Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Bhanti
1968 GKU

Sarasvati Foundation Chennai and eGangotri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

113541

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPILED

भारती

संस्कृतमासिकस्य

पश्चिमराष्ट्रेष्वपि यो, भारतमहिमानमाघोषत् ।
स्वामिविवेकानन्दो गुणैरमन्दोदयो जयति ॥

Stock Verification-2024

वर्षम् १८

वार्षिकमूल्यं सप्तमुद्राः

एकप्रतेः सप्ततिपणाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठ संख्या
१.	मङ्गलम्	आशुकवि श्रीहरिशास्त्री, सम्पादकः	१०३
२.	श्री जगद्गुरु सम्मान समारोहः	मधुः	१०४
३.	स्वागतगीतिः	श्रीराधाकृष्ण र्मा साहित्याचार्यः जयपुरम्	१०५
४.	स्वागतपद्यानि	मधुपः सहसम्पादकः	१०६
५.	गजयुद्धम्	श्रीगणेशरामशर्मा डूंगरपुरम्	१०७
६.	करौलीवर्णनम्	पं० श्रीकन्हैयालाल शर्मा जयपुरम्	१११
७.	विचारणीयाः प्रश्नाः	श्रीकृष्णदत्तशर्मा शास्त्री बी. ए. आगरा	११३
८.	श्रीमदानन्दसागरसूरीश्वराः	श्रीरुद्रदेवत्रिपाठी, मन्दसौरः	११५
९.	विशेषणविभक्त्यर्थ-विचारः	श्रीविश्वनाथमिश्रः, बीकानेरः	११७
१०.	श्रीशिवराज्योदये महाकाव्ये २६ सर्ग	डॉ० श्रीधरभास्करवर्णेकरः, नागपुरम्	१२१
११.	वेदाध्ययने नाधिकारः	श्रीबद्रीप्रसादशास्त्री, पपुरना	१२३
१२.	महाराणा अमरसिंह	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	१२८
१३.	सम्पादकीयम्	श्रीहरिशास्त्री, सम्पादकः	१३१
१४.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	१३३
१५.	मनोविनोदः	मधुपः, सहसम्पादकः	१४१
१६.	सूक्तिसुधा	आशुकविः श्रीहरिशास्त्री सम्पादकः	१४५
१७.	अपील	श्रीशिवचरणमाथुरः शिक्षामंत्री, राजस्थानं	१४६

WITH THE COMPLIMENTS OF

HM
HINDUSTAN MOTORS

HINDUSTAN MOTORS LIMITED, CALCUTTA
INDIA'S LARGEST AUTOMOBILE MANUFACTURERS

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
113541
COMPILED

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

भारती

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १८ | माघमासः, विक्रमाब्दः २०२४ (फरवरी १९६८) | अङ्कः ४

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री

यस्याः प्रकाश (मवलम्ब्य) मुपगत्य युधिष्ठिरो द्राग्
अज्ञातवासपथिको हि विराणनरेशम् ।
सम्मोहयन् स्वसफलत्वमियाय सा दृक्-(१)
सौदामनी स्फुरतु मय्यसिताभ्रिकायाः ॥

मासावतारः

निशि प्रसुप्ता महिला नराश्च
सूर्योदयानन्तरमप्यहो हो ।
तूलाम्बरेभ्यो न बहिर्भवन्ति,
यत्रैष माघः समुपागतोऽस्ति ॥

(१) असिताभ्रिका, श्यामला, अभ्रिका बार्दली, कालमेघस्वरूपिणी, काली पराम्बा भगवतीत्यर्थः ।

वर्षम्
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीजगद्गुरुसम्मानसमारोहः

गोसेवासम्मेलनस्य अवसरेऽत्र समायाता **जगद्गुरु-शङ्कराचार्य-श्रीनिरञ्जनदेवतीर्थ-पादा** नवम्बरमासस्य २८ तारिकायां प्रातः महाराज-संस्कृत-कालेजमपि स्वपादार्पणेनापाविषुः।

तदानीं वैदिकमङ्गलाचरणानन्तरं स्वागत-गीति-पद्यानां पाठो जातः। ततश्च कालेजाध्यक्ष-श्रीगोविन्दनारायणनैयायिकमहोदयैः श्रीशङ्कराचार्याणां कृते पुष्पमालासमर्पणपुरस्सरं कालेजस्याध्यापकानां छात्राणाञ्च विषये वर्तमानकालिकः परिचयो दत्तः।

ततश्च संस्कृतभाषां तथा संस्कृतज्ञान् प्रति शुभाशिषः प्रयच्छद्भिः श्रीशङ्कराचार्यैः छात्राणां वर्तमानामुपास्थितिं परिज्ञाय सन्तोषः प्रकटितः, सहैव च कतिचन पूर्वपण्डिता राजसेवातो विश्रान्तिं गृहीतवन्तः—इतिवृत्तमुपलभ्य च मनाक् चिन्तापि प्रदर्शिता।

अग्रे च श्रीजगद्गुरुभर्भणितं यत् सम्प्रति संस्कृतमिदं नापि जीवति, नापि मृतम्, अपि तु श्वसिति, अर्थात् कतिचित् श्वासान् परिगृह्णाति, संस्कृताध्येतॄणां च कृते पुरा नियमोऽयमासीयत् 'सुखार्थिनः कुतो विद्या०.....,, इत्यादि। तथा च—

'अहेरिव जनाद्भीतो मिष्टान्नाच्च विषादिव।
राक्षसीभ्य इव स्त्रीभ्यः स विद्यातत्त्वमर्हति॥'इति।

परमार्थतः सर्वत एव च संस्कृतभाषायाः प्रचारोऽपि सम्प्रति न भवति। बहुत्र विलोक्यते यत् संस्कृतं नोच्चारयितुं बोद्धुं वा समर्था भवन्ति जनाः। अत एव संस्कृतस्य प्रचारो न भवति। यथांग्लशिक्षिता आंग्लभाषां भाषन्ते, बुध्यन्ति च, न तथा संस्कृतसेविनः संस्कृतम्—इति दुःखास्पदमिदम्। एवं रीत्या तु शनैः शनैर्भारतीयसंस्कृतेरपि लोपो भविष्यति। आधिक्येन च पाश्चात्यशिक्षायाः स्वरूपमेवानुकुर्वन्ति लोके लोकाः प्रायः। उपविश्यैव वा छात्रेण कथमध्येतव्यम्? छात्रैश्च कीदृशैर्भाव्यम्?। सैषा परम्परापि सम्प्रति समुच्छिन्ना वर्तते जायमाना। एतावता च प्राचीनपरम्परायाः संरक्षणमपि सुदुर्लभं भविष्यति। व्याकरण-न्यायादीन्येतानि शास्त्राण्यस्माकं तपःसाहाय्येनैव ज्ञातुं शक्यन्ते। एवमेव वेदान्तदर्शनशास्त्राणां गभीरस्य पाण्डित्यस्य प्राप्तयेऽपि भगवतः शङ्करस्योपासना विद्यार्थिभिः कर्तव्या।

किञ्च यथा पुरा श्रीकृष्णेन गुरोर्गृहे काष्ठाहरणादिकं कार्यं कृतम्—इत्येवंरूपा सेवापि कर्तव्या भवति छात्रैः। प्राचीना खलु परम्परा सेयमासीत् यत् छात्रं गुरुगृहे गन्तव्यं भवति स्म। अत एव भगवान् श्रीकृष्णोऽपि गुरुगृहं स्व[illegible] गतवान्। इदानीं सा परम्परा नास्ति [illegible] सम्प्रति पाठनाय गच्छन्ति। अतः संस्कृतस्याभिवृद्धये संस्कृतज्ञैः तस्याः प्राचीनपरम्पराः संरक्षणाय प्रयत्नो विधेयस्तथा शास्त्रीयं प्रखरं पाण्डित्यमवाप्तुञ्च। अन्ते च शङ्कराचार्यमहाराजाय सर्वैरपि विद्वद्भिः पुष्पमालाः समर्प्यन्त[illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वागतगीतिः

श्रीराधाकृष्णशर्मा, साहित्याचार्यः, म० सं० कालेजः, जयपुरम्

स्वागतं क्रियतेऽद्य धर्माचार्यवर्याणां वरम् ।
पूज्यपादजगद्गुरूणामथ पवित्राणां परम् ॥ १ ॥

यो निरञ्जनब्रह्मभासा भासतेऽथ निरीहतां
मनसि संलभतेऽत एव निरञ्जनोऽयं गीयताम् ॥ २ ॥

दिव्यदीप्त्या दीप्यते देवो न कथमभिधीयताम् ।
जगति जंगमतीर्थरूपतया जनैरयमुच्यताम् ॥ ३ ॥

निगमपानीयं परं स्नानीयमनिशं जायताम् ।
छन्दोगन्धः स्मृतिगणोऽक्षतनिकर एव निभाल्यताम् ॥ ४ ॥

विविधशिक्षा धूप इव ग्रहशास्त्रदीपो दीप्यताम् ।
शाब्दनैवेद्यं सरससाहित्यफलमास्वाद्यताम् ॥ ५ ॥

भक्तिश्रद्धाशुद्धपुष्पाञ्जलिरयं ह्यनुभूयताम् ।
नतिरिहैव परानतिस्ते चरणयोः संभायताम् ॥ ६ ॥

मानसीपूजां गृहीत्वा भवद्भिर्ह्यनुगृह्यताम् ।
ते पदार्पणमत्र भगवन् ? भूतये संजायताम् ॥ ७ ॥

सुरभिरक्षाव्रतनिरत महसा सदैव महीयताम् ।
सुरभिसुरभितजनमनोजागर्तिबलमाधीयताम् ॥ ८ ॥

धर्मवर्मवृतात्मनां श्रीशंकराचार्यात्मनाम् ।
जगद्वन्द्यपदारविन्दानां मनोज्ञानां सताम् ॥ ९ ॥

काव्यकलितसुभक्तिश्रद्धाञ्चितसुमैरभिवन्दनम् ।
परमदिव्यानामिदं सौवागतिकमभिनन्दनम् ॥ १० ॥

स्वागतं विदधामहे किमु धीमतां भवतां मतम् ।
दीपभासा ख्याप्यतेऽखिलभुवनदीपोऽसौ कथम् ॥ ११ ॥

वर्षम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वागत-पद्यानि

दीना हीनदशाश्च लोकजलधावाकण्ठमग्ना वयं
स्वात्माराम ! परार्थमुद्यमपर !! श्रीशङ्कराचार्य ते
सर्वेषां जगतां गुरोर्भगवतो भक्तिप्रियस्याधुना
कैः शब्दैर्विधिना च केन मतिमन् ! कुर्याम सुस्वागतम् ॥

संस्पृष्टाः सततं विवेकविकला ये क्लेशकर्मादिभिः,
क्लिश्यन्ते परतन्त्रतामुपगताः कर्तव्यशून्याश्च ये ।
सर्वेषामपि सन्ततं तनुभृतां तेषां हितार्थं तथा,
कल्याणाय जगद्गुरो भवतु ते भव्या सदा भारती ॥

श्रीमज्जगद्गुरु-निरञ्जनदेवतीर्थाः

श्रीस्वामिनः सदसि येऽत्र विराजमानाः ।
तेषां तपःपरमपूतसुमानसानां
सुस्वागतं खलु वयं हृदयेन कुर्मः ॥

दीनोऽनाथो जनोऽहं ते माहात्म्यं वक्तुमप्रभुः ।
भक्त्या केवलया नौमि श्रीमच्चरणपङ्कजे ॥

विनीतो
दीनानाथत्रिवेदी मधुपः
सहसम्पादकः

गिरने से पहले उनकी रक्षा करें

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय ? इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तैल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल घने तथा लम्बे और आपके दाँत चमकीले तथा मजबूत रहेंगे।

इलाज से बचाव बेहतर है !

आयुर्वेद सेवाश्रम प्रकाशन लिमिटेड [illegible]

गाय
छाप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—❀ गजयुद्धम् ❀—

ले० विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम् (राज०)

नगरस्य दक्षिणदिग्भागे पक्वणप्राया हस्तिपकानां वसतिर्वर्तमानास्ते। तां वसतिमनु संगतं सघनं वटवृक्षवनं विद्यते यत्र हस्तिपकाः प्रतिदिनं गजाँश्चारयितुं व्रजन्ति। वसतावत्र हस्तिपकाः सकुटुम्बपरिवाराश्चिरान्निवसन्ति, यतस्ते सर्वे परम्परातो हस्तिकुलानां परिपालनाद्राजाश्रयवशादेव स्वजीविकामुपलभन्ते। अत्र वसतौ राज्यस्याङ्गभूताः क्षात्रशासकैः परिपालिताः शताधिका गजाः करिणी-कलभसहितास्तैरेतैर्हस्तिपकैः संसेव्यमाना वर्तन्ते। केचन हस्तिनोऽत्र शासक कुलस्य वाहनोचिताः केचन मृगयोपयोगिनोऽन्ये भारवाहास्तथा परे राजकीयेष्वन्यान्येषु कर्मकलापेषूपयुक्ताः सन्ति। केचिद्धस्तिपरिवृढा युद्धोपयोगित्वेनात्र गजकुलेऽभ्यन्तरीकृताः सन्तिष्ठन्ते। केऽपि बलवीर्यशक्तिशालिनो वरवारणाः केवलं तत्कुलवृद्धय एव संरक्षिता मदोन्मदा दुर्धर्षाश्चात्र संवर्ध्यन्ते। अन्ये गजाः सुलक्षणाः शरीराकृतिगतिभङ्गीरूपगुणसौष्ठवमनोहरा दर्शनीयतया शोभायात्रोपयोगित्वेनात्र संरक्षण लभमाना विराजन्ते। काश्चन शीलस्वभावविनीताः सौम्याः सौम्यदर्शनाश्च करिण्यो राजकुटुम्बस्य महिषीवधूजनकुमारबालकादीनां वाहनत्वेनोपकल्पिताः सावधानमहरहो विनीयमानाश्चात्र परिपोष्यन्ते। केचित् कमनीयकलाकृतयश्चञ्चलचेष्टाः कलभाश्चात्र गजकुले बाललीला वितन्वाना इवपथमुपयान्ति। अपरे महागजास्तु केचनातीवोत्कटबलशालिनो भीषणाकाराः प्रोत्तुङ्गगण्डस्थलाः कज्जलपर्वतशिखरोपमकृष्णवर्णदीर्घदेहाः प्रलम्बदन्ता निसर्गतो दुःस्वभावा निर्दया युद्धप्रिया गजकुलस्य तस्य नायकत्वमिव भजन्ते। केचनाखेटकर्मणि प्रशिक्षिताः सिंहकुलविद्वेषिणो दुर्धर्षा भीषयन्तो जनाँस्तत्पालकाँश्चापि यदाकदा खेदखिन्नान् विदधानाः सर्वदैव सावधानं परिपालनीया वर्तन्तेऽत्र। अन्ये क्षुद्रप्रकृतयो दुर्मदाकुला स्तथाविधाश्चापि विद्यन्तेऽत्र गजा ये स्वयूथाद्दूरमेकान्तप्रिया निवासस्थानात्तस्माद्वनान्तर्भागाद्वा प्रपलायन्ते, यथेच्छमाहारविहारपरायणाः स्वच्छन्दं स्वेच्छाचारं चाचरन्तो विलोक्यन्ते। इत्थंविधा दुष्टगजा यदा कदा मदोन्मत्ताः सन्तो हस्तिपालकानां तेषामङ्कुशमर्यादामतिलङ्घमाना विद्रोहमाचरन्तोऽपि न मनागपि विरमन्ति। इत्थंविधैरुत्प्लुतै र्वारणविशेषैरकाण्डताण्डवं विद्रोहे कृते तत्र वसतौ वने नगरे च सर्वत्र भीषणा परिस्थितिर्विजृम्भते, हाहाकारश्च प्रवर्तते, विध्वंसलीला दुर्दश्यानि चोपतिष्ठन्ते।

अथ च त इमे हस्तिपका नित्यमेव हि प्रातः सूर्योदयसमये तदिदं हस्तियूथं नीत्वा तद्वटवृक्षवनं प्रविश्य दूरं गच्छन्ति, तत्र च गजाँश्चारयन्ति, सरोवरे ताञ्जलं पाययन्ति, स्नापयन्ति सायङ्कालपर्यन्तं स्थानात्स्थानमाहिण्ड्यमाना रजनोमुखेऽरण्यात्तस्मात् पुनर्वसतिं प्रति निवर्तन्ते। स एष दैनन्दिनः क्रमस्तेषां सर्वेषां हस्तिपालकानाम्।

तेषां हस्तिपानामेतेषां सर्वेषां कुटुम्बाः परम्परया राजाश्रयादेव स्वजीविका वृत्तिमुपार्जयन्तो जीवननिर्वाहं कुर्वते। गजपालानामेषां कानिचित् कुलानि सन्ति। अमीषां ज्ञातौ प्रधानकुलस्य सदस्यानां जीविकार्थम् राज्यशासकैर्दशसहस्रमुद्रात्मिका वृत्तिरुपकल्पितास्ते, वर्षासनं, भूमिका च प्रदत्तास्ति। केभ्यश्चित् परिवारेभ्यः सप्तसहस्रमुद्राणामन्येभ्यः पञ्चसहस्र-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्राणामपरेभ्यो द्विसहस्ररूप्यकाणां च जीविका वृत्तिः कृषियोग्या प्रकीर्ण भूमिश्चापि विसृष्टास्ते। राजकीयानां गजानां पालनं पोषणं संरक्षणं च यथावसरं राजसेवासु तन्नियोजनमेवैतेषां गजपालानां मुख्यं कर्तव्यं पारम्पर्यक्रमागतं विद्यते। राज्येऽस्मिन् यदा यदा माङ्गलिका महोत्सवा विवाहादयः प्रसङ्गा वा सम्पद्यन्ते, तदा तदा त एते हस्तिपा राजाज्ञामुपलभ्य राजप्रसादाङ्गणमुपतिष्ठन्ते, समाप्तेषु च मङ्गलोत्सवोद्यापनेषु पुनस्तत्र पक्कणवसतिं प्रत्यावर्तन्ते। होलिका—दीपावली–विजयादशमी–जन्मग्रन्थिप्रभृतिमहोत्सवावसरेषु तेषां गजपालानां कर्तव्यनियोगो गुणप्रदर्शनावसरः कार्यगौरवं चावश्यकर्तव्यताकानि भवन्ति। प्रकरणेष्वेवं विधेषु राजशासनाज्ञा भवति, गजपालानां प्रधानपुरुषो विज्ञाप्यते, स च कार्यगौरवानुरूपं गजान् करिणीश्च तद्रक्षकांश्च गजपालान्नियुङ्क्ते। सर्वेऽपि च ते गजपालकुलानां सदस्याः स्वज्ञातेः प्रधानपुरुषस्याज्ञामनुल्लङ्घनीयां प्राणपणेनापि परिपालनीयां सर्वात्मना सर्वतोभावेन च वज्ररेखामिव मत्वा तामनुतिष्ठन्ते।

अथेमे हस्तिजीवा बाल्यात्प्रभृत्येव स्वबालकान् गजपरिपालनं शिक्षयन्ति, हस्त्यश्वशास्त्रोक्ताः सर्वाः शिक्षाश्च तेभ्यः सप्रयत्नं ग्राहयन्ति। ते च बालका यदा बाल्यमतिक्रम्य युवानो भवन्ति तदा व्यायामाचरणैः परिपुष्टसर्वावयवा वज्रसुदृढदेहाः साहसिका वीराः शस्त्रास्त्रविद्याप्रवीणा दुष्कराणि कार्याण्यपि च लीलया सम्पादयन्तो महामल्लकल्पा दुर्धर्षा बलवीर्यशालिनश्च निष्पद्यन्ते। केचन तरुणा गजपाला व्यायामपरिपुष्टां देहसम्पत्तिं सबलां सक्षमां च दधतो विग्रहवन्तो वीररसा इव कार्ष्णायसनिर्मिताः करिकलभा इव दरीदृश्यन्ते। यदा चोत्कटमदा वारणाः खल्वौद्धत्यं भजन्ते, तदा त इमे गजपालकानां युवका वने वा वसतौ वा जलाशयेषु पर्वतेषु वा स्थानात् स्थानान्तरमाहिण्ड्यमानास्तन्नियमनं विदधति। केचिद्दुष्टा गजास्तु यदा कदा मदोन्मत्ताः सन्तो भल्लैरङ्कुशैर्लोहकण्टकैरपविद्धाः प्रयत्नानां शतैर्नियन्त्रिताश्चापि स्वस्यौद्धत्यं न परित्यजन्ति, न च गजपालयूनां वशमायान्ति, वरञ्च प्राणान्तं वैरभावमात्मनि दधतस्तान् रक्षकानेव हिंस्यकत्वेनापघ्नन्ति। परिणामतः केचन हस्तिपास्तु विप्रकृतैर्गजेन्द्रैरपहताः संकटमापन्नाः स्वप्राणानपि विमुच्य मृत्योर्मुखं प्रविश्याकालकवलिता भवन्ति। इत्थंविधैर्व्यतिकरैः केचनाधोरणा गजैस्ताडिता मर्दितदेहा भग्नशरीरा विकलाङ्गाः सन्तः कष्टमयं जीवनमपक्षपयितुं विवशाश्च भवन्ति। तथाविधानां संयोगात् कष्टां दशां गतानां पालनं, संरक्षणं, चिकित्सौषधिदानादिकं सर्वं तेषामाश्रयभूतः स्वामी राजा करुणापूर्णभावैर्विधत्ते। तस्मादेवैते गजपालानां ज्ञातयः स्वपालकस्याश्रयं न मुञ्चन्ति, नैव मुञ्चन्ति।

अद्य तावन्मध्याह्नोत्तरं राजप्रसादप्राङ्गणे गजयुद्धं भावीति राजादेशः सडिण्डिमघोषमधिनगरमुपनगरं च सर्वतोऽघोष्यत। गजपालानां वसतावत्र प्रातःकालादेव महान् कलकलो व्यातेने। वसतौ यत्र तत्र सर्वत्र काचिद्गम्भीरा परिस्थितिव्याप्तास्ते। प्राणावरोधकरमिव स्तब्धं जडप्रायं सशङ्कनिबिडतरं च वातावरणं प्रावर्तिष्ट सर्वतः। हस्तिपकानां प्रधानेनाधिकारिणा कुलवृद्धेन पुरुषेण राजाज्ञासन्दर्भपूर्वकं केचन युवान आदिष्टा यत्तेऽद्यतनं गजयुद्धसंयोजनसञ्चालनरूपं महदुत्तरदायित्वपूर्णं दुष्करं च कार्यं सावधानं स्फूर्तिस्फारं सकौशलं च निर्विघ्नं यथा स्यात्तथा सचेतस्त्वेन सम्पादयन्त्विति। अत्रैकस्य गृहस्याङ्गणे केचन हस्तिपाला निषण्णाः सन्ति, ते च गजयुद्धसम्पादनस्योपक्रमं कुर्वाणाः सन्ति। एकतो महाकायो गजः कज्जलपर्वताकारः सर्वतो लोह-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रृण्खलाभिर्दृढतररज्जुभिश्च निबद्धस्तिष्ठति। तत्सम्मुखे हरितकोमलतृणानां चयाः इक्षुदण्डानां सम्भाराः श्रीफलानां राशयस्तथान्ये चापि तथा विधानां गजभोग्यानां पदार्थानां समूहा विकीर्णा वर्तन्ते। स खलु महाकायो हृष्टपुष्टसर्वावयवो दन्ती तान् पदार्थान् यथेच्छं भुञ्जानो मध्ये मध्ये पादाघातैः शिरोधूननैश्चेष्टाभिश्च ताभिस्ताभिर्बन्धनान्मुक्तो भवितुमिव प्रयतते। युवानो हस्तिपास्तमित्थं चेष्टमान विलोक्य यष्टिभिर्वंशाग्रप्रोतैस्तोत्रशल्यैरङ्कुशैर्भल्लादिभिश्च नियन्तुं सक्रिया विद्यन्ते। अनुभवशालिनः कुलवृद्धा गजपालमुख्यास्तं महागजं गण्डस्थले तैलाभ्यङ्गं कृत्वा तद्भालपट्टमारभ्य शुण्डादण्डपर्यन्तं सिन्दूरकुङ्कुमपिष्टातकादिभिर्नानावर्णैर्माङ्गलिकैर्द्रव्यैः श्रृंगारयन्ति। कश्चनैको हस्तिपो गजस्य तस्य पृष्ठभागे रज्जुभिः पाशमतीव सुदृढं ग्रथयंस्तथा प्रयतमानोऽस्ति यथा युद्धसमयेऽन्येन प्रतिद्वन्द्विना महागजेनाक्रमणे कृते सति तस्य गजस्य, तदारूढस्य तत्सञ्चालकस्य च रक्षोपायाः सम्भवेयुः। वृद्धा जनाः प्रत्येकं ग्रन्थिं पाशं च निपुणं निरीक्षन्ते त्रुटोश्च संशोधयन्ति येन मध्येयुद्धं तत्पाशबन्धनं शिथिलं न स्याद्विघ्नबाधाश्च न भवेयुरिति। अपि चैकः कुलवृद्धो गजपालो वंशनलिकामापूर्य मन्त्रोच्चारपूर्वकं 'गजसुरा' इतिनामकं मादकौषधं तं गजमपाययत्। एवं क्रमेण श्रृङ्गारसज्जाभिरलङ्कृतः स वारणकुलसम्राडिव योद्धा गजराजो युद्धार्थं समुद्यतो विहितस्तैः सर्वैः। अन्ते तं प्रणम्य प्रदक्षिणीकृत्य चान्यकर्मसु व्यापृतास्ते सर्वे।

अथ प्रकृत्यैवोद्धतस्वभावः करिणीकुलनायकः स गजपरिवृढोऽधुना क्रमशो मदवेगप्रभावाच्छनैः शनैश्चाञ्चल्यमञ्चन्वर्तते। तेन च तत्राहारार्थं पुरतो निक्षिप्ता इक्षुदण्डानां भारा नारिकेलफलानां चयास्तथान्यान्ये सर्वेऽपि च भोग्यपदार्थाः स्वोदरस्थान् कृत्वा निःशेषतां नीताः। ततः स गजपुङ्गवः स्वसमीपस्थानाम् वृक्षाणां शाखाः सपल्लवा विच्छिद्य काश्चनाभक्षयत्काश्चिदितस्ततोऽर्धजग्धा व्यकिरत्। स खलु पाषाणनिर्मिताज्जलकुण्डाच्छुण्डादण्डेन जलमापूर्य यत्र तत्र फूत्कर्तुमारेभे। भूमौ पतितोच्चारादीन्नीत्वा यत्र तत्र प्रचिक्षेप। शुण्डादण्डाग्रं वारं वारं पृथिव्यामास्फोटयामास। एवंविधेभ्य उद्दण्डचेष्टाशतेभ्यस्तं वारयितुं यः कोऽपि हस्तिपस्तन्नियन्त्रयितुं प्रयतते तं तृणायेवापदार्थं तुच्छं च मन्यमानोऽन्तर्मदाविष्टो भेदिन्या दृशा घूर्णयन् पूर्वतोऽप्यधिकमुद्दण्डतामाचचार। इत्थं पश्यतामेव सर्वेषां तेषां गजपालकानाम् स वारणो मदमत्तो बभूव। तस्य नेत्राभ्यां कुक्षिभ्यां गण्डस्थलाच्च मदरेखाः प्रस्रवितुमारेभिरे। तदानीं तत्स्वरूपं भीषणरमणीयाकृतिरौद्रं प्रचण्डं दुर्दमनीयमिव समभूत्।

तावदेव केनचिद्राजदूतेन तत्रागत्योक्तम्—'राज्ञो वरिष्ठाधिकारिण आज्ञापयन्ति यदिदानीं युष्माकमस्य गजराजस्य राजप्रासादाङ्गणे विरचितां युद्धरङ्गस्थलीं प्रापयितुं सयत्ना भवत। तत्रत्यायां गजशालायामन्यो मदोत्कटो वारणश्चापि तमेतं प्रतीक्षमाणो योद्धुं सन्नद्धस्तिष्ठति। मा भूदिदानीं विलम्बः समयातिक्रमश्च। महाराजमहोदयस्य तत्र गजयुद्धोत्सवे समागमनस्य समयोऽपि च नाति दूरः।'

गजपालमुख्यो विनयेन निवेदयामास—'राजाज्ञा प्रमाणम्। अधुनैव वयं समाप्तकृत्याः स्मः। गजपरिवृढोऽसौ शीघ्रमेव हि प्रासादाङ्गणरङ्गस्थले युद्धाय प्राप्यते।'

एवमावेद्य स वृद्धो हस्तिपः स्ववंश्याञ्जनान् बभाषे घनगम्भीरघोषया गिरा—

'अये, प्रियाः पुत्रकाः! किमिति विलम्ब्यते? अतिवर्तते समयः। गुणप्रदर्शनस्य पुरस्कार-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्तेश्चासावनुत्तमोऽवसरः सफलो विधीयताम्भोः ! त्वर्यताम् !! त्वर्यताम् !!!'

अथात्रेदं हस्तिपानां वसतौ तद् गृहाङ्गणं वर्तते । द्वौ युवानौ महामल्लकल्पौ प्रचण्डबलशालिनौ व्यायामपुष्टसुदृढदेहबन्धौ कृततैलाभ्यङ्गौ सद्यः स्नातौ भालपट्टे कृततिलकौ 'अस्माकमसौ गजराजोऽद्यावश्यमेव हि परपक्षं गजं पराजित्य विजयं लप्स्यते ।' इति मनसि कृतध्रुवनिश्चयौ बद्धपरिकरावतीवोत्साहसम्पन्नौ हस्त्यश्वशास्त्रे व्युत्पन्नौ पाशाङ्कुशभल्लदण्डादिनानायुधसहितौ गजस्य तस्य युयुत्सोर्नियन्त्रणार्थं सञ्चालनार्थं च नियुक्तौ तत्रागत्योपस्थितौ । आदौ कुलवृद्धस्य ततोऽन्येषां सर्वेषां हस्तिपानां पादाभिवन्दनं चक्रतुः । 'चिरञ्जीवतं वत्सौ, विजयश्रियं च विन्देथाम्, भगवान् भूतभावनो गजराजं युवां च रक्षतात् ।' इति स्वाशिषा तौ सर्वे ते समायोजयन् । ततस्तौ द्वावपि गृहं प्रविश्य स्वकुलदेवतां मातरं सर्वान् कौटुम्बिकान् पूज्यजनांश्च ववन्दाते । पुनर्द्वारदेशं प्राप्तयोस्तयोर्भालपट्टे कुङ्कुमकेशरादिभिर्माङ्गलिकैर्द्रव्यैस्तिलकमङ्गलं विधाय गले पुष्पमालां समर्प्य नीराजना व्यधीयत वधूजनैः कुमारिकाभिश्च । ततस्तेन कुलवृद्धेन हस्तिपानां प्रधानपुरुषेण गजकुलदेवीमिन्द्रं च संस्मृत्य संस्मृत्योपांशु मन्त्रजपं कृत्वा स्वाङ्के सुविशालाकारं मृदङ्गवाद्यमादाय गम्भीरघनध्वनिघोषैस्तालसाधनं कुर्वता तौ तरुणमल्लौ गजमारोढुं सङ्केतेनाज्ञापितौ ।

तत्कालमेव तावेतौ युवानौ वायुवेगेनेवोल्लम्फ्य गजराजमारुरुहतुः । एको गजस्य शुण्डादण्डमालम्ब्य कुम्भस्थलमन्यश्च रज्जुसूत्रितं पाशं गृहीत्वा पृष्ठभागं निषसाद । अन्ये सर्वे तत्रोपस्थिता आधोरणास्तं गजराजं सर्वतो रज्जुशृङ्खलादिबन्धनेभ्योनिर्मुक्तं कृत्वा भल्लाङ्कुशदण्डादीन्यायुधानि गृहीत्वा गजराजस्य वामदक्षिणपक्षावाश्रित्य स्थिताः केचन वारणराजस्य तस्य पृष्ठतः सावधानं जागरूकं च सव्यूहबन्धं स्थितवन्तः । ततस्तौ युवानौ ते च सर्वे हस्तिपा गजसञ्चालनस्य साङ्केतिकीं भाषां ब्रुवाणास्तं मदोन्मत्तं महागजं राजमार्गे गतिशीलं कर्तुं प्रायस्यन् ।

अथासौ योधनो वारणराजो मार्गे पदानि निदधानो मन्दं मन्दं गतिशीलो भवति, परन्तु स मदमत्तारुणलोचनो घूर्णयन्नितस्ततो मदकलं दृक्पातं कुर्वाणो दर्पाद्धृष्टतामवलम्बमानो यथेच्छं स्वच्छन्दं च किमपि विचित्रमेवाभूतपूर्वं चेष्टमानः क्षणं पदमेकं द्वे वा पदे चलति, क्षणं पथि पदमारोप्य स्तब्धो जड इवाचलः सुस्थिरं तिष्ठति, क्षणं दुराग्रहग्रहिलो भवति, क्षणं प्रतिनिविष्टचेताः शठ इव हठमारति, क्षणं शुण्डादण्डमाकाशे प्रोत्थाप्य फूत्कारान् कुरुते, क्षणं चिक्कुरोति, क्षणक्षणविलक्षणमौद्धत्यमाविष्करोति, क्षणमुच्छृङ्खलतां गतो मदमत्ततामात्मनः परिचाययति क्षणं पार्श्वतः परिवृत्य स्वालानं गन्तुं व्यवस्यति परन्तु सर्वतो हस्तिपैरायुधाघातैर्हन्यमानः कष्टेन महता मार्गस्थो भवति । यद्यपि तमारूढौ युवानौ तत्सहचरा हस्तिपालकाश्च सर्वे तं नियन्तुं नानाविधिभिर्निर्दयमतिकठोरं च बहु चेष्टन्ते तथाप्यसौ मदविह्वलो गजराजः पूर्वतोऽप्यधिकमुत्तरोत्तरमौद्धत्यमातन्वानो हिंस्यको दुष्ट इवात्मनो मदमत्ततामाचरन् सन्तिष्ठते ।

महागजस्यास्य तानितानि दुर्लीलाविलसितानि क्षणादेव नगरोपनगरवसतिविस्तारेषु स्वमाहात्म्यमहिम्ना जनरवपरम्पराभिः प्रसेरुः तदिदं गजराजचेष्टितं श्रावं श्रावं नागरिका ग्रामीणाश्च जनास्तत्सर्वं द्रष्टुकामास्तद्दिदृशि बद्धलक्ष्या धावन्ति । विशेषतो बालकाः किशोरवयसः कौतुकपरवशाः कोलाहलं कुर्वाणास्तत्र गत्वा गजं तं सर्वतः परिपश्यन्तः सन्तिष्ठन्ते । [क्रमशः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करौली-वर्णनम्

पं० श्रीकन्हैयालालशर्मा, महाराजसंस्कृतकालेजः, जयपुरम्

कालिन्दजा क्षालयतीव पादम्, तीरे स्थितानां द्रुमवल्लरीणाम् ।
व्रजेन्द्रभूमौ व्रज-सुन्दरीणाम्, भद्रावतीयं पुरसुन्दरीणाम् ॥१॥

भद्रावतीयं कुरुते सदम्भः साहाय्यमन्यत्पुरनागराणाम् ।
कूपा हि तद्दुर्धरमात्राः क्षाराम्बुतः सार्थवतो बभूवुः ॥२॥

क्षारं हि नीरं प्रविलोक्य पुर्याम् माधुर्यपूर्णं सरिदम्बु धात्रा ।
लावण्यलाभाय व्यधायि पूर्वम् माधुर्यलब्ध्यै विहितं परं स्यात् ॥३॥

कंसद्विषः सार्थमपेक्ष्य भक्तैः ग्राम्यैः परित्यज्य मधोर्वनं पुरा ।
गोपालगोलोकविहारशीलैः व्यधायि वासस्तटिनीतटेऽत्र ॥४॥

रम्योऽत्रलोकः, भवनानि पुर्यां कलां दधुः वासववासभूमेः ।
गव्यञ्च मिष्टं दधि माक्षिकञ्च हरेः प्रसादात् सुलभानि नूनम् ॥५॥

आनन्दकन्दः, व्रजभूमिचन्द्रः, सम्मोहनः श्रीमदनस्य मोहनः ।
वृन्दावनं चैवममु विलोक्य, चक्रेऽत्र वासं शिखिखण्डमौलिः ॥६॥

पक्षच्छिदा पूर्वमकारि कृत्यं, द्विषां विघाताय हि पक्षनाशम् ।
कर्तुं प्रतीकारमिवेह लोके, तैर्निर्मिता पूरमरावतीव ॥७॥

यतो यतो निष्पततीह दृष्टिः गृहाणि रम्याणि च धर्मशालाः ।
देवालयाः श्रीशिवमन्दिराणि सर्वत्र संवीक्ष्य प्रमोदतेऽन्तः ॥८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिवार के सब बेहद खुश !

इस देश के पेड़-पौधों से व आयुर्वेदिक तौर पर बने साधना दशन के नियमित इस्तेमाल से मुँह की दुर्गन्ध और दाँतों की सब बीमारी जाती रहती है। दाँतों की 'एनामेल' काफी दृढ़, दाँत स्वस्थ, मजबूत और जगमग सफेद होते हैं...चेहरे पर खूबसूरत हँसी झाँकने लगती है। इसीलिये हम सब एक आश्चर्यजनक दंत मंजन ही इस्तेमाल

साधना दशन

करते हैं।

साधना औषधालय — ढाका
३६, साधना औषधालय रोड
साधना नगर, कलकत्ता-४८

प्रख्यात डा० योगेश चन्द्र घोष, एम-ए, आयुर्वेद-शास्त्री, एफ. सी. एस (लंदन), एम. सी. एस. (अमेरिका), भागलपुर कालेज के रसायन शास्त्र के भूतपूर्व अध्यापक।
कलकत्ता केन्द्र : डा० नरेश चन्द्र घोष, एम-बी, बी-एस, आयुर्वेद आचार्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—:० विचारणीयाः प्रश्नाः:०—

ले० श्रीकृष्णदत्तशर्मा शास्त्री, बी. ए., आगरा

प्रकृतिरियम्मनुष्यांणां यत्ते सर्वप्रियाः, सर्वेषामेव नयनानां कनीनिकाः भवितुमिच्छन्ति। परञ्च ते न विदन्ति तानि कानि कारणानि सन्ति यानि पुरुषं 'सर्वप्रियः, इति कुर्वन्ति। अस्मास्वनेके वर्तन्ते य आत्मनः 'भद्रपुरुषाः' विशिष्टास्तथा विद्वांसः इति मन्यन्ते। परञ्च नास्तोदम् सत्यम्। यद्यपि ते पुरुषैरनेकैः सेविताः भवेयुः परञ्च न सन्ति ते तादृशाः। अनिच्छन्तोऽपि पुरुषाः स्वार्थसिद्धये तानुपगच्छन्ति।

मया परीक्षणार्थं निम्नलिखिता केचित् प्रश्ना दत्ताः, यद्यपि ते हिन्दीभाषायाः अनूदिताः, तदापि मनोविनोदायैव सन्ति। तेषामुत्तराणि भवद्भिरेव दातव्यानि। यदि भवद्भिरंकाः १५० लब्धाः तदा तु भवन्तः 'सर्वप्रियाः' भवितुं क्षमाः।

प्रश्ना निम्नलिखिताः सन्ति—

१. किं भवान् दृढ़प्रतिज्ञः, वचनपालकः, विश्वसनीयश्च ? ५

२. आग्रही तु नास्ति भवान् ? ४

३. मनुष्याः भवन्तं 'स्वार्थी' इति तु न विचारयन्ति ? ५

४. भवतां विद्या विवादाय धनं मदाय। शक्तिः परेषाम् परिपीड़नाय तु नास्ति ? ५

५. युवा भूत्वा युवतिं प्रति, युवतिर्भूत्वा वा परयुवकं प्रति कामासक्तः आसक्ता वा तु न भवति ? ५

६. परधनहरणाय, स्वकार्यसिद्धये वा बलं न प्रयोजयति ? ५

७. किं भवान् 'सत्यं जयते नानृतम्' सिद्धान्तमनुसरति ? ५

८. क्रोधाद् दूरमपसरति भवान् ? ५

९. किं दासोऽस्ति नवसज्जायाः (फैशन के गुलाम) ?

१०. मानवेषु भेदजनकस्तु न ? ५

११. किं भवान् सेवकान् भृत्यान् प्रति दयालुः अथवा तेषां दशा मार्जारदर्शने मूषकाणामिव भवति ? ५

१२. अपि भवतां बान्धवाः भवतां सान्निध्येन प्रसन्नाः भवन्ति ? ५

१३. विनोदी भवान् ? ५

१४. अमूल्यसमयो निद्रया, कलहेन व्यसनेन वा तु नश्यति ? ५

१५. किं भवान् वाचालः ? ५

१६. कृतघ्नस्तु न भवान् ? ५

१७. ऋणी तु न भवान् ५

१८. भवान् परिश्रमी, साहसी अथवा आलस्याभिभूतस्तथा अकारणसुखप्रियः ? ५

१९. परकलहकारणः किम् ? ५

२०. गुरुजनानामाज्ञापालकः, वृद्धसेवी, अभिवादनशीलः ? ५

२१. किं भवान् 'सत्यं' तत्क्षणमेव ग्रहणाति ? ५

२२. परोपकारी भवान् ? कठोरहृदयस्तु न ? ५

२३. शांतिप्रियो भवान् ? ५

२४. साक्षी भवितुं न्यायालये मन्यते भवानुचितम् ? ५

२५. परिचितानामपरिचितानाञ्च त्रुटीः ताः उचितसमये निवेदयति भवान् ? ५

२६. ययोरेव समं वित्तं ययोरेव समं कुलम्।
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः॥
मन्यते न वा ? ५

२७. वादविवादस्य कुविपाकाद्रक्षति आत्मानं भवान् ? ५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२८. येषां व्यवहारो न रोचते भवते किं भर्त्सयति भवान् तान् ? ५

२९. अपवादान् सोढुं समर्थोऽस्ति ? ५

३०. किं भवान् चाटुकारः ? ५

३१. कस्यचित् पृष्ठे तस्य दोषान् तु न गणयति समाजे ? ५

३२. ये भवतां सहायतां कर्तुमक्षमाः किन्तेषां सम्मुखे स्ववार्ताकथने संकोचमनुभवति भवान् ? ५

३३. अलंक्रियते भवतोचितमेव स्थानम् सभायाम् ? ५

३४. सर्वदा स्वच्छवस्त्राण्येव परिधारयति भवान् ? ५

३५. मनुष्याः भवन्तम् 'कृपणः' तु न विचारयन्ति ? ५

३६. धूम्रपानं करोति किम् ? ५

३७. मद्यसेवी तु न ? ५

३८. द्यूतक्रीड़ाप्रियः किम् ? ५

३९. अक्षक्रीड़ा (शतरंज) व्यसनी तु न ? ५

४०. स्वाध्यायं करोति भवान् आध्यात्मिक-बौद्धिकोन्नतिभ्याम् ? ५

४१. प्रत्यहं भ्रमणार्थं याति, ? व्यायामयति न वा ? ५

४२. विशेषवस्तु विना कष्टम् तु नानुभवति भवान् ? ५

४३. चलचित्रपटालय (सिनेमा) व्यसनी तु न भवान् ? ५

४४. क्षमाशीलोऽस्ति किम् ? ५

४५. प्रत्यहं परानुपकरोति ? ५

४६. किं भवतां गुरुजनाः भवत्सु दयालवः ? ५

४७. किं सहवासिनं प्रति सहानुभूतिपूर्णं व्यवहरति ? ५

४८. प्रजावृद्धये यत्नशीलः भवान् ? ५

४९. प्रतिदिनमीशमुपास्ते ? ५

५०. देशजातिसमृद्धये यत्नशीलः ? ५

५१. स्वायस्य ४% प्रतिशतं दानं करोति ? ५

५२. अन्यधर्मान् प्रति भवतः मनसि घृणा किम् ? ५

५३. भवतः अर्जितं धनं पवित्रम् ? ५

५४. प्रातरुत्थाय प्रभुं स्मरति न वा ? ५

उत्तरम्—कलौ काले करालेऽस्मिन्नीदृग्गुणयुतः पुमान्।
सर्वथा दुर्लभो लोके, भवेद्वा स्वयमीश्वरः ॥
—मधुपः

शुभ कामनाओं के साथ

रविन ट्रेडिंग कम्पनी

एच० टी० तथा एल० टी० अन्डरग्राउन्ड केबल्स

अधिकृत संग्रहकर्ता :—

ट्रापडर पावर तथा कन्ट्रोल केबल्स

५ मोहता मार्केट पहला तल्ला,

पो० ओ० बाक्स नं० १९६९, बम्बई-१

ग्रामस् : बीविच

फोन न० २६४८८३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आर्षपुरुषार्थस्य प्रतिमूर्तयः

श्रीमदानन्दसागरसूरीश्वराः

निबद्धा--रुद्रदेवत्रिपाठी, साहित्यसांख्य- योगाचार्यः एम०ए० (संस्कृत-हिन्दी), बी०एड, काव्यपुराणतीर्थः, साहित्यरत्नम्, साहित्यालङ्कारः। मन्दसौरः (मध्यप्रदेशः)।

संस्कृतभारती—अस्माकं संस्कृतभारती सत्यमेव समेषां सम्प्रदायवतां समानमानेन समादरभागभूदिति विदन्त्येव विपश्चितः। यथा हि सत्याहिंसादिधर्मोपदेशाः सर्वेषां धर्माणां शिरोभूताः सन्ति तथैव संस्कृतसरस्वत्यपि सर्वत्र धर्मप्रचाराय समानरूपेणैव स्थानं प्राप्तवतीति कस्य न सुपर्वसरस्वती सेवकस्य प्रहर्षाय ? तेषु जैनधर्मावलम्बिभिरपि निर्व्याजमेवैषा सुरगवी स्वेषां शास्त्रीयविचाराय तेषां प्रचाराय प्रसाराय च स्वधर्मभाषया सहैव स्वीकृताऽस्ति। अद्य यावदालिखितानां प्रभूतग्रन्थरत्नानामालोकनेन च तदीयटीकाप्रटीकादिभिः स्वारस्यपुरस्करणपुरस्सरं च विविधविमर्शादिष्वपि तत्प्रयोगबाहुल्येन चास्माकं हृदयं नितरां मोमुदीति। हेमचन्द्रप्रभृतयो नैके सूरीश्वरास्तत्र प्रमाणम्। एवमेव गतेषु विंशशत्या द्वितीय-तृतीयचरणयोर्वत्सरेषु विराजमानानां श्रीमदानन्दसागरसूरीश्वराणां संस्कृत-साहित्यसेवाविषयमाश्रित्यात्र मनाग् विमर्शाय प्रवर्तामहे।

जीवन-परिमलः—एतेषां महापुरुषाणां जननं किल गूर्जरप्रदेशस्य कार्पटवाणिज्य (कपड़वंज) नाम्नि नगरे गांधिपरिवारस्य मगनभाई-भायचन्द्रनाम्नः श्रेष्ठिनो धर्मपत्न्याः श्रीजमुनामातुः कुक्षेरभवत् हेमचन्द्रनाम्ना बाल्ये वयसि प्रथितिङ्गतानामेतेषां सत्यप्रियतासाहसिकतानिर्भीकतादृढनिश्चयवत्ताप्रभृतयो गुणा नितरामाश्रयवन्त एवाभवन्। पित्रोः संस्कारभूतस्य संस्कारस्य प्रभावाद् जैनधर्मे मतिर्भगवति जिने भव्या रतिर्गुरुजनेषु नतिः सन्मार्गेष्वेव गतिराहारव्यवहारयोश्च यतिरादयो नियमा एतेषु नियतमेव व्यराजन्त। १९४७ तमवैक्रमवत्सरस्य माघशुक्लपञ्चम्यां वयसस्त्रयोदश एव वसन्तानन्तरं वैराग्यरागरसिकतया तात्कालिकसाधुसमाजे महनीयायां पदव्यां भ्राजमानेभ्यः श्रीमद्झवेरसागरमुनिमहाराजेभ्यो जैनीं दीक्षामङ्गीकृत्य 'श्री आनन्दसागर' इति नाम्ना परमानन्दोपलब्धये गुरुचरणोपास्ति श्रुतोपासनाञ्च नितरामवर्धयन्।

स्वीयामध्ययनभावनां मूर्तयितुमेव तैः प्रत्यहं ५०० पञ्चशतश्लोकानां स्वाध्यायः, व्याकरणसाहित्य-न्याय-योगादिविषयाणामभ्यासः, स्वक्रियाणां सविधि सम्पादनमित्यादय आसंस्तेषां दैनिककार्यकलापेषु प्रामुख्यं भजमाना विषयाः। व्याख्यानवैशद्यं सम्पाद्य चर्चापदवीमधिरूढानां विषयाणां शास्त्रमन्थनपूर्वकं समुपस्थापनं, विना वैमनस्यं प्रश्नकाराणां मनः सन्तोषणमित्यादिगुणैरनूनां शासनोद्धरणधोरणीमाश्रितवता तेषां महिमानं विचिन्त्य क्रमशः पंन्यासपदवीमाचार्यपदवीं च समुपलभ्य शासनमदीपयन्।

एतेषां महात्मनां सम्पादनप्रवृत्तिवशात् १९६४ तमे वैक्रमवत्सरे श्रीजैनधर्मप्रसारकसंस्थाद्वारा ग्रन्थसम्पादनकर्म प्रारब्धम्। ततश्च शेठदेवचन्दलालभाई-जैन-पुस्तकोद्धारकसंस्थायाः सूरतनगरे संस्थापनां विधाय पूर्वाचार्याणां मान्यग्रन्थानां सम्पादन-प्रकाशनं प्रचालितं, तथैव च-आगमोद्धारकसमिति-शेठ-ऋषभदेव-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केशरीमलजीनी—पेढ़ी-नामभ्यामपि सम्पादन-प्रकाशनानि प्रवर्त्तितानि यान्यद्यापि नवनवैरुत्साहैः शास्त्राणां प्रकाशनं विधाय लोकोपकारं साधयन्ति । आगमवाचनाश्चोपलक्ष्यागमानां सम्पादनं तेषां सुखप्रकाशनं बहुशश्च प्रायोगिकरूपेण वाचनानां प्रशिक्षणं प्रदाय सर्वोपकारं विदधतां सूरिपुङ्गवानां कर्मभिरेव हठाकृष्टमानसैः 'आगमोद्धारक' इति पदव्या ते प्रथिमानं प्राप्ताः ।

आसंस्तदीयानीमानि पावनकर्माणि जीवन-समसौहृदानि-प्रवचन-तीर्थरक्षा--पठन--पाठन जीवरक्षा-शास्त्रचर्चा--शिलाताम्र—पत्रादिष्वागमानामुट्टङ्कनपूर्वकमागममन्दिरसंस्थापन-नानाविधदेवालयप्रतिष्ठापनप्रभृतीनि । एतैः पवित्र-कर्मभिः सहजतयैव तदीयं जीवनं सर्वेभ्यः समुज्ज्वलतरमभूदिति तत्र किं कथनीयम् ?

तेषां ज्ञानं सीमातीतमेवासीदिति तु प्राकृतार्धमागधी-संस्कृत-हिन्दी-गुजराती-प्रभृतिभाषास्वालेखन-पठन-पाठन--भाषणादि—प्रवृत्त्यैव परिचीयते । एवंविधानां तपसा परिपूतानां सर्वतो विसारिसाहित्ये संस्कृतसाहित्यं सर्वाधिकमस्तीति तद्विरचितेन गद्य-पद्यादीन्याश्रित्य साहित्येन प्रतीमहे ।

संस्कृत-साहित्यसेवाः – श्रीमत्सागरानन्द-सूरीश्वरैः स्वकीयेजीवने २२१ एकविंशत्युत्तर द्विशतमितानां पुस्तकानां रचनाः संस्कृत-प्राकृतयोर्विहिताः । तत्र हि १६६ मिता रचनाः पद्यमय्यः सन्ति गद्यकृतयश्च ५५ मिताः । पद्य कृतिषु १०१ तः १३८१ पद्यवत्यः १६ कृतयः । ४१ तः १०० पद्यमय्यः २९ कृतयः । ३१ तः ४० पद्यवत्यः १९ कृतयः । १७ तः २० पद्यवत्यः १७ कृतयः । १५ पद्यमय्यः ९ कृतयः । १२ तः १५ पद्यशालिन्यः १४ कृतयः । ११ पद्यवत्यः ११ कृतयः । ९–१० पद्यमय्यः ८ कृतयः । ८ पद्यवत्यः १३ कृतयस्तथा ५ तः ७ पद्यशालिन्यः ७ कृतयः सन्ति ।

गद्यकृतिषु लेखाः ३२, सूत्राणि ७, दीपिकाः ४, व्याकरणं ३, प्रश्नोत्तराणि १, वार्तिकम् १, काव्यम् १, तर्कावतारः १, अवचूरिः १, वृत्तिः १, व्याख्या १, टिप्पणं १, तथैकं यन्त्रनिरूपणम् ।

उपर्युक्तासु २२१ कृतिषु चतस्रः कृतयः प्राकृते सन्ति, अथ च प्रायो २० कृतयोऽपूर्णाः सन्ति ।

एतदतिरिक्तं सम्पादनपाटवं वृण्वद्भिस्तैः प्रायः १७३ ग्रन्थानां प्रकाशनार्हं सम्पादनमपि विहितम् । यत्र नानाविधटिप्पण-पाठप्रमार्जनादिना सह प्रस्तावनालेखनमपि नैपुण्येन विहितम् । प्रायः ८२ लिखितानां प्रस्तावनानामालोडनेन तेषां विषयगतं गाम्भीर्यं वयं परिचिनुमः ।

संस्कृतभाषा च तेषां परमा प्रौढा व्याकरणसम्मता समासपेशला भावमांसला चावर्तत । कृतिषु च प्रसादमाधुर्ययोर्गुणयोर्दर्शने भवतः । इयतीषु रचनासु स्वभावत एव तेषां प्रखरं पाण्डित्यं शास्त्रीयं सारसंकलनं विचार-वैशद्यं च विद्याविदां मनोरञ्जनाय विस्मयपदारोहणाय चालं भवति ।

इदमस्मदादीनां संस्कृतसेवाहेवाकिनां कर्तव्यकोटावापतति यदीदृशाणामपूर्वसंस्कृत-साहित्यसेवकानां ग्रन्थानुशीलनं विधाय तान् प्रति श्रद्धासुमान्यर्पयेम इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषणविभक्त्यर्थ-विचारः

श्रीविश्वनाथमिश्रः, प्रधानाचार्यः, शार्दूल-संस्कृतविद्यापीठं, बीकानेरः ।

शाब्द-बोधो हि निखिल-शास्त्रोपयोगी । स क्रया-कारकाऽऽदिघटित-पद-कदम्बकाज् जायमानो निराकाङ्क्ष-बोध-हेतुरिति प्रथितम् एव । तत्र च शाब्द-बोधे केचन पदार्था विशेषणताम् उपयान्ति, अपरे च विशेष्यताम् । तत्र ये पदार्था विशेषणताम् उपयान्ति, तद्-वाचक-पदान्य् अपि विशेषणानीत्युच्यन्ते । तादृशेभ्यो विशेषण-वाचक-पदेभ्यः समायातानां विभक्तीनां कोऽर्थः ? इति जिज्ञासायां प्रस्तूयते तावद् विचारः ।

पदार्थानां परस्परम् अन्वयः प्रकार-द्वयेन क्रियते—भेद-सम्बन्धेन, अभेद-सम्बन्धेन च । तत्र भेद-सम्बन्धेनाऽन्वयस् तत्रैव जायते यत्र विभिन्न-विभक्तिकानि पदानि स्युः । यथा "राज्ञः पुरुषः" इति । अत्र राज-पदार्थस्य आकाङ्क्षा-भास्येन स्वत्व-सम्बन्धेन पुरुष-पदार्थेऽन्वयः, तेन स्वत्व-सम्बन्धेन राजवान् पुरुष इति बोधः । इदम् अप्य् अत्र विज्ञेयम्—यस्य पदार्थस्य कुत्राऽप्य् अन्वयः क्रियते सोऽन्वयस्य (सम्बन्धस्य) प्रतियोगी, यत्र च तस्याऽन्वयः स खलु सम्बन्धस्याऽनुयोगीत्यच्यते । किञ्च, यस्याऽन्वयः स प्रकारो विशेषणं वा, यत्र चाऽन्वयः स विशेष्यम् इति चोच्यते । एवञ्च विशेषणे विशेषणता, सम्बन्धीया प्रतियोगिता च तिष्ठतश् चेद् विशेष्ये विशेष्यता, सम्बन्धीयाऽनुयोगिता च वर्तेते । इमाः सर्वाः प्रतियोगिताऽनुयोगिता विशेष्यतादयो विषयता-पदेनोच्यन्ते । तत्र येन सम्बन्धेन विशेषणता स सम्बन्धो विशेषण-निष्ठो धर्मश् च तत्र वर्तमानाया विशेषणताया अवच्छेदको भवतीति विशेषणताऽपि तत्सम्बन्धाऽवच्छिन्ना तद्धर्माऽवच्छिन्ना च जायते । एषैव गतिः सर्वासां विषयतानां कृते वेदनीया । तेनोपर्युक्त-स्थले स्वत्वसम्बन्धाऽवच्छिन्न-राजत्वाऽवच्छिन्न-प्रकारता-निरूपित-पुरुषत्वाऽवच्छिन्न-विशेष्यताकः शाब्द-बोधः सम्पद्यते ।

"नीलो घटः" इत्यादौ तु नील-पदार्थस्याऽभेद-सम्बन्धेन घट-पार्थेऽन्वयः । अभेदाऽन्वय-बोधं प्रति समानविभक्तिकत्वस्य प्रयोजकत्वात् एवञ्चाऽत्र अभेद-सम्बन्धाऽवच्छिन्न-नीलत्वाऽवच्छिन्न-प्रकारता-निरूपित-घटत्वा वच्छिन्न-विशेष्यताकः शाब्द-बोधः । अत्र नील-पदार्थे पूर्वत्र राजपदार्थे च या विशेषणता वर्तते सा क्रमशः अभेद-सम्बन्धेन भेद-सम्बन्धेन चेति स्थितिः । एतत् सर्वं संसर्गता-वादिनां मतम् ।

एषां नये हि भेदाऽन्वयो भवेदभेदाऽन्वयो वा स्यात्, विशेषणवाचकात् समायाता विभक्तिः केवलं पद-साधुत्व-मात्र-प्रयोजनिका, न तु संख्यादिकं किम् अपि तदीयं वाच्यम् अभ्युपगतम् । अत एवाऽत्र मते "राज्ञः पुरुषः" "नीलो घटः" इत्यादौ सर्वत्रैव विशेषण-विभक्तिर् निरर्थिका । राजनीलादि-पदार्थास् त्वाका-ङ्क्षा-भास्येनैव सम्बन्धेन परस्परम् अन्वयम् उपगच्छन्ति । यत्रापि "राज्ञः पुरुषः राजपुरुषः" नीलश्चासौ घटः नीलघटः" इति समस्त-स्थलं वर्तते, तत्राप्यकाङ्क्षा-भास्येनैव स्वत्वाऽभेद-सम्बन्धेन पदार्थानां परस्परम् अन्वयः । राज-पदार्थस्य पुरुष-पदार्थेन सहभेदाऽन्वयस्यैवाऽऽकाङ्क्षा, नील-पदार्थस्य घटपदार्थेन सहाऽभेदान्वयस्यैवाकाङ्क्षेति न काऽप्य-व्यवस्था । "प्रातिपदिकार्थस्य प्रत्ययार्थेन सह निपातार्थेन वा सहैव भेदाऽन्वयो न तु प्रातिपदिकार्थ-द्वयस्य परस्परं भेदाऽन्वयः" इति नियमे प्रमाणाऽभावेन राज-पदार्थ-पुरुषपदार्थयोर् भेदान्वये नास्ति किम् अपि बाधकम् । यत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"दधि पश्य" इत्यादौ "स्वमोर्नपुंसकाद्[१]" इति सूत्रेण लुग् भवति तत्र लुप्त-विभक्त्यनुसन्धान-द्वारा यद्यपि बोधोऽभिमतस् तथापि सामासिक-लुक्-स्थले लुप्त-विभक्त्यनुसन्धानम् अन्तरैव बोधोऽभीष्ट इति समास-स्थले यद्याकाङ्क्षा-भास्येन सम्बन्धेनाऽन्वयः सिद्ध एव, तर्हि को लाभोऽसमस्त-स्थले विशेषण-विभक्तेः सार्थक-त्वाभ्युपगमेन ? तस्माद् विशेषण-वाचकात् समायाता विभक्तिः पद-सम्पादनेन कृतार्था न कम् अप्यर्थ-विशेषं पुष्णाति, अपि तु निरर्थिकै-वेति संसर्गता-वादिनः ।

अत्र प्रकारता-वादिनः—समास-स्थले लुप्त-विभक्त्यनुसन्धानस्याऽभावेऽप्यन्वय-बोधस्याऽभी-ष्टतया जायतां नाम संसर्गमर्यादया भानम्, किन्तु यत्र समासो नास्ति तत्र "नीलो घटः" इत्यादौ समान-विभक्तिकस्थले विशेषण-विभक्तेः स्वत्वाऽऽधेयत्वादि-भेद-सम्बन्ध-बोधक-त्वम् । स चाऽयं विभक्त्यर्थः प्रकृत्यर्थ-निष्ठ-प्रकारता–निरूपित–विशेष्यताऽऽश्रयोऽपि विशे-ष्यार्थ-निष्ठ-विशेष्यता-निरूपित-प्रकारताऽऽश्रयो-ऽपि भवतीति विभक्त्यर्थस्य प्रकारताऽऽश्रयतया मतम् इदं प्रकारतावादरूपेण ख्यातिं गतम् । यथा "नीलो घटः" इत्य् अत्र नील-पदार्थः प्रथमार्थेऽभेदे विशेषणम्, स च घटपदार्थे विशे-षणम् । एवञ्च "नीलाऽभेदवान् घट" इति बोधः । एवं "राज्ञः पुरुषः" इत्यत्र राज-पदार्थस्य निरूपितत्व-सम्बन्धेन षष्ठ्यर्थ-स्वत्वे-ऽन्वयः, तस्य च आश्रयत्व-सम्बन्धेन पुरुषेऽन्वय इति 'राज-निरूपित–स्वत्वाऽऽश्रयः पुरुषः" इति बोधः ।

अथेदं विमृश्यते–अत्र मते समान-विभक्तिक-स्थले विशेषण-विभक्तेर् यः खल्वभेद-रूपोऽर्थः स्वीकृतस् तस्याऽभेदस्य कोऽर्थः ? यदि च अभेदो नाम भेदाऽभावः, स च भेदत्वाऽवच्छि-न्नत्वे सति भेदत्वेतर-धर्माऽनवच्छिन्नप्रतियोगि-ताकाऽभाव इत्युच्यते, तदा यस्य कस्यचिद् भेदस्य सर्वत्रैव वर्तमानतया एतादृशस्याऽभावस्य सुतराम् अप्रसिद्धिः । यदि चैनाम् अप्रसिद्धिम् अपाकर्तुं भेदाऽभावो भेदनिष्ठ-प्रतियोगिकाऽभाव इत्युच्यते, तदा प्रसिद्धिस् तु कथञ्चिद् यास्यति । भेदस्य सार्वत्रिकत्वेऽपि भेदघटोभयं नास्तीति रीत्या उभयाऽभावम् आदाय भेद-स्थलेऽपि तदभावस्य वक्तुं शक्यत्वात् । परन्तु कृते चैवं नीलं जलम्' इति वाक्यस्याऽपि प्रामा-ण्याऽऽपत्तिः स्यात्, यतो हि—यद्यपि जले शुक्ल-रूपस्य विद्यमानतया तत्र नील-भेदस्य सत्त्वेन नीलं जलम् इति प्रयोक्तुम् अशक्यम्, तथापि जले नील-भेद-घटोभयं नास्तीति रीत्या नील-भेदाऽभावस्य सत्त्वेन नीलं जलम् इति प्रयोगस्य प्रामाण्यं केन वार्यताम् ? न च नील-भेदत्वाऽव-च्छिन्न-प्रतियोगिताकाऽभाव एव सोऽर्थः । तथा चाऽस्य अभावस्य जले वक्तुम् अशक्यतया न भवितुम् अर्हति प्रामाण्यं नीलं जलम् इति वाक्यस्येति चेत्–विभक्तेर् एव नील-भेदाऽभाव इत्य् एतावन्मात्रार्थकत्वे प्रकारताऽवच्छेदक-भेदस्य विशेष्यताऽवच्छेदकेऽभावात् नील-रूप-प्रकृत्यर्थस्य विभक्त्यर्थैकदेशे नीलेऽभेदेनाऽनन्वय-प्रसङ्गः । यदि च भेद-प्रतियोगिकाऽभावस्य विशेषण-विभक्त्यर्थत्वम् अभ्युपगम्य नीलं जलम् इत्यादौ नील-पद-समभिव्याहाराद् नील-भेदत्वा-ऽवच्छिन्नाऽभावः प्रतीयते इत्युच्यते, तद् अपि न शोभनम्, एक-पदार्थेऽपर-पदार्थस्यैव संसर्ग आकाङ्क्षा-भास्यो भवतीति नियमे जागरूके सत्य भाव–रूपपदार्थे भेद-रूपपदार्थताऽवच्छे-दक–सम्बन्धस्याऽऽकाङ्क्षा–भास्यत्वाऽभावात् । तस्मात् कस् तावद् अभेद-पदार्थ इति चेद् ? अत्रोच्यते-भेदेऽभावे च विशेषण-विभक्तेः खण्डशः शक्तिः । तथा च भेदाऽभावयोर् उभयोः पदार्थ-त्वे न पदार्थ-द्वय-संसर्गस्याऽऽकाङ्क्षा-भास्यत्वेन च विशिष्ट-बोधो यास्यत्याकाङ्क्षया । 'नीलं घटः' इत्यादौ तु नाऽभेद-प्रकारको बोधः, द्वितीयान्त-विशेषणवाचक-पदेनाऽभेद-बोधने द्वितीया-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभक्त्यन्त-विशेष्य-वाचक-पद-समभिव्याहारस्यैव तन्त्रत्वात्। परन्त्व् एवं रीत्या विशेषण-विभक्तेर् भेदेऽभावे च खण्डशः शक्तौ स्वीकृतायाम् अपि परापतन्ति बहूनि दूषणानि। तद्यथा-निखिलस्य वस्तुनः प्रमेयत्वेन प्रमेयत्त्व-प्रतियोगिक-भेदस्य वक्तुम् अशक्यतया 'प्रमेयो घटः' इत्यादौ शाब्द-बोधाऽनापत्तिः। एवं "कम्बुग्रीवादिमान् घटः" इत्यादौ कम्बुग्रीवादिमत्त्वस्य गुरु-धर्मस्य प्रतियोगिताऽनवच्छेदकतया तदवच्छिन्नाऽभावस्याऽप्यप्रसिद्धिः। यदि च विशेषणताऽवच्छेदकीभूतं नीलत्वम्, प्रमेयत्वम्, कम्बु-ग्रीवादिमत्त्वादिकम् एव विशेषण-विभक्त्यर्थ इत्य् अभ्युपेयते चेत्, तावताऽपि न निस्तारः। नील-पदोत्तरं वर्तमानस्य सु-प्रत्ययस्य नीलत्वम् इत्य् अर्थे कृते नीलत्व-विशिष्टस्य प्रकृत्यर्थस्य प्रत्ययार्थे नीलत्वे कथम् अन्वयो जायताम्? यथा हि तद्धर्म-विशिष्टे तद्धर्मस्याऽधिकरणता-सम्बन्धेनाऽन्वयोऽव्युत्पन्नस् तथैव तद्धर्म-विशिष्टस्याऽप्य् आधेयतया तद्धर्मेऽन्वयोऽव्युत्पन्न एव। अतः पन्थानम् इमम् अपाकृत्य विशेषण-विभक्त्यर्थोऽभेदः, तादात्म्यम् एवेति स्वीक्रियताम्, अनुमन्यतां च तादात्म्यं स्ववृत्त्यसाधारणो धर्मः। असाधारण्यञ्च कव्यक्ति-मात्र-वृत्तित्वम्। तच्च तद्-व्यक्तित्वम् एवेति फलितम्। तथा च नीलो घट इत्यादौ नील-पदार्थस्य वृत्तित्व-सम्बन्धेन तद्व्यक्तित्वेऽन्वयः, तस्य च स्वरूप-सम्बन्धेन घटेऽन्वय इति "नीलवृत्ति-तद्व्यक्तित्ववान् घटः" इति जायते बोधः। संसर्गतावादिनाऽप्य् एतादृशस्थले तादात्म्यम् एव संसर्गः स्वीकार्यः, न त्व् अभेदः संसर्गः। यतो ह्य् अभेदस्य संसर्गत्वे तत्तद्व्यक्तित्वाऽवच्छिन्न-प्रयोगिताक-भेदाऽभाव-रूपे तस्य पर्यवसानम्। तथा च संसर्ग-भेदेन अभावस्यापि वैभिन्न्यम्। यथा संयोगेन घटाभावो भिन्नः, समवायेन भिन्नः, कालिकेन सम्बन्धेन च भिन्न एव। एवञ्चाऽभेदस्य संसर्गता-वादिना तत्तद्-व्यक्तित्वाऽवच्छिन्न-प्रतियोगिताक-भेदाऽभाव-संसर्गेण नील-पदार्थस्य घटेऽन्वयः कार्यः। तत्र च तद्व्यक्तित्वभेदेन तद्घटित-सम्बन्धस्याऽपि नानात्वं स्वत एव समायाति। एवञ्चाऽत्र मते "नीलो घटः" इति वाक्याद् अननुगत-सम्बन्धेन नीलवान् घट इति बोधे समापतिते सति "घटो न नीलः" इति नञ्-घटित-वाक्याद् अननुगत-सम्बन्धावच्छिन्न-प्रतियोगिताकाऽननुगत-नीलाऽभावा घटे भासेरन्, न तु नील-वृत्तिर् एकोऽभावो भासेत। यदि तादात्म्य-सम्बन्धेन नील-पदार्थो घट-पदार्थेऽन्वेति तदा तादात्म्य-सम्बन्धेन नीलवान् घट इति बोधे संजाते, नञ्-सत्त्वे तादात्म्य-सम्बन्धाऽवच्छिन्न-प्रतियोगिताक-नीलाऽभाववान् घट इति जायते साधुः शाब्द-बोधः।

तस्मात् समान-विभक्तिकाऽसमस्त-स्थले प्रकारता वादिना विशेषण-विभक्त्यर्थस् तादात्म्यं यथा स्वीकृतं तथैव तत्र स्थले विभक्तेर् नैरर्थक्यम् आकाङ्क्षा-भास्येन सम्बन्धेन विशेष्य-विशेषणयोः परस्परम् अन्वयश् चेति स्वीकुर्वता संसर्गता-वादिनापि तादात्म्यम् एव संसर्गः स्वीकार्यः। वस्तुतस् तु तादात्म्यस्य संसर्गत्वे स्वीक्रियमाणे एव नञो भेद-बोधकत्वम् उपपद्यते। भेदो नाम अन्योऽन्याऽभावः। अन्योऽन्याऽभावश् च तादात्म्य-सम्बन्धाऽवच्छिन्न-प्रतियोगिताक इति प्रसिद्धम् एव। एवञ्चाऽभेदस्य प्रकारत्वम् इति पक्षेऽभेदे विशेषण-विभक्तेः शक्ति-स्वीकरणम्, तथा नीलस्य भेदे भेदस्य चाऽभावेऽन्वयार्थं सम्बन्ध-द्वयम् आकाङ्क्षा-भास्यम् इति स्वीकरणम्, इति भूयो गौरवम् अङ्गीकृत्यापि "नीलो घटः" इति वाक्यात् स्वरूप-सम्बन्धेन नीलवान् घट इति बोधे कृते, पश्चात् समायाते नञि, "घटो न नीलः" इति वाक्यात् स्वरूप-सम्बन्धाऽवच्छिन्न-प्रतियोगिताक-नीलाऽभाववान् घट इत्य् एव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बोधः स्यान् न तु तादात्म्य-सम्बन्धाऽवच्छिन्न-प्रतियोगिताकोऽपि । नञोऽसत्त्वे येन सम्बन्धेन, येन धर्मेण यत्र धर्मिणि यद्वत्ता प्रतीयते, समागते नञि, तत्र धर्मिणी तत्सम्बन्धाऽवच्छिन्न-तद्धर्माऽवच्छिन्न--प्रतियोगिताकाऽभाववत्त्वस्य प्रतीतेर् अभ्युपगमात् । एवञ्च प्रकारता-वादि-मते गौरवग्रस्तेऽपि नञो भेद-बोधकत्वं नैवोप-पद्यते । अभेदस्य स्थाने तादात्म्यस्य विशेषण-विभक्त्यर्थत्वम् अङ्गीकृत्य स्वरूप-सम्बन्धेन तस्य घटादाव् अन्वयेऽपि स्वरूप-सम्बन्धाऽव-च्छिन्न-प्रतियोगिताक--नील--तादात्म्याऽभाववान् घट इति बोधः स्यान् न तु तादात्म्य-सम्बन्धाऽव-च्छिन्न-प्रतियोगिताको भेदः । एवञ्च न दृश्यते कश्चनाऽभ्युपायः प्रकारतावादि-नये नञो भेद-बोधकत्वं सम्पादयितुम् ।

तास्मात् तादात्म्यं संसर्ग एव । स च आकाङ्क्षा-भास्यः, न तु विशेषण-विभक्तौ तन्निरूपिता शक्तिः । एवञ्च आकाङ्क्षा-भास्येन तादात्म्य-संसर्गेण "नीलो घटः" इत्यादौ समान-विभक्तिकस्थले नीलादि-पदार्थानां घटादाव् अन्वयोपगमे नञोऽभावे तादात्म्य-सम्बन्धेन नीलवान् घट इति बोधे सम्प्रतिपन्ने, समागते नञि, "घटो न नीलः" इत्य् अत्र तादात्म्य-सम्बन्धाऽवच्छिन्न-प्रतियोगिताक-नीलाऽभाववान् घट इति जायते शाब्दधीः । तथा च नञो भेद-बोधकत्वम् उपपद्यते । एषैव सरणिः सर्वत्राऽ-भेदान्वयस्थले बोध्या ।

ननु "मुखं चन्द्रः" इत्यादाव् अपि तादा-त्म्येन चन्द्रस्य मुखेऽन्वयोपगमे 'तादात्म्य-सम्बन्धेन चन्द्रवन्मुखम्' इति बोधः प्राप्नोति । प्रसिद्ध्यनुरोधाद् इष्यते तु चन्द्र-पदस्य चन्द्र-सदृशे लक्षणया, तेन सह मुखस्याऽभेदाऽन्वये चन्द्र-सदृशाऽभिन्नं मुखम् इति; न च प्रसिद्धिर् अपलाप्येति चेद् ? न । यतो हि "मुखं चन्द्रः" इति गौण-सारोप लक्षणायाः स्थलम् । सा चेयं लक्षणा रूपकाऽलंकारस्य बीजम् । रूपकालंकारे भवत्य् आहार्याऽऽरोपः । आहार्याऽऽरोपो हि बाध-कालिकेच्छा-जन्यं ज्ञानम् । मुखे चन्द्रत्वस्य बाधितत्वेऽपि चमत्कार-प्रतिपादनेच्छया तत्र चन्द्रत्वम् आरोप्यते । नहि तत्र चन्द्रत्व-प्रतीतिं विना चन्द्रत्व-नियत-गुणवत्त्वधीः शक्योपपाद-यितुम् । न च मुखे चन्द्रत्वाऽभाववद् इति बाध-ज्ञाने जागरूके सति कथं मुखं चन्द्रत्ववद् इत्य् आहार्य-ज्ञानं सम्पादयितुं शक्यम् इति वाच्यम्; बाध-निश्चय-प्रति-बन्ध्यताऽवच्छेदक-कोटाव् आहार्याऽतिरिक्तत्वस्य निवेशनीयत्वात् ।

तस्मात् तादात्म्याऽतिरिक्त-सम्बन्धेन समान-विभक्तिक-स्थले नामार्थयोर् न परस्परम् अन्वयः । तादात्म्यञ्च तद्वृत्ति-धर्मवत्त्वम् । एवञ्च मुखं चन्द्र इत्यादौ मुखे चन्द्र-वृत्त्याह्ला-दकत्व-मूलको भवति चन्द्रत्वाऽऽरोपः, तत एव च चमत्कार इत्य् आलंकारिकसमयः ।

एवञ्च भेदाऽन्वय-स्थले अभेदाऽन्वय-स्थले च सर्वत्रैव विशेषण-विभक्तिः केवलं पद-सम्पादन-मात्र-प्रयोजनिका, न तु किम् अपि तदीयं वाच्यम् अपि तत्त्वम् अभ्युपेयत इत्य्-अलं पल्लवितेन ।

'विश्वसंस्कृतम्' इतित्रैमासिकपत्रतः साभार समुद्धृतोऽयं लेखः— इति निवेदयति—मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय ॥३५५॥ गुरुकुल कांगड़ी विश्वविद्यालय

अथ श्रीशिवराज्योदये महाकाव्ये

२६ सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः, डी.लिट्, नागपुरम्

ततः शिवाजिमाबद्धं सजीवं वाऽपजीवितम् ।
द्रढिष्ठनिश्चयः क्रूरोऽफुल्लोऽसौ पुरो ययौ ॥१॥
गिरिप्रदेशसञ्चारानभ्यासात् तस्य सैनिकाः ।
पदे पदे स्खलन्तोऽपि सम्प्रचेलुः पुरः पुरः ॥२॥
स्खलतां तुरगोष्ट्राणां करिणां च विशेषतः ।
हेषाक्रन्दनचीत्कारैररण्यं व्यापि कर्कशैः ॥३॥
कूपकुण्डसरिद्धाराविहीने तत्र कानने ।
तृषार्तैः पशुभिर्लीढा अन्योन्यस्वेदबिन्दवः ॥४॥
गवेषमाणाः सोत्कण्ठं जललेशमितस्ततः ।
तृषार्ताः सैनिकाः सर्वे लिलिहुर्निजसृक्कणीः ॥५॥
दुरारोहं दुराक्रम्यमुच्चकैर्गिरिकाननम् ।
विगाहमानं श्रान्तं तद् बलं बलवतामपि ॥६॥
जलाशयसमीपस्थं जटिलारण्यमध्यगम् ।
शिविरस्थानमभ्येत्य सैनिकास्ते विशश्रमुः ॥७॥
तेषां सुखोपभोगार्थमातिथ्यार्थं च सर्वशः ।
भोग्यं भोज्यं च बहुधा शिवादेशादकल्प्यत ॥८॥
चिरात् क्षुधाऽतिमात्रं ते व्याकुला म्लेच्छसैनिकाः ।
भृशघस्मरभावेन ह्यनुचक्रुर्बकासुरम् ॥९॥
पानीयमपिबन् केचिदतिमात्रं तृषातुराः ।
तानाश्चर्यवदैक्षन्त पानशौण्डाः क्रमेलकाः ॥१०॥
विश्रान्तं तत्र सेनानीमफुल्लं तदा ययौ ।
शिवादेशादसौ दूतो वयोतीतः प्रियंवदः ॥११॥
मुहुर्मुहुः प्रणम्यैनं विनयातिशयादिव ।
कथयामास वृत्तान्तं वृत्तज्ञः स यथोचितम् ॥१२॥
जगाद च स्वसामर्थ्यविश्वस्तं तं विवेकवान् ।
वीरवर्य मम स्वामी बिभेति भवतो भृशम् ॥१३॥
भवद्दर्शनलाभार्थी स स्वयं चिरकालतः ।
हन्त तं प्रतिबध्नाति तदीयं कातरं मनः ॥१४॥
सत्कार्येऽपि प्रवृत्तस्य प्रतीपं चेद् भवेन्मनः ।
स पराधीनवत् प्रायः कर्ता कार्येभिवर्तते ॥१५॥
अतः स ममुन्खेनैतत् प्रार्थयत्येकमेव वः ।
यदितः कृपया तत्र श्रीमद्भिरभिगम्यताम् ॥१६॥
पृतनेयमिहैवास्तु सदातिथ्यैश्च तुष्यतु ।
विश्राम्यतु सुनिश्चिन्तं का चिन्ता विषये स्वके ॥१७
अध्यास्य शिविकायानं श्रीमद्भिः शस्त्रशालिभिः ।
स्वयमभ्येत्य तद्गेहं दर्शनं तस्य दीयताम् ॥१८॥
सेवकानां द्वयं वाऽथ त्रयमावश्यकं यदि ।
तत्र यातु सुखेनैव श्रीमता सह शस्त्रभृत् ॥१९॥
दशाऽन्येऽप्यनुगच्छन्तु सैनिकाः शस्त्रपाणयः ।
प्रत्येकं येषु शक्तः स्यात् पराजेतुं शताधिकान् ॥२०
विजापुरीयसाम्राज्यशिरस्त्राण ! महाबलिन् ।
ते कुर्वन्तु भवत्त्राणमिति मूर्खोचितं वचः ॥२१॥
यथाक्रमं ते तिष्ठेयुर्बाणप्रक्षेपणान्तरे ।
बलवन्तो न वाञ्छन्ति स्थानं समबलैः समम् ॥२२
कातरत्वान्मम स्वामी खड्गं धत्ते दिवानिशम् ।
तत्खड्गालङ्कृतः प्रायो दर्शनार्थं स एष्यति ॥२३
भीरोस्तदस्तु खड्गोऽसौ कटिस्थो वा करोद्धृतः ।
न जातु जायते भीरौ शस्त्रयोगेन शूरता ॥२४॥
भवदीया इवायान्तु तदीया दश सैनिकाः ।
एकैकशस्ते तिष्ठेयुर्बाणप्रक्षेपणान्तरे ॥२५॥
भवदातिथ्यसत्कारोचितः सत्पटमण्डपः ।
उपत्यकायां स्वावासदुर्गस्य स्वामिना कृतः ॥२६॥
यद्यदारण्यकायत्तं मण्डपानां प्रसाधनम् ।
तत्तत्सर्वं समायोजि स्वयं तेन सकौशलम् ॥२७॥
सुरम्ये मण्डपे तस्मिन् प्रागस्तु श्रीनदागमः ।
पश्चादसौ यथाकालं दर्शनार्थमुपेष्यति ॥२८॥
श्रीमतां परिचर्यार्थं तत्रायातु नरद्वयम् ।
नैकाकिनो हि श्रीमन्तो यान्ति क्वापि कदाचन ॥२९
सेवकद्वयमागच्छेत् स्वामिनाऽपि समं तथा ।
प्रयोजनं न चेत् किञ्चिन्न तन्मण्डपमाविशेत् ३०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आग्रहायणिके शुक्लसप्तम्यां गुरुवासरे ।
मध्यन्दिनेऽस्तु भवतोश्चिराकांक्षितमेलनम् ॥३१॥
गतायुरहमाशासे भवतोरत्र मेलने ।
निरपायं शिवं सर्वलोकस्यास्य प्रियं सदा ॥३२॥
निःशङ्कमिदमाकर्ण्य शिवदूतस्य भाषितम् ।
प्रतिशुश्राव धीरोऽसौ सर्वमेव तदीहितम् ॥३३॥
मेने च येन केनापि प्रकारेण पुरःस्थितम् ।
रिपुमेनं विनिर्बध्य वक्ष्यामि नृपमातरम् ॥३४॥
तदशङ्कमिमं सर्वं समयं समयोचितम् ।
स स्वीचक्रे महाशक्तिस्तिमिङ्गल इवामिषम् ॥३५
शिवाजिश्च तदाकाले कुर्वन्नाजिनियोजनम् ।
एकान्ते मन्त्रयाञ्चक्रे सुहृद्भी रणपण्डितैः ॥३६
कांश्चिज्जयावली देशाच्छादिनीं सोऽति भीषणाम् ।
विगाहितुमरण्यानीं सङ्ग्रामार्थमदीदिशत् ॥३७॥
अपरान् गिरिसञ्चारगूढाध्वानं सुदुर्गमम् ।
निरोद्धुमादिशत् सर्वं हन्तुं शत्रुं पलायितम् ॥३८
अन्यानाज्ञापयामास वृक्षशाखासु गूहितुम् ।
संकेतध्वानमाकर्ण्य शत्रुवर्गेषु कूर्दितुम् ॥३९॥
इतरानादिशन्नानाच्छद्मरूपैः प्रसर्पितुम् ।
उदन्तजातं विज्ञातुं रिपुसेनागतं द्रुतम् ॥४०॥
नेताजिप्रमुखाः सर्वे शिवसैन्यधुरन्धराः ।
यथादेशं यथाकालं तस्थुरास्कन्दनोत्सुकाः ॥४१॥
यथा यथा सा निकषा निश्चिता तिथिराययौ ।
शिवराजचमूव्यूहो ययौ स्थैर्यं तथा तथा ॥४२॥
सा तिथिः कालकन्येव प्रेतनाथवशंवदा ।
निमिषे निमिषे नूनं तत्त्वरे कार्यसिद्धये ॥४३॥
मृत्योरखण्डिताज्ञस्य विशेषाज्ञेव सा तिथिः ।
ससैन्यमफझुलं तं निजायत्तमिवाकरोत् ॥४४॥
अस्तंगतायां पूर्वस्यां तिथौ षष्ठ्यां स भावुकः ।
धर्मकर्म समारेभे यतो धर्मस्ततोजयः ॥४५॥
राजोपाध्यायसम्प्रोक्तैः श्रुतिमन्त्रैरखण्डितम् ।
रुद्राभिषेकं विदधौ भक्त्येकाग्रेण चेतसा ॥४६॥
जातोचम्पकपद्मानि बिल्वपत्राणि भक्तितः ।
ॐ नमः श्रीशिवायेति जपन्नार्पयदानतः ॥४७॥
जगौ श्रीशङ्कराचार्यचरित मधुरस्वरम् ।
शिवमानसपूजायाः स्तोत्रं भक्तिरसायनम् ॥४८॥
विदधौ च परापूजां ध्यानसम्पुटितेक्षणः ।
आत्मन्यात्मानमुत्पश्यन् राजयोगो हि कोऽप्यसौ ४९
तं कर्तुमन्यथा कर्तुं समर्थं खलु लीलया ।
चिराराध्य विश्वेशं कथयामास कांक्षितम् ॥५०
देवाधिदेव सचराचरविश्वनाथ,
सद्धर्मरक्षणकृते कृतनिश्चयाय ।
त्वद्भक्तिमात्रपरशक्तियुजे शिवाय,
दासाय देहि भगवन् जयमेव नित्यम् ॥५१॥

दी अवध सूगर मिल्स लिमिटेड

निर्माता :—

प्रधान कार्यालय :—
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई-१

मिल्स :—
हरगांव
जिला-सीतापुर
उत्तरप्रदेश

शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदाध्ययने नाधिकारः

ले० श्रीबद्रीप्रसादशास्त्री, पपूरना (झुञ्झनु)

[विदितमेवेदं तत्रभवतां विदुषां यद् गते २ अङ्के 'वेदस्याध्ययनाध्यापनयोर्विषये कोऽस्ति शास्त्रीयो विधिः ?' इति वेदविदः पण्डितान् प्रति मया निवेदितमभूत्। वस्तुतोऽद्यत्वे बहव एव सुजनाः यथेमां वाचं०.....' इत्यादीनां मन्त्राणां मनःकल्पितमर्थं विधाय 'स्त्रीशूद्राणामपि वेदेऽधिकारोऽस्तीति' साधयितुं प्रवर्तमानाः सन्दृश्यन्ते। तेषां समाधानार्थं मम सुहृद्वर्यस्यायं लेखः सम्प्रति 'भारती' पाठकानां पुरस्तात् समुपस्थाप्यते--इति —मधुपः]

विदित मेवेदं विपश्चिदपश्चिमानां भारतीपत्रपाठकानां यद् "अजयमेरु" पत्तने समायोजिते सुसम्पन्ने चाखिलभारतीयवेदान्तसम्मेलने यदा "श्रीसरोजबाला" भिधा बाला प्रणवव्याख्यापुरःसरं वेदमन्त्रान्नुदचरत्। श्रीजगद्गुरुप्रभृतयः कतिपयमहर्षयश्च तां श्रुति मंत्रोच्चारणे प्रणवोच्चारणे चानधिकृतां समुदघोषयन्।

तदानीमेव च समुत्पन्ने वाक्कलहे "श्रीविश्ववामहोदयः" स्त्रीणां शूद्राणाञ्च वेदाध्ययने शास्त्रसम्मतमधिकारंसिसाधयिषुरिव ह्यनादिष्वपि श्रुतिसम्मतेषु स्मृतिपुराणेषु वर्तमानं स्वोक्तिविरोधं वितण्डावलेन परिजिहीर्षुरिव वैदिकविदुषो विजिगीषुरिवानादिमपि भगवन्तं कालं प्रबलं श्रौतस्मार्तप्रमाणपुञ्जञ्च शपन्निवोचिवान्। "गतः स खलु कालो यदा स्त्रियः शूद्राश्च वेदाध्ययनान्निवार्यन्ते स्मे" ति न केवलं विश्ववामहोदय एवापितु सम्प्रति समुद्भूताः सन्तीदृशाः शतशः सम्प्रदाया यदनुयायिनो वेदार्थविचारे समन्वयात्मकार्षसरण्यनुसारोणि स्मृतिसूत्रपुराणादीनि सर्वाणि दूरतो विहाय स्वाभिलषितश्रुतिमन्त्राणामर्थं वदन्ति वावदूकाः।

किन्त्वेष्वार्यसमाजऽऽख्यः सम्प्रदायो मुख्यस्तदनुयायिनश्चैते श्रीविश्ववामहोदयप्रभृतय एव ब्राह्मणग्रंथानां मन्वादिस्मृतीनां रामायणमहाभारतयोः शास्त्राणां दर्शनानाञ्चर्षिप्रणीतत्वं सकर्तृकत्वमत एवाऽऽप्तवाक्यत्वमभ्युपगच्छन्तःपुन स्तेष्वपि केषाञ्चिदंशानां प्रक्षिप्तत्वमङ्गीकृत्य वेदस्य पञ्चमवेदस्य चानाप्तवाक्यतामेव प्रकारान्तरेण साध्याभावसाधकेन हेत्वन्तरेणेव वा प्रतिपादयन्ति। त एते स्वोक्तौ वदतो व्याघातमपश्यन्तः सर्वस्यापि श्रुतिस्मृतिपुराणरूपस्य शब्दब्रह्मण एकत्र प्रामाणिकतामन्यत्र चाप्रामाणिकतां ब्रुवाणाः स्वपक्षस्थापने शब्दप्रमाणमेवैकमालम्बं मन्वानास्तमेव दुर्बलमुपेक्षणीयमिव विदधति।

अर्थादेकस्यैव ग्रंथस्य कुत्रचित् प्रामाणिकत्वं कुत्रचिच्चाप्रामाणिकत्वं, ब्राह्मणादिश्रुतीनामपि स्मृतित्वं स्वीकुर्वाणानां श्रीमद्दयानन्दाऽऽदिमस्करिणां चरणमेव शरणमुपयातांनां विलक्षण एव शब्दशक्तिग्रहोपायः प्रामाण्यवादो वा, विलक्षणैव चासमन्विताऽपि समन्वयाभासाऽऽकुला विकला श्रुतितत्त्वप्रतिपादनपद्धतिरिति वितण्डावादबहुले विवादरणाङ्गणे किलैतैरायोजिते को वा श्रुतितत्त्वमीमांसामांसलोऽपि मनोषो प्रतिभटत्वेनोपतिष्ठेत।

किञ्च तथापि साधारणतया धार्मिकसमाजे समुत्पन्नभ्रमनिवारणाय वरदैर्वेदविद्याविशारदैरपोहितारिरदैर्विमदै र्विद्वद्वरैः श्रीमदुव्वटमहीधरादिभिर्महीसुरै र्निदिष्टाध्वगामितया किञ्चिदिवावगतश्रौतस्मार्तमतः कृषकायेऽ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्मिल्लेखे वेदाध्ययनविधिविमर्शपुरस्सरं शूद्राणां वेदाध्ययनेऽनधिकारित्वविषये लेखिनीव्यापारमाविष्करोमि।

तत्रादौ वेदाध्ययनविधिविमर्शपुरस्सरं शूद्राणां वेदाध्ययनेऽनधिकारित्वं व्याचक्ष्महे। एवञ्च "प्रयोजनत्वावच्छिन्नवदर्थविधायकत्वेनार्थवान् शब्दो विधिर्लिङादिप्रत्ययार्थ इति विधिसामान्यलक्षणानुसारं "स्वाध्यायोऽध्येतव्य" इति नित्येऽपूर्वविधिवाक्ये कथं केनेत्याकाङ्क्षायां "वसन्ते ब्राह्मणमुपनयीत" "ग्रीष्मे राजन्यं" "वर्षासु वैश्य" "वसन्ते ब्राह्मणोऽग्नीनादधीत" "ग्रीष्मे राजन्यो" "वर्षासु वैश्य" इतिनियमविधिवाक्याभ्यामुपनीतेन साग्निकेन द्विजेनैव परमपुरुषार्थसिद्धये स्वाध्यायोऽध्येतव्यः। अनग्नेरनुपनेयस्य शूद्रस्य तु वेदाध्ययनाध्यापनयोर्यज्ञे चानधिकार एवेत्यर्थापत्तिलभ्यः श्रुतार्थापत्तिलभ्यो वार्थः प्रेक्षावतामपरोक्षः।

इममेवाशयं हृदयसात्कृत्वा "ब्राह्मणराजन्यवैश्यानां श्रुते" रितिपरिभाषाध्यायोक्तकातीयश्रौतसूत्रभाष्ये उपनयनं चाध्ययनार्थम्। अतस्तदभावत्वादवैद्यत्वान्नाधिकारः शूद्रस्य। अपि शूद्रस्य भवति प्रतिषेधोऽध्ययनं प्रती" ति श्रीमान् कर्काचार्यो निगदं बभाषे। एवञ्चोपनयनपूर्वकं त्रैवर्णिकस्यैव वेदाध्ययनमिति सामान्ये वेदाध्ययनविधावनग्निरनुपनेयः शूद्रो वेदाध्ययनेऽनधिकृत एव।

अष्टाध्याय्यामपि "सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः" १।३।३६ इतिसूत्रे उपपूर्वकान्नयतेरात्मनेपदप्रयोगं व्यवस्थापयत्। "माणवकमुपनयत" इत्यादावाचार्यकरणार्थेऽप्युपनयनपूर्वकेणाध्यापनेन हि उपनेतरि आचार्यत्वं क्रियते। अर्थाद् उपनयनपूर्वकं वेदाध्ययनं भवतीति स्फुटमभिधत्ते तत्र भगवान् पाणिनिरपि सोपसर्गक्रियापदप्रयोगव्यवस्थाप्रदानेन। स्मृतिकृच्छिरोमणिर्भगवान् मनुरपि "उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः। आचारमग्निकार्यं च सन्ध्योपासनमेव चे। म. स्मृ. २।६९ ति शौचमाचारमग्निकार्यं (यज्ञं) सन्ध्योपासन (ब्राह्मध्यानं सावित्री जपादिकं) चेत्यादि वेदाध्ययनजन्यज्ञानसाध्यं सर्वमपि "उपनीये" ति, उपपूर्वकस्य नयतेरानन्तर्यार्थकल्यबन्तपदप्रयोगेणोपनयनपूर्वकं माणवकं-शिक्षयेदिति विध्यर्थकक्रियापदेन विविधज्ञानविज्ञानपुञ्जं वेदमध्यापयेदिति व्यवस्थापयामास।

"नाभिव्याहारयेद् ब्रह्म स्वधानिनयनादृते।
शूद्रेण हि समस्तावद् यावद् वेदे न जायत"
म० स्मृ० २।१७२

इत्यत्र तु "यावद् वेदे न जायते" इत्यनेन गर्भाधानादिसंस्कार-सम्पन्नस्त्रैवर्णिकोऽपि यावद् वेदे जनिं न लभते, उपनीतत्वाद्वेदजन्मा द्विजन्मा गृहीतगायत्रीको वान भवति तावदेनं वेदं नाभिव्याहारयेन्नाध्याययेत्। अर्थाद्-उपनीतो गर्भाधानादिसंस्कारसम्पन्नस्त्रैवर्णिकः शूद्रभिन्न एव वेदाध्ययनेऽधिकारी स्यादिति सूचयन् "शूद्रेण हि सम" इतिवाक्येन तु वैदिकविधिना गर्भाधानादिसंस्कारसम्पन्नस्यानुपनीतस्य त्रैवर्णिकस्य पुनस्तद्भिन्नस्य शूद्रस्य च वेदाध्ययनेऽनधिकारित्वसाम्यं समादिश्योपनेयत्वानुपनेयत्वाभ्यामुपमेयोपमानवत्तयो-र्भेदमपि वास्तविकं-साधयति स्मृतिकारः। अन्ते च "अनेक क्रमयोगेन संस्कृतात्माद्विजः शनैः। गुरौ वसन् सञ्चिनुयाद् ब्रह्माधिगमिकं तपः"। म. स्मृ. २।१६४ कृतोपनयनस्यास्य व्रतादेशनमिष्यते। ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वक" म. स्मृ. २।१७३ मित्यादिवचोभिरपि पूर्वोक्त श्रुत्यनुसारं कृतोपनयनस्य त्रैवर्णिकस्यैव वेदाध्ययनं प्रतिपाद्यते। इतिवैदिकमन्त्रसंहितेतरश्रुतिभिर्मनुपाणिन्यादिस्मृतिभि र्वादिसम्मताभिराप्तोक्तिभिरेव शूद्रे वेदमध्येतुमनधिकृते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धेऽधुना सर्वसम्मता स्वतः प्रामाण्यभूता संहिता श्रुतिरपि प्रस्तूयते। तथा च तस्माच्छूद्रो यज्ञेऽनवक्लृप्त" तै. सं. ७।१।१।६ इत्यत्र यज्ञ इति-पदं द्रव्ययज्ञस्य ज्ञानयज्ञस्य च वाचकं व्यंजकं च तस्मात् द्रव्ययज्ञे ज्ञानयज्ञे च शूद्रोऽनवक्लृप्तः। असमर्थः। असामर्थ्यं चात्र वेदाध्ययनाभावरूपं पूर्वोक्तमेव तस्मादिति पदेनाभिव्यज्यते। न च ततोन्यत् किमपि शारीरिकादि कल्पयितुं शक्यतेऽविशेषात्। अतो यथाविधि गर्भाधानादि-संस्कारसम्पन्न उपनेतुं योग्यस्त्रैवर्णिक उपनीतो द्विजो वेदाध्ययनेऽधिक्रियते।

शूद्रस्तु "वसन्ते ब्राह्मणमुपनयीत" "शूद्र श्चतुर्थो वर्ण एकजातिर्न च संस्कारमर्हती" त्यादिश्रुतिभि "र्नचास्योपादशेद्धर्मं" "न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हती" त्यादि स्मृतिभिश्चानुपनेयत्वादसंस्कार्यत्वात् त्रैवर्णिक-भिन्नत्वादुपनयनपूर्वके वेदाध्ययनेऽनर्हे एव सिद्धे तस्य तत्रार्थित्वसामर्थ्ययोरपि प्रत्याख्यातत्वं वेदितव्यम्।

यत्तु "यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्यां शूद्राये" तीयं श्रुति-रेव स्त्रीशूद्रयोर्वेदाध्यनाधिकारे 'मान' मिति वदन्ति। तन्न। तस्या अन्यार्थपरत्वादप्राकर-णिकत्वाच्च। अग्निष्टोमाग्निसौत्रामण्यश्वमेधसर्व-मेध पितृमेधप्रवर्ग्योपनिषत्सम्बद्धत्वाद् यजमानो क्तिरूपिणीयं श्रुतिः, अर्थस्तु यथाऽहं ब्रह्मराज-न्याभ्यां वैश्याय चेमां शुभां श्रवणमंगलां शापा-क्रोषरहितां सभ्यतापूर्णां "दीयतां भुज्यतां" मित्येवमादिकामत एवानुद्वेगकरीं कल्याणीं संस्कृतामस्खलितां वाचं सर्वतो ब्रवोमि। स्वाय आत्मीयाय अरणाय परायचापि तादृशीमेव सर्वथा वच्मि। तथात्वे चाहमपि समाजे व्यव-हारकुशलत्वाद्-विनीतत्वाच्च सर्वथा समृद्धो यथेष्टं सम्मानितश्च भूयासमित्येव प्रार्थनात्मकोऽ वगम्यते।

नैवास्मिन्नध्याये त्रैवर्णिकानां तदितरशूद्र-चाण्डालाऽऽदीनामपि मिथो वैदिकवागव्यव-हारादिविचारः उपक्रमोपसंहारादिभिः सिध्यती ति कृतहृदयङ्गमाऽऽगमानामतिरोहितम्।

इतश्चेमां कल्याणीं मन्त्ररूपिणीं वाचं सर्वेभ्यो जनेभ्य आवदानोत्यर्थमप्राकरणिक-मपि स्वकल्पितमङ्गीकृत्य शूद्राणां मानवमात्र-स्यैव च वेदाध्ययनेऽधिकारोऽङ्गीक्रियेत चेत् तदप्यसम्यग् अनुपपन्नत्वात्। यतो हि मन्त्रेऽस्मि-न्निदंत्वसर्वनामविशेषणविशिष्टां मंत्ररूपिणीं वैदिकीं वाचं सर्वेभ्यो जनेभ्य आवदानोत्येव विवक्षितोऽर्थोऽभविष्यच्चेत्तदा "कल्याणी" मिति पदमनुक्त्वाऽशेषकल्याणगुणगणैक वाचकं "वैदिकी" मित्येवासन्दिग्धपदं प्रयोज्य स्पष्टमुपादेक्ष्यत् सर्वेषां मानवानां वेदमन्त्रोच्चा-रणाधिकारं भगवती श्रुतिः। वेदोपदेशस्या-संदिग्धत्वात् अप्रतारकत्वात् सुगमत्वाच्च। किञ्च-वादिविहितव्याख्यानेन तु सन्दिग्धत्वं प्रतार-कत्वमस्पष्टत्वं मन्त्रस्य स्फुटमेवेत्यतो मंत्रोऽयं न खलु शूद्रनिषादादीनां वेदाध्ययनाधिकार-साधकप्रमाणपदवीमापद्यते।

पुनश्चेदंत्वविशेषणविशिष्टाऽऽधुनिकी प्राकृता लौकिकवागपि सम्प्रति विविधकल्याण-कारिणीभवतीति यदा प्रत्यहं सभ्यैर्व्यह्रिय-माणां तामिमां प्राकृतामपि प्रत्यक्षं पश्यामः, तर्हि किं पुनस्तदानींतनीं लौकिक संस्कृतवाच-मेवेदंत्वविशिष्टां कल्याणीमस्मदुक्तार्थाभिधात्रीं यजमान उवाचेति न मन्येत। अतो वादिनः स्वकल्पितमप्रामाणिकं मंत्रार्थं विहायान्यपूर्वो-दाहृतश्रुतिस्मृतिषु स्फुटमुपवर्णितं श्रुत्यैवा-नयापि साक्षात्सङ्केतितं प्राकरणिकं पूर्वाचार्य-सम्मतमस्मदुक्तमेवार्थमपक्षपातया धियाङ्गी-कुर्वन्तु।

"नैतदब्राह्मणो विवक्तु मर्हति समिधं सौम्याहर उपत्वा नेष्ये न सत्यादगा" ४।४।५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इतिछान्दोग्यश्रुतौ "तदभावनिर्धारणे च प्रवृत्ते" १।३।३७ रिति तदुपजीव्ये ब्रह्मसूत्रे जावालो गौतममुपसद्य ब्रह्मचर्यं चर्तुमियेष, किंगोत्रोऽसीति गोतमेन पृष्टोनाहं भगवन् गोत्रं स्मरामीति जाबालोक्तमाकर्ण्य ब्राह्मणेतरः शूद्र एवं निर्भीकः सत्यवक्ता च न भवतीति गोतमस्य-जावाले शूद्रत्वाभावस्य निर्णये सति तमुपनेतु-मनुशासितुं प्रवृत्ते वेदाध्ययने शूद्रस्यानधिकार-स्तथा च वैश्यक्षत्रिययोरपि श्रुतिषूपनयन पूर्वक-वेदाध्ययनाधिकारश्रवणात्, तदुपलक्षणार्थकेन "ब्राह्मण" इतिपदेनात्र द्विजस्य वेदाध्ययनेऽधिकारश्च स्पष्टमुपदिष्टः।

एवञ्चोक्तानां सर्वसम्मतानां श्रुतीनां स्त्रीशूद्रयो र्वेदाध्ययनेऽनधिकारप्रतिपादनात् "स्त्रीशूद्रौ नाधीयातां" "शूद्रसमो पेनाध्येतव्यं" "वेदमुपश्रृण्वतस्त्रपुजतुभ्यां श्रोत्रपूरण" मित्यादीनां श्रुतीनामपि पूर्वोक्तश्रुत्युक्तार्थाभिधायकत्वात् तुल्यार्थकत्वादकल्पितत्वं स्वतः प्रामाण्यञ्च सिद्धमित्यवगन्तव्यम्।

न चेदानीं मंत्रब्राह्मणात्मके वेदेऽनुपलब्धत्वादप्रामाण्यमिति वक्तव्यम्। समग्रस्य वेदस्यानुपब्धत्वादनुपलब्धभागे सत्वाच्चासां श्रुतित्वमनादित्वं स्वतःप्रामाण्यञ्चाक्षुण्णमेव। "श्रवणाध्ययनार्थप्रतिषेधादिति श्रीमद्दयानन्दस्वीकृतस्वग्रन्थे ब्रह्मसूत्रेऽपि स्त्रीशूद्रयोर्वेदश्रवणाध्ययनप्रतिषेधदर्शनात् सूत्राणाञ्च श्रुत्युपजीव्यत्वात् स्त्रीशूद्रयो र्वेदाध्ययननिषेधार्थकश्रुतीनामासामनादित्वं व्याससम्मतत्वं स्वतः प्रामाण्यं चैतिह्यबलेनाप्यव्याहतं, तथात्वे च स्त्रीशूद्रयोर्वेदाध्ययनाधिकारं वदन्तः परास्ता एवेति वेदाध्ययनविधिविमर्शपुरस्सरं शूद्राणां वेदाध्ययनेऽनधिकारप्रतिपादनेन प्रसङ्ग प्राप्तः स्त्रीण मपि वेदाध्ययनेऽनधिकारः समासत उपवर्णितः।

किञ्चाधुनिकसुधारवादिभिः पण्डितमानिभिः श्रौतस्मार्तवाक्यानां विपरीतव्याख्यानेन समुत्पादितं-संशयमपनेतुं स्त्रीणां वेदाध्ययनेऽनधिकारविषये भूयः किञ्चिदिहोल्लिलिखिष्यते। तत्र च ननु मा स्तु शूद्राणां शूद्राणांञ्च वेदाध्ययनेऽनधिकारः किञ्च "आचार्यादणत्व" मित्यत्र स्वयं वेदव्याख्यात्रीं स्त्रियमाचार्यां ब्रवाणः कात्यायनः स्त्रीणां वेदाध्ययनेऽधिकारं मनुते। 'वसन्ते ब्राह्मणमुपनयीते' त्याद्युपनयनाग्न्याधानादिविधिवाक्येषु ब्राह्मणादिपदानां-जातिवाचकत्वाद् ब्राह्मण्यादीनां स्त्रीणां वेदाध्ययनेऽग्न्याधाने चाधिकारोऽस्तु, श्रूयतेऽपि गार्गीमैत्रेय्याद्यास्त्रैविद्या ब्रह्मवादिन्य इति पूर्वः पक्षः सिद्धान्तस्तु नास्ति स्त्रीजाते र्वेदाध्ययनेऽधिकारः। उच्यते च—"स्त्रीशूद्रौ नाधीयाता" मिति श्रुतेर्वैवाहिको विधिस्त्रीणां संस्कारो वैदिकः स्मृतः। पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रियेति स्मृतेश्च ब्राह्मण्यादीनां स्त्रीणामपि वैवाहिकविधेरेवोपनयनस्थानीयत्वात् स्त्रीजातेरेवानुपनेयत्वात् सर्वासामेव स्त्रीणां वेदाध्ययनेऽधिकारो नास्त्येव। उक्तश्रुतेरकल्पितत्वमनादित्वञ्च पूर्वमेवोक्तं सत्यवसरे उपरिष्टाद् बहु वक्ष्यामः।

"आचार्यादणत्व" मिति वार्त्तिकं तु स्वयं वेदव्याख्यात्र्याः स्त्रिय "आचार्यादणत्व" मिति वार्त्तिकं तु स्वयं वेदव्याख्यात्र्याः स्त्रिय "आचार्या" इत्याख्यसंज्ञाविधायक—प्रत्ययप्रदर्शकमस्ति, न खलु तत् स्त्रीकर्तृकस्य वेदव्याख्यानस्य शास्त्रसम्मतत्वं प्रतिपादयति। पुरुषेण सहैव स्त्रियो यज्ञेऽधिकारविधिप्रतिपादनावसरे श्रौतसूत्रे व्याकरणवार्तिककारो-भगवान् कात्यायनोऽस्मदुक्तमेवाऽऽशयं विशदोचकार इत्यत उक्तव्याकरणवार्तिकबलेन स्त्रीणां वेदाध्ययनेऽधिकारसिषाधयिषा तु दुराशा मात्रमेवास्ति। मुख्यतया लौकिकवैदिकशब्दानुशासनप्रयोजनात्मकत्वाद् व्याकरणशास्त्रे तु शास्त्रविरुद्धाऽऽचरणवाचकशब्दानामपि प्रकृतिप्रत्ययादिनाऽनुशासनं दरीदृश्यते। एवमेव च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"आचार्या" शब्दस्यापि गतिरवगन्तव्या । इत श्च "वसन्ते ब्राह्मणमुपनीयते" त्यादिवाक्येषु "ब्राह्मणा" दिपदानां पुरुषत्वावच्छिन्नजात्यादिमत्त्वे सति ब्राह्मणत्वादौ शक्तिरस्ति । अन्यथा शास्त्रविरोधापत्तेः । तथा च स्मर्यते त्रैवर्णिकस्त्रीणामपि वैवाहिको विधिरेवोपनयनस्थानीय इत्यादिना ।

यच्चोपनिषदादिषु वैदिकवैदुषीमासेदुषीं स्वोयां शेमुषीं प्रदर्शयामासुः काश्चन स्त्रियोऽतोऽस्ति स्त्रीणां-वेदाध्ययनेऽधिकार इत्युच्यते तदप्यरोचकम् । तत्र खलु गर्गगोत्राणामृषीणां जातिर्गार्गी । मैत्रेयगोत्राणाञ्च मैत्रेयीति तयोर्जात्यो र्भूयान्सो ब्रह्मविदो बभूवुः । ते पुनर्याज्ञवल्क्यादिभिः सह ब्रह्मवद्याः कथाश्चक्रुरिति "मञ्चाः क्रोषन्ती" तिवत्तत्तजात्युद्भवा ब्रह्मवादिनो द्विजा इति लक्ष्यार्थोऽवगन्तव्यः। तथा चात्र षड्लिङ्गोपेतत्वमप्युक्तवाक्यानां सिध्यति । किञ्च लेखभूयस्त्वभिया नेह भूयः प्रपञ्चायोद्यम्यते ।

वस्तुतस्तु स्त्रीणां वेदाध्ययनाधिकारोऽस्तीति क्वचिल्लक्ष्यतेऽपि चेत् स खलु "पुरा काले तु नारीणां मौञ्जीबन्धनमिष्यते, अध्यापनं च वेदानां सावित्रीवाचनं तथे ति स्मृतेः कल्पान्तरविषयत्वादुपेक्षणीय एव । स्मृतिवचनमिदं वादिसम्मतस्मृतिष्वनुक्तत्वादपि नेदमालम्बनं तेषां स्वाभीष्टसिद्धौ ।

एवमुक्तप्रमाणपुञ्जेन स्त्रीशूद्रयो र्वेदाध्ययनेऽनधिकारः सुतरां सिद्धः । परमनेन मानवसमाजे सनातने धार्मिकसमाजे वा स्त्रीशूद्रयोर्हीनता नैव सिध्यति ।

प्रत्युत "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता" इत्यादिना स्त्रीसमाजस्य "न शूद्रे पातकं किञ्चित्" इत्यादिना शूद्राणां धार्मिकसमाजे विशिष्टं महत्त्व मक्षिलक्ष्यीभवति ।

स्त्रियः शूद्रा द्विजबन्धवो द्विजाश्चैहिकं पारलौकिकं च सुखमपि सदृशं समीधिगच्छन्तीति "स्त्रियः शूद्रास्तथा वैश्यास्तेऽपि यान्ति परां गतिं" "स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः" इत्यादिना स्फुटमेव ।

किन्तु स्त्रियः शूद्रा द्विजबन्धवश्च पौराणिकविधिना द्विजास्तु वैदिकविधिनेत्यस्ति कर्मविधिभेदः स च फलसाम्ये व्यापारभेदमिव "पानं सुधाया अमृतत्वहेतु पात्रं न हैमं न च राजतं वे" तिन्यायादकिञ्चित्कर एव ।

इतश्च स्त्रीशूद्रयोर्ज्ञानदौर्बल्यं श्रमप्राबल्यं द्विजेषु तु श्रमदौर्बल्यं ज्ञानप्राबल्यमित्यस्ति चातुर्वर्ण्यस्य मिथः पूरकत्वं पारस्परिकप्रेमप्रवणत्व मन्योन्याश्रितत्वमित्याधुनिकसुधारकाणां वैदिकमानिनामनर्गलप्रलपनेन विद्वेषाग्नौ निपत्य न कलहायितव्यं न विमनायितव्यं वा चातुर्वेर्ण्येन ।

दृश्यते हीदानीमपि तथाकथितेषु विकसितदेशेषु पुरातनधार्मिकदृशा त्वविकसितेषु साम्यवादिषु देशेष्वपि श्रमजीविबुद्धिजीविवर्गयोर्मिथो वैमनस्यं वैषम्यं कलहाऽऽकुलत्वमनैतिकत्वञ्चेति किमु परदूषणवर्णनेन ।

अतः सनातनवर्णधर्मानुसारं ससुखं सस्नेहं च चिरं जीवनं यापयतु चातुर्वर्ण्यमिति श्रीसर्वेश्वरस्मरणपुरस्सरं विरम्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाराणा अमरसिंहः

श्रीगिरिराजशर्मा शास्त्री, जयपुरम् ।

महाराणाप्रतापस्य मृत्योरनन्तरं तस्य ज्येष्ठो राजकुमारः श्रीअमरसिंहः राज्यारूढोऽभूत् । राज्यारोहणानन्तरं तेन मेवाडशासने अनेकानि प्रजाहितार्थं नियमादिकानां व्यवस्थादीनि कृतानि। कालान्तरे प्राप्ते सति महाराणा-अमरसिंहेन तान्येव कार्याणि कृतानि येषां विषये महाराणाप्रतापसिंहः आशंकित आसीत् । तेन महाराणा प्रतापस्यावासस्थले निर्मितानि सर्वाणि पर्णकुट्यादीनि उत्पाट्य तत्र 'अमरप्रासाद'-नामक एकः सुविशालः प्रासादः निर्मापितः । तस्यानेन कृत्येन महाराणाप्रतापस्याज्ञाया अवहेलना कृता । तदनन्तरं सपरिवारः सः स्वसमर्थकैः मित्रैश्च सह तत्रैव निवासं कर्तुमारब्धवान्। महाराणाप्रतापस्य विशिष्टानुयायिलघुराजभिः सामन्तैश्च एतद्कृते वारंवारं निषिद्धोऽपि स कस्यापि कथनं न श्रुतवान् । महाराणाअमरसिंहस्याधीनाः ते सर्वे वराकाः समन्ताः तस्मिन् समये मौनिनो भूत्वाऽतिष्ठन् ।

महाराणाप्रतापस्य स्वर्गारोहणानन्तरं अष्टवर्षाणि व्यतीतान्यभूवन् । दिल्लीश्वरः अकबरोऽपि तदनन्तरं परलोकगामी समभूत् । तदा तस्य सलीमाख्यो राजकुमारः 'जहांगीर' इत्याख्यातः सिंहासनारूढोऽभूत् । राज्यारोहणाच्चत्वारि वर्षाणि यदा व्यतीतानि तदा तस्य ध्यानं मेवाडप्रदेशस्योपरि गतम् । तेन एका विशाला सेना मेवाड़जयार्थं संप्रेषिता ।

अमरसिंहेनाऽपि दिल्लीतः मेवाड़ प्रति सेनाप्रयाणस्य वार्ता श्रुता तेन किन्तु चिन्ताविरहितेन न काऽपि रणसज्जा कृता । इदं सर्वं औदासीन्यं विलोक्य सामन्तसरदारगणाः अत्यधिकाः सचिन्ता अभवन् । तैः सर्वैः महाराणाप्रतापस्य सम्मुखं 'प्रत्येकं परिस्थितिषु 'मेवाड़रक्षा भविष्यत्येव' इति प्रतिज्ञा कृताऽऽसीत् । ते सर्वे 'अमरप्रासादे' सम्मिलिता अभूवन् । ते अमरसिंहं मुगलानां आक्रमणस्य वार्तां श्रावितवन्तः । अमरसिंहेन किमप्युत्तरं न दत्तम् । स तु सर्वेषां सामन्तानां सम्मुखं मौनमाश्रित्यैव अतिष्ठत् ।

मेवाड़प्रदेशोपरि आक्रमणार्थं मुगलसेनायाः प्रयाणस्य संवादं श्रुत्वाऽपि महाराणा अमरसिंहस्य मुखमण्डले कस्या अपि प्रतिक्रियायाश्च अभावं दृष्ट्वा ते सर्वे सामन्ताः क्रोधनिमग्नाः संजाताः । चन्दावतसरदारः क्रुद्धो भूत्वा इदमवोचत् 'महाराज ! किं भवान् इत्थमेव स्वप्रतिज्ञायाः युष्माकं पितुः पूजस्य महाराणाप्रतापस्य आज्ञायाः परिपालनं करिष्यति' ? शत्रुः समरार्थं सज्जो भूत्वा मेवाड़प्रदेशं प्रति दैनन्दिनं निकटतरं आगच्छति, भवांश्च कापुरुषवत् मौनमालम्ब्य अवस्थितोऽस्ति । मुगलसैनिका अत्र आगत्य जनधनविनाशं करिष्यन्ति युष्माकं प्रजाः विलपन्त्यः इतस्ततः पलायिष्यन्ते, भवांश्च मूकबधिरवत् निर्विकारो भूत्वाऽवलोकयिष्यति ? किं यदि भवति पूर्वजानां गौरवरक्षायाः साहसं नाऽस्ति चेत् किमर्थं एतस्य महाराणावंशस्य कुले समुत्पन्नो भवान्, यदि भवद्भ्रातृजयोः मेवाड़शासनस्य रक्षायाः बलं नाऽस्ति तर्हि किन्निमित्तं अस्य पवित्रवंशोचितस्य सिंहासनस्य पावित्र्यं दूषितं त्वया ?

महादाश्चर्यस्य विषयोऽयम्, एतस्य समयोचितस्य कथनस्य अमरसिंहस्योपरि कोऽपि परिणामो नाऽभूत् । सः वाणीरहितः मूकः सन् तेषां सामन्तानां समक्षं किंकर्तव्यताशून्यः विलोकयन् तिष्ठन्नासीत् । इदं विलोक्य चन्दावतसरदारः क्रोधातिरेकेण प्रमत्तवदभूत् । महाराणा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमरसिंहस्य पुरस्तात् विद्यमानं दर्पणं स्वहस्तेन उत्थाप्य भित्तौ क्षिप्तवान्, सिंहवद् गर्जन् अत्योजस्विन्या वाण्या तेन इदमुच्चरितम् 'तव मेवाड़प्रदेशस्य रक्षार्थं खड्गधारणं आवश्यकम्' इदं तेन महाराणा अमरसिंहस्य हस्तं गृहीत्वा सिंहासनाच्च अधस्तले आनीत सः समस्तान् सामन्तगणान् च सम्बोध्य तीक्ष्णया वाण्या निगदितं पुनः, 'भवन्तः सर्वे इमं कलंकात् रक्षन्तु, एषः कापुरुषः पूजस्य महाराणाप्रतापस्य पुत्रोऽस्ति, इमं अश्वोपरि आरोह्य युद्धे नयन्तु'।

वराकः अमरसिंहः किंकर्तव्यताविमूढः आसीत्। अपमानेन, क्रोधेन, दुःखेन च दह्यमानहृदयः स आसीत्। सामन्तैः स अश्वमारोपितः। सर्वैः पर्वतादधस्तलारोहणम् आरब्धम्। किञ्चित् कालानन्तरं अमरसिंहः प्रबुद्धोऽभूत्। सः स्वेनानुष्ठिते पुनः पुनः पश्चात्तापं कुर्वन् चन्दावतसरदारमवोचत् 'अहं निजेन कुकृत्येन खिन्नोऽस्मि, त्वं माम् क्षमस्व, अहं मुगलसेनया युद्धार्थं कृतसंकल्पोऽस्मि। इदं श्रुत्वा सर्वे सामन्ताः वाञ्छितं फलं प्राप्य अतीवप्रसन्ना अभूवन्। ते सर्वे अदम्येनोत्साहेन मुगलसैन्यं पराभवितुं धावन्तः आगच्छन्।

देवीराख्यरणक्षेत्रे द्वयोः सैन्ययोः युद्धम् आरब्धम्। शनैः २ युद्धं भीषणतरं संजातम्। महाराणा अमरसिंहस्य प्रोत्साहनेन मेवाड़सैन्यस्य क्षत्रियवीराणाम् अमितोत्साहेन मुगलसैन्यनाशः आरब्धः। प्रातःकालात् मध्याह्नपर्यन्तं घोरं युद्धमभूत् किन्तु विजयश्रीः कस्याऽपि पक्षस्य हस्तगता नाऽभवत्। अन्ततो गत्वा अतीवक्रुद्धैः मुगलसैन्यदलैः सायं समये शतघ्न्यस्त्रस्य प्रयोगः कृतः। धांयधांयध्वनिना समस्तं दिङ्मण्डलं संक्षुब्धमभूत्। सर्वत्र वायुमण्डलं धूमाच्छन्नं संजातम्। किन्तु क्षत्रियवीराः अनेन किञ्चिदपि व्याकुलाः नाऽभवन्। तैः सर्वैः खड्गहस्तैः धूम्रं विदीर्य मुगलसैन्योपरि तीव्रगत्या प्रहारः कृतः। द्वयोः सैन्ययोः परस्परं अतितुमुलं युद्धमभूत्। खड्गप्रहारैः अनेकैः सैनिकाः क्षतविक्षताश्च भूत्वा प्रबलतमवेगैः खड्गसंचालने यन्त्रवत् गतिमन्तः संजाताः। क्षत्रियाः अस्मिन् समये अतिप्रबलप्रमत्तवत् खड्गप्रहाकरणे रता आसन्। तेषां दृष्टिपथे शत्रुसंहारातिरिक्तं किमप्यन्यन्नासीत्। मुगलसैनिकाः क्षत्रियवीराणां सम्मुखं खड्गयुद्धे नाऽतिष्ठन्। तैः सर्वैः युद्धस्थलात् पलायनमारब्धम्। क्षत्रियवीरैः तेषां बहुदूरपर्यन्तम् अनुगमनं कृतम्। सम्पूर्णदिवसपर्यन्तं भीषणं संग्रामं कृत्वा विजयश्रियश्च प्राप्तिं विधाय, महाराणा अमरसिंहः अतीवसुप्रसन्नः स्वसैन्येन सह उदयपुरं प्रत्यागतोऽभूत्।

इदानीं महाराणाअमरसिंहस्य हृदयं युद्धस्य कृते निर्भयमभूत्। स मृत्योः भयात् मुक्तोऽभवत्। तदनन्तरं यदा यदा जहांगीरेण पादशाहेन स्वसैन्यं मेवाडजयार्थं प्रेषितं तदा तदा सर्वदैव अमरसिंहेन सा मुगलसेना पराजिता दिल्लीं प्रति सम्प्रेषिता च। प्रत्येकं युद्धं अमरसिंहेनैव जितम्। किन्तु जहांगीरेणाऽपि पुनः पुनः सैन्यप्रेषणं कृतम्। अन्तिमे एकस्मिन् युद्धे महाराणा अमरसिंहः पराजितोऽभूत्। तदनन्तरं अमरसिंहो जहांगीरेण सह सन्धिं कृतवान्। किन्तु परिणामस्त्वस्य इत्थमभूत् यत् अतीवखिन्नो अमरसिंहः राज्यसंचालने अन्यमनस्कः स्वज्येष्ठपुत्राय कर्णाय राज्यशासनं प्रदाय 'राजनचौकोपर्वतोपरि अगात्, तत्रैव च तस्य जीवनलीला समाप्ताऽभूत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बस दो या तीन बच्चे
होते हैं घर में अच्छे



परिवार नियोजन केन्द्र की पहचान लाल त्रिकोन

davp 67/337

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

श्रीविवेकानन्दशिलास्मारकसमितिः

अखिलभारतीया स्वामि—श्रीविवेकानन्दशिलास्मारकनिर्माणसमितिः घोषणामिमां कुर्वती परमं प्रमोदमनुभवति, यत् पूर्वयोजनानुसारं अक्टोबरमासीय १२ दिनाङ्के विजयादशम्याः पावने पर्वणि श्रीविवेकानन्दशिलायां भूमिपूजनानुपदमेव स्मारकनिर्माणकार्यं प्रारब्धं वर्तते।

निर्माणसामग्री शिलाद्वीपं यावत् पान्टूनवेडेषु टगनौसु च संचित्य प्रेष्यते। समितिः निर्माणसामग्र्या अरोहणावरोहणसौविध्यार्थं शिलाया मुख्यतटे अस्थायिनां नौघाटानां (नौ स्थानानां) निर्माणं कारितमस्ति। साम्प्रतं मद्रासराज्यस्य सार्वजनिकनिर्माणविभागस्य निर्माणाधीनेषु नौकाविश्रामेषु (घाट) निर्मितेषु सामग्रीसंवहनस्य तथा प्रस्तरयोजनायाश्च कार्ये तीक्ष्णगतिरायास्यति।

शिलातटेऽवतारितप्रस्तरान् अन्यामपि निर्माणसामग्रीं शिलाशिखरां स्मारकस्थलपर्यन्तं प्रापणार्थं शिलावतारभूमौ वाष्पयानलौहरेखाः (पटरियां) समास्तीर्णाः। यतो यन्त्रसाहाय्येन सामग्र्या उपरि समाकर्षणं सुशकं स्यात्।

स्मारकस्थलमुभयतः अवतारभूमौ जलाशयद्वयमपि निर्मितम्, यत्र सर्वयोजनेन एकलक्षगेलनतोऽप्यधिकं जलं संग्रहीतुं शक्यते। एतयोर्जलाशययोः वर्षाकालीनंजलं संग्रहीष्यते, यत् स्मारकनिर्माणकर्मणि सम्यक् उपयोक्ष्यते।

मुख्यातटात् स्मारकस्थलं यावत् विद्युत्प्रकाशप्रापणायापि समुद्रमध्य एव १६०० फीटप्रमाणदीर्घा किबिललाइनविस्तारयोजना कृतास्ति एषा विद्युत्तारारेखा आगामिनि दिसम्बरमासे राजकीयविद्युन्मण्डलद्वारा प्रारप्स्यत इत्याशा वर्तते।

समितिस्थापनाकालमारभ्यैव स्मारकार्थं धनसंग्रहस्य प्रयासः सामान्यगत्या प्रारब्ध एवासीत्, परन्तु एतत्कार्यस्य तीव्रगत्या प्रसारणाय भिन्नाः २ राज्यसमितयो हि संदृब्धाः। याभिः राज्यद्वारा धनसंग्रहाभियानं पूर्णवेगेन चालयितुं प्रावर्तत। महीशूरराज्यसमित्या गते वर्षे जनसम्पर्कद्वारा सार्द्धषट्लक्षरुप्यकाणि संचितानि।

विगतमाससार्द्धमासतः महाराष्ट्रीयसमित्या धनसंग्रहाभियानं चाल्यत एव। उत्तरप्रदेशस्य तथा गुर्जरप्रान्तीयराज्यसमितिभिः नवम्बरमासीय ५ दिनाङ्कत एतदर्थं धनसंग्रहाभियानं चालितम् गुर्ज्जरदेशे तत्रत्यराज्यपालश्रीनित्यानन्दकानूनगोमहानुभावेन धनसंग्रहाभियानमुद्घाटितम्, उत्तरप्रदेशाभियानोद्घाटनं च स्वयमुपराष्ट्रपति बी० वी० गिरिमहोदयेन कृतम्।

एवं पंचाम्बु–हिमालय, हरियाणा, दिल्ली, चण्डीगढप्रदेशानां समितिभिरपि अस्मिन्नेव पक्षे भिन्नासु तिथिषु धनसंग्रहाभियानानि समारब्धुं प्रयत्यते।

हरियाणाप्रान्ते एतदुद्घाटनं नवम्बरमासीय १० दिनाङ्के सोनीपते तत्रत्यराज्यपालश्री वी. एन. चक्रवर्तिनोऽध्यक्षतायामभूत्। राजधान्यां च (दिल्ल्याम्) नवम्बरमासीय ९ दिनाङ्के श्री वि० वी० गिरिणा उपराष्ट्रपतिना धनसंग्रहाभियानोद्घाटनं कृतम्।

छात्राणां श्रमिकाणां च सीमितसाधनवतां सामान्यजनानां च सौविध्यार्थं सैषा समितिः एका बहुरंगयुता आकर्षका संग्राह्या च एकरूपकयोग्या सचित्रा उपहारपत्रिका प्रकाशिता यस्यां पूज्यस्वामिमहाभागानां चित्रं तथा विवेकानन्दशिलायाः एवं तत्स्मारकस्य (यन्निर्मातुमस्ति)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आकृतयोऽङ्किताः सन्ति। छात्राणां समीपे श्रमिकाणां च सन्निधौ तत्तन्माध्यमद्वारा तथैव शिक्षणसंस्थानां कार्यालयानां च साहाय्येन एताः पत्रिकाः प्रापयितुं यत्यते। यतो हि ते प्रतिभेंटपत्रिकं एकं रूपकं समर्प्य अस्मिन् पवित्रे कर्मणि स्वं योगदानं कर्तुं शक्नुयुः।

सामान्यजनानामपि सहयोगप्राप्त्या सममेव राज्यसमितयः औद्योगिकसंस्थासु सार्वजनिकन्यासेषु जनप्रातिनिध्यकारिकासु संस्थासु, एवं मध्यवर्गीयजनतासु अपि एतमन्हाप्रयासार्थं धनं संग्रहीतुं यथावसरं प्रयान्ति।

अनया समित्या राज्यसर्वकारेभ्य एतत्कार्यपूर्त्यै एकमेकं लक्षं रूपकाणां प्राप्तुं सविनयोऽनुरोधः कृतः। राज्यसर्वकारैः समितये उत्साहवर्द्धकः सहयोगः प्राप्तः। तत्फलस्वरूपतो वयमिदं सगर्वं वक्तुं प्रभवामः एतत् शिलास्मारकं जनतायाः सर्वकाराणां च संयुक्तेन साहाय्येन साकारतां गच्छद्राष्ट्रीयायोजनमास्ते।

अद्यावधि पंचषः राज्यसर्वकारैरेकलक्षतोऽप्यधिकं पंचाम्बुवंग महीशूर महाराष्ट्र हरियाणाः प्रदेशतः प्राप्तम्। तथा उत्तरप्रदेशेन सार्द्धैकलक्षमितो धनराशिः समर्पितोऽस्ति। एतदतिरिक्तञ्च मद्रदेशसर्वकारेण अनुमानतः रूपकाणां लक्षत्रयव्ययेन मुख्यतटे शिलातटे च सुदृढनौकास्थानानां निर्माणभारः स्वीकृत आस्ते।

आशास्मो वयं यदागामिनि मासे मासद्वय एव शेषैरपि सर्वकारैर्वाञ्छितपरिमाण आर्थिकसहयोगः प्रदास्यते। एवं राजस्थानराज्यसर्वकारेणापि अन्यान्यसर्वकारसमं एव द्रव्यराशिप्रदानं कृत्वा अस्मिन् पावने कर्मणि सुसम्पन्नतायै योगः प्रदातव्यः।

स्मारकनिर्माणं ईश्वीय सन् १९६८ वर्षस्य अन्ते पूर्णं भविष्यति—इति वयमाशास्महे। अद्यावधि अस्माकं मद्रदेशीयराज्यकार्यालये तद्देशीयभिन्नेभ्यो भागेभ्यः विंशतिलक्षरूप्यकाणि प्राप्तानि। एतस्य धनराशेरधिकांशव्ययः संजातः। सम्प्रति समितेः समीपे एकलक्षमितो धनराशिरेवावशिष्यते।

अस्मिंश्च कर्मणि संशोधितानुमानानुसारं ५० पंचाशत्लक्षरूप्यकरूपो धनराशिर्व्ययीभावमेष्यति।

आशा तु इयती वर्तते यत् विभिन्नराज्येषु चलद्भिरभियानैः एकत्रितः सर्वधनराशिः निर्माणव्ययं पंचाशत्लक्षमितं राशिमप्युल्लंघयिष्यति। निर्माणसमितिश्च तद्राशिमुपयुज्य (योज्य) स्मारकेण समं समं स्वदेशस्य दक्षिणे प्रान्ते एकं सशक्तं सचेतनं केन्द्रं स्थापयितुं स्वाकांक्षां पूरयिष्यति, यतः स्वामिमहाभागद्वारा समुपदिष्टानि मनोनीतानि च कर्माणि संचालयिष्यति। यतः स्वामिमहोदयानां दिव्यं तेजः प्रवाहितं भूत्वा सर्वदेशमाप्लावयिष्यति।

किञ्च नवघटिताया राजस्थानराज्यसमितेः सदस्यानां सूच्याः समवलोकनेनेदं स्पष्टं प्रतीयते यत् पवित्रेऽस्मिन् कर्मणि राजस्थानस्य सर्वेषामपि वर्गाणां प्रतिनिधिभूतानां मान्यानां महानुभावानां सहयोगः पूर्णतया प्राप्तोऽस्ति यथा हि—

राजस्थानराज्यसमितिः

संरक्षकः—श्रीमोहनलालसुखाड़िया, मुख्यमंत्री राजस्थानम्,

अध्यक्षः—श्रीलक्ष्मीलालजोशीमहानुभावः अध्यक्षः म० शि० मण्डलम्,

उपाध्यक्षः—श्रीशिवचरणमाथुरः, शिक्षामंत्री राजस्थानम्, इत्यादयः

सदस्यगणः—स्वामी श्रीवीरराघवाचार्यः पुष्करम्, मुनिश्रीजिनविजयचंदेरिया, श्रीजगन्नाथपहाड़िया, उपमंत्री (वित्तं) भारतसर्वकारः, श्रीदामोदरलालव्यासः, गृहमंत्री, राजस्थानं, श्रीरामप्रसादलड्ढा, सिंचाईमंत्री राजस्थानम्, श्रीरामनिवासमिर्धा संसत्सदस्यः कांग्रेसः—इत्यादयः ४८ संख्यामिताः सदस्याः।

कोषाध्यक्षः—श्रीचन्द्रसिंहबोथरा जौहरी, मंत्री डा० श्रीखुशीरामभम्भाणी, संघटनमंत्री श्री कु० भँवरसिंहशेखावतः, इत्यादयः सन्ति पदाधिकारिणः।

—श्रीहरिशास्त्री, सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथा

प्रास्ताविकम्

श्रीगिरीराजशर्मा शास्त्री

प्रातःकालस्य समयः कालपुरुषस्य मङ्गलमयं स्वरूपमस्ति । रात्रेः तमोमयं स्वरूपं त्यक्त्वा कालपुरुषः अस्यां प्रभातवेलायां स्वस्य ज्योतिर्मयं स्वरूपं सर्वेषु प्राणिषु अनुग्रहार्थमाविर्भावयति । एतदर्थमेव प्रातःकाले मानवस्यान्तःकरणे मङ्गलमयाः संकल्पाः निसर्गतः एव समुत्पद्यन्ते । अस्माकं भारतवर्षस्य परम्परागतसंस्कृतेरनुसारेण परमात्मचिन्तनं, ध्यानयोगः, अध्ययनं, व्यायाम इत्यादीनाम् आत्मकल्याणकराणां कार्याणां कृते प्रातःकालस्य समय एव सर्वोत्कृष्टत्वेनाङ्गीक्रियते । स्वहितपराङ्मुखानां जीवानां उद्धारमार्गस्य दर्शकाः समग्राः साधवो महात्मानश्च प्रातःकाले समुत्थाय परमात्मनः चिन्तनस्य तत्स्तवनस्य च उपदेशान् अतीवोत्कटतया प्रदत्तवन्तः ।

प्रातःकाल का समय कालपुरुष का मंगलमय स्वरूप है । रात्री के तमोमय स्वरूप को त्यागकर कालपुरुष इस प्रभात के समय में अपना ज्योतिर्मय स्वरूप समस्त प्राणियों के के ऊपर कृपा करने के लिए प्रगट करता है । इसी कारण प्रातःकाल के समय मनुष्य के अन्तःकरण में मंगलमय संकल्प स्वाभाविकतया ही उत्पन्न होते हैं । हमारे भारतवर्ष की परम्परागत संस्कृति के अनुसार परमात्मचिंतन, ध्यानयोग, अध्ययन, व्यायाम इत्यादि आत्मकल्याणकारक कार्यों के लिए प्रातःकाल का समय ही सर्वोत्कृष्ट माना जाता है । अपने कल्याण मार्ग से पराङ्मुख जीवों के उद्धारमार्ग के दर्शक सारे साधु महात्माओं ने प्रातःकाल के समय उठकर परमात्मचिंतन का और उसके स्तुतिगान का उपदेश अत्यन्त उत्कटता से किया है ।

अस्माकं केषाञ्चिदपि जनानां स्मरणं स्यात् यत् यदा कोऽपि लेखकः व्याख्याता च कस्यापि महापुरुषस्य उल्लेखं करोति तदा स तस्य नाम्नः पूर्वं प्रातःस्मरणीय इति उपधिना तं विभूषयति । उदाहरणार्थं बालगङ्गाधरस्तिलक अनेनैवोपाधिना विभूषितोऽभूत् । किमस्त्यस्य तात्पर्यम् ?

हममें से कुछ लोगों को स्मरण होगा कि जब कोई लेखक और व्याख्याता किसी भी महापुरुष का उल्लेख करता है तो वह उसके नामके पूर्व प्रातःस्मरणीय इस उपाधि से उसको विभूषित करता है । उदाहरणार्थ जैसे बाल गंगाधर तिलक इसी उपाधि से विभूषित थे इसका क्या तात्पर्य है ?

प्रातःस्मरणीयस्यास्ति अयमर्थः यत् प्रातःकाले स्मरणयोग्याः जनाः । अनेन विषयद्वयस्य संकेतो भवति । प्रथमस्तु प्रातःकालस्य महत्त्वं प्रकटयति अपरश्च तस्य महाजनस्य विभूतिमत्त्वं दर्शयति ।

प्रातःस्मरणीय का यह अर्थ है कि प्रातःकाल के समय स्मरणयोग्य लोग । इससे दो बातों का संकेत होता है । प्रथम तो प्रातःकाल के समय का महत्त्व प्रगट होता है और दूसरे उस महान् व्यक्ति के विभूतिमत्व को प्रगट करता है ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रातःकालस्य महत्वं अस्माकं देशे सुमहत् परिगणितं भवति । विश्रान्तिमयरात्रेः कर्ममयदिवसस्य च अयमस्ति सन्धिकालः । तं समयं वयं पवित्रवेलां मन्यामहे यदि प्रातः कोऽपि असत्यभाषणं कुरुते तर्हि इदं अत्यन्त-मनुचितं मन्यन्ते जनाः । तस्मिन् समये अस्माकं मनः सोत्साहं हृदयञ्च सुप्रसन्नं भवति । तस्मिन् काले अस्माकं बुद्धिः निर्मला भवति । एतादृशे समये वयं मनसि यान् २ विचारान् करिष्यामः यान् संकल्पांश्च करिष्यामः तदनुसारनेव अस्माकं स दिवसो व्यतीतो भविष्यति । तस्मिन् समये मनसि उच्चविचारणां प्रादुर्भावो भवेत् पवित्राणां श्रेष्ठकार्याणां च सम्पादनस्य च संकल्पः स्यात् इत्यस्ति अस्माकं परम्परागता शिक्षा । यथा "ब्राह्मे मुहूर्ते चोत्थाय चिन्तये-दात्मनो हितम्" ।

प्रभातवेलायां वयं येषां महानुभावानां स्मरणं कुर्मः तेषां योग्यता महती एव भवेत् येन तेषां विभूतिमत्वे, पुण्यचरित्रप्रकाशे च वयं स्वजीवनपथं आलोकयितुं समर्था भवेम । तेषामेव स्मरणं वयं प्रातःवेलायां कुर्याम । चरित्रस्य निर्मलता, वृत्तेः दृढता, एकाग्रता, निर्भीकता तथा परिश्रमशीलता इत्यादयः श्रेष्ठजीवनस्य आधारस्तम्भवत् ये गुणाः प्रतीयन्ते तान् स्वजीवने प्रकाश्य ये जनाः समाज-जीवने पथप्रदर्शकत्वेन अवस्थिता अभूवन् तानेव महानुभावान् प्रति एष प्रातःस्मरणीयतायाः उपाधिः प्रदत्तोऽस्ति विद्वद्भिः । इदं विशेषणं सर्वसम्मत्या प्रदत्तं तस्मै श्रेष्ठपुरुषाय तस्य श्रेष्ठतायाः प्रमाणभूतमेवास्ति ।

प्रातःकाल का महत्व हमारे देश में बहुत महत्वपूर्ण गिना गया है । विश्रान्तिमय रात्री का और कर्ममय दिवस का यह सन्धि-काल है । उस समय को हम पवित्रबेला मानते हैं । यदि प्रातःकाल में कोई असत्य भाषण करता है तो लोग इसे अत्यन्त अनुचित मानते हैं । उस समय हमारा मन उत्साहपूर्ण और हृदय सुप्रसन्न रहता है । उस समय हमारी बुद्धि निर्मल रहती है । ऐसे समय में हम मन में जिन-जिन विचारों को करेंगे जिन संकल्पों को करेंगे उनके अनुसार ही हमारा वह दिन व्यतीत होगा । उस समय मन में उच्चविचारों का प्रादुर्भाव हो, पवित्र और श्रेष्ठकार्यों के सम्पादन का संकल्प किया जाय यह हमारी परम्परागत शिक्षा है । जैसे :—

"ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितम्"

प्रातः ब्राह्म मुहूर्त में उठकर अपने हित का चिन्तन करें । प्रातःकाल के समय हम जिन महानुभावों का स्मरण करें उनकी योग्यता महती ही होनी चाहिये जिससे उनके विभूति-मत्व और पुण्यचरित्र के प्रकाश में हम अपने जीवनपथ को आलोकित करने को सफल हों, उन्हीं का स्मरण हम प्रातःकाल में करें । चरित्र की निर्मलता, वृत्ति की दृढता, एकाग्रता, निर्भीकता तथा परिश्रमशीलता इत्यादि श्रेष्ठ जीवन के आधार-स्तम्भवत् जो गुण दिखते हैं उन्हें अपने जीवन में प्रकाशित करके जो लोग समाजजीवन में पथप्रदर्शक होकर खड़े रहे हैं उन्हीं महानुभावों को विद्वानों द्वारा यह प्रातः स्मरणीयता की उपाधि प्रदत्त की गई है । यह विशेषण सर्वसम्मति से प्रदत्त उस श्रेष्ठ-पुरुष के लिए उसकी श्रेष्ठता का प्रमाणभूत ही है ।

इदानीं वयं परम्पराप्राप्तस्य प्रातःस्मरणस्य विषये विचारं करिष्यामः । अस्य प्रातःस्मरणस्य-

अब हम परम्पराप्राप्त प्रातःस्मरण के विषय में विचार करेंगे । इस प्रातःस्मरण के

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्चारणस्य प्रथा एषु दिवसेषु लुप्तप्राया दृश्यते किन्तुव शितिवर्षेभ्यः पूर्वं अस्माकं देशस्य प्रत्येकं प्रान्ते प्रत्येकं सुगृहे वृद्धाः पुरुषाः स्त्रियश्च प्रातः समुत्थाय अस्य सहस्रावधिवर्षेभ्यः प्रचलितस्य प्रातःस्मरणस्य पाठं कुर्वन्ति स्म। अयं तेषां दैनिकजीवनस्य प्रथमः कार्यक्रम एवासीत्। गृहस्थानां बालकानां बालिकानां च इदं स्तोत्रं पाठितमासीत्। पुराणप्रवचनैः कथागीतैश्च स्वपूर्वपुरुषैः सह बालकानां परिचयो भवति स्म। अनेन प्रातःस्मरणेन च स महापुरुषपरिचयः दृढतामापन्नः संस्काररूपेण परिणतः क्रियते। स्म। बालानां चरित्रशिक्षायां चरित्रघटनस्य च अयं अनिवार्यमङ्गमिव समभूत्। अनेन आयासेन विनैव संस्कृतवाण्याः प्रारम्भिकः परिचयः बालकानां जायते स्म, तथा तेषां स्मरणशक्तेः विकासेऽपि अयं सहायकोभवति स्म।

उच्चारण की प्रथा इन दिनों में लुप्तप्राय दिखती है किन्तु बीस वर्षों से पूर्व हमारे देश के प्रत्येक प्रान्त में प्रत्येक घर में वृद्धपुरुष तथा स्त्रियाँ प्रातः उठकर इस हजारों वर्षों से प्रचलित प्रातःस्मरण का पाठ करते थे। वह उनके दैनिक जीवन का प्रथम कार्यक्रम ही होता था। घर के बालकों और बालिकाओं को यह स्तोत्र पढाया जाता था। पुराणप्रवचन तथा कथा गीतों के द्वारा अपने पूर्वपुरुषों के साथ बालकों का परिचय होता था। तथा इस प्रातःस्मरण से वह महापुरुष का परिचय पक्का होकर संस्कार रूप में परिणत किया जाता था। बालकों की चरित्र शिक्षा और चरित्रघटन का यह अनिवार्य अङ्ग की तरह हो गया था। इससे अनायास ही संस्कृत भाषा का प्रारम्भिक परिचय भी बालकों को हो जाता था। और उनकी स्मरणशक्ति के विकास में भी यह सहायक होता था।

अपरा या वार्ता अस्य प्रातःस्मरणस्य विषये विचारणीयास्ति सा अस्य अखिलभारतीयता। समस्ते भारतवर्षे एकमेव प्रातःस्मरणं प्रचलितमासीत्। यद्दक्षिणे उच्चरितमासीत् तदेवोत्तरेप्यासीत्। तत्र स्थानीयभेदः न क्रियते स्म। एषा वार्ता वस्तुतः अस्माकं राष्ट्रियत्वस्य परिचायिकाऽस्ति, तया च यः संस्कारो भविष्यति सोऽपि प्रातःस्मरणस्य अवलोकनेनैव स्फुटं भविष्यति। यान् जनान् वयं स्वराष्ट्रिग्रादर्शानां सगुणां साकारां मूर्तिं कथयितुं शक्नुमः, यत्कारणादेव अस्माकं राष्ट्रस्य मस्तकं संसारे समुन्नतमभूत् एतादृशानां पूज्यविभूतीनामेव नामानि वय प्रातःस्मरणे प्राप्नुमः। अतः यदि इदं प्रातःस्मरणात्मकं स्तोत्र वयं भारतभक्तिस्तोत्रं कथयाम तर्हि इदं पूर्णं : समुचितं भविष्यति।

दूसरी जो बात इस प्रातःस्मरण के विषय में विचारणीय है वह है इसकी अखिलभारतीयता। सम्पूर्ण भारतवर्ष में एक ही प्रातःस्मरण प्रचलित था। जो दक्षिण में बोला जाता था वहीं उत्तर में भी था। वहां स्थानीय भेद नहीं किया जाता था। यह बात वस्तुतः हमारे राष्ट्रियता की परिचायक है उसके द्वारा जो संस्कार होगा वह भी प्रातः स्मरण के अवलोकन से स्पष्ट हो जायगा। जिन लोगों को हम अपने राष्ट्र के आदर्शों को सगुण साकार मूर्ति कह कसते हैं, जिनके कारण से ही हमारे राष्ट्र का मस्तक संसार में समुन्नत था ऐसे पूज्य विभूतियों के नाम ही इस प्रातःस्मरण में पाते है। अतः इस प्रातः स्मरणात्मक स्तोत्र को हम भारतभक्तिस्तोत्र कहें भी तो भी यह पूर्ण समुचित होगा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयमस्ति महादुःखस्य विषयो यत् अत्र लिखितानां महापुरुषाणां अथवा स्थानानां विषये वयं केवलं नाममात्रमेव जानीमः, अन्यत् किमपि तेषां विषये न जानीमः। एतादृशा अपि जना अत्र वर्तन्ते ये तेषां नामपरिचयमपि न जानन्ति। इदमस्ति देशोपरि विदेशीयशासकानां दुःशासनस्य कुफलम्। विचारे कृते सति इदं सुस्पष्टं ज्ञातं भवेत् यत् अस्मासु राष्ट्रियताभरणस्य सत्संस्काराः अनेनैव प्रमुखसाधनेन भवन्ति स्म, वर्तमानसमयेऽप्यस्ति च।

भारते जन्मग्रहणात् अत्रत्येन जलवायुसेवनेन अथवा अत्रोत्पन्नेन धान्याद्युपभोगेन वयं न स्म राष्ट्रियाः। राष्ट्रभावनाऽस्ति हृदयग्राह्यं वस्तु। तत्तु आत्मिकं चैतन्यमयं वस्तु वर्तते न च भौतिकं किन्तु भौतिकशरीरमधिष्ठाय यथा आत्मा कार्यक्षमो भवति अस्य भौतिकस्य तुच्छशरीरस्य आश्रयेण विना वायुमध्ये लम्बमानः स चैतन्यमय आत्माऽपि किमपि कर्तुं न सक्षमः तथैव राष्ट्रियभावनायाः विकासः कार्यक्षमताऽपि च अतीतकालस्य प्रत्यक्षं कुर्वाणानां ऐतिहासिकावशेषाणां तथा राष्ट्रियमहापुरुषाणां यथार्थ परिचयोपरि निर्भराः सन्ति। एतेषां महापुरुषाणां सम्पर्केण अस्माकं रुधिरस्य एकैकोऽपि विन्दुः हिन्दुत्वभावनया अभिमन्त्रितो भवति। अनेकशतवर्षपर्यन्तं अत्याचारि-विधर्मिशासकानां अत्याचारयुक्ते कुशासने न्यवसन्नपि अस्माकं समाजः यथावत् अवस्थितोऽस्ति। तस्यास्ति इदमेव राष्ट्रियजागरणार्थं प्रदत्ताः संस्कारपरम्परा मूलभूतं कारणम्।

यह महान् दुःख का विषय है कि यहाँ लिखे महापुरुषों अथवा स्थानों के विषय में हम केवल नाममात्र को ही जानते हैं अन्य कुछ भी उनके विषय में हम नहीं जानते। ऐसे भी लोग यहां हैं जो उनके नामपरिचय को भी नहीं जानते। यह है देश पर विदेशीय शासकों के कुशासन का कुफल। विचार करने पर यह हमें सुस्पष्ट ज्ञात हो जायगा कि हममे राष्ट्रियता भरनेवाले सत्संस्कार इसी प्रमुख साधन द्वारा होते थे और वर्तमान समय में भी होते हैं।

भारत में जन्मग्रहण करने से यहां की जलवायु सेवन से अथवा यहां उत्पन्न धान्यादि के सेवन से हम राष्ट्रिय नहीं है। राष्ट्रभावना हृदय से ग्रहण करने योग्य वस्तु है। वह तो आत्मिक चैतन्यमय वस्तु है, भौतिक नहीं। किन्तु भौतिक शरीर का आधार लेकर जैसे आत्मा कार्यक्षम होता है, इस भौतिक तुच्छ शरीर के आश्रय के बिना वायु में लटकता सा चैतन्यमय आत्मा भी कुछ भी करने को समर्थ नहीं है। वैसे ही राष्ट्रिय भावना का विकास और कार्यक्षमता भी अतीतकाल को प्रत्यक्ष करनेवाले ऐतिहासिक अवशेषों और राष्ट्रिय महापुरुषों के सच्चे परिचय पर ही निर्भर है। इन महापुरुषों के सम्पर्क से हमारे रक्त का एक एक बूंद हिन्दुत्व की भावना से अभिमन्त्रित हो जाता है। सैंकड़ों वर्ष पर्यन्त अत्याचारी विधर्मी शासकों के अत्याचारयुक्त कुशासन में रहकर भी हमारा समाज जैसे का तैसा अवस्थित है। उसका यह राष्ट्रियता जगाने हेतु प्रदत्त संस्कारों की परम्परा ही मूलभूत कारण है।

तस्मिन् काले प्रस्तरनिर्मितानि अनेकानि मन्दिराणि शासकैः ध्वस्तानि, किन्तु जनानां हृदयेषु संस्कारोत्पन्नभावनायाः कारणात् यानि आकांक्षामन्दिराणि निर्मितान्यासन् तेषु ये

उस समय पत्थर से बने अनेक मन्दिर शासकों द्वारा तोडे गए किन्तु मनुष्यों के हृदयों में संस्कारों से उत्पन्न भावनाओं के कारण जो आकांक्षाओं के मन्दिर निर्मित किए गए थे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदर्श-स्वरूपाः देवाः सुप्रतिष्ठिताः आसन् तेषां विनाशं कर्तुं तत्कालीनाः परकीयाः शासकाः न शक्ता अभूवन्। तस्मिन् काले सुदूरेषु पाटन-गराणां राजप्रासादेषु निवसन्तः ते राज्य-संचालने तत्पराः आसन् अत्र च प्रत्येकग्रामे एव न, अपि तु प्रत्येकगृहे अस्माकं महातीतस्य कथागाथाः श्रवणगोचरीभवन्ति स्म। बालकाः स्वमातुः दुग्धेन सह तस्या एव मुखात् अस्य अमृतरसं नित्यं (प्रतिदिनं) पिबन्ति स्म। तस्य च परिणामात् तेषां हृदयेषु जातीयभावनायाः जातीयादर्शाणां च तेजस्विबीजस्य वपनं भवति स्म। अस्यैवासोदयं परिणामः यत् यदा विधर्मि-शासकैः यत्र कुत्राऽपि अस्माकं एकं मन्दिरं ध्वस्तं कृतं तदा ते अस्माकं पूर्वपुरुषाः तत्र चत्वारि मन्दिराणि नवनिर्मितानि कृत्वा जातीयभाव-नायाः प्राचीनं स्रोतः रक्षन्ति स्म। स्व जातेरप-मानस्य एकैकस्या अपि घटनायाः समाचारः इत्थं जनेषु स्वराष्ट्ररक्षार्थं अधिकाधिकं त्यागं कर्तुं पौरुषं प्रकटयितुं च प्रवर्तयति स्म।

अद्यतनीयः समयः पूर्णतः परिवर्तितः जातः। अद्य सा पवित्रा, गौरवमयी आशावादेन परिपूर्णा पुरुषार्थस्य प्रेरणादात्री जातीयभावना विस्मृतिगर्ते पतिता इव दृश्यते। अतीतं गौरव-मयं इतिहासं विस्मारयितुं, अथवा विकृतं सम्पा-दयितुमस्मद्धितविरोधिनो जनास्तु प्रयासं कुर्वन्त्येव, परं तेषां कुटिलतापूर्णेषु कृत्येषु स्व-मुग्धताया वा कुसंस्काराणां वशात् अजानाना अपि सहयोगिनोऽस्माकं समाजस्य जना अद्य दृष्टिपथमायान्ति। एतादृशे समये च येऽपि राष्ट्रस्य वस्तुतः कल्याणं कामयन्ते ते या प्राचीन-प्रथा अस्माकं राष्ट्रस्य भावं सवर्धयितुं शक्नोति तस्याः पुनरुज्जीवनं कुर्युः, राष्ट्रियभावनायाः स्रोतश्च विषयसम्प्रक्तं तथा खण्डितञ्च न भवे-दित्येतदर्थं प्रयतेरन्।

उनमें ये आदर्शस्वरूप देव सुप्रतिष्ठित थे उनका विनाश करने को ये उस समय के परकीय शासक सफल नहीं हुए। उस समय सुदूर राजधानियों के महलों में निवास करते हुए वे राज्य चलाने में तत्पर थे और यहाँ प्रत्येक गांव में ही नहीं अपितु प्रत्येक घर में हमारे महान् अतीत की कथा गाथा सुनाई देती थी। बालक अपनी माता के दूध के साथ उसी के मुख से इस अमृतरस को भी नित्य पीता था। उसी के परिणाम स्वरूप उनके हृदयों में जातीय भावना का और जातीय आदर्शों का तेजस्वी बीज बोया गया था। इसी का यह परिणाम था कि जब जब विधर्मी शासकों द्वारा जहां कहीं भी हमारा एक मन्दिर गिराया गया तो वे हमारे पूर्व पुरुष वहाँ चार मन्दिरों का नवनिर्माण करके जातीय भवना के प्राचीन स्रोत की रक्षा करते थे। अपने जातीय अप-मान की एक भी घटना का समाचार इस प्रकार के लोगों में अपने राष्ट्र की रक्षा के लिए अधिकाधिक त्याग करने को तथा पौरुष प्रगट करने को प्रवृत्त करता था।

आज का समय पूरी तरह परिवर्तित हो गया है। आज वह पवित्र, गौरवमयी, आशा-वाद से परिपूर्ण, पुरुषार्थ की प्रेरणा देनेवाली जातीय भावना विस्मृति के गड्ढे में गिरी हुई सी दिखती है। अतीत के गौरवमय इतिहास को भुलाने को अथवा विकृत बनाने को हमारे हितों के विरुद्ध लोग तो प्रचार कर ही रहे हैं किन्तु उनके कुटिलता पूर्ण कृत्यों में अपनी मूर्खता अथवा कुसंस्कारों के कारण अनजाने में भी सहयोग करते हुए हमारे समाज के लोग आज दिखाई देते हैं। ऐसे समय में जो भी राष्ट्र का वास्तविक कल्याण चाहते हैं वे जो प्राचीन प्रथा हमारे राष्ट्रभाव का संवर्धन करने में समर्थ हैं उनका पुनरुज्जीवन करें। राष्ट्रभावना का प्रवाह विषाक्त और खण्डित न हो एतर्थ प्रयत्न करें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकं समाजे राष्ट्रभक्तेः भावनायाः एषु दिवसेषु सर्वत्र अभावो दृश्यते। अस्या दुष्परिणामेन अद्य देशे साम्प्रदायिकतायाः, प्रादेशिकतायाः भाषावादस्य स्वरूपं धृत्वा संकीर्णता सर्वत्र दृग्गोचरीभवति। अनया संकीर्णतया राष्ट्रजीवनं दुर्बलंतरं कृतम्, दुर्बलता च सर्वासां विपत्तीनां मूलकारणमस्ति। अतः अस्माकं समाजस्यान्तःकरणे राष्ट्रभक्तेर्भावो दृढतरः स्यात् इत्यस्ति परमावश्यकं कर्तव्यम्।

इदं प्रातःस्मरणं अस्माकं परम्पराप्राप्तस्य प्रातःस्मरणस्य नवीनं संस्करणम्। अस्मिन् प्रातःस्मरणे त्रिंशत्श लोकाः सन्ति तेषु अधिकांशश्लोकाः अनुष्टुब्छन्दसि निबद्धाः सन्ति। आद्याः षड्श्लोकाः परम्परागतप्रातःस्मरणात् गृहीताः। सप्तमश्लोकतः दशमपर्यन्तेषु चतुर्षु श्लोकेषु क्रमशः भारतदेशस्य पवित्रपर्वतानां, नदीनां तथा नगराणां स्मरणं कृतमस्ति। एकादशे श्लोके अतिप्राचीनकालीनानां पूज्यानां मातॄणां, द्वादशे श्लोके च अर्वाचीनानां वीराङ्गनानां साध्वीनां च स्मरणं कृतमस्ति। त्रयोदशश्लोकात् सप्तदशश्लोकपर्यन्तं तस्यैव प्राचीनकालस्य (वैदिकस्य पौराणिककालस्य) धर्मधुरन्धराणां सम्राजां ऋषीणां च चिन्तनं अस्ति। सप्तदशश्लोके भारतवर्षीयजीवनस्य प्राचीनतमः कालखण्डः समाप्ति नीतः।

अष्टादश श्लोकात् द्वितीय ऐतिहासिकः कालखण्डः प्रारभ्यते। अस्मिन् सुदीर्घकाले संजाता बुद्ध-शंकर-ज्ञानेश्वर-तुलसीदास-नायन्मार-आलवारसदृशाः साधुपुरुषाः, चन्द्रगुप्त-विक्रम-प्रताप-शिवाजी-सदृशाणां वीराणां चिन्तनं कृतम्। एकविंशतिसंख्यके श्लोके भारतस्य नैसर्गिकीं सीमां समुद्रमपि च उल्लंघ्य यैः महापुरुषैः असंस्कृताय धर्महीनाय मानवसमूहाय संस्कृतेर्धर्मस्य प्रकाशप्रदानस्य महत्कृत्यं कृतं तेषां षड्दिग्विजयिवीराणां चिन्तनं कृतमस्ति।

हमारे समाज में राष्ट्रभक्ति की भावना का इन दिनों में सर्वत्र अभाव दिखाई देता है। इसके दुष्परिणाम के कारण आज देश में साम्प्रदायिकता, प्रादेशिकता तथा भाषावाद का स्वरूप धारणकर संकीर्णताने राष्ट्रजीवन को दुर्बल कर दिया है और दुर्बलता सारी विपत्तियों का मूलकारण है। अतः हमारे समाज के अन्तःकरण में राष्ट्रभक्ति के भाव दृढतर हों यही परमावश्यक कर्तव्य है।

यह प्रातःस्मरण हमारे परम्परागत प्रातःस्मरण का नवीन संस्करण है। इस प्रातःस्मरण में तीस श्लोक हैं इनमें अधिकांश श्लोक अनुष्टुप् छंद में निबद्ध हैं। आरम्भ के ६ श्लोक परम्परागत प्रातःस्मरण से लिये हैं। सातवें श्लोक से दसवें श्लोक तक चार श्लोकों में क्रमशः भारतदेश के पवित्र पर्वत, नदियां तथा नगरों का स्मरण किया है। ग्यारहवें श्लोक में अतिप्राचीनकाल की पूज्या माताएँ, बारहवें श्लोक में अर्वाचीन वीराङ्गनाओं और साध्वियों का स्मरण किया गया है। तेरहवें श्लोक से सत्रहवें श्लोक तक उसी प्राचीनकाल के (वैदिक पौराणिक काल के) धर्मधुरन्धर सम्राटों और ऋषियों का चिन्तन है। सत्रहवें श्लोक में भारतवर्षीय जीवन का प्राचीनतम काल खण्ड समाप्त हुआ है।

अठारहवें श्लोक से दूसरा ऐतिहासिक काल खण्ड प्रारम्भ होता है। इसमें सुदीर्घकाल में हुए बुद्ध-शंकर, ज्ञानेश्वर, तुलसीदास, नायन्मार-आलवार सदृश साधुपुरुष, चन्द्रगुप्त-विक्रम प्रताप-शिवाजी सदृश वीरों का चिन्तन किया गया है। इक्कीसवें श्लोक में भारत की नैसर्गिक सीमा को समुद्र को भी लांघ कर जिन महापुरुषों के द्वारा असंस्कृत धर्महीन मानवसमूहों को संस्कृति का धर्म का प्रकाश देने का महान् कृत्य किया है उन छै दिग्विजयी वीरों का चिन्तन किया है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२५, २६, २७ संख्यकेषु श्लोकेषु अद्यतनीयानां श्रीरामकृष्णपरमहंसादारभ्य डाक्टर-हैडगेवारपर्यन्तं हिन्दूधर्मनिष्ठानां समाजधुरीणानां चिन्तनमस्ति। सप्तदशश्लोकेषु (११ तः २७ पर्यन्तम्) केवलं दशोत्तरशतसंख्यकानां विभूतीनां (५३ वैदिकाः पौराणिकाः, ४४ ऐतिहासिकाः १३ अर्वाचीनाः) उल्लेखः अस्मिन् भारत-भक्तिस्तोत्रे कृतोऽस्ति। एतदतिरिक्तानां उल्लेखनीयविभूतीनां समावेशः सीमितसंख्यके श्लोकबद्धस्तोत्रे न सम्भव इति मत्वा अष्टाविंशतिसंख्यके श्लोके अनिर्दिष्टानां, अप्रसिद्धानां, प्राचीनानां, अर्वाचीनानाञ्च महात्मनां वीराणां कृते नतमस्तको भूत्वा भक्तियुक्तं प्रणमनं कृतम्। तदनन्तरं २९ श्लोके भारतमातुः वन्दनं कृतमस्ति। ३० श्लोके च अस्य भारतभक्तिस्तोत्रस्य प्राचीनपरम्परानुसारं फलश्रुतिः उल्लिखिताऽस्ति। यः इदं प्रातःस्मरणस्तोत्रं सम्यक् ज्ञात्वा आदरतः पठिष्यति सः सम्यक् धर्मनिष्ठो भविष्यति, तस्य च हृदये अखण्ड-भारतस्य स्मरणं सम्पत्स्यते।

भारतवर्षस्य समस्तानां प्रदेशानां इतिहासेन अस्य भारतभक्तिस्तोत्रस्य नामहारावल्यां संकलनं कृतमस्ति। अतः एव फलश्रुत्यां 'संस्मृताऽखण्डभारतः' अस्य शब्दस्य प्रयोगोऽपि अनयापेक्षया कृतः यत् अस्य नित्यपठनकर्तुः अन्तःकरणे अखण्डभारतस्य स्मरणं सदैव स्थास्यति।

अस्य प्रातःस्मरणस्तोत्रस्य पठनं जनानां अन्तःकरणं भारतभक्त्या परिपूर्णं कर्तुं प्रेरकं स्यात् इत्येव परमेश्वरस्य चरणयोः हार्दिकी प्रार्थना।

प्रतिदिनं प्रातःकाले व्यक्तिशः संघशः अस्य भारतभक्तिस्तोत्रस्य पठनं सङ्घ्रियताजागरणे सहायकं भवेत् इत्यस्ति पूर्णाऽपेक्षा।

२५, २६, २७वे श्लोकों में वर्तमान समय के श्रीरामकृष्ण परमहंस से लेकर डाक्टर हैडगेवार पर्यन्त हिन्दू-धर्मनिष्ठ समाजधुरीणों का चिन्तन है।

सत्रहश्लोकों में (११ से २७ तक) केवल एकसोदश संख्या में महापुरुषों का (५३ वैदिक पौराणिक, ४४ ऐतिहासिक, १३ अर्वाचीन) उल्लेखनीय विभूतियों का समावेश सीमित संस्यावाले श्लोक बद्धस्तोत्र में सम्भव नहीं है यह मानकर अठाइसवें श्लोक में अनिर्दिष्ट, अप्रसिद्ध प्राचीन अर्वाचीन महात्माओं; वीरों के लिए नतमस्तक होकर भक्तियुक्त प्रणयन किया गया है। इसके पश्चात् उनतीसवें श्लोक में भारतमाता का वन्दन किया गया है। तीसवें श्लोक में इस भारतभक्ति स्तोत्र की प्राचीन परम्परानुसार फलश्रुति उल्लिखित है। जो इस प्रातःस्मरण स्तोत्र को ठीक प्रकार से समझकर आदरपूर्वक पढेगा वह ठीकप्रकार से धर्मनिष्ठ होगा और उसके हृदय में अखण्ड भारत का स्मरण होगा।

भारतवर्ष के समस्त प्रदेशों का इतिहास इस भारत-भक्तिस्तोत्र की नाम हारावली में संकलन किया गया है। इसीलिये फलश्रुति में 'संस्मृताखण्डभारतः' इस शब्द का उपयोग भी इस अपेक्षा से किया है कि इसका नित्य-पठन करने वाले के अन्तःकरण में अखण्ड भारत का स्मरण सदैव रहेगा।

इस प्रातःस्मरणस्त्रोत्र का पठन मनुष्यों के अन्तःकरण को भारतभक्ति से परिपूर्ण करने को प्रेरक हो यही परमेश्वर के चरणों में हार्दिक प्रार्थना है।

प्रतिदिन प्रातःकाल में व्यक्तिशः, संघशः (सामूहिक रूप में) इस भारत-भक्तिस्तोत्र का पठन राष्ट्रियता जगाने में सहायक हो यह ही पूर्ण अपेक्षा है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति प्रारम्भिकं निवेदनं कृत्वा इदानीं प्रातः-स्मरणस्तोत्रस्य शुभारंभः क्रियते ।

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले तु गोविन्दः प्रभाते करदर्शनम् ॥१

मानवस्य करतलाग्रभागे लक्ष्म्याः निवासः, करमध्ये सरस्वत्याः वासः तथा करमूले च गोविन्दस्य निवासो वर्तते । अतः प्रातःकाले सर्वैः स्वकरौ विलोकनीयौ ।

आधिदैविकसृष्टेरस्तित्वोपरि श्रद्धा हिन्दु-धर्मस्य वैशिष्ट्यं अस्ति । अस्माकं प्रातः स्मरणस्य प्रथमश्लोके अयमेव भावः सूत्ररूपेण ग्रथितोऽस्ति । लक्ष्मीः-धनसम्पत्तिः, सरस्वती-विद्या-ज्ञानम्, गोविन्दः साक्षात्परमात्मा च एतेषां निवासः अस्माकं अग्रहस्ते एवाऽस्ति । तेषां अन्वेषणं अन्यत्र अनावश्यकम् । अस्य हस्तस्य योग्यकर्तृत्वे सम्पादिते सति एतेषां त्रयाणां देवानां कृपां प्राप्तुं शक्नुमः । अयं श्लोक अतिप्राचीनकालात् परम्परागतेषु प्रातः स्मरणीयश्लोकेषु वर्तते यः सम्पूर्णे भारतवर्षे प्रारम्भादेव गीयते । अतः अस्मिन् नूतने प्रातः स्मरणे सर्वारम्भे एव अस्य प्राचीनस्य परम्परा-गतस्य श्लोकस्य कथनं सर्वथोचितमस्ति ।

समुद्रवसने देवि !
पर्वतस्तनमण्डले !
विष्णुपत्नि नमस्तुभ्यं
पादस्पर्शं क्षमस्व मे ॥२॥

हे समुद्रवसने-समुद्ररूपवस्त्रधारीणि पर्वत-स्तनमण्डले पर्वता एव स्तनमण्डले यस्याः, विष्णुपत्नि ! अस्माकं भूः (पृथ्वीमातः !) आधि-दैविकदृष्ट्या सर्वव्यापिभगवतः विष्णोः पत्नीति

यह प्रारम्भिक निवेदन करके अब प्रातः स्मरण स्त्रोत्र का शुभारम्भ किया जाता है ।

कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती
करमूले तु गोबिन्दः प्रभाते करदर्शनम् ॥१

मानव के करतल के अग्रभाग में लक्ष्मी का निवास है, करके मध्य में सरस्वती का वास तथा करके मूल में गोबिन्द का निवास है । अतः प्रातःकाल में सबलोगों के द्वारा हस्तदर्शन करने चाहिये ।

आधिदैविक सृष्टि के अस्तित्व पर श्रद्धा हिन्दूधर्म की विशेषता है । हमारे प्रातःस्मरण के प्रथमश्लोक में यही भाव सूत्र रूप से ग्रथित है । लक्ष्मी=धनसम्पत्ति, सरस्वती=विद्याज्ञान और गोबिन्द=साक्षात्परमात्मा इनका निवास हमारे अग्रहस्त में ही है । इनका अन्वेषण अन्यत्र अनावश्यक है । इस हाथ द्वारा योग्य कर्तृत्व सम्पादित होने पर इन तीनों देवों की कृपा प्राप्त कर सकते हैं । यह श्लोक अति-प्राचीनकाल से परम्परागत प्रातःस्मरण के श्लोको में से है जो सम्पूर्ण भारतवर्ष में प्रारंभ से ही बोला जाता है । अतः इस नवीन प्रातः स्मरण में सर्वारम्भ में ही इस प्राचीन परम्प-रागत श्लोक का कथन सर्वथा उचित है ।

समुद्रवसने देवि
पर्वतस्तनमण्डले
विष्णुपत्नि नमस्तुभ्यं
पादस्पर्शं क्षमस्व मे ॥२॥

हे समुद्रवसने=समुद्ररूप वस्त्र को धारण करने वाली पर्वतस्तनमण्डले=पर्वत ही हैं स्तनमण्डल जिसके ऐसी विष्णु-पत्नि । हमारी पृथ्वीमाता आधिदैविक दृष्टि से जो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृत्वा मन्यते। अतः सा विष्णुपत्नीति सम्बोधनेन सम्बोधिता। अहं त्वां प्रणमामि, मां चरणस्पर्शस्यापराधेन क्षमस्व।

सर्वव्यापी भगवान् विष्णु की पत्नी करके मानी जाती है अतः वह विष्णुपत्नि इस सम्बोधन से सम्बोधित है। मैं तुझको प्रमाण करता हूं। मुझको चरणस्पर्श के अपराध से क्षमा कर।

भूमाता अस्माकं मातास्ति। सा सर्वव्यापिपरमात्मनः पत्नी अस्ति। प्रातः उन्निद्रिता भूत्वा सर्वप्रथमं वयं तां चरणाभ्यां स्पृशामः दिवसपर्यन्तं च तस्या एवाधारेणावस्थिताः स्मः। अतः अस्य आत्मदोषस्य कारणात् प्रस्तुते श्लोके तदर्थं क्षमायाचना कृता।

भूमाता हमारी माता है। वह सर्वव्यापी परमात्मा को पत्नी है। प्रातः निद्रा त्यागकर सर्वप्रथम हम उसको चरणों से स्पर्श करते है, दिवस पर्यन्त उसी के आधार से खड़े रहते है। अतः इस आत्मदोष के कारण प्रस्तुत श्लोक में उससे क्षमा-याचना की है।

मनोविनोदकणिका—

सफलो वैद्यः

रुग्ण :— वैद्यराज ! नमस्तुभ्यं धन्यवादान् ददामि ते।
तवौषधेन मे हन्त ! स ज्वरस्तु गतः, परम् ॥
ममेदानीं रुजा द्वेऽपि नयने पीडिते भृशम्।

वैद्य :— दास्ये यदौषधं तेऽद्य तेन तेऽपि गमिष्यतः ॥

—दीनानाथत्रिवेदी मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान विदेशों को माल भेजता है

नाम वस्तु	जहां भेजी जाती है
१. बकरी के बालों का सामान	ईराक, कुव्वैत, तथा अन्य अरब देश
२. हाथों की चूड़ियां तथा अन्य शृंगार का माल	नाईजीरिया, तांगानिका और जर्मनी
३. खिलौने और घर की सजावट का सामान	अमेरिका, ब्रिटेन, अफगानिस्तान नाईजीरिया
४. पी० पी० सी० ओटोकेबिल्स और हब के पुर्जे	ईरान, कुव्वैत और ईराक
५. स्प्रे गन तथा कृषि का अन्य सामान	वियतनाम और नैपाल

विदेशी मुद्रा अर्जित करने में देश के साथ राजस्थान।
अपना हाथ बंटा रहा है।

उद्योग एवं पैदावार बढ़ाने में आपका सहयोग वांछनीय है।

स० वि० दी० /६७/५१६

राजस्थान सरकार द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्रस्य स्वामित्वसम्बन्धे अधिकृतं विवरणम्

पत्रकम् ४ (नियमः ८)

१. प्रकाशनस्थानम्	जयपुरम्
२. प्रकाशने कालावधिः	मासिकपत्रम्
३. मुद्रकस्य नाम नागरिकता संकेतः	राधेश्यामशर्मा, श्रीहनुमान प्रि० प्रेस, राजस्थानीयः चौड़ा रास्ता, जयपुरम्
४. प्रकाशकस्य नाम नागरिकता संकेतः	श्री जयबहादुरसिंहः भारतीयः भारती भवन, गोपालजी का रास्ता, जयपुरम्
५. सम्पादकस्य नाम नागरिकता संकेतः	श्रीहरिशास्त्री, दाधीचः भारतीयः तिलकनगरम्, जयपुरम्
६. पत्रस्य संपत्तेः अधिकारिणां आधिकारस्यांशभाजां वा जनानां संस्थाया वा नाम संकेतश्च	'संस्कृतप्रचारपरिषद्' जयपुरम्

अहं श्रीजयबहादुरसिंहः घोषयामि यत् उपरि लिखितं विवरणं मद्विश्वासेन परिज्ञानेन च सत्यमस्ति। दिनांकाः १७-१-१९६८)

शुभ कामनाओं के साथ

*

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाराजा श्री उम्मेद मिल्स लिमिटेड़

— पाली मारवाड़ —

गणतन्त्र दिवस के शुभ अवसर पर समस्त देशवासियों के प्रति मंगल कामनाएँ प्रकट करती है।

हमारी विशेषताएँ :

नाना प्रकार की बनावट के सुन्दर व आकर्षक सुपरफाइन व हायर मीडियम में

मर्सराइज्ड़, ब्लीच्ड़, डाइड़ व प्रिन्टेड़ पॉपलिन

केम्ब्रिक लॉन इत्यादि

और

कार्डेड, कोम्ब्ड़ व मर्सराइज्ड़ सूत

१ से १०० काउन्ट तक

हेंकों में, कोनों पर व साइज किया हुआ बीमों पर

★

मैनेजिंग एजेटन्स :

मेसर्स श्रीकृष्णा एजेन्सी प्राईवेट लिमिटेड़,

पाली मारवाड़

रिटेल शॉप : लक्ष्मी मार्केट, पाली मारवाड़

फोन : ५, ३३, ३७, ४७ व ९५

तार : उम्मेदमिल्स

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

श्रीहरिशास्त्री, सम्पादकः

येषां वाग् हृदयं दृष्टि-
विचाराः भावनाः सदा ।
सन्निष्ठाः सत्परास्ते हि
मान्याः सर्वत्र सज्जनाः ॥१॥

जिनकी वाणी, मन, दृष्टि, विचार और भावनाएं सदैव सत् सन्निष्ठ सत्परायण रहती हैं, वे ही सर्वत्र सज्जन माने जाते हैं।

तादृशाः सन्त औदार्य-
गाम्भीर्यनिधयो जनाः ।
यत्र सन्ति स वै
देशस्तीर्थराजपदं व्रजेत् ॥२॥

वैसे सन्त, महात्मा तथा विद्वान् औदार्य और गंभीरता के निधान जहाँ रहते हैं, बसते हैं, वह देश तीर्थराज कहाता है ॥२॥

सर्वंसहा वसुमती
तत्र कामदुघा ध्रुवम् ।
यत्र तादृक्सतां वास-
स्तत्त्वज्ञानप्रकाशनः ॥३॥

सर्वंसहा सब सहने वाली वसुमती पृथ्वी वहीं सब काम पूर्ण करनेवाली होती है जहां ऐसे सज्जनों का तत्वज्ञान प्रकाश करने वाला निवास होता है ॥३॥

सन्त एव जना लोकान्
सद्गतिं प्रापयन्त्यहो ।
तेषां भवाम्बुधौ नाव
उपदेशा भवन्ति वै ॥४॥

संसार में सन्त (सज्जन) ही लोकों को ऊंची और उत्तम गति प्राप्त कराते हैं, क्योंकि उनकी सूक्तियां वाणी, उपदेश लोकों के भवाम्बुधि पार करने को नावें होती हैं ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP.6
'Licenced to Post.
Without Prepayment"

राजस्थान सरकार

शिवचरण माथुर
शिक्षा मंत्री

जयपुर
राजस्थान

सं० ३०७४/शि/मं/६७

दिनांक २२ दिसम्बर, १९६७

अपील

विषय—स्वामी विवेकानन्द स्मारक हेतु धन संग्रह

कन्या कुमारी के समीप लगभग ४५० गज दूरी पर, सागर में स्थित शिला पर स्वामी विवेकानन्दजी ने साधना की थी। उस स्थान पर स्वामीजी को देश धर्म-स्वाभिमान जागरण की प्रेरणा प्राप्त हुई थी। उस शिला पर तपस्वी, देशभक्त संत का एक महान स्मारक बन रहा है, जिसका अनुमानित व्यय ५० लाख रुपये होगा। निर्माण कार्य आरम्भ हो चुका है।

राजस्थान का स्वामीजी से विशेष सम्बन्ध रहा है। सब राज्यों के समान, राजस्थान विवेकानन्द शिला स्मारक समिति ने भी ७ लाख रु० धन संग्रह का निर्णय लिया है। यह अभियान स्वामीजी के जन्म दिवस के शुभ अवसर पर १२ जनवरी १९६८ से आरम्भ होकर ११ फरवरी, १९६८ तक चलेगा।

इस योजना को सफल और यशस्वी बनाना हमारा पवित्र कर्त्तव्य है, ताकि स्वामीजी की शिक्षा और उपदेश जन जन तक पहुंच सके। अतः सभी शिक्षण संस्थाओं व उनके अधिकारियों से प्रार्थना की जाती है कि इस अभियान में पूर्ण सहयोग दें और अपने सभी सहयोगियों, छात्र, छात्राओं को यह प्रेरणा दें कि वे उदार होकर दान दे सकें।

(शिवचरण माथुर)
उपाध्यक्ष
विवेकानन्द शिला स्मारक समिति
राजस्थान शाखा

प्रकाशकः—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४९६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रि० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य

गुरुकुल कांगड़ी

सौराष्ट्रे सोमनाथं[1] च श्रीशैले मल्लिकार्जुनम्[2],
उज्जयिन्यां महाकालम्[3] ओङ्कारममलेश्वरे[4] ।
परल्यां वैजनाथं[5] च डाकिन्या भीमशंकरम्[6],
सेतुबन्धे तु रामेशं[7] नागेशं[8] दारुकावने ।
वाराणस्यां तु विश्वेशं[9] त्र्यम्बकं[10] गोतमीतटे,
हिमालये तु केदारं[11] घुसृणेशं[12] शिवालये ॥

स १८

वार्षिकमूल्यं सप्तमुद्राः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

कः ६

एकप्रतेः सप्तविंशतिः

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठ संख्या
१.	मङ्गलम्	आशुकविः श्रीहरिशास्त्री, सम्पादकः	१४९
२.	पाणिनीयतन्त्रस्य वैशिष्ट्यम्–	श्रीविश्वनाथकेलखुरो शास्त्री, जोशी मठम्	१५०
३.	प्राणनाथः	मधुप सहसम्पादकः	१५२
४.	गजयुद्धम्	श्रीगणेशरामशर्मा डूंगरपुरम्	१५३
५.	मानिनी-मानभञ्जनम्	पं० श्रीदुःखिश्यामपट्टनायकः खल्लिकोटः	१५५
६.	स्वाध्यायदिष्टदेवतां संयोगः	श्रीयोगेन्द्रः पुरुषार्थी, झज्जरः	१५७
७.	मातृस्तवनम्	श्रीरुद्रदेवत्रिपाठी संस्कृतविद्यापीठं, दिल्ली	१६०
८.	जय-जय भारतमाता !		
९.	अथ प्रमाणादिषोडश पदार्थसामान्य-विशेषलक्षणानि–	पं० श्रीयमुनाधरलाटा, रामगढ़ः	१६३
१०.	विनायकानामभिनन्दनम्	आचार्यः श्रीनारायणशास्त्री काङ्करः, जयपुरम्	१६५
११.	प्रश्नः	मधुपः सहसम्पादकः	१६८
१२.	श्रीशिवराज्योदयेमहाकाव्ये २७ सर्गः	डॉ० श्रीधरभास्करवर्णेकरः, नागपुरम्	१६९
१३.	फाल्गुने मनोविनोदकणिकाः	मधुपः, सहसम्पादकः	१७३
१४.	सम्पादकीयम्	,, ,,	१७५
१५.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	१७७
१६.	सूक्तिसुधा	आशुकविः श्रीहरिशास्त्री, सम्पादकः	१८८

श्रद्धाञ्जलिः

भारतीय-जनसङ्घस्याध्यक्षः **श्रीदीनदयालुः उपाध्यायमहानुभावः** फरवरीमासस्यास्य ११ तारिकायां प्रातः मुगलसरायस्य रेलयानस्थितिस्थाने मृतावस्थायामुपलब्धोऽभूदिति दुःसहं समाचारमिमं श्रुत्वा प्रायो देशस्य सर्वापि जनता महद्दुःखमनुभवति। वस्तुत उपाध्यायमहोदयेन तेन जनताजनार्दनस्य सेवायामेवात्मनः समग्रमपि जीवनं समर्पितम्। स हि देशस्यास्य प्रामाणिकः समुपासको नेता समासीत्—इति निश्चप्रचमेव।

दुरतिक्रमो हि भगवतः शक्तिस्वरूपस्य कालस्य प्रभावः, न जनस्तत्र किमपि कर्तुं प्रभवतीति उपाध्यायमहानुभावस्यासामयिक-स्वर्गमनेन शोकमनुभवन् सोऽयं भारतोपरिवारः स्वर्गतायोपाध्यायमहोदयाय श्रद्धाञ्जलि समर्प्य करुणावरुणालयं परमात्मानं प्रार्थयते यत्स तस्मै शाश्वतिकीं शान्तिं दद्यादिति—

मधुपः
भारती–सहसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १८ | फाल्गुनमासः, विक्रमाब्दः २०२४ (मार्चः १९६८) | अङ्कः ५

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री,

स्फूर्ज्जच्छोणप्रवाहोपरि सितगरुतां मालिकां दर्शयन्ती ।
नीलाम्भोजे प्रकामं शशिरुचिरुचिरां विद्युतं स्थापयन्ती ॥
शैवं वक्षो विशालं प्रमुदितमनसा कुर्वती पादपीठं ।
साऽस्मच्चेतः श्मशाने विलसतु सुतरामादिमा कापि विद्या ॥१॥

मासावतरणम्

उद्वाहादि-सुमङ्गलान्यपि बलाद् यो वारयन्नागतो
वासन्तीं श्रियमङ्कगामिव वहन् चेतस्ततः खेलति ।
आलापानपि यो मिथः प्रणयिनामश्लीलतामापयन्
मासः फाल्गुन एष धृष्टयुवल्लोकैः समालोक्यताम् ॥१॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनीयतन्त्रस्य वैशिष्ट्यम्

श्रीविश्वनाथकेलखुरीशास्त्री, श्रीबद्रीनाथजोशीमठं, चमोली

पुरा कल्पे शब्दज्ञानं प्रतिपदपाठद्वारा बभूव, ऐकैकं शब्दं पठित्वा तस्यार्थः शिष्यैर्गृह्यते स्म, इन्द्रबृहस्पत्योर्दृष्टान्तमत्र विषये महाभाष्यकारः पतञ्जलिराचार्यो महाभाष्यान्तर्गतपस्पशान्हिके दत्तवान्, "एवं किल श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम" इति। तेनोपायेन सर्वे शब्दाः वर्षसहस्रेणापि-अध्येतृभिः ग्रहीतुमशक्या आसन्। अतः लोकोपकारनिरतैः ऋषिभिरत्र विषये विचारितम् कः साधीयानुपायः स्यात्, येनाल्पेन यत्नेन अल्पेन च कालेन महतो महतः शब्दौघानध्येतारः प्रतिपद्येरन्। तत्रादाविन्द्राद्याचार्याः प्रकृतिप्रत्ययादिविभागकल्पनया व्याकरणस्य लक्षणग्रन्थान् प्रणीतवन्तः। ततश्च शब्दार्थविज्ञाने मन्दमतीनां जनानां कृते महत्सौकर्यं सारल्यं च जातम्। संस्कृतभाषायाः प्रचारः अस्मादेव कालादूर्ध्वमभवत्। काव्येतिहाससूत्रनाटकादिरूपेणानेके ग्रन्थाः विद्वद्भिर्निर्मिताः। एतस्मिन्नेव क्रमे भारतीयसंस्कृतेः स्वर्णयुगे दाक्षीपुत्रः शालातुरीयः पाणिनिनामाचार्यः स्वजनुषा भारतं विश्वस्य विद्वद्वर्गं चालंचकार। तेन स्वपूर्ववर्तिनामाचार्याणां महावैयाकरणानां गार्ग्यगालव-काश्यपापिशलि-भारद्वाज-शाकटायन-प्रभृतीनां व्याकरणसूत्रनिर्माणप्रकारं समालोच्य सर्वाङ्गपूर्णो नूतनो व्याकरणग्रन्थोऽष्टाध्यायीनामधेयो धातूणादिगणलिङ्गानुशासन-पाठोपेतो व्यरचि। तत्र तेन यल्लक्षणमङ्गीकृतमष्टाध्याय्यामुत्सर्गापवादरूपं तन्महाभाष्ये सुपरीक्षितं विद्यते। उभौ वार्तिककारमहाभाष्यकारौ तस्य लक्षणस्याधारं शब्दनित्यत्वसिद्धान्तं मन्येते स्म तदुक्तं वार्तिककारेण "सिद्धे शब्दार्थसम्बन्धे" भाष्यकारोऽपि वार्तिकं विवृण्वन्नाह – "नित्यं पर्यायः सिद्धशब्द", नित्यः शब्दः, नित्यः अर्थः, नित्यः सम्बन्धश्चेति पाणिनीयतन्त्रसारे, एतादृशमेव भाष्ये प्रकटीकृतं विद्यते :—

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे तु नित्यत्वं नोपपद्यते॥

अस्यैकदेशविकारादेर्निर्वाहमाचार्यः पाणिनिर्वहवीभिः काल्पनिकसंज्ञाभिस्तथाऽनेकपरिभाषाभिश्च कृतवान् स्वशास्त्रे शब्दलाघवमर्थगौरवं च दर्शयन्नल्पाक्षराणि सूत्राणि प्रणिनाय। सूत्राणि तावदन्यत्रापोदृशान्येव भवन्ति। तथा च लक्षणं प्राहुरभिज्ञा :—

अल्पाक्षरमसन्दिग्धं, सारवद्विश्वतो मुखम्।
अस्तोभमनवद्यं च, सूत्रं सूत्रविदो विदुः॥

तदत्राष्टाध्याय्यां संज्ञाया द्वैविध्यं दरीदृश्यते। काश्चिदल्पाक्षराः सन्ति काश्चिच्चानल्पाक्षराः। एतदुभयमनल्पमतेराचार्यस्य बुद्धिचातुर्यं बहुश्रुतत्वं च ख्यापयति। तत्राल्पाक्षराणां संज्ञानामुदाहरणानि टि, घु घ, भ, घि, इत्येवमादीनि अनल्पाक्षराणां खल्वपि वृद्धि-ह्रस्व-गुणदीर्घेत्येवमादीनि। एतासु द्विविधसंज्ञासु यास्ता अल्पाक्षरसंज्ञा टि, घु, भादयस्ता लोके सर्वथाप्रसिद्धा इति। लौकिकदृष्ट्या निरर्थकास्ता भवन्ति, लोके हि घ इति शब्दं केनचिदुक्तं, कोऽपि न प्रत्येति अर्थवानयं शब्दः इति। केवलो वैयाकरण एव ज्ञातुमर्हति तरन्तमयोरियं संज्ञाऽस्तीति, अन्याश्च या वृद्धिगुणादयः संज्ञा बह्वक्षराः, ताः क्वचिदनर्थकत्वेन आचार्यो गृहीतवान्, इति योगरूढ़त्वं तासां विद्यते, क्वचिच्च लौकिकमर्थमेवानुश्रित्यैताः प्रयुक्तवान्नित्यासां यौगिकत्वं प्रसिद्धार्थत्वं च गम्यते। भाष्ये खल्वपि निग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दितम्–महत्याः संज्ञायाः करणे एतत्प्रयोजनम् अन्वर्थसंज्ञा यथा विज्ञायेत, यथा वृद्धिशब्दः आदैचां संज्ञात्वेनोपात्तः सोऽत्र अन्वर्थको गृह्यते, अकारः वृद्धिगतः आकारः भवति। एवमिकारः एकारः, उकारः औकारः ऋकारश्च रपरो भूत्वा आर् इति भवति। लोकप्रसिद्धमेव वृद्धिपदार्थमभ्युपगम्य आ, ऐ, औ, इति वर्णत्रयस्य अर्थे वृद्धिपदं प्रयुङ्क्ते इति स्पष्टं योगरूढ़त्वम्, "कर्तरि कर्मव्यतिहारे" इत्यत्र गृहीतः कर्मशब्दः "शब्दवैराकलहाभ्रकण्वमेघेभ्यः करणे" इत्यत्र गृहीतः करणशब्दश्च 'नदीभिश्च' इत्यत्र गृहीतो नदीशब्दश्च सर्वथा लौकिकमर्थमेवानुवदति न पारिभाषिकम्–"कर्तुरीप्सिततमं कर्म" 'साधकतमं करणम्' "यूस्त्र्याख्यौ नदी" इत्येवम्।

उक्तविवरणेनायमर्थो निष्कृष्यते–शब्दशास्त्रं प्रणेतुः आचार्यः पाणिनिः साधुशब्दः सिद्ध्यर्थपदेषु प्रकृतिप्रत्ययविभागे विकारागमादेशलोपोपजनकार्येषु सर्वत्र सर्वथा लौकिकमेव दृष्टान्तं लौकिकमेव व्यवहारं चाश्रितत्वात्। अत एवोक्तम् भगवता भाष्यकारेणापि–नहादं लोकाद् भिद्यते इति। अस्यायमर्थः पाणिनिप्रणीतं व्याकरणशास्त्रमष्टाध्यायीरूपकं तथैवार्थान् प्रतिपादयति यथा लोके सामाजिकप्रशासनिक–धार्मिक–नैतिकव्यवहारेषु व्यवहरन्ते। अत एवोक्तम् महामान्यवर्य्यैरस्मदाचार्यवर्य्यैः स्वप्रणीतपाणिनिप्रशस्तौ :—

समाजशास्त्रावगतिर्भवेदितः,
तथेतिहासादिनयादि बुद्ध्यते।
न केवलेयं पदसिद्धिसंहिता,
द्विजत्वसम्पादनसञ्चिकाद्भुता ॥

एवं नियमकारीणि सूत्राण्यपि लौकिकव्यवहारमनुसरन्ति। "अनुदात्तङित आत्मनेपदम्" इत्युक्ते गम्यते अनुदत्तेभ्यो धातुभ्यो ङिद्भावमात्मनेपदमेव भवतीति। लोकेऽपि दृश्यते यो द्विजो भवति स एव यागादिकर्माणि कर्तुं कारयितुं चार्हति, नान्य इति। अन्यच्च परिभाषासूत्रेष्वपि सर्वत्र लौकिकसामाजिकव्यवहारमेवानुश्रित्य सूत्रकार्याणि कृतवान् आचार्यः। यथा "इको गुणवृद्धी" इत्यनेन इक एव स्थाने गुणवृद्धी च कर्तव्यत्वेन मन्यते नान्यत्र। तेन इको बहिर्गुणवृद्धिशब्दाभ्यां विहितौ गुणवृद्धी नैव भवतः। लोकेऽपि दृश्यते मंत्रिविशेषे सचिवविशेषे अधिकारिविशेषे वा पुरुषे ये अधिकाराः (Powers) कार्याणि वा निहिता भवन्ति ते तस्मादन्यस्मिन्पुरुषे नैव प्राप्नुवन्ति। एवं "विप्रतिषेधे परं कार्यम् पूर्वत्रासिद्धम्" इत्यादिपरिभाषासूत्रेष्वपि लौकिकोऽर्थः एवानूद्यते। कथमिति चेदुच्यते–लोके द्वयोर्वहुषु वा विवदमानेषु कश्चिदेकः निर्णायको न्यायाधीशो वा भवति, स यस्य साधीयान् पक्षो भवति तमेव कारयति। तथैव यत्र सपादसप्ताध्याय्याः पूर्वापरसूत्रयोः परस्परं विरोध उत्पद्यते। तत्र परं सूत्रं बलीयः न्याय्यमिति कृत्वा "विप्रतिषेधे परं कार्यम्" इति सूत्रं निर्णयं करोति, परं विजयतामिति।

एवमेव "पूर्वत्रासिद्धम्" इति सूत्रमपि सपादसप्ताध्यायीं प्रति त्रिपादीमसिद्धीकृत्य त्रिपाद्यामपि परं परं सूत्रं पूर्वं पूर्वं प्रति असिद्धीकृत्य लौकिकन्यायाधिपतेरिव कार्यं करोति तत्रापि महान्यायाधीश इव "पूर्वापरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः" इत्येषा अन्या परिभाषा सर्वोपरि वर्तमाना कार्यं करोति।

अधिकारसूत्राणामपीयं स्थितिरस्ति यथा लोके ग्रामाध्यक्ष एकस्य ग्रामस्य स्वामी भवति। तस्मिन्ग्रामे तस्याधिकारो भवति। मण्डलाधीशो मण्डलस्य (बहूनां ग्रामाणां) स्वामी विद्यत इति। सर्वस्मिन्मण्डले तस्याधिकारो वर्तते। राज्यपालस्य सम्पूर्णे राज्ये (अनेकमण्डलेषु) अधिकारो भवति। राष्ट्रपतेश्च सम्पूर्णे राष्ट्रे (अनेक-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्येषु) अधिकारो भवति। एवमेव इहाष्टाध्याय्यामपि "प्रागीश्वरान्निपाताः, प्राक्कडारात्समासः कारके, प्रत्ययः, परश्च, संहितायाम्, अङ्गस्य, पूर्वत्रासिद्धम्, सर्वस्य द्वे, पदात्, इत्येवमादीनि अधिकारसूत्राणि स्वे स्वेऽधिकारे प्रवर्तन्ते।

प्रतिषेधसूत्राण्यपि लोकवदेकप्रसक्ताप्रसक्तस्य निषेधं कुर्वन्ति। यथा "भक्ष्यमण्यपथ्यं नाश्नीयात्" इत्युक्ते अपथ्यभोजनस्य निषेधो भवति। "न परक्षेत्रे बीजं विनिक्षिपेत्" इत्युक्ते परक्षेत्रे बीजवपनस्य सर्वथा प्रतिषेधो भवति। तथैव न धातुलोप आर्धातुके" इत्युक्ते धातुलोपे आर्धधातुके "इकोगुणवृद्धी" न भवतः। 'न ङिसम्बुद्ध्योः' इति नलोपस्य ङौ सम्बुद्धौ च प्रतिषेधो भवति।

अतिदेशसूत्राण्यपि लौकिकव्यवहारमेवानुश्रित्य प्रवर्तितानि। यथा लोके "गुरुवद् गुरुपुत्रे वर्तितव्यम्" दर्भाणां स्थाने शरैः प्रस्तरितव्यम् इत्युक्ते गुरुपुत्रे शरेषु च स्थानिवत् कार्यं (मुख्यवत्कार्यम्) भवति, तथैव 'आद्यन्तवदेकस्मिन्' इत्युक्ते एकस्मिन् आदेरिवान्त्यस्यैव कार्यं भवति। "स्थानिवदादेशोऽनल्विधौ" इत्युक्ते च आदेशे स्थानितुल्यमेव कार्यं भवति।

विधिसूत्राणामपि स्थितिस्तादृश्येव। यथा लोके कश्चित्कंचिदाज्ञापयति-दद्ध्यानीयताम्। स श्रोता द्रुतमेव दद्ध्यानयति। एवमिहापि व्याकरणे "कर्मणि द्वितीया" इत्युक्ते कर्मणि कारके द्वितीया विभक्तिः साध्वी भवति। "कर्मण्यण्" इति कर्मोपपदे धातोरण् प्रत्ययो भवति। "सार्वधातुकार्धधातुकयोः" इत्यङ्गस्य गुणो भवति, एवं सर्वत्र।

इत्थं सूक्ष्मदृष्ट्या विचारणे कृते सर्वं सकलं चेदं पाणिनीयं तन्त्रं नूनं वैज्ञानिकरीत्या अद्भुतविषयविन्यासेन लौकिकनियमैश्च विरचितं विद्यते। येनर्जुनोपायेन श्रद्धालवो जनाः छात्राश्च तदल्पेन कालेन अल्पेन श्रमेण च गुरोरन्तेवासिनो भूत्वा समधीत्य शब्दशास्त्रे निष्णाताः विद्वांसो बोभूयन्ते। एवं महामतिपाणिनिराचार्यस्तदनुगामिनश्च कात्यायनपतञ्जल्याचार्यौ तस्य शास्त्रस्य व्याख्यया भृशं लोकमनुगृहीतवन्तः। तेषां गुणप्रशंसा अशक्याऽस्माभिः कर्तुम्, तथा च—

सदाध्येया सर्वैर्निगमसदृशी पाणिनिमुने—
रहो? अष्टाध्यायी झटिति पदबोधप्रणयिनी॥
सुपूर्णा वैज्ञानी ध्रुवमतिशयाह्लादजननी।
स्वयं स्वार्थं ब्रूते क्रमनियमपाठेन सुगमा॥१॥
निगमसदृशमेतत्पुण्यदं पाणिनीयम्।
प्रियतमसुतवृन्दं यत्नतः पाठनीयम्॥
फलमिह पदबोधे लाघवं साधनीयम्।
द्विजकुलमपि मेधावर्द्धनं ज्ञापनीयम्॥२॥

इतिश्लोकद्वयमुद्धृत्य शतशः प्रणमामो मुनित्रयमिति।

प्राणनाथः

युवतिः— अहं विज्ञातुमिच्छामि श्रीमन्! नामास्ति किं तव?।

युवा— प्राणनाथोऽस्ति मे नाम, संक्षिप्तं नाथ इत्यपि॥

—मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—❀ गजयुद्धम् ❀—

ले० विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम् (राज०)

[मान्याः ! मनीषिणः !! तत्रभवतां भवतामेवास्याः 'भारती' संस्कृतपत्त्रिकायाः परमादरणीयेषु धन्यवादार्हेषु तथा सुयोग्यलेखकेषु चैवायमेकतमः श्रीविद्याभूषणमहोदयो वर्तते। महाभागस्यास्य लेखाः भारत्यां पठन्त्येव भवन्तः। यद्यप्यत्र नाधिकमिदानीं किमपि वक्तव्यं विद्यते, तथापि साम्प्रतमेष महोदयो राज्यसेवातो विश्रान्तिमुपलभ्यापि सुरसरस्वतीमेव सततं सेवामानो वर्तते। अहं सर्वथा हृदयेन वाञ्छामि यदीदृक्षाणां विचक्षणानां सर्वेषामपि समये-समये सवेकारेण जनतया च विशिष्टं सत्कारं विधायोत्साहः सम्वर्द्धनीयः, यतो हि प्रारम्भकालादेव वस्तुतः संस्कृतसेविनामार्थिकी दशा नैव भवति समीचिनेति। —मधुपः]

पुर्वानुवृत्तं

गतानुगतिकं केचिदबोधाः किशोरा मुग्धभावा वास्तवीं विषमां स्थितिमजानन्तस्तत्र प्राप्तास्तं कज्जलपर्वताकारं वारणसम्राजं वीक्ष्यान्तर्मनसि बिभ्यतोऽपि च तं स्पृष्टुमिवोत्कण्ठतामात्मनो निरोद्धुं न पारयन्ते। ततस्ते दूरस्थाश्चापि हस्तपादं प्रसार्य स्पर्शसुखमिवानुभवन्ति। केचनान्ये सत्यावश्यके स्वात्मरक्षार्थमुपायान्तरमिव चिन्तयानाः स्वहस्ते लोष्ठपाषाणकाष्ठादीनि दधानास्तं मत्तगजमभिहन्तुं सोद्यमा धावन्ति। केचिद्धार्मिका जना मदोन्मदस्य तस्य गजराजस्य तास्ताः सर्वाश्चेष्टाः पार्वतीनन्दनस्य विघ्नविनायकस्य श्रीगणेशभगवतो लीलावतारक्रीडाकौतुकानीव सम्भावयन्तो हर्षानन्दनिर्भराः सश्रद्धं सभक्तिभावं च तत्पुरतो मिष्ठान्नमोदकान् फलानि श्रीफलानीक्षुदण्डादीनि च भोज्यवस्तूनि समानीय प्रक्षिपन्ति। महानेव कोलाहलो महानेवोद्घोषः सर्वतः प्रसृतः। हस्तिपकैर्गजसञ्चालकैर्भूयो भूयो विज्ञाप्य निषिद्धा निवारिताश्चापि लोकाः प्रकृतिपरवशाः स्वभावादेव कौतुकप्रिया अन्तर्मदाविष्टं तं गजपुङ्गवं विप्रकुर्वन्तो न विरमन्ति स्वचेष्टासहस्रेभ्यः।

इत्थं दुःस्थितिमुपगतानामपि च तेषां हस्तिपानां कर्तव्यनियोगो नैतावता कृतकार्यतां व्रजति। लोकानां दुश्चेष्टासहस्रैर्गजराजस्य तस्योद्दण्डाचरणैश्चोभयथापि कष्टबहुला स्थितिर्जायमानास्ते। एवं क्लिश्यमानानां तेषां सर्वेषां गजपालानां भल्लैरङ्कुशैश्च मुहुर्मुहुर्विध्यमानोऽसौ मत्तवारणः कष्टसाध्यैरुपायैः कथं कथमपि चैकस्मात्पदादन्यदुद्गच्छति। क्वचिदग्रे गतोऽपि प्रतिनिवर्तते, क्वचित्तीव्रजवं धावति, क्वचित् फलादिपदार्थान् शुण्डोत्तम्भितान् कृत्वाकाशे बहुदूरमुत्क्षिपति, क्वचित्तान् भूमावपात्य पादाघातैरपमर्द्दयंश्चूर्णयति क्वचिन्मूको जडोऽध इव सर्वंसहो मार्गस्थिरतामाश्रयते, क्वचिदकस्माद्भूमितले शुण्डादण्डमास्फोटयति, क्वचिद्धण्टापथमुभयतो वर्तमानान् वृक्षान् स्तम्भान् पादपान् विद्युद्दीपाधारांश्च शुण्डाग्रेणाकृष्याकृष्य समूलमुत्पाट्योत्क्षिपति, क्वचिद्धूलिमापूर्य शुण्डायामाकाशे भूमौ च सर्वतः प्रकिरति, क्वचिच्चीत्कारैर्दिशां मुखानि बधिरयति महद्भयं च दर्शकानां हृदि समुत्पादयति। सत्यप्येवं बहिस्तो मत्तगजोऽसौ कोऽपि महात्मावधूतो योगीव परिदृश्यते स्थितप्रज्ञ इत्यहो !

अथैवं व्यवसितानां तेषां गजपालानां तत्कर्मसम्पादने क्लाठिन्यमुत्तरोत्तरं वर्धमानमास्ते। तेषां मनसि न केवलं राजादेशानुसारं तस्य गजस्य नियतकाले रङ्गस्थले प्रापणस्य चिन्ता, वरं च तस्य संरक्षणे, गजकृतादनिष्टा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्नागरिकाणां रक्षणस्य, गजपृष्ठारूढयोस्तयोर्युवकयोर्द्वयोः प्राणरक्षणस्यापि चिन्ता, पुनस्तद्दिने गजयुद्धे स्वपक्षस्य विजयापादनस्य च चिन्तैवं सर्वतः खिन्नाः विलष्टाः शङ्कातङ्काकुलितचतसो हस्तिपका मध्येमार्गमेव श्रान्ताः क्लान्ताः परिश्रान्तस्वान्ताः कालकृतान्तादिव संघर्षमाचरन्तः कथमपि चोपायानां शतैः 'गड धत्त ! अगड धत्त !!' इत्येवंरूपां गजप्रेरणसङ्केतभाषां ब्रुवाणास्ते मदोन्मदं गजराजं प्रहरप्राये समये पक्कणवासाद्राजप्रासादं यावदानिन्युस्तत्र च प्राङ्गणभूमौ विरचितं रङ्गस्थलं प्राप्योपतस्थिरे ।

अत्रेदं राजप्रासादस्य प्रांगणस्थलम् । पूर्वाभिमुखमुपकल्पितायां राजसभायां प्रथमपङ्क्तौ सिंहासने राजाधिराजः शासकस्ततः पार्श्वयोर्द्वयोर्युवराजो राजकुमाराः सामन्ताः सचिवमुख्या मन्त्रिणस्तथा च सुप्रतिष्ठिता नागरिकाश्च यथाक्रममासनेष्वासीनाः सन्ति । द्वितीयपङ्क्तौ राज्याधिकारिणोऽन्ये विभागाध्यक्षाः कार्यकरास्तत्सहायकास्ततः सर्वसाधारणा जना निषण्णा वर्तन्ते। तदन्वसंख्या मानवानां समूहा विद्यमाना वर्तन्ते । गजयुद्धं दिदृक्षूणां जनानां महान् संघट्टसम्मर्द्दोऽत्र सन्निविष्टोऽस्ति । समस्तमपि च प्राङ्गणस्थलं सुविशालमायताकारं वामतो दक्षिणतश्च युद्धदर्शनोत्सुकैर्जनसमूहैः परिपूर्णमस्ति । बहवो जनास्तु स्थानमनासाद्रयन्तो वृक्षेष्वट्टेषु गवाक्षेषु यत्र तत्रारूढाः सन्तो, युद्धदर्शनायोत्सुकाः पद्भ्यामेवाधारं प्रकल्प्य संस्थिताः सन्ति । इत्थं महानेव जनसमूहोऽहेसहमिकया युद्धं द्रष्टुमुत्सुकोऽत्र प्रतीक्षापरस्तिष्ठति । पश्चिमायां दिशि राजप्रासादस्योत्सङ्गे राजकीया गजशाला अश्वशालाश्च सुविशाला विद्यन्ते । तत्रैव गजशालायाः सम्मुखतो विरचिता गजयुद्धोपयुक्ता सुविशदा सुदृढा च रङ्गभूमिर्विद्यमानास्ते । उभयपार्श्वयोर्युद्धस्थल्याः शतोधिकानां गजानाम् पङ्क्तिस्ततोऽश्ववाराणां पङ्क्तयः सैन्यपंक्तयश्च वर्तन्ते। यथा प्राग्वर्णितस्तथान्यो गजराजोऽपि चात्र पूर्वत एवैको मदविह्वलो हस्तिपैः संरक्ष्यमाणश्चेष्टाभिस्ताभिश्चाञ्चल्यमञ्चन् कोपाविष्टः सद्यस्तत्रागतं प्रतिद्वद्विरूपमन्यं गजं दर्शं दर्शं तत्प्रतीक्षाकुलस्तद्दिशि मदाघूर्णितदृगितस्ततोऽवलोकयन्नास्ते । स हि राजप्रासादप्राङ्गणस्थोऽपरो गजराजस्तमागच्छन्तं मदोन्मदं युयुत्सुं वारणमालोक्यैव सहसा स्वशुण्डाग्रमुच्चैराकाशे समुत्तभ्य तद्गन्धं चाघ्रायाघ्राय फुङ्कारांश्चीत्काराँश्च कर्तुमारेभे । स खलु शुण्डादण्डं भूमावास्फोटयन् तमाक्रमितुमिव प्रयेते । पर्वतशिखरोपमं स्वदेहमाधुन्वतस्तस्य देहे निबद्धा लोहशृङ्खलाः शब्दायमाना अश्रूयन्त सर्वतः । स च सद्यस्तत्रागतो महागजोऽपि दूरतस्तमवलोक्यैव प्रतिद्वन्द्विरूपं तत्कालमेव वैरान्धतया सव्यूहरचनागतिभङ्गीरौद्रभीषणं सत्वरं क्षणादेव तत्सम्मुखमुपेत्यातस्थे । तावदेव हि राजाज्ञया शतघ्नीसंस्फोटध्वनिर्युद्धारम्भसङ्केतरूपो दध्वान मदान्धयोस्तयोर्वारणयोर्युद्धं चारेभे ।

'अरर धम् धम्.....' इति शब्दध्वनिना साकमेव तौ द्वावपि गजेन्द्रौ मिथः पूर्वकायं वप्रकल्पे मध्यभागे प्रोच्चैरुत्थाप्य शुण्डादण्डावाम्रेडयन्तौ व्यावावल्गताम् । दन्ताभ्यां दन्तौ समघट्टयताम् । कुम्भस्थलेन सकठोराघातमपजघ्नतुः । फूत्कारचीत्कारपूर्वकं प्रचण्डरणरौद्रभीषणं च युयुधातेऽतिनिष्ठुरं प्राणान्तवैरनिर्दयम् । युद्ध्यमानयोस्तयोर्दन्ताघाताघट्टनया 'खट खट' शब्दध्वनिः श्रूयते । कुम्भस्थलाभ्यां मिथः कृतैः प्रहारैः क्षणमेको गजः क्षणञ्चापरश्चोर्ध्वमधोऽथ पुरः पश्चाच्च भवतः । तयोर्द्वयोरपि देहाभ्यां मदधाराः प्रवहन्ति यतस्ततः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ तौ युध्यन्तौ गजावारूढौ युवानौ द्वावपि हस्तिपकौ तद्दण्डस्थलासीनौ सङ्कुशाघातं मुखाभ्यां गजसङ्केतभाषया गर्जन्ताविव तौ गजौ प्रेरयतः। द्वयोरपि पक्षयोः पृष्ठतो वर्तमाना हस्तिपाः परस्परं स्पर्धाभावपरवशाः स्वस्वगजस्य विजयं कामयाना बुक्कारैर्भल्लादिभिरायुधैश्च प्रेरयन्तोऽतिमात्रमहमहमिकया प्रचेष्टन्ते। तावदेव सर्वैरपि दृष्टम्—अहह हा, हन्त! हन्त!! युध्यतोस्तयोर्मदान्धवारणयोर्लोहनिर्मितादिव कायाद्रुधिरबिन्दवः प्रस्रवन्ति। अतीव बीभत्सं दृश्यमुपस्थितम्! पृष्ठतो गजपालैः प्रहृतैर्भल्लशल्यैः सद्यो जातेभ्योऽपक्षतेभ्योऽपि चासृकप्रस्रुतयो वहन्ति। गैरिकधातुप्रवाहैः स्नाताविव कज्जलपर्वतोपमौ तौ महागजौ प्रतीयेते स्म। तावदेव—'अहो, दृश्यताम्! दृश्यताम्भोः!! द्वयोरेकस्य तस्य वारणस्य दन्तोऽसौ निर्भग्नः!!! रुधिरधाराश्च सर्वतः प्रावहन्!!! गजयोस्तयोः कुम्भस्थलारूढौ हस्तिपकौ युवानौ रुधिराक्ताविव बभूवतुः!!! गजयोस्तयोर्द्वयोरपि चाग्रपादौ रक्तकर्द्दमाप्लुताविवाभूताम्। तयोः फुङ्कारैश्चीत्कारैः सर्वा दिशः प्रतिध्वनिभिरापूर्यन्त इव। मदाघूर्णमानयोर्युध्यतोश्च तयोर्मातङ्गयोर्देहान्निर्गतो मदगन्धो वातावरणं जुगुप्सितमिवाकार्षीत्। तयोर्वारणराजयोः पादाघातैरुत्थिता रजस्तोमा धूलिपटलानि चाकाशं मेदुरं व्यधुः। सर्वेऽपि च दर्शकास्तस्माद्भयभीषणा दृश्यान्निवृण्णा इव बभूवुः। तत् क्रूरं दृश्यं द्रष्टुमसहमानाः केचिज्जना भयभीताः सन्तो हाहाकारमिवान्तर्हृदि व्युत्तिष्ठमानमन्वभूवन्!

तावदेव राजाज्ञया युद्धसमाप्तिसूचकः शतघ्नीगर्जनध्वनिरश्रूयत। तयोरेको गजो विजयश्रीवृतो घोषितः। तदुपरि पुष्पवर्षा निपेतुः। जयदुन्दुभयो नेदुः। विजयिनो वारणस्य पृष्ठपोषकाः सर्वे हस्तिपालाः स्वविजयं मन्यमाना हर्षोत्फुल्लनयनाः स्वाभिमानोन्नतमानसा कामपि परां मुदमापुः। राज्ञा पुरस्कृतास्ते स्वपरिश्रमस्य साफल्यमविन्दन्त। एवं तद्गजयुद्धं समाप्तिं जगाम।

मानिनी—मानभञ्जनम्

पं० श्रीदुःखिश्यामपट्टनायकः खल्लिकोटः

कोकिल—वचने पङ्कज—नयने प्रियसखि! न कुरु विलम्बम्
रतिरसजनितं त्वदलससकलं मुञ्च विजहि ते मानम्॥ ध्रुवम्॥

पिकवरविरुतं मधुमृदुमरुत दिशि दिशि कुसुमविकासम्।
समुदितमरुणं धृतनवकिरणं जगदनुलक्ष्य सहासम्॥१॥

शशधरकिरणं गतविभाऽऽतुलं पश्य जवेन विलीनम्।
उडु—निकुरम्बं विगलितदम्भं विरहभरेण तु दीनम्॥२॥

विहसितकमलं विकसितविमलं मधुकरसहकृतखेलम्।
त्वमपि च सजनि! भृशमनुरञ्जिनी मम हि भव यथावेलम्॥३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देर क्यों करें ?

आप बधाई के तार अब एक महीने पहले भी बुक करा सकते हैं। आपका तार निश्चित तारीख को आपके स्वजनों के पास पहुंचा दिया जायेगा। ऐसा करने से आप जल्दीबाजी की भीड़ से बच जायेंगे और देर भी नहीं होगी।

बधाई के लिये निर्धारित वाक्यों वाले तार ही भेजिये। इनमें आपके पैसे कम लगते हैं। और फिर, इन्हें विशेष रूप से छपे रंग-बिरंगे लिफाफों में सुबह ६ बजे से रात ९ बजे के बीच आपके स्वजनों तक पहुंचा दिया जाता है।

भारतीय डाक व तार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाध्यायादिष्टदेवता संप्रयोगः

ले० श्रीयोगेन्द्रः पुरुषार्थी, झज्जरः, गुरुकुलम् ।

योगदर्शनस्य प्रणेत्रा महर्षिपतञ्जलिमहाभागेन समाधिमाप्तुं स्वकृतदर्शनस्य साधनपादे प्रणीतानि विभिन्नानि साधनानि, एभिः साधनैर्योगिनो याः सिद्धीर्लभन्ते, तासामपि तत्रैवोल्लेखो-दृष्टिपथे समायाति। सन्ति तत्र कानिचित्साधनानि तेष्वेकं स्वाध्यायोऽप्याध्यात्मिकज्ञानवृद्धयेऽलं वर्तते। स्वाध्यायेन खलु यां सिद्धिं प्राप्नुवन्ति तस्या एव सार्वभौमिकं महत्त्वं प्रस्तुते योगे वरीवर्ति। योगार्थस्य स्पष्टीकरणमेवमभिलक्ष्यते।

'स्वाध्यायसम्पन्नो जीवने यां देवातां कामयते तत्सम्बन्धं स्वाध्यायेन क्षिप्रमाप्नोति'। देवताशब्देनात्र यथा वेदे तथैव 'विषयो' ग्रहीतव्यः। महर्षिव्यासेनापीत्थमेव व्याहृतम्, प्रामाणिकभोजवृत्तावप्यर्थस्य क्रमः प्रस्तुतविधिमनुसरति, परं टिप्पणीकारविज्ञानाश्रममहोदयैरयं योगो अन्यथा कृतः। तैर्व्यासभाष्यमप्यशुद्धं विज्ञाप्य स्वमतं प्रामाणिकं विहितम्। तत्तेषां ननु भ्रममात्रमेव प्रतिभाति।

परं वस्तुतोऽर्थस्यानुभूतिरनेन विधिना भवति, 'यन्मानवः स्वजीवने वर्तमानावस्थायां यमिष्टदेवमभिकाङ्क्षते, अभिमतविषयस्य स्वाध्यायेन स्वावस्थां व्यवस्थापयति, पुनरिष्टदेवं प्राप्नोति'। सम्मतोऽयं सिद्धान्तो यत्स्वाध्यायस्य मौलिकजीवननिर्माणे उत्कृष्टस्थानं विद्यते।

मानवयोनौ जीवात्मा प्रादुर्भूय विभिन्नास्ववस्थासु, यथा-ब्रह्मचारी गृही वा, वनी तुर्याश्रमिको वा, अध्येता साधकः कस्मिन्नपि क्षेत्रे कार्यं साधयति, स्वाध्यायेन स्वकार्ये पटुतां लब्धुं निर्दिष्टविषयस्य गहनमध्ययनमावश्यकम्। तदेव स पूर्णां सफलतां प्रातुर्महो भवति।

कस्मिन्काले स्वाध्यायं कुर्यादिति? कस्यचिज्जिज्ञासा, अत्र समाधत्ते—एवं तु स्वाध्यायस्य नैतिकजीवने सम्बन्धो वर्तते। दिनचर्या च प्रमुखाङ्गं विद्यते। यथा-शयन-शौच-व्यायाम-स्नानोपासनानि प्रत्यहमावश्यकानि सन्ति, तथैव स्वाध्यायोऽपि।

यथा भगवति वेदेऽपि निगदितम्—

दुहे सायं दुहे प्रातर्दुहे मध्यं दिनं परि।
दोहा ये यस्य संयन्ति, तान् विद्मानुपदस्वतः॥
अथर्व० ४।११।२

"प्रातःसायं मध्याह्ने च दुहे। अस्य दोहस्योत्तमतया याः सिद्धीः प्राप्नुवन्ति ताभिरनश्वरं जानीम"। साधनं कालेनापि विशिष्यते। यस्मिन्काले यस्य महात्म्यं महीयते, तस्मिन्नेव काले तत्साधनं वयं प्रकृष्टतया प्रयोजयामहे। इत्थमेव प्रकृष्टस्वाध्यायसाधनस्य विशेषकालः श्रावणीपूर्णिमाप्रभृतिर्दीपमालिकापर्व यावच्छुभकालः। इतरोऽपि कालः प्रयुक्तोऽस्ति, परं वैदिकमतावलम्बनेन स्वाध्यायनिमित्तेनैव स्वाध्यायसप्ताहं, वेदसप्ताहं वा जनाः श्रावणमासे मन्यन्ते।

अपरः कश्चिज्जिज्ञासुः, स्वाध्यायः केषां ग्रन्थानां करणीय इति? प्रश्नं पृच्छति।

अत्र समाधत्ते—सार्वभौमिकै विद्वद्भिः—"वेदो मानवीयसमस्यानां सफलं साधनं वरीवर्ति" अस्य वाक्यस्य पोषणमक्षरशः कृतम्। पूर्वं ऋषिभिरस्य माहात्म्यसंवर्द्धनाय विपुलः प्रयत्नः कृतः, अनुसन्धानप्रयोगाश्च कृताः। वेदस्य महत्ता तु महर्षिव्यासेन महाभारतस्योद्योगपर्वणः त्रिचत्वारिंशत्तमेऽध्याये श्लोकावुट्टङ्कितौ स्तः।

यथा—न वेदानां वेदिता क्वचिदस्ति,
क्वचित् त्वेतान् बुद्धयते वापि राजन्।
यो वेद वेदान् न स वेद वेद्यं,
सत्ये स्थितो यस्तु स वेद सत्यम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यो वेद वेदान् न स वेद वेद्यं,
न तं विदुर्वेद विदो न वेदाः।
तथा हि वेदेन विदन्ति वेदं,
ये ब्राह्मणा वेदविदो भवन्ति ॥

एताभ्यां श्लोकाभ्यां स्फुटमेव प्रतिभाति यद् वेदविज्ञानाय स्वाध्यायो ननु परमावश्यकः। तदनुसारमाचरणेन तु वेदस्य तथ्यं, रहस्यं, तत्त्वज्ञानञ्चानुभवति। वेदस्यैव स्वाध्यायं कुर्यादिति स्फुट्वाचोक्तिर्दरीदृश्यते।

वेदमेवाभ्यसेन्नित्यं, यथाकालमतन्द्रितः।
तं ह्याहुः परं धर्ममुपधर्मोऽन्य उच्यते ॥

वेदस्यैव स्वाध्यायं कुर्यादिति नान्यस्येत्यत्र को हेतुः ?

मानवस्य खल्वेकमात्रलक्ष्यमीश्वरप्राप्तिः। ऋते परमात्मसाक्षात्कारान्नास्ति जीवने चिरशांतिः सम्भवा। अद्य वाऽब्दशतान्ते वा लक्ष्यप्राप्तिर्निश्चिता एव। लक्ष्यप्राप्तिः प्राणिमात्रस्य श्रेष्ठधर्मो वस्तुत इष्टदेवो वरीवर्ति। अयमेव साधकानां साध्यः, गायकानां गानम्, स्तोतॄणां स्तुत्यः, नराणाञ्च प्रार्थनीयः। सर्वं जगदमुमेव भजते। अमुष्य साधनायै श्रुतेः स्वाध्यायः खलु परमावश्यकः, यतो हि वेदाध्ययनमेव प्रकृष्टतमः स्वाध्यायो नेतरः। अद्यत्वे पल्लवग्राहि पाण्डित्यं लब्ध्वा ऋषिपदवीं विना ग्रन्थान् ग्रथयन्ति। इमेऽनार्षग्रन्थाजनान् वेदप्राप्तौ रुन्धन्ति, यतो हि तत्रभवत्सु-आर्षग्रन्थेषु गूढभावाः, ऋजुभाषा, अपरे भावहीना शब्दाडम्बराः।

वेदानां महिमा महाभारते प्रगीतः—'नास्ति वेदात्परं शास्त्रम्' अपरञ्च 'वेदश्चक्षुः सनातनम्'।

ज्ञानविज्ञानयोः प्राचीनतमश्चक्षुर्वेदं विना नास्ति श्रेष्ठतमः। यतो हि बुद्धि पूर्वा वाक्यकृतिर्वेदे। (वैशेषिकदर्शनम् ६।१)

वेदानामेकैकं वाक्यं बुद्धिपूर्वं, बुद्धिसंयुक्तं वरीवर्ति। अतः स्वाध्यायो वेदानामेव करणीय इति।

महाभाष्यकारपतञ्जलेर्वाचोयुक्तिः स्फुटमेव प्रतिभाति— 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो-वेदोऽध्येयो ज्ञेयश्च''।

महर्षिदयानन्दस्वामिनाऽऽर्यसमाजस्य नियमेषु तृतीयो नियमो निर्मितः — वेदाध्ययनंतस्याध्यापनं, श्रवणं श्रावणं सर्वेषां द्विजानां परमो धर्मः।

अयि पाठकाः ! यदि भवन्तः सर्वे वेदाध्ययनं नित्यमेव नियमेन कुर्युस्तर्हि क्षिप्रमेव ज्ञानाचिता भूत्वा परं पदं प्राप्नुयुः। तथायुक्तमेवात्रोक्तम्—

स्वाध्यायद् योगमासीत, योगात्स्वाध्यायमानयेत्।
स्वाध्याययोगसम्पत्त्या, परमात्मा प्रकाशते ॥

दी अवध सूगर मिल्स लिमिटेड

निर्माता :—

प्रधान कार्यालय :—
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई-१

मिल्स :—
हरगांव
जिला-सीतापुर
उत्तरप्रदेश

शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आप जानते हैं, ये महिला कौन हैं? आप एक दफ्तर में 'आफिस सुपरिन्टेन्डेन्ट' हैं। खुश और जीवन से सन्तुष्ट। मेहनत और असाधारण लगन के कारण एक मामूली 'टाइपिस्ट' से बढ़कर आज ये इस पद पर पहुंच गई हैं। इस सफलता का श्रेय ये अपनी छोटी सी गृहस्थी को देती हैं: "छोटी सी गृहस्थी है मेरी। पति और तीन बच्चे। कोई परेशानी या दिक्कत नहीं होती। हम दोनों इतना कमा लेते हैं कि हमारी सारी जरूरतें पूरी हो जाती हैं। तीसरे बच्चे के बाद ही हम दोनों ने फैसला कर लिया था कि अब हमें और बच्चे

नहीं चाहियें। घर में सुख-शान्ति रहती है, इसी लिये मैं दफ्तर में मन लगा कर काम कर पाती हूं।"

ये खुश हैं —

और आप ?

devp 67/185

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातृ स्तवनम्

(श्री रुद्रदेवत्रिपाठी संस्कृतविद्यापीठ दिल्ली–७)

जय जय भारतमातः !
बहिरपि तव गृहवत् सत्स्नेहानेवालभत कृपातः ।

हिमगिरिरुन्नतहृत् ते तस्मिन् भरितः कियान् विषादः ?
पुनरपि दहनं निरुद्ध्य नैजं, रक्षति स हि गतसादः,
स्त्रोतोभ्यः शतशो विभज्य यत्–
पयसां भवति निपातः ।
जय जय भारतमातः !

अप्सु कमलमुन्मीलनमास्ते फलिताः क्षितौ रसालाः,
तव हरिताङ्के भृताः कियन्तो देश-विदेशा बालाः
मिथो भ्रातरो ऽयुध्यन् किन्तु न,
भग्नः प्रेमा जातः ।
जय जय भारतमातः !

चन्द्रभास्करौ चिरादुदयतो मातः ! शोणदिशायां,
मुक्ताफलमश्नन्ति सङ्गता हंसास्तव वसुधायाम् ।
सुखं वर्धते विपद् ह्रसति, ते
यदा विभक्तिं यातः,
जय जय भारतमातः !

प्रोतास्तव बालाः समे वयं बहुशो बन्धनमाप्ताः,
किन्तु मुक्तये कथय कदा नो वयं सङ्गरं प्राप्ताः ?
मरणशान्तिदा त्वमसि जीवन–
क्रान्तिविधात्री मातः
जय जय भारतमातः !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जय जय भारत माता !

तेरा बाहर भी घर जैसा रहा प्यार ही पाता ।।

ऊँचा हिया हिमालय तेरा उसमें कितना दर्द भरा;
फिर भी आग दबाकर अपनी रखता है वह हमें हरा।
सौ स्रोतों से फूट-फूटकर पानी बहता जाता।
जय जय भारतमाता ।।१।।

कमल खिले तेरे पानी में, धरती पर है आम फले,
इस धानी अंचल में आहा ! कितने देश विदेश पले,
भाई-भाई लड़े भले ही टूट सका क्या नाता ?
जय जय भारतमाता ।।२।।

तेरी लाल दिशा में ही माँ चन्द्र-सूर्य चिरकाल उगे,
तेरे आंगन में मोती ही हिल मिल तेरे हंस चुगे,
सुख बढ़ जाता दुःख घट जाता जब है वह बँट जाता।
जय जय भारतमाता ।।३।।

तेरे प्यारे बच्चे हम सब बन्धन में बहु बार पड़े,
किन्तु मुक्ति के लिए बता माँ कहाँ न जूझे कब न लड़े,
मरण शान्ति का दाता है तू जीवन-क्रांति-विधाता।
जय जय भारत माता ।।४।।

गिरने से पहले उनकी रक्षा करें

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय ? इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तैल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल घने तथा लम्बे और आपके दाँत चमकीले तथा मजबूत रहेंगे।

इलाज से बचाव बेहतर है।

आयुर्वेद सेवाश्रम प्रकाशन लिमिटेड [illegible]

गाय

छाप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिवार के सब बेहद खुश !

इस देश के पेड़-पौधों से व आयुर्वेदिक तौर पर बने साधना दशन के नियमित इस्तेमाल से मुँह की दुर्गन्ध और दाँतों की सब बीमारी जाती रहती है। दाँतों की 'एनामेल' काफी दृढ़, दाँत स्वस्थ, मजबूत और जगमग सफेद होते हैं...चेहरे पर खूबसूरत हँसी झाँकने लगती है। इसीलिये हम सब एक आश्चर्यजनक दंत मंजन ही इस्तेमाल

साधना दशन

करते हैं।

साधना औषधालय — ढाका
३६, साधना औषधालय रोड
साधना नगर, कलकत्ता-४८

अध्यक्ष डा० योगेश चन्द्र घोष, एम-ए, आयुर्वेद-शास्त्री, एफ. सी. एस (लंदन), एम. सी. एस. (अमेरिका), भागलपुर कालेज के रसायन शास्त्र के भूतपूर्व अध्यापक।

कलकत्ता केन्द्र : डा० नरेश चन्द्र घोष, एम-बी. बी-एस. आयुर्वेद आचार्य।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ प्रमाणादिषोडशपदार्थसामान्यविशेषलक्षणानि

व्याख्यानकलानिधिः पं० श्रीयमुनाधरलाटा, नव्यन्यायशास्त्री, रामगढः (सीकरः)

प्रमाणादि-रसोर्वीणां, पदार्थानाञ्च लक्षणम्, प्रमाणादिपदार्थत्वधर्मवत्त्वं स्वरूपतः ॥१॥

प्रमीयते वस्तुजातं, येन तद्धि प्रमाणकम्[1] । करणापरसंज्ञं तच्चतुर्विधकमीरितम् ॥२॥

प्रत्यक्षमनुमानञ्च, ह्युपमानं तृतीयकम् । शब्दस्तूरीयं ततो ज्ञानमात्रं संजायते वटो ॥३॥

घटोऽयं, पर्वतोऽग्निमान्, गवयः शब्दवाच्यकः । इयं धेनुश्चरत्यत्र, क्रमेणोदाहृतिर्मता ॥४॥

प्रकृष्टत्वविशिष्टं यन्मेयत्वं निर्मलं वटो ।[2] प्रमेयलक्षणं तद्धि, प्रमेयं चार्कधं[12] मतम् ॥५॥

आत्मदेहेन्द्रियाण्यर्थबुद्धिमनःप्रवृत्तयः । दोषोथ प्रेत्यभावश्च, फलदुःखापवर्गकाः ॥६॥

एकस्मिन् धर्मिणि ज्ञानं विरुद्धानेकधर्मकम् ।[3] संशयः सोपि नित्यं वै, विशेषापेक्षको मतः ॥७॥

यमर्थं चित्त उद्दिश्य सर्वो जोवः प्रवर्तते ।[4] तत्प्रयोजनमित्युक्तं, तद्विना न प्रवर्तते ॥
प्रवृत्तिहेतुकेच्छायागोचरः परिकीर्तितः ॥८॥

लौकिकानां परीक्षायाः केतॄणां च विशेषतः । यस्मिन्नर्थे मते साम्यं, स दृष्टान्तो[5] निगद्यते ॥९॥

इत्थंभूतमिदं चेति, शास्त्रानुज्ञापितं वटो । अर्थजातं भवेत् सिद्धं, तस्य संस्थितिरेव च ॥
इत्थं भावव्यवस्थाख्या[6] सिद्धान्तः प्रोच्यते बुधैः ॥१०॥

पञ्चानामपि चाङ्गानां न्यायस्य निर्धारिणाम् । लक्षणं तु प्रतिज्ञाद्यन्यतमत्वं विचार्यताम् ॥११॥

प्रतिज्ञाहेतुनामानावुदाहरणसंज्ञकः । तूरीय उपनयः प्रोक्तो निगमनञ्च पञ्चमः ॥
अनुमानात्मभूता वै, पञ्चैतेऽवयवा. स्मृताः ॥१२॥

अविज्ञातञ्च यस्यास्ति तत्त्वं तस्मिन् किलार्थके । हेतूपपत्तितस्तत्वज्ञानायोहस्तु तर्ककः[8] ॥१३॥

संदिह्य पक्षतः पूर्वं, प्रतिपक्षाद्धि वा पुनः । अर्थावधारणं ज्ञेयो, निर्णयः [9]सर्वसम्मतः ॥१४॥

प्रमाणतर्कतो यत्र स्थापनप्रतिषेधकौ । सिद्धान्तादविरूद्धश्च पञ्चावयवसंयुतः ॥
पक्षस्य प्रतिपक्षस्य चादानं[10] वाद उच्यते ॥१५॥

छलेन जातितो यत्र, निग्रहस्थानतोऽपि वा । मण्डनं खण्डनञ्चैव, स[11] जल्पो वादवन् मतः ॥१६॥

न स्थापयति यः पक्षं, प्रतिपक्षस्य निन्दनात् ।[12] वैतण्डिकः स विज्ञेयः, परपक्षविखण्डकः ॥१७॥

जल्पधर्मानुगामी च, तथा वैतण्डिकोऽधमः । तिस्रः कथा भवन्त्यत्र, वादो जल्पो वितण्डिका ॥
तासु वादो वरीयान् हि, तत्र तत्त्वावधारणात् ॥१८॥

विवादो नैव कर्तव्यस्तत्र जाते विरोधिता । विरोधितत्वसंबुद्धिर्न जायते कदाचन ॥१९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

*पञ्चरूपोपपन्नत्वाभावे तद्रूपतो यदि । भासमानत्वमाहुर्वै, हेत्वाभासस्य[13] लक्षणम् ॥२०॥+

आद्यः सव्यभिचारो हि, विरुद्धस्तु द्वितीयकः । प्रकरणसमः साध्यसमो ह्यतीतकालकः ॥
हेत्वाभासस्य भेदास्तु, एते पञ्चप्रकीर्तिताः ॥२१॥

वादिमान्यवचोघातोऽर्थविकल्पेन युक्तितः ।[14] तच्छलं विदुषा ज्ञेयं, नवकम्बलको यथा ॥२२॥

वाग्छलं किल सामान्यच्छलं हि चोपचारकम् । छलमेवं त्रिधा ज्ञेयं, विद्याचरणयुग् द्विजः ॥२३॥

मञ्चाः क्रोशन्ति नित्यं वै, द्वितीयकतृतीययोः । क्रमेणोदाहृतो ज्ञेये, प्रसिद्धे पुस्तकान्तरे ॥२४॥†

हेता उक्ते प्रसंगो यः, साधर्म्यात्तत्र जायते । वैधर्म्यात् प्रतिबोधो वै, सा[15] जाति दुस्तरा मता ॥२५॥

विरुद्धा कुत्सिता वा या, स्वोक्तिर्हास्यकारिणी । विप्रतिपत्तिरेषा सा, वक्तव्यस्योक्तिरेव न ॥२६॥

अप्रतिपत्तिरहो निन्द्ये, शास्त्रार्थे विदुषां सदा । त एव निग्रहस्थानं,[16] पराजयविधायकम् ॥२७॥

हेतुबाहुल्यतो जातेर्निग्रहः स्थानकस्य च । बहुत्वं भो वटो ज्ञेय, स्वस्मात्तच्च निवारयेत् ॥२८॥

पदार्था लक्षिताः सर्वे, कण्ठे धार्याः प्रयत्नतः । तेन विद्वत्सभायां वै, मान्यताविजयौ ध्रुवौ ॥२९

एतेषां तत्त्वबुद्धेस्तु प्राप्यते मोक्ष एव हि । ज्ञानं तु श्रीगुरोर्विष्णोः कृपया च विजायते ॥३०॥

+ हेतुवदाभासते–इति हेत्वाभासशब्दो दुष्टहेतुपरकः । हेतोराभासः इति शब्दो हेतुनिष्ठदोषपरकः ।

* पञ्चरूपोपपन्नता तु अन्वयव्यतिरेकिण एव हेतोः, केवलान्वयिनः केवलव्यतिरेकिणश्च चतूरूपोपपन्नतैवेति विवेकः ।

† असदुत्तररूपाया जातेः २४ भेदाः । तथा पराजयहेतुभूतस्य निग्रहस्थानस्य च २२ भेदाः सन्ति ।

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—❀ विनायकानामभिनन्दनम् ❀—

आचार्यः श्रीनारायणशास्त्री काङ्करः एम.ए, विद्यालङ्कारः, जयपुरम्

चतुर्थ-निर्वाचन-संयुगेऽद्य,
जयश्रियं प्राप्य प्रशासनस्य ।
तत्तत्पदेषु प्रमुदा स्थितानां,
विनायकानामभिनन्दनं वः ॥१

इस चतुर्थ महानिर्वाचन-समर में विजयश्री प्राप्त करके सरकारी उन उन पदों पर बड़ी प्रसन्नता से विराजमान हुए आप लोग विशिष्ट नेताओं का अभिनन्दन है।

धन्यं स्वराज्यं जनतान्त्रिकं तत्,
प्रजाजना आत्महिताय यत्र ।
निर्वाचितैर्योग्यजनैः स्वमध्यात्,
प्रशासते स्वानकुतो भया हि ॥२

अहो ! वह जनतान्त्रिक स्वराज्य धन्य है—जिसमें प्रजाजन अपने हित के लिये अपने ही में से निर्वाचित किये गये योग्य व्यक्तियों के द्वारा निश्चिन्त होकर अपने आप पर प्रशासन किय करते हैं।

विज्ञातमेतद् भवतां भवेद् यत्,
प्राप्ताऽनुभूतिर्जनता चिरेण ।
स्वकीय-भाग्यं भवदीय-हस्ते,
समर्प्य किञ्चित् सुखमोप्सतीति ॥३

यह आपको विदित है ही कि विगत बीस वर्षों से अनुभव प्राप्त की हुई जनता अपने भाग्य को आपके हाथों में सौंप कर कुछ सुख प्राप्त करना चाहती है।

सर्वानुकूलं भवताद् यदेव,
सुखं तदेवाऽभिहितं सुधीभिः ।
तस्माद् भवन्तो न तदाचरन्तु,
स्वप्नेऽपि जीवार्तिकरं भवेद् यत् ॥४

"जो सबके अनुकूल पड़ता है" विद्वानों ने उसी को "सुख" बताया है। अतः आप लोग ऐसा आचरण कभी न करना—जो स्वप्न में भी जीवों को पीड़ा पहुंचाने वाला हो।

हे नेतृवर्य्याः ! कटु सत्यमेतद्,
गतेषु वर्षेषु यदस्मदीये ।
प्रशासकीये खलु रीति-नीती,
किञ्चिन्न सिद्धे सुखदेऽनुकूले ॥५

हे उत्तम नेताओ ! यह कटु सत्य है कि गत वर्षों में हमारी प्रशासनिक रीति-नीतियां कुछ भी सुखद और अनुकूल सिद्ध नहीं हो पायीं।

महार्धता वै सुरसेव भीष्मा,
व्यात्तानना नोऽत्तुमुपद्रुताऽस्ति ।
त्रातुं ततो हा ! नहि दृश्यतेऽन्यः,
श्रीमन्त एवाऽत्र पुनर्यतन्ताम् ॥६

आज घोर महंगाई सुरसा की भांति मुँह खोले हुए हमें खाने को झपट पड़ी है। हा ! खेद है, कोई भी इससे रक्षा करने वाला नहीं दीख पड़ता !! जरा, श्रीमान्जी ! आप ही इस विषय में फिर यत्न करो तो ठीक हो।

शिक्षा न दीक्षा न तथैव भाषा,
भूषाऽपि हा हन्त! न चाऽस्ति देश्या।
खाद्यं च पेयं परकीयमेव,
सेव्यं यदा स्यात्, किमु वाच्यमत्र ॥७

हा हन्त ! आज शिक्षा, दीक्षा, भाषा और भूषा भी देशी नहीं है। भला, जब खाद्य और

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पेय हो परदेशी प्राप्त हो रहा हो, तब यहाँ बोलने का अवसर ही कहाँ है ?

स्वदेशितायां न हि प्रेम याव–
ज्जागर्त्ति जायेत कथं तदेतत् ?
स्वानेव तस्मादयि नेतृवर्य्याः !
देशानुरागे समुदाहरन्तु ॥८

स्वदेशता के प्रति प्रेम जब तक लोगों में जागृत नहीं हो जाता, तब तक यह कैसे हो सकता है ? अतः हे श्रेष्ठ नेताओ ! आप लोग अपने स्वयं का ही देश प्रेम का अच्छा उदाहरण प्रस्तुत करो ।

लोकोऽनुवर्त्ती नितरां प्रकृत्या,
महाजनानां भवतीति गीतम् ।
तस्याऽनुशिष्टावयि नेतृवर्य्याः !
श्रीमन्त एवाऽत्र परं प्रमाणम् ॥९

गीता में भगवान् श्रीकृष्ण ने कहा है कि जन-साधारण स्वभावतः अपने से बड़ों का अनुकरण किया करता है। इसलिये हे उत्तम नेताओं ! आप ही उस जन-साधारण में अनुशासन बनाये रखने में परम प्रमाण हो।

धर्मात् पृथङ् नो नृपनीतिरोक्ष्या,
यतस्तथेक्षा क्षतिदाऽस्त्यतीव ।
धर्मं पुरस्कृत्य हि राजनीत्या,
युधिष्ठिरोऽसौ विजयं सुलेभे ॥१०

धर्म से राजनीति को कभी भी पृथक् मानकर व्यवहार मत करना – क्योंकि ऐसा करने से अत्यन्त क्षति हो जाती है। देखो, धर्म को आगे रख कर राजनीति से व्यवहार करते हुए राजा युधिष्ठिर ने बड़ी आसानी से विजय प्राप्त करली थी।

प्राणैः स्वधर्मः परिरक्षणीय–
स्त्याज्योऽन्यधर्मश्च सहैव मान्यः ।
एषैव रीतिः खलु लाभदाऽस्ति,
भयावहो रे परधर्म उक्तः ॥११

प्राणों से भी स्वधर्म की रक्षा करनी चाहिये और परधर्म का परित्याग कर देना चाहिये – किन्तु उसका सम्मान अवश्य करना चाहिये। यह रीति निश्चित लाभदायक होती है। अरे ! भगवान् श्रीकृष्ण ने भी पर धर्म को बड़ा भयावह बताया है।

विशेष वक्तव्य–

धर्म का क्षेत्र बड़ा लम्बा चौड़ा है। उसमें से एक यह भी है कि जो व्यक्ति जिस दल का सदस्य हो – उसी का बन कर रहना उस व्यक्ति का स्वधर्म है। यदि वह किसी स्वार्थवश स्वदल अर्थात् स्वधर्म का त्याग करके पर दल अर्थात् परधर्म को स्वीकृत करता है तो वह सामाजिक, राजनैतिक और धार्मिक इन तीनों ही दृष्टियों से हानिकारक है। अतः स्वदल में रहते हुए स्वधर्म का पालन करना प्रत्येक व्यक्तिका परम पवित्र कर्त्तव्य है और साथ में उसके लिए यह भी आवश्यक है कि वह स्वदल में रहते हुए पर धर्म अर्थात् पर-दल का सम्मान करे – उसकी भावनाओं को किसी प्रकार की ठेस न पहुँचाये। यही आज भी पुराकाल से चली आयी भारतीय धर्म-निरपेक्षिता का विशद अभिप्राय है।

रामस्य राज्ये न हि कश्चिदासीत्,
क्षुधी तृषो वा गदवान् वियोगी ।
निराश्रयो निन्दितकर्मकारी,
नग्नो दरिद्रोऽप्यनवाप्त-विद्यः ॥१२

राम के राज्य में कोई भी भूखा, प्यासा, रोगी, वियोगी, बेघरबार, निन्द्यकर्मकर्त्ता, नंगा, दरिद्र और अशिक्षित नहीं था।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रजाजनानामनुरञ्जनेन,
त्यागैकवृत्त्याऽप्रतिमो मनस्वी ।
श्रीरामचन्द्रो मनु-मार्ग-यायी,
मान्यो महीयानभवत् सुशास्ता ॥१३

मनु-निर्दिष्ट मार्ग का अनुगमन करनेवाले अद्वितीय मनस्वी श्रीरामचन्द्रजी प्रजाजनों का अनुरञ्जन करने से और त्याग की वृत्ति का पालन करने से ही विश्व में महामान्य सुशासक बन सके थे।

श्रीरामराज्यं सुखदं स्वतन्त्रे,
देशेऽस्मदीयेऽपि ववाञ्छ गान्धी ।
हा ! किन्तु सोऽयं समयात् पुरैव,
दुर्दैवतो नः समभूद् दिविष्ठः ॥१४

परम पूज्य महात्मा गांधी भी हमारे स्वतन्त्र भारत में सुखदायक रामराज्य की ही स्थापना कर देना चाहते थे। किन्तु अतीव दुःख है, वे ये महात्मा हमारे दुर्भाग्य से समय से पूर्व ही दिवङ्गत हो गये।

तस्माज्जनानां प्रियनेतृवर्य्याः !
प्राप्ताधिकाराः परिपूर्णशक्त्या ।
महात्मनोऽमुष्य भवन्त एव,
स्वप्नानिदानीं चरितार्थयन्तु ॥१५

अतः हे जनता के प्यारे श्रेष्ठ नेताओं ! आप लोगों को अधिकार प्राप्त हैं। इस कारण आप ही पूरी पूरी शक्ति लगाकर उस राष्ट्रपिता के स्वप्नों को अब साकार करके दिखादो।

गवां सुरक्षाऽस्तु कृषिप्रधाने,
देशेऽस्मदीये हि समृद्धिदात्री ।
तुष्टिं च पुष्टिं परिलभ्य लोकाः,
स्वातन्त्र्य-सौख्यं सरसं स्वदन्ताम् ॥१६

इस हमारे कृषि प्रधान देश में गायों की सुरक्षा होनी चाहिये क्योंकि गोरक्षा सदा से समृद्धिदात्री रही है। गोरक्षा होने पर लोग तुष्टि और पुष्टि पाकर स्वतन्त्रता के सच्चे रसवान् सुख का स्वाद ले सकेंगे।

बुद्धस्य वीरस्य जनि-प्रदेशे,
न प्राणिहिंसा भवतात् कदापि ।
अशोक-चक्रं कुरुतादशोकं,
राष्ट्रध्वजे नोऽङ्कितमार्यलोकम् ॥१७

विश्व विख्यात महात्मा बुद्ध और महावीर स्वामी की जन्मभूमि भारत में प्राणिहिंसा कभी भी नहीं होनी चाहिए। हमारे राष्ट्रध्वज में अङ्कित अशोकचक्र आर्यलोक को स-शोक न होने दे।

भाषाविवादः कलहस्य मूलं,
देशैक्य-नाशी सुचिरात् प्रवृत्तः ।
सर्वप्रियां संस्कृतमार्यभाषां,
प्रचार्य देश्यां तमिमं हरन्तु ॥१८

बहुत समय से देश की एकता को छिन्न-भिन्न कर देने वाला भाषा-विवाद चला आ रहा है—यही कलह की जड़ है। अतः हे नेता लोगो ! आप, सब को प्यारी स्वदेशी आर्यभाषा संस्कृत का प्रचार करके इस भाषा-विवाद का उन्मूलन कर दो।

आङ्ग्लीं विदेश-व्यवहार-भाषां,
देशैक्य-हेतोर्निजप्रान्तभाषाः ।
सम्मानयन्तः सममेव तासा—
मेकां लिपिं तु प्रतिपादयन्तु ॥१९

देश की एकता बनाये रखने के लिए विदेशी भाषा अंग्रेजी का केवल विदेश व्यवहार के लिये उपयोग और अपनी सभी प्रान्तीय भाषाओं का सम्मान करते हुए उन सबकी एक ही दो नागरी लिपि निर्धारित कर दो।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समस्तभाषा-जननीं पुराणीं,
निलिम्पवाणीममरामधीत्य ।
सुताः सुराणाममृतं पिबन्तो,
यथेप्सित शांतिसुखं लभन्ताम् ॥२०

भगवान् करे आपके सत्प्रयत्नों से समस्त भाषाओं की प्राचीनतम जननी अमरवाणी देवभाषा का अध्ययन करके अमरपुत्र अमृत पान करते हुए यथेच्छ शान्ति सुख को प्राप्त करें।

तेजस्विनः स्याम वयं तथैव,
यथैव शत्रुर्निजमस्तकस्योत्- ।
पातात् पुरैवाऽस्तु नियन्त्रणे नो
ऽथवा स्वयं स्तान्निज-कर्मनष्टः ॥२१

हम लोग वैसे तेजस्वी बन जायें जिससे शत्रु शिर उठाने के पूर्व ही हमारे वश में आ जाय अथवा वह स्वयं ही अपने कुकर्मों के कारण नष्ट हो जाय।

स्वपूर्वजानां चरितं स्मरन्ती
प्रेमाऽऽवहन्ती निजसंस्कृतौ च ।
यथोद्धरेत् स्वां जनता भवन्त-
स्तथाऽऽत्म्यचारित्र्यमुदाहरन्तु॥२२

अपने पूर्वजों के पावन चरित्र का स्मरण करती हुई और अपनी संस्कृति के प्रति अगाध प्रेम धारण करती हुई जनता जिस प्रकार भी अपने आप का स्वयम् उद्धार करले; हे नेताओं! आप लोग उसके सामने आत्मचरित्र का उदाहरण प्रस्तुत करो।

देशोऽस्मदीयश्चटका सुवर्ण्या,
जगद्गुरुश्चापि पुरैष जातः ।
यथार्थनामाऽस्त्वधुनापि येन,
तथा प्रयासः सफलो विधेयः ॥२३

इतना ही नहीं, अपितु यह हमारा भारत देश किसी समय में सोने की चिड़िया कहा जाता था! जगद्गुरु की पदवी भी इसे प्राप्त थी!! आज भी वह वैसा ही नामानुसारी गुणवान् बन जाय, वैसा, हे नेता लोगो! आपको सफल प्रयास करना चाहिये।

श्री-रामगञ्जे जयपत्तनस्य,
सुमेरुकर्णाध्व-निवासकृद् वः ।
करोति नारायणकाङ्करोऽयं,
हारापणं मञ्ज्वभिनन्दनेन ॥२४

सुमेरुकर्ण मार्ग, रामगञ्ज, जयपुर-३ (राजस्थान) में निवास करनेवाला यह नारायणकाङ्कर आपको अभिनन्दन के साथ मञ्जुल हार अर्पित करता है।

विचार-सूत्रे ग्रथितोऽयमच्छः
पद-प्रसूनोत्कर-तार-हारः ।
प्रेम्णाऽर्पितः कण्ठगतो मनोहृत्
सुशोभतां वोऽद्य प्रमोदकाले ॥२५

हे प्यारे नेताओ! आज इस प्रमोद के अवसर पर आपको विचाररूपी धागे में पिरोया हुआ पदरूपी कुसुमों का यह अद्वितीय मनोहर दिव्य हार बड़े प्रेम से अर्पित किया है। कण्ठगत हुआ यह आपको सदैव सुशोभित करता रहे।

प्रश्नः

'बिम्बाकारं सुधाधारं कान्तावदनपङ्कजम् ।
अत्र क्रियापदं गुप्तं मर्यादा दशवार्षिकी ॥'
विद्वन्मनोविनोदाय प्रश्नोऽत्रायं प्रकाशितः ।

—मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ श्रीशिवराज्योदये महाकाव्ये

२७ सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः, डी.लिट्, नागपुरम्

अथाफझुल्लः स्मयदूषितोऽसौ
स्वहस्तबद्धं रिपुमूहमानः ।
प्रतापदुर्गं प्रति सम्प्रयातुं
दिनोदयादेव भृशोत्सुकोऽभूत् ॥१॥

स प्रातराशं मधुमद्यपूर्णं
गोमांसभोजी सहसा समाप्य ।
सेनाविभागाधिकृतः समस्तान्
निजाधिवासे द्रुतमाजुहाव ॥२॥

तेष्वागतेष्वाहितसम्मदेषु
स्वकार्यसिद्धावपसंशयेषु ।
मुहुर्मुहुः प्रस्फुटगूढहासः
स वीरमानी गिरमुज्जगार ॥३॥

अद्यागतोऽसौ दिवसश्चिरेण
प्रतीक्षितो यो हि मयाऽऽतुरेण ।
यदर्थमत्यन्तमचिन्तयध्वम्
यूयं च सर्वे निजधामकामाः ॥४॥

अद्यापराह्णे तमरिं शिवाजिं
तुरङ्गमारूढमपि प्रसह्य ।
सन्दृष्टमात्रं स्वकरेऽवबध्य
युष्मत्समक्षं स्वयमाहरामि ॥५॥

किं वा मदालोकनभीतभीतं
पुरःस्थितं तं परिकम्पिताङ्गम् ।
कण्ठे वितस्त्या साहसाऽवगृह्णन्
उत्क्षिप्य निक्षिप्य विनर्तयामि ॥६॥

प्रणामहेतोर्नतमस्तको वा
भवेदसौ चेन्मम सम्मुखीनः ।
पृष्ठेऽञ्जसा तस्य तदैव हन्यां
प्राणापहर्त्रीं निजवज्रमुष्टिम् ॥७॥

रीतिं स्वजातेरथवाऽनुसृत्य
मत्पादसंस्पर्शमसौ चिकीर्षन् ।
जायेत चेदानतपूर्वकायः
पुनर्न चोत्थास्यति तस्य कायम् ॥८॥

क्षमामसौ याचितुमात्मबाहू
प्रसार्य चेदेष्यति मत्पुरस्तात् ।
आक्षिप्य वेगादुभयौ भुजाभ्या-
मुत्पाटयिष्यामि हि मूलतस्तौ ॥९॥

किं वा मदाश्लिष्टतनोरमुष्य
खर्वस्य मूर्धानमखर्वशक्त्या ।
कुक्षौ विनिष्पेष्य झटित्यहं तं
मूर्च्छान्धकूपे खलु पातयामि ॥१०॥

आरादसौ दृष्टिपथं मदीयं
कुतश्चिदायास्यति चेद् विमूढः ।
तीव्रासिपुत्रीं कटिपट्टगूढां
क्षेप्तास्मि तद्-वक्षसि तन्निमेषे ॥११॥

एवं स मत्तो मदिरातिरेकात्
सहावभावं बहुधा प्रजल्पन् ।
हसन्मुहुस्तानधिकारिणोऽपि
प्रहासयामास विवेकहीनान् ॥१२॥

दुर्भागधेयाहतशेमुषीका
यथेच्छमापीय मधूनि तत्र ।
उत्प्रेक्षमाणा विजयोत्सवं तं
विजापुरे भाविनमारभंस्ते ॥१३॥

ज्ञात्वा प्रयाणावसरं तदानी-
माज्ञापयत्तेषु महाबलाढ्यान् ।
पर्याणकालोचितवस्त्रशस्त्रा-
ण्याधाय मत्पार्श्वमुपेत चेति ॥१४॥

स चात्मदेहे लघुपर्वताभे
वासांसि सौवर्णमृगाङ्कितानि ।
कस्तूरिकागन्धमनोहराणि
दधौ निगूढच्छुरिकाणि वीरः ॥१५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उष्णीषमाधाय निजाधिकारो-
चितं शिरस्युज्ज्वलरत्नशोभि ।
आलोकितुं स्वीयमुदारूपं
स दर्पणाग्रे स्थितवान् मुहूर्तम् ॥१६॥

सुदुष्टबुद्धिः सहसाट्टहासं
कुर्वन्मुहुर्दर्पणसम्मुखस्थः ।
आज्ञापयामास च सैनिकानां
सहस्रमायान्तु मया सहेति ॥१७॥

वीराः सहस्रं धृतभीषणास्त्राः
शिरस्त्रसन्नाहसुगुप्तकायाः ।
उद्धूनयन्तश्चरणप्रहारैः
भुवो रजःस्तोममदभ्रमायन् ॥१८॥

निस्साणढक्कापणवानकानां
निह्लोदमुच्चैः रणतूर्यकाणाम् ।
विजृम्भमाणं सहसा निशम्य
द्रागाययौ वीतवयाः स एव ॥१९॥

सहस्रसिंहप्रखरप्रभावं
वीराग्रगण्य प्रथितोरुकीर्ते ।
अनीकिनीयं विधृतास्त्रशस्त्रा
समुद्यता यातुमितः किमर्थम् ॥२१॥

एकाकिनं चापि भवन्तमेको
यो द्रष्टुमीष्टे न हि भूरिभीरुः ।
शस्त्रास्त्रसन्नद्धसहस्रवीर-
परीतमीक्षेत कथं समक्षम् ॥२२॥

आयात् स युष्मत्समयानुसारं
श्रीमन्त आयान्तु च तद्वदेव ।
अनीकिनीदर्शनजातभीतिः
न जातु गेहात् स बहिर्निरीयात् ॥२३॥

सम्पद्यमानं सुचिरेण साध्यं
विपद्यते चेल्लघुनो निमित्तात् ।
विवेकिना तद्विविधप्रयत्नैः
हर्तव्यमेवेति हि नीतिरीतिः ॥२४॥

प्रवीर युष्मद्भुजदण्डवीर्यं
भेत्तं क्षमं यद् गजगण्डपिण्डम् ।
पदातिभिः संशयहेतुभूतैः
अलं तदेभिर्बलिभिः समस्तैः ॥२५॥

तन्मानयिष्यन् बहु वृद्धवाक्यम्
अनागतं चापि रिपोर्विशंक्य ।
इतो निवर्तध्वमिति स्ववीरान्
प्राह स्म सर्वानपि सोऽभिमानी ॥२६॥

क्षणान्निवृत्तेषु ततः स तेषु
चतुर्नृवाह्यं चतुरस्रयानम् ।
अध्यास्य कामं गमनोत्सुकोऽभूत्
स्वकार्यसिद्धिं द्रुतमाप्तुकामः ॥२७॥

तमन्वगच्छन्नधिकारिणोऽपि
कृष्णाजिमुख्याः समयानुसारम् ।
येषामसाधारणशक्तिमत्त्वाद्
बण्डाभिधानोऽभवदग्रयायी ॥२८॥

वृद्धः स तैः साकमभिप्रतस्थे
विलोक्य सर्वं स्वमतानुकूलम् ।
दध्यौ च भाग्योदयमुत्प्रसन्नः
शिवस्य सद्धर्मधुरन्धरस्य ॥२९॥

अथातिवेलं कुलदेवतायाः
ध्याने मनः स्वं प्रणिधाय भक्त्या ।
प्रस्थानकालं समया समीक्ष्य
शिवोऽपि पूजामुपसञ्जहार ॥३०॥

सवत्सधेनूनि सकाञ्चनानि
स धान्यराशीनि सभूषणानि ।
दानानि भूयांसि स दानशीलः
भक्त्या यथेच्छं द्विजसाच्चकार ॥३१॥

नतेन मूर्ध्ना जगृहे च तेषाम्
अवन्ध्यवाचां हृदयप्रकीर्णाः ।
दीर्घायुरारोग्यजयप्रदात्रीः
शुभाशिषो मन्त्रमयीरगण्याः ॥३२॥

भुक्त्वा च नैवेद्यगतं पवित्रं
दध्योदनं किञ्चन पूतभोजी ।
आचामदल्पाल्पमनेकवारं
गङ्गादितीर्थोपहृतं च तोयम् ॥३३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यायामसंस्कारदृषत्कठोरे
दधौ शरीरेऽपि स रक्षणार्थम् ।
सूक्ष्मं दृढायःकवचं सुगूढं
स्वदेहगुप्तिः प्रथमा हि नीतिः ॥३४॥

ततः शरच्चन्द्रमरीचिजाल-
लसद्धिमानीधवलं सुवासः ।
कौषेयमत्यन्तमृदु प्रकृत्या
दधौ स्वदेहे कवचद्रढिष्ठे ॥३५॥

काश्मीरजोन्मिश्रिततोयबिन्दू-
त्संसिञ्चनापादितकान्तकान्ति ।
वासो वसानस्तदतीव शुभ्रं
स परिजात्यां सुषमां जिगाय ॥३६॥

शिरस्त्रसंरक्षितशीर्षभागे
बबन्ध चोष्णीषमतीव चारु ।
यस्मिन् सुमाणिक्यमणिप्रकाशो
विलोलमुक्तास्तबकोऽतिरेजे ॥३७॥

कपाटवक्षस्यभिमानतुङ्गे
प्रवालशोणीकृतमौक्तिकालीम् ।
नैसर्गिकीं सत्त्वरजःप्रवृत्तिं
प्रदर्शयन्तीमिव संबभार ॥३८॥

म्लेच्छाधमानामतिघोरकृत्यैः
संधुक्षमाणस्य नितान्तमन्तः ।
क्रोधानलस्येव हि धूम्रलेखा
श्मश्रुप्रवृद्धिर्वदने विरेजे ॥३९॥

सुश्यामलश्मश्रुणि कान्तवक्त्रे
रराज तत् कुण्डलयुग्ममच्छम् ।
नीलाम्बुदाच्छन्ननभोविभागे
मन्दं विगाहीव बलाकयुग्मम् ॥४०॥

जीवाभिधानेन सुहृद्वरेण
पात्रोपनीता च्छुरिका विषाक्ता ।
न्यधायि गूढं सहसा भुजत्रे
रहस्यवार्तेव सुगोपनीया ॥४१॥

आभूषणं व्याघ्रनखानुकारि
करे सुगूढं बिभरांबभूव ।
अरौ पुरस्तादसुरायमाणे
नृसिंहसादृश्यमिवाधिगन्तुम् ॥४२॥

कृपाणमेकेन दधत् करेण
ह्यन्येन सत्पट्टिशमुग्रधारम् ।
आलोकयामास निजस्वरूपम्
आदर्शबिम्बे विमले हृदीव ॥४३॥

नवस्वराज्यप्रलयोद्यतस्य
क्रौर्यप्रसिद्धस्य रिपोरमुष्य ।
संपर्कहेतोर्बहिरापतन्तं
शिवं सखायः परितः प्रतीयुः ॥४४॥

प्रेमादराद् गद्गदिकावरुद्ध-
वचःप्रसाराः मुहुरुच्छ्वसन्तः ।
प्रणामनम्राः गलदश्रुधाराः
एकैकशस्ते शिवमूचुरेवम् ॥४५॥

स्वामिन् प्रसीद सदयो भव मय्यनन्ये
त्वत्पादपूजनसमर्पितजीवभावे ।
रुष्टोऽसि किं प्रणतदासजने स्वकीये
कृच्छ्रे प्रयासि यदितः स्वयमेकलस्त्वम् ॥४६॥

भ्रूभङ्गमात्रमथवा तव दृङ्निपातं
निर्हेतुकस्फुरणमप्यमुना मया हि ।
मत्वाऽनिशं खलु निदेशमलङ्घनीयं
किं किं न दुर्घटमकारि न देव कार्यम् ॥४७॥

भूयस्सु सत्सु वचनस्थितकिङ्करेषु
संकेततोऽपि हि तृणीकृत जीवितेषु ।
न स्वामिनो विदधति स्वयमल्पमात्रम्
ऊरीकरोषि किमु कर्म गरिष्ठमेतद् ॥४८॥

प्रब्रूहि देव हृदयस्थितमात्मनीनं
यत्किञ्चिदस्ति तव वाञ्छितमत्र कार्ये ।
मत्साधनीयमतिदुष्करमप्यहं तत्
प्राणव्ययेन सकलं खलु साधनवानि ॥४९॥

यासि प्रसह्य नरराक्षसमीक्षितुं तं
दुर्योधनं कपटकर्मपटुं त्वमेकः ।
अस्माभिरत्र विकलैरिव देव तावत्
औत्कण्ठ्यमात्मनि कथं खलु संनियम्यम् ॥५०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतावता हि समयेन कदापि राजन्
उल्लङ्घिता तव मनागपि नो मयाज्ञा ।
हा हन्त किन्तु मम विह्वलमद्य चेतः
प्रोल्लङ्घ्य तामनुसरेति तुदत्यजस्रम् ॥५१॥

सर्वेऽपि ते स्वामिपदारविन्दे
नत्वा नमोवाकमनेकवारम् ।
बाष्पप्रवेगादवरुद्धकण्ठा
ययाचिरे स्वानुगमभ्यनुज्ञाम् ॥५२॥

सुहृद्वराणां प्रणयार्णवं तम्
उल्लङ्घितुं नूनमशक्नुवानः
निसर्गधीरः स कृपाकटाक्षैः
परामृशंस्तान् सकलानुवाच ॥५३॥

विजानीथ कृच्छ्रं सखायः समस्तं
विजानामि हार्दं च यौष्माकमुच्चैः ।
सुधीभिस्तु संघर्षकाले दुरन्ते
स्वकर्तव्यमेवानुपास्यं कठोरम् ॥५४॥

प्रणामा इमे सन्तु मे वः समस्तान्
इमे चापरे मातरं प्रापणीयाः ।
पतत्वेष कायो ममाद्यारियोगे
स्वराज्यं परं त्रायतां हिन्दवीयम् ॥५५॥

शतघ्नीध्वनिः श्रोत्रमेयाद्यदैव
तदैवारि सेनाङ्गसंहारसत्रम् ।
समारभ्यतामत्र सर्वत्र वीरा
अविश्रान्तमावेशपूर्वं प्रचण्डम् ॥५६॥

दिव जन्मदातर्युपेते तदीयं
व्रतं विन्दते धर्मतः पुत्र एव ।
मृतश्चेदहं सङ्गरेऽस्मिन्निदानीं
सुतायार्य्यतामुग्रवीरव्रतं मे ॥५७॥

ममैकाकिनोऽभूज्जिजा जन्मदात्री
परं सर्वथा साऽस्य राष्ट्रस्य धात्री
(महाराष्ट्रधात्री)

तदाज्ञानुसारं यथापूर्वमेव
स्वधर्माधिराज्यं हि संवर्धनीयम् ॥५८॥

न सम्मानकामो न वा वित्तलोभः
न च स्वार्थमोहो न शक्त्युन्मदो वा ।
मनस्यस्तु वो राष्ट्रसेवाव्रतानां
सखायः कदाचित् कुतश्चित् कथञ्चित् ॥५९॥

इति कथमपि सद्विवेकवाक्यैः
प्रणयमयान् सुहृदोऽनुयातुकामान् ।
स्वयमरिदर्शनसत्त्वरस्तदानीं
भृशमुपदिश्य शिवोऽग्रतः प्रतस्थे ॥६०॥

शुभ कामनाओं के साथ

-: इंडस्ट्रियल इलेक्ट्रिक कारपोरेशन :-

अधिकृत विक्रेता :—

ट्रापाडर पावर केबल्स

साईमन्स इलेक्ट्रिकल इक्विपमेन्ट

के० मोहता मार्केट पहला तल्ला, पलटन रोड़, बम्बई-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

फाल्गुने मनोविनोदकणिका :—

(१) सखायौ

प्रथमः—मित्रवर्य । नमस्तुभ्यं चिराद् दृष्टोऽसि साम्प्रतम् ।
द्वितीयः—गर्दभाय मया नैव कदापि क्रियते नमः
प्रथमः—मया तु क्रियते मित्र ! शिष्टाचारविधानतः

(२) स्वप्नः

शम्भुः— 'मित्र ! रात्रौ मम भार्यया एष स्वप्नः दृष्टः यत् तया लक्षाधिपेन केनापि जनेन सह स्वविवाहः कृतः' इति ।

मित्रम्— 'सुहृद्वर ! न्नूनं त्वमसि धन्यः, यतो हि मदीया धर्मपत्नी तु दिने एव स्वप्नम् इमं नित्यं विलोकयन्ती वर्तते' इति ।

(३) उपदेशकः

एकत्र नगरे सभायां भाषमाणः कश्चन मध्ये एवावदत् यत् अयि सज्जनाः ! परपत्नी प्रत्यनुधावनं नैव कदाचन कर्तव्यम् अस्माभिः, यतो हि कर्म इदं लोके अस्ति विनिन्दितं पापजनकञ्च' इति

एतस्मिन् एव अवसरे कश्चिद् एकः नागरिकः मध्ये एव सहसा समुत्थाय किमपि मनसि चिन्तयन् इव तूष्णीम् अस्थात् ।

तदा उपदेकमहाराजः तं पृष्टवान् भवान् किमपि वक्तुकामः अस्ति किम् ?

एतत् तस्य वचः श्रुत्वा लज्जमानः स कथञ्चित् समवोचत् यत् क्षम्यतां महाराज ! नाहं किमपि विवक्षुः अस्मि । वस्तुतः अहन्तु केवलम् इदानीं भवता प्रोक्तेन अनेन वचनेन एतत् स्मृतवान् अस्मि, यद् ह्यः रात्रौ नवीनं कम्बल म्अहं कस्याः गृहे विस्मृत्यः' आगतः' इति ।

(४) पिण्डदानम्

भूदानस्य प्रसङ्गे कश्चन कृपणमहानुभावं प्रति दानसंग्रहीता जनः प्रार्थयत यत्—महाशय ! भूदाने भवतापि भूमिः दीयताम् ।

कृपणः— नास्ति मम समीपे काचिद् भूमिः ?
संग्रहीता— तर्हि स्वल्पं धनमेव वा दातव्यं कृपया इति ।
कृपणः— भगवन् ! अहम् इदानीम् अस्मि अधमर्णः (ऋणी)
ग्रहीता— एवं तर्हि श्रमदानम् एव कर्तव्यं त्वया ?' ।
कृपणः— महानुभाव ! इदानोमेव द्रावतरः मां समादिशत् यत् 'कतिपयमासान् यावत् त्वया पूर्णतया विश्रामः करणीयः' इति तस्योपदेशानुसारेण नाहं सम्प्रति श्रमदानं कर्त्तमपि शक्नोमि ।
ग्रहीता— 'तर्हि अस्माकं कृते पिण्डदानम् एव कृपया कर्तव्यम्' इति—

दीनानाथत्रिवेदी मधुपः
सहसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान प्राच्यविद्या प्रतिष्ठान, जोधपुर

द्वारा

शोध, सन्दर्भ एवं दुर्लभ्य महत्वपूर्ण ग्रंथों का
राजस्थान पुरातन ग्रंथमाला के अंतर्गत प्रकाशन

प्रकाशित ग्रंथों की सूची

(क) संस्कृत–प्राकृत

प्रकाशन का नाम	सम्पादक	मूल्य
		रुपये
दशकण्ठवधम्	श्री गंगाधर द्विवेदी	४–००
श्री भुवनेश्वरी महास्तोत्रम्	श्री गोपालनारायण बहुरा	३-७५
रत्नपरीक्षादि सप्तग्रंथ संग्रह	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य	९–२५
स्वयम्भूछंद	प्रो० एच० डी० वेलणकर	७–७५
वृतजातिसमुच्चय	,, ,, ,,	५–२५
कविदर्पण	,, ,, ,,	६–००
वृतमुक्तावली	स्व० पं० श्री मथुरानाथ भट्ट	३–७५
कर्णामृतप्रपा	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य	२–२५
पदार्थरत्नमंजूषा	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य प्रस्तावना—श्री दलसुख मोलवणिया	३–७५
त्रिपुराभारती–लघु-स्तव	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य	३–२५
प्राकृतानन्द	,, ,, ,,	४–२५
इन्द्रप्रस्थ-प्रबन्ध	डा० दशरथ शर्मा	२–२५
एकाक्षर–नाम कोश–संग्रह	पन्यासप्रवर मुनि रमणीकविजय	९–००
वासवदत्ता कथा	जै० एम० शुक्ला	४–५०
वृत्तभौक्तिक	म० विनयसागर	१८–२५
चांद्रव्याकरण	प० वेचरदास दोशी	७–००

पुस्तक विक्रेताओं को २५ प्रतिशत कमीशन दिया जाता है।

(राजस्थान सरकार द्वारा प्रकाशित)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

या भारतीयभाषाणां जननीति समीरिता ।
सा सुरवाक् स्वतन्त्रेऽस्मिन् भारते भातु भारती ॥

संस्कृतस्योद्धारायाऽस्माकं नेतृवर्यैर्विधीयमाना यत्नाः

राजस्थानस्य शिक्षामंत्री श्रीशिवचरण-माथुर महोदयः

रा० शिक्षामन्त्रि— **श्रीमाथुरमहानुभावो** गतदिवसेषु भीलवाडास्थ-संस्कृत-विद्यापीठ-द्वारा सङ्घटितं राजस्थान-संस्कृतशिक्षणसंस्था-सङ्घमुद्घाटयन् समभाषत यद् राजस्थाने संस्कृतस्य प्रसाराय प्रचाराय च देशस्यान्य-राज्यापेक्षया बहवः प्रयत्ना अक्रियन्त, राज्य सर्वकारश्च संस्कृतस्य प्रचाराय प्रयतमानो वर्तते ।

किञ्च रा० शिक्षामन्त्रि-श्रीमाथुरमहानु-भावेन देशस्यास्य प्राचीनतमसंस्कृति-संरक्ष-णार्थं संस्कृतशिक्षाया विकासस्यावश्यकता प्रकटिता, एवं संस्कृतशिक्षातत्पराणां स्वयं सेविसंस्थानां तथा सङ्घस्थापनस्य च प्रशंसा कृता ।

अग्रे च रा० श्रीशिक्षामन्त्रिवर्येण भणितं यद्यदि राजस्थाने एवंविधाः संस्था अग्रे वर्ध-मानाः स्युस्तर्हि संस्कृतविकासस्य कार्यमपि चेद-मतिसरलं सम्पद्येत, यतो हि सम्मिलितेन प्रयासेन यत्र सस्कृतशिक्षा वृद्धिं गता भविष्यति, तत्रैकनिष्ठताया दृढतायास्तथैकशक्त्याश्च भावनाः समुदेष्यन्तीति ।

प्रो० श्रीशेरसिंहमहानुभावः

राजस्थान-संस्कृत-संसद् द्वारा सञ्चालितस्य शिक्षाशास्त्रि - प्रशिक्षणालयस्य उद्घाटनसमारोहे केन्द्रीयशिक्षामन्त्रालये **राज्यमंत्रिणा प्रो० श्रीशेरसिंहमहाभागेन** भाषित यत् संस्कृत-भाषा हि भारतीयसर्वभाषाणां वर्तते जननी । सस्कृतशिक्षणे सारल्यं तथा वैज्ञानिकत्वञ्च सम्पादनीयं विद्वद्भिः ।

तथा चाग्रे श्रीशेरसिंहमहानुभावेन प्रतिपादितं यत् सेयं संस्कृतभाषा पूर्वमपि सम्पर्कभाषारूपेणास्थात्, सांस्कृतिकदृष्ट्या चाद्यापि संस्कृतभाषा सम्पर्कभाषा वर्तते । तथापि संस्कृतस्य समुचितः प्रसारो नाजायत । अत्र कारणञ्चेदमेव यद् भारतीयभाषाणां शिक्षायां स्थानप्राप्तेरभाव एव । यदा च शैक्षणिकं कार्यं भारतीयभाषासु सम्पत्स्यते, तदैव संस्कृतस्या-वश्यकतापि अनुभवपथमायास्यति ।

किञ्च संस्कृतशिक्षणस्याध्ययनाध्यापनयोः स्वरूपमद्याप्यपरिवर्तितमेव प्रचलति । अतः संस्कृतप्रणाल्यां सारल्यं वैज्ञानिकत्वञ्चापा-दितं स्यात्तदा विदेश्याश्छात्रा अपि संस्कृतस्य ज्ञानमधिगन्तुं प्रभवेयुः ।

अपि चाद्यत्वे स्थितिरियं वर्तते यत् संस्कृत-मिद जीवितभाषारूपेण नाङ्गीक्रियते प्रायो लोके लोकैः, यतो हि संस्कृतस्याध्ययना-ध्यापनयोर्विधिरेष देशस्य प्रभावशालिवर्गे न वर्तते । तथा चाद्य संस्कृतं त एव छात्राः पठन्ति, ये सन्त्यनाथाः, अथवा येषां माता-पितरौ निर्धनौ वर्तेते । अर्थात् धनिकवर्गस्या-पत्यन्तु संस्कृतं स्पृशत्येव नेति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रा० शिक्षामंत्री श्रीशिवचरणमाथुर-महानुभावः

प्रस्तुत-प्रसङ्गे भाषमाणेन श्रीराज्यशिक्षा-मन्त्रिमहोदयेन प्रतिपादितं यत् संस्कृतशिक्षाया विकासो ययापि रीत्या सम्भवेत्, तथावश्यं प्रयत्नो विधेयः, तथा संस्कृतसाहित्ये निहितस्य ज्ञानस्यान्वेषणञ्च सर्वैरपि विधेयम्। सहैव श्रीमाथुरमहानुभावेनैतदपि प्रोक्तं यत् पूर्व-काले गुरुकुलेषु यादृशो शिक्षाप्रणाली प्रचलित। वर्ततेस्म तादृश्येव प्रणाली साम्प्रतमपि प्रारब्धा भवतु-इत्यत्र विचारश्च कर्तव्यः।

प्रदेशकांग्रेसाध्यक्षश्रीनाथूराममिर्धामहोदयः

प्रदेश-कांग्रेसाध्यक्षः श्रीमिर्धामहानुभावो ऽवसरेऽस्मिन् स्वभाषणे प्रोक्तवान् यत् संस्कृत-मिदं जनमानसस्य वस्तु यथा भवेत्, तथा प्रयत्यम्, तथा च संस्कृते यन्निगूढं प्राक्तनं ज्ञानं निहितमास्ते, तदिदानीं बहिरानेतव्यं भवि-ष्यतीति।

डा० श्रीमण्डनमिश्रमहोदयः

दिल्लीस्थ-श्रीलालबहादुरशास्त्रि-राष्ट्रिय-संस्कृतविद्यापीठस्य निदेशकः श्रीमिश्रमहोदयो ऽप्यवसरेऽस्मिन् समवोचत् यत् 'सोऽयं महाराज-संस्कृत-कालेजो राष्ट्रियशिक्षासंस्थानं सम्पद्येत' इत्यस्यावश्यकतां प्रकटितवानिति।

मया तु प्रसङ्गेऽत्रैतदेव निवेद्यते यत्केन्द्रीय-सर्वकारो राज्यसर्वकारास्तथा संस्कृतपण्डिता-श्च वस्तुतः संस्कृतस्य प्रसारं हृदयेन कामयन्ते, तदा त्वत्र मनाग् ध्यानं दातव्यं भविष्यति-

१-साम्प्रतमत्र विषये सर्वतः प्रथमं संस्कृत-पण्डितानां कर्तव्यमिदमेव विद्यते यत्तैः संस्कृत-सेविभिर्विद्वद्भिः संस्कृते सारल्यमापादितं यथा स्यात् तथा प्रयत्नो विधेयः। संस्कृतज्ञाः सर्वेऽपि सभासम्मेलनादिषु मिथः संस्कृतमेव वदेयुः, यथांग्लभाषाविद आत्मानं धन्यं मन्यमाना मिथ आंग्लभाषामेव वदन्ति।

२-सर्वकारस्य कार्तव्यमिदं वर्तते यत्स-संस्कृतं त्रिभाषासूत्र्यां स्थानं लभेत, तथैव कृपया प्रयतेत।

३-सहैव सर्वकारेण यदि संस्कृतशिक्षाया अनिवार्यत्वं क्रियेत, तदा तु संस्कृतस्य व्यापकः सफलश्च प्रसारः सम्भवेदेव, यतो ह्येवं जाते तु धनाढ्यानां महापुरुषाणां निर्धनानां जनानां वा बालकाः सर्वेऽपि संस्कृतमध्येतुं प्रवृत्ता अवश्यं भविष्यन्ति। एतावता च सहैव संस्कृत-शिक्षणालयेषु छात्रसंख्यापि वृद्धिमेष्यतीति मदीयः सुदृढो निश्चयः।

४-वस्तुतो ये चापि महानुभावा रात्रि-न्दिवमपि सातत्येन संस्कृतं सेवमानाः सन्ति, तेषां कृते कन्द्रोयसर्वकारेण राज्यसर्वकारेण वा आर्थिकं साहाय्यमवश्यं दातव्यं भविष्यति।

५-किञ्च संस्कृतपरीक्षोत्तीर्णाः पण्डिता जना अपि कार्यालयादिषु अन्यभाषाभिज्ञा जना इव भृत्यर्थं यथा प्रवेशं लभेरन्, तथैव सर्व-कारेणाप्यात्मन औदार्यस्य परिचयोऽवश्यं दातव्यः।

उपाधिवितरणोत्सवः

जयपुरस्थ-महाराज-संस्कृत-कालेजस्योपाधि-वितरणोत्सवः (१७-२-६८) दिने राजस्थान-शिक्षामंत्रि-**श्रीशिवचरणमाथुर** महाभागानां साभापत्ये सम्पत्स्यते। अ० स० साहित्यसम्मे-लनस्य महामन्त्रिणो डा० **श्रीमण्डनमिश्र-**महोदयाश्चास्य मुख्यातिथयो भविष्यन्ति।

अहन्तु मन्ये यदवसरेऽस्मिन् सोऽयं सम्मान-नीयोऽस्माकं राजस्थानशिक्षामन्त्रिमहोदयो न केवलं रास्थानस्य कृत एवापि तु समग्रस्यापि संस्कृतजगतः कृते किमपि हितावहं कार्यमवश्यं विधास्यते इति।

दीनानाथत्रिवेदी मधुपः
भारती-सहसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्रीगिरिराजशर्मा शास्त्री, जयपुरम् ।

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः
शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः
कुर्वन्तु सर्वे मम सुप्रभातम् ॥३

ब्रह्मा, मुरारिः (विष्णुः) त्रिपुरान्तकारी (शंङ्करः), भानुः (सूर्यः) शशो (चन्द्रः) भूमिसुतः (मंगलः) बुधः, गुरुः, शुक्रः, शनैश्चरः, राहुः केतुश्च सर्वे ग्रहाः मम सुप्रभातं कुर्वन्तु। ब्रह्मविष्णुशङ्कराख्याः त्रिदेवाः सृष्टेः उत्पत्तिस्थिति प्रलयङ्कराः सन्ति। अतः तेषांमनुग्रहेणैव अस्माकं जीवनस्यास्तित्वंम्। अतः सर्वारम्भे तेषां स्तवनं कृतम्। ज्योतिषशास्त्रानुसारं सूर्यचन्द्रमङ्गलादोनां नवग्रहाणां शक्त्या अस्माकं वैयक्तिकं सामूहिकञ्च जीवनं नियन्त्रितं भवति। अतः तेभ्यः प्रतिदिनं प्रत्येकं प्रभातं मङ्गलमयं स्यात् एतदर्थं प्रार्थना कृतास्ति। मङ्गलमयप्रभातस्य प्रभावेण सम्पूर्णमपि दिनं मङ्गलमयं भवति।

ब्रह्मा, विष्णु, शंकर, सूर्य, चन्द्रमा, मंगल, बुद्ध, गुरु, शुक्र, शनैश्चर और राहु, केतु सारे ग्रह मेरे प्रभात को मंगलमय करें। ब्रह्मा, विष्णु, शंकर नामक ये तीनों देवता क्रमशः सृष्टि के उत्पत्ति, स्थिति तथा प्रलय के देवता हैं। उनकी कृपा से ही हमारे जीवन का अस्तित्व है। इसलिए सबके आरम्भ में उनकी स्तुति की है। ज्योतिष शास्त्र के अनुसार सूर्य चन्द्र मंगल आदि नवग्रहों को शक्ति से हमारा व्यक्तिगत और सामूहिक जीवन नियन्त्रित होता है। उनसे प्रतिदिन प्रत्येक प्रभात मंगलमय होवे। इसलिए प्रार्थना की गई है। मंगलमय प्रभात के प्रभाव से सारा दिन मंगलमय होता है।

सनत्कुमारः सनकः सनन्दनः
सनातनोऽप्यासुरिपिङ्गलौ च ।
सप्त स्वराः सप्त रसातलानि
कुर्वन्तु सर्वे मम सुप्रभातम् ॥४

पुराणेषु सनत्कुमारः, सनकः, सनन्दनः सनातनश्च एते चत्वारः भगवतो विष्णोः अवतारस्वरूपाः ब्रह्मदेवस्य मानसपुत्राः प्रख्याताः। पुराणग्रन्थेषु एतेषां विषये विभिन्नासु कथासु तेषां महिमा वर्णितोऽस्ति।

पुराणों में सनत्कुमार, सनक, सनन्दन और सनातन ये चार भगवान् विष्णु के अवतार रूप ब्रह्मा के मानसपुत्र प्रसिद्ध हैं। पुराणग्रन्थों में इनके विषय में इनकी महिमा का विभिन्न कथाओं में वर्णन किया गया है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इनसे मिलिये। आप एक फैक्टरी में 'एसिसटेन्ट फोरमैन' हैं। इन्होंने अपना जीवन 'लेबोरेटरी एसिसटेन्ट' के रूप में शुरू किया था, और सात साल के अरसे में ही आज इस पद पर पहुंच गये। इनकी सफलता का रहस्य उन्हीं के शब्दों में सुनिये—"काम तो सभी करते हैं। लेकिन मैंने कुछ ज्यादा जिम्मेदारियों के काम हाथ में लिये और बड़ी सूझबूझ और मेहनत से उन्हें पूरा किया। घर की तरफ से मैं परेशान नहीं रहा। मैंने अपने साथियों को देखा। उनके लम्बे चौड़े परिवार हैं। उनका सारा ध्यान और समझबूझ उनके घर की आये दिन की परेशानियों में ही लग जाती है। मैंने इसी बात पर ध्यान दिया। मेरे दो ही बच्चे हैं, जिन्हें मैं अच्छी से अच्छी शिक्षा देना चाहता हूं। मेरा छोटा सा परिवार सुखी है।"

ये खुश हैं —

और आप ?



avp 67/184

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसुरिः — सांख्यदर्शनप्रवर्तकस्य कपिलमुनेः श्रेष्ठशिष्यः आसीत्। पिङ्गलः – छन्दःशास्त्रं यत् वेदाङ्गत्वेन प्रसिद्धं तस्य निर्माता एष ऋषिः।

सप्तस्वराः — सङ्गीतशास्त्रे षजऋङ्षभेत्यादि सप्तस्वराः सन्ति ये सा, रे, ग, म, प, ध, नि इति नाम्ना लोके उच्चार्यन्ते। भौतिकदृष्ट्या सृष्टेः प्रत्येकं अंश एतेषु कस्याप्येकस्यांशेन व्याप्तोऽस्ति।

सप्तरसातलानि—अतलं, वितलं, सुतलं, रसातलं, महातलं, तलातलं, पातालञ्च।

पुराणेषु भूः भुवः स्वः महः जनः तपः सत्यं इति नाम्ना सप्तस्वर्गाः अर्थात्–ऊर्ध्वलोकाः वर्णिता उपरि निर्दिष्टाः सप्त रसातलाः अधोलोकाश्च वर्णिताः सन्ति। एतेषु चतुर्दशभुवनेषु मध्ये अस्माकं पृथ्वी स्थिताऽस्ति। सर्वव्यापिनः सप्त स्वराः सप्तरसातलाश्च मम प्रभातं मङ्गलमयं कुर्वन्तु।

आसुरिः — सांख्यदर्शन के प्रवर्तक कपिल मुनि के श्रेष्ठ शिष्य थे। पिंगल-छन्दः शास्त्र जो कि वेदांग के रूप से प्रसिद्ध है उसका निर्माता यह ऋषि है।

सप्तस्वरः – संगीतशास्त्र में षड्ज ऋषभ आदि सात स्वर हैं। जो सा रे ग म प ध नी इन नामों से संसार में उच्चारित होते हैं। भौतिक दृष्टि से सृष्टि के प्रत्येक अंश में इनमें से किसी भी एक के अंश से व्याप्त है।

सप्तरसातलः – अतल, वितल, सुतल, रसातल, महातल, तलातल और पाताल। पुराणों में भूः, भुवः, स्वः महः जन, तप और सत्य नामक सात स्वर्ग अर्थात् ऊध्व लोक गिने हैं। उपरोक्त सात रसातल अधोलोक गिने हैं। इन चौदह भुवनों (लोकों) के बीच में हमारी पृथ्वी स्थित है। ये सर्वव्यापी सात स्वर, सात रसातल मेरे प्रभात को मंगलमय बनावें।

सप्तार्णवाः सप्तकुलाचलाश्च
सप्तर्षयो द्वीपवनानि सप्त।
भूरादि कृत्वा भुवनानि सप्त
कुर्वन्तु सर्वे मम सुप्रभातम् ॥५

सप्तसमुद्राः, सप्तकुलाचलाः सप्तर्षयः सप्तद्वीपाः, सप्तवनानि सप्तभुवनानि मम सुप्रभातम् कुर्वन्तु।

सात समुद्र, सात कुलाचल, सात ऋषि, सात द्वीप, सात वन, सात भुवन मेरे प्रभात को मंगलता प्रदान करें।

सप्तसमुद्राः — पुराणानुसारं लवणाब्धिः, इक्षुसागरः सुरार्णवः, आज्यसागरः, दधिसमुद्रः, क्षीरसागरः स्वादुजलसमुद्रः लवणेक्षुरसमयघृत, दधि, दुग्ध शुद्धजालनां इति नामभिः सप्तसमुद्राणां सृष्टिमध्ये अस्तित्वं वर्णितम्।

सात समुद्रः – पुराणों के अनुसार लवणसागर, इक्षुसागर, सुरासागर, अज्यसागर, दधिसागर, क्षीरसागर, स्वादुजल सागर नाम से लवण ईख का रस, मद्य, घी, दूध, शुद्धजल के सात समुद्रों का सृष्टि में अस्तित्व का वर्णन है।

सप्तकुलाचलाः – "महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षवानपि। विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः॥"

सात कुलाचलः – इस महाभारत के श्लोक में सात कुलपर्वतों का नाम निर्देश है। परम्प-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन् महाभारतश्लोके सप्त कुलपर्वतानां नामनिर्देशो वर्णितः। परम्परागता इयं श्रद्धा-वर्तते यत् एतैः एव कुलपर्वतैः पृथिव्याः भारो गृहीतः।

सप्तर्षयः — कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गोतमः। जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः॥

अस्मिन् श्लोके निर्दिष्टेभ्यः कश्यपः – अत्रिः भरद्वाजः विश्वामित्रः गोतमः जमदग्निः वसिष्ठः इत्येतेभ्यः सप्तर्षिभ्यो अतिरिक्तं मरीचि-अत्रि अङ्गिरस, पुलस्त्यं, पुलह, वसिष्ठनामकाः सप्तर्षयः लोके प्रख्याताः सन्ति। इमान्येव नामानि आकाशमध्ये स्थितानां सप्तर्षिनामकानां तारकरणां प्रदत्तानि सन्ति।

सप्तद्वीपाः – जम्बुप्लक्षाभिधानौ च शाल्मलश्च कुशस्तथा। क्रौञ्चशाकौ पुष्करश्च ते सर्वे देवभूमयः॥

जम्बू–प्लक्ष–शाल्मल-कुश-क्रौञ्च-शाक-पुष्कराख्याः सप्तद्वीपाः देवानां निवासस्थानि मन्यन्ते।

सप्तवनानि–दण्डकारण्यं खण्डारण्यं चम्पकारण्यं वेदारण्यं नैमिषारण्यं ब्रह्मारण्यं धर्मारण्यं- इति नाम्ना सप्तारण्यानि रामायणे निर्दिष्टानि सन्ति।

पृथ्वी सगन्धा सरसास्तथापः
स्पर्शी च वायुर्ज्वलनं च तेजः।
नभः सशब्दं महता सहैव कुर्वन्तु,
सर्वे मम सुप्रभातम् ॥६॥

गन्धवती पृथ्वा, रसयुक्तं जलं, स्पर्शगुणयुक्तो वायुः, प्रज्वलितं तेजः, शब्दगुणयुक्तं आकाशं महत्तत्वेन (बुद्धया) सहितं सर्वे मम सुप्रभातं कुर्वन्तु।

मूलप्रकृतेः आद्यविकारः सांख्यदर्शनानुसारं महत्तत्वं कथ्यते, महत्तत्त्वं अर्थात् बुद्धितत्त्वम्।

रागत यह श्रद्धा है कि ये कुल पर्वत ही पृथ्वी का भार ग्रहण किये हुए हैं।

सात ऋषिः – इस श्लोक में बताये गये कश्यप, अत्रि भरद्वाज, विश्वामित्र, गोतम, जमदग्नि, वसिष्ठ इन सात ऋषियों के अलावा मरीचि, अत्रि, अंगिरस, पुलस्त्य, पुलह, क्रतु वसिष्ठ नामक सात ऋषि लोकप्रसिद्ध हैं। इन नामों से ही आकाश के बीच में स्थित सप्तऋषिमण्डल तारों का नाम दिया गया है।

सातद्वीपः – जम्बु, प्लक्ष, शाल्मल, कुश, क्रौञ्च, शाक, पुष्कर नामक सात द्वीप देवों के निवासस्थान माने जाते हैं।

सात वनः – दण्डकवन, वंडावन, चम्पकवन, वेदारण्य नैमिषारण्य, ब्रह्मारण्य, धर्मारण्य नामक सात वन रामायण में बताये गये हैं।

गन्धवाली पृथ्वी, रसयुक्त जल, स्पर्श गुणयुक्त वायु, प्रज्वलित तेज, शब्दगुण युक्त आकाश, महत् तत्त्व के सहित ये सब मेरा प्रभात मंगलकारी करें।

मूलप्रकृति के आद्य विकार को सांख्य दर्शन के अनुसार महत्तत्त्व कहते हैं। महत्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृथ्वीजलतेजोवाय्वाकाशानि इति पञ्चमहाभूतानि सन्ति । प्रस्तुतश्लोके तेषां पञ्चमहाभूतानां स्वविशेषगुणानामपि निर्देशः कृतोऽस्ति ।

गंगा सिन्धुश्च कावेरी
यमुना च सरस्वती ।
रेवा, महानदी गोदा,
ब्रह्मपुत्रः पुनातु माम् ॥८॥

गंगाः — गङ्गाभारतवर्षस्य सर्वश्रेष्ठा नदी अस्ति । गङ्गाजलं पवित्रतायाः निर्मलतायाः उपमानं वर्तते । संसारस्य सर्वासां नदीनां जलं अल्पकाले एव दूषितं भवति, किन्तु गङ्गाजलं कदापि दूषितं न भवति । हिमालये गङ्गोत्री-स्थानं गङ्गायाः उद्गमं मन्यन्ते जनाः । तस्मात् हिमालयशिखरात् निस्सृत्य गङ्गा हरिद्वारे समतलप्रदेशे आगत्य उत्तरप्रदेशं, बिहारप्रदेशं, बङ्गप्रदेशञ्च स्वपवित्रजलप्रवाहेण पवित्रयति । (पावनं करोति) । गङ्गायाः तटे सहस्रं तीर्थ-स्थलानि अवस्थितानि सन्ति । तेषु हरिद्वार-प्रयागकाशीतीर्थानां महिमा सर्वश्रेष्ठोऽस्ति । अनादिकालात् लक्षशः ऋषयः, मुनिजनाः सिद्धाः संन्यासिनश्च गङ्गायाः तटे उग्राणि तपांसि कृत्वा परमात्मसाक्षात्कारं कृतवन्तः । भगवता श्रीरामकृष्णपरमहंसेन गङ्गाजलं 'ब्रह्मवारि' इति नाम्ना उच्चारितम् । पुराणमतानुसारं गङ्गा विष्णुचरणात् निस्सृत्य स्वर्गलोके प्रवहते । सगरवंशीयानां महाराजानां विशेषतः भगी-रथस्य दीर्घतपश्चर्यायाः परिणामेन गङ्गा पृथिव्यामवतीर्णाऽभूत् । तस्याः स जलप्रवाहः भगवता शङ्करेण स्वजटाजूटे धारितः । तदन-न्तरं जह्नुनृपस्य कर्णात् तज्जलप्रवाहः प्रस्फु-रितः । अस्मादेव कारणात् गङ्गा भागीरथी जह्नवी च कथ्यते जनैः ।

सिन्धुः — हिमालये गङ्गोत्री स्थानस्य सन्नि-कटादेव समुत्पन्ना । इयं सिन्धुनदी पञ्चाम्बु-

तत्त्व यानी बुद्धितत्व । पृथ्वी, जल, वायु, अग्नि, आकाश ये पांच महाभूत हैं । प्रस्तुत श्लोक में उन पांच महाभूतों के निजी विशिष्ट गुणों का भी निर्देश किया गया है ।

गंगाः – भारतवर्ष की सर्वश्रेष्ठ नदी है । गङ्गाजल पवित्रता का निर्मलता का उपमान है । संसार की सारी नदियों का जल अल्पकाल में ही दूषित हो जाता है किन्तु गंगाजल कभी दूषित नहीं होता । लोग हिमालय में गंगोत्री स्थान को गंगा का उद्गम मानते हैं । उस हिमा-लय शिखर से निकलकर गंगा हरिद्वार में समतलप्रदेश में आकर उत्तरप्रदेश, बिहार-प्रदेश और बंगप्रदेश को अपने पवित्रजल प्रवाह से पवित्र करती है । गंगातट पर हजारों तीर्थ स्थान खड़े हैं । उनमें हरिद्वार, प्रयाग, काशी तीर्थों की महिमा सर्वश्रेष्ठ है । अनादि-काल से लाखों ऋषि-मुनि सिद्ध संन्यासी गंगा के तट पर उग्रतप करके परमात्मा का साक्षा-त्कार कर चुके है । भगवान् श्री रामकृष्ण परम हंस ने गंगाजल को 'ब्रह्मवारि' कहा है । पुराणमत के अनुसार गंगा विष्णुचरण से निकलकर स्वर्गलोक में बहती है । सगरवंशीय महाराजाओं के विशेषतः भगीरथ की लम्बी तपस्या के परिणाम से गंगा पृथ्वीपर अवतीर्ण हुई । उसका वह जलप्रवाह भगवान् शंकर ने अपने जटाजूट में धारणकर लिया । इसके पश्चात् जह्नु, राजा के कान से वह जलप्रवाह निकला । इसी कारण गंगा को भागीरथी और जाह्नवी कहते हैं ।

सिन्धुः – हिमालय में गंगोत्रीस्थान के पास से ही समुत्पन्न यह सिन्धु नदी पंजाब प्रदेश में

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान प्राच्यविद्या प्रतिष्ठान, जोधपुर

द्वारा

शोध, सन्दर्भ एवं दुर्लभ्य महत्वपूर्ण ग्रन्थों का

राजस्थान पुरातन ग्रन्थमाला के अन्तर्गत प्रकाशन

प्रकाशित ग्रंथों की सूची

(ख) राजस्थानी – हिन्दी

प्रकाशन नाम	सम्पादक	मूल्य
कान्हड़दे प्रबन्ध	प्रो० के० बी० व्यास	रु० १२–२५
क्यामखां रासा	डा. दशरथ शर्मा और अगरचन्द भंवरलाल नाहटा	४–७५
लावा रासा	श्री महताबचन्द खारेड़	३–७५
बांकीदास री ख्यात	श्री नरोत्तमदास स्वामी	५–५०
राजस्थान साहित्य संग्रह भाग १	,, ,, ,,	२–२५
,, ,, ,, भाग २	डा० पुरुषोत्तमलाल मेनारिया	२–७५
कवीन्द्र-कल्पलता	रानी लक्ष्मीकुमारी चूण्डावत	२–००
जुगलविलास	,, ,, ,,	१–७५
भगतमाल	श्री उदयराज उज्जवल	१–७५
राजस्थान पुरातत्व मंदिर के हस्त-लिखित ग्रन्थों की सूची भाग १	पदमश्री मुनि जिनविजय, पुरातत्वाचार्य	७–५०
राजस्थान प्राच्यविद्या प्रतिष्ठान हस्त-लिखित ग्रन्थों की सूची भाग २	श्री गोपालनारायण बहुरा	१२–००
राजस्थान हस्तलिखित-ग्रंथ-सूची भाग १	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य	४–५०
,, ,, ,, भाग २	डा० पुरुषोत्तमलाल मेनारिया	२–७५
स्व० पुरोहित हरिनारायणजी विद्याभूषण ग्रन्थ संग्रह	श्री गोपालनारायण बहुरा	६–२५
मुहता नैणसी री ख्यात भाग १	श्री बदरीप्रसाद साकरिया	८–५०
,, ,, ,, भाग २	,, ,, ,,	९–५०
,, ,, ,, भाग ३	,, ,, ,,	८–००
,, ,, ,, भाग ४	,, ,, ,,	८–७५
राजस्थानी साहित्य संग्रह भाग ३	श्री लक्ष्मीनारायण गोस्वामी	५–५०
सूरजप्रकाश भाग १	श्री सीताराम लालस	८–००
,, भाग २	,, ,, ,,	९–५०
,, भाग ३	,, ,, ,,	९–७५
नेहतरंग	श्री रामप्रसाद दाधीच	४–००
मत्स्य–प्रदेश की हिन्दी साहित्य को देन	डा० मोतीलाल गुप्त	७–००

पुस्तक विक्रेताओं को २५ प्रतिशत कमीशन दिया जाता है

(राजस्थान सरकार द्वारा प्रसारित)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रदेशे सिन्धप्रदेशे च प्रवहन्ती पश्चिमसमुद्रे विलीना भवति। सिन्धोः कारणादेव सिन्धप्रदेशः सिन्धनाम्ना रूढः संजातः। गङ्गायमुनादि पवित्रतमासु नदीषु सिन्धोः गणना भवति। सिन्धुप्रान्ते उडेडोलालनामकं एकं देवं सिन्धोः अवतारं मन्यन्ते। दशमे शतके उडेडोलालस्य अवतारोऽभूत्। अस्मिन् समये सिन्धुप्रदेशे मर्ख नामको मुहम्मदीयः शासक सासीत्। तेन "सर्वे हिन्दवः मुस्लिमधर्मे परिवर्तिता भवेयुः" इति आदेशः प्रदत्तः। अस्य आदेशस्य यः उल्लङ्घनं करिष्यति स प्राणदण्डं प्रप्स्यति' इत्यपि घोषितम्। अस्मिन् संकटकाले हिन्दुभिः। सिन्धुनद्याः प्रार्थना कृता। तृतीये दिने सिन्धुनद्याः पात्रात् एषा वाणी श्रुता यत् अष्टदिनानन्तरं अहं नरसापुरे अवतरितो भूत्वा युष्माकं संकटं अपनेष्यामि'। अष्टमे दिने प्रसिद्धस्य हिन्दुनेतुः रतनरायठाकुरस्य देवकी नाम्नी पत्नी पुत्ररत्नं अजनयत्। अयमेवासीत् सिन्धोः अवतारो उडेडोलालः। उडेडोलालेन हिन्दवः धर्मान्तरणस्य संकटात् रक्षिताः - सिन्धुप्रदेशे थत्ता, सक्कर, पीरपाथो, पीरमांधो, मनोराबेट् इत्यादिषु स्थानेषु सिन्धोः अवतारस्य उडेडोलालस्य मन्दिराणि विद्यमानानि सन्ति।

और सिन्ध प्रदेश में बहती हुई पश्चिम समुद्र में विलीन होती है। सिन्धु नदी के कारण ही सिन्ध प्रदेश सिन्धनाम से रूढ हुआ है। गंगा यमुना आदि पवित्र नदियों में सिन्धु की गणना होती है। सिन्धप्रान्त में उडेडोलाल नामक एक देव सिन्ध का अवतार माना जाता है। दसवीं शताब्दी में उडेडोलाल का अवतार हुआ था। इस समय सिन्धप्रदेश पर मर्ख नामका एक मुस्लिम शासक था। उसने 'सारे हिन्दू मुस्लिम धर्म में परिवर्तित हों' यह आदेश दिया था। 'इस आदेश का जो उल्लंघन करेगा उसे प्राणदण्ड मिलेगा' यह भी घोषणा कर दी थी। इस संकट के समय हिन्दुओं ने सिन्धुनदी की प्रार्थना की। तीसरे दिन सिन्धु नदी के पात्र से यह वाणी सुनाई दी कि "आठ दिन बाद मैं नरसरपुर में अवतार लेकर तुम्हारा संकट निवारण करूंगा" आठवें दिन प्रसिद्ध हिन्दूनेता रतनराय ठाकुर की देवकी नामकी पत्नी को पुत्र हुआ। यही सिन्धु का अवतार उडेडोलाल था। उडेडोलाल ने हिन्दुओं को धर्मबदलने के संकट से रक्षा की। सिन्ध प्रदेश में थत्ता, सक्कर, पीरपाथो, पीरमांधो, मनोराबेट इत्यादि स्थानों पर सिन्धु के अवतार उडेडोलाल के मंदिर विद्यमान हैं।

कावेरी—कावेरीनदी कुर्गप्रान्तस्य ब्रह्मगिरिनामकात् पर्वतात् निःसृत्य तामिलनाडस्य तिरुचिरापल्लीमण्डले तांजोरमण्डले च प्रवहन्ती पूर्वसागरे विलीना भवति। कावेरीप्रवाहात् अतिप्राचीनकालात् अनेकाः जलकुल्याः (नहरें) निस्सरिताः अभूवन्। अत एव तामिलनाडप्रदेशस्य कृषिः सदा सर्वदा हरिता फलवती च भवति। उत्तरे भारते यथा गङ्गायमुनयोः सर्वाधिकं महत्वं मन्यन्ते, तथैव दक्षिणभारते कावेरीताम्रपर्णीनद्यो च तामिलनाडप्रदेशस्य गङ्गायमुने नद्यौ इति कथ्यते। अनयोः नद्योः

कावेरी—कावेरी नदी कुर्गप्रान्त के ब्रह्मगिरि नामक पर्वत से निकलकर तामिलनाड के तिरुचिरापल्ली तांजोर जिलों में बहती हुई पूर्व सागर में विलीन होती है। कावेरी प्रवाह से बहुत प्राचीन समय से अनेक नहरें निकाली गयी हैं। इसी कारण तामिलनाड प्रदेश की खेती सदा हरी-भरा और फलवती है। लोग जैसे उत्तरभारत में गङ्गा, यमुना का महत्त्व मानते हैं वैसे ही दक्षिण भारत में कावेरी और ताम्रपर्णी नदियां तामिलनाड की गंगा यमुना नदियां कहलाती हैं। इन दोनों नदियों के

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Cable : BOWREAH

Phone : 22-9601 (6 lines)

FOR NOBLE DURABLE QUALITIES

INSIST ON

Cotton Textiles and Yarns Manufactured by

BOWREAH COTTON MILLS CO., LTD.

BOVRIA.

★

Specialities :—

SIZED BEAMS AND HOSIERY YARN DEEPSHADE, POPLIN AND CORD COATING SHIRTING IN CHECKS & DOBBIES DYED AND PRINTED LAUNS AND CAMBRICS.

Managing Agents :

KETTLEWELL BULLEN & Co., Ltd.

21, STRAND ROAD,

CALCUTTA I.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तटेषु तामिलनाडप्रदेशस्य असंख्यानि पुण्यक्षेत्राणि अवस्थितानि सन्ति।

यमुना—यमुनानदी उत्तरभारतस्य एका विशाला नदी वर्तते। वन्दरपुंछनामकात् हिमालयशिखरात् निस्सृत्य यमनोत्रीमार्गात् उत्तरप्रदेशे अवतीर्य प्रयागक्षेत्रे गङ्गाप्रवाहे सम्मिलिता भवति। गङ्गायमुनयोः संगमं भारतवर्षे अद्भुतं तीर्थक्षेत्रं मन्यन्ते जनाः। यमुनायाः तटे दिल्ली-वृन्दावन-मथुरानगरीत्यादीनि अनेकानि प्रसिद्धानि नगराणि अवस्थितानि सन्ति। बाणगङ्गा, चर्मण्वती (चम्बल) वेत्रवती इत्यादयः नद्योः यमुनाप्रवाहे मिलन्ति। पुराणमतानुसारेण यमुना सूर्यकन्या उच्यते। भगवतः श्रीकृष्णस्य बाललीलाः गोकुल-वृन्दावनयोर्यमुनायाः तटे एव संजाताः। अतः कृष्णभक्तानां कृते यमुनायाः महत्वमसाधारणमस्ति।

सरस्वती-सरस्वतीनदी वेदेषु वर्णितास्ति। पुराणेषु सरस्वती ब्रह्मणः पत्नी तथा वाग्देवता इति वर्णिता। पञ्चाम्बुप्रदेशे सरस्वती नाम्नी एका लघुनदी वर्तते। द्वितीया एका सरस्वती अरावली पर्वतात् निस्सृत्य कच्छप्रदेशे सिन्धुसागरे विलीना भवति।

रेवा—एषा पवित्रा नदी, नर्मदानदी इतिनाम्ना प्रख्यातास्ति। नर्मदानदी विन्ध्यपर्वतस्य अमरकण्टकशिखरात् निस्सृत्य भडोंचप्रदेशस्य समीपे पश्चिमसमुद्रे विलीना भवति। पुराणानुसारं एषा पवित्रा नदी भगवतः शङ्करस्य शरीरात् समुत्पन्नाऽस्ति। नर्मदातटे प्रत्येकसङ्गमस्थले अनेकानि मन्दिराणि अवस्थितानि सन्ति। ओंकारमान्धाता, महेश्वरतीर्थ, भेडाघाट-शुक्लतीर्थं इत्यादीनि तीर्थक्षेत्राणि नर्मदायाः तटे दर्शनीयानि सन्ति। महेश्वरतीर्थे महाराज्ञा अहिल्यादेव्या नर्मदातटे अनेकानि घट्टानि (घाट) निर्मापितानि। अहिल्या देव्याः

तटों पर तामिलनाड के असंख्य पुण्यक्षेत्र अवस्थित हैं।

यमुना—यमुना नदी उत्तरभारत की एक विशाल नदी है। बन्दरपुंछनामक हिमालय के शिखर से निकलकर यमनोत्री मार्ग से उत्तर प्रदेश में उतरकर प्रयाग क्षेत्र में गंगा के प्रवाह में सम्मिमित होती है। लोग गंगा यमुना के संगम को भारतवर्ष में अद्भुत तीर्थक्षेत्र मानते हैं। यमुना के तट पर दिल्ली, वृन्दावन, मथुरा नगरी इत्यादि अनेक प्रसिद्ध नगर खड़े हैं। बाणगंगा, चर्मण्वती (चम्बल) वेत्रवती (बेतवा) इत्यादि नदियां यमुना के प्रवाह में मिलती हैं। पुराण के अनुसार यमुना सूर्य की कन्या कहलाती है। भगवान् श्रीकृष्ण की बाललीलाएं गोकुल वृन्दावन में यमुना के तट पर हो हुई है। इसलिये कृष्णभक्तों के लिए यमुना का महत्त्व असाधारण है।

सरस्वती—सरस्वती नदी वेदों में वर्णित है। पुराणों में सरस्वती को ब्रह्मा की पत्नी तथा वाग्देवता कहा है। पंजाब में सरस्वती नामकी एक छोटी नदी है। दूसरी एक सरस्वती अरावली पर्वत से निकल कर कच्छ प्रदेश में सागर में विलीन होती है।

रेवा:—यह पवित्र नदी नमदा नदी इस नाम से प्रख्यात है। नर्मदा नदी विंध्य पर्वत के अमरकण्टक शिखर से निकलकर भडोंच के समीप पश्चिम समुद्र में विलीन होती है। पुराण के अनुसार यह पवित्र नदी भगवान् शंकर के शरीर से उत्पन्न हुई है। नर्मदा के तट पर प्रत्येक संगमस्थल पर अनेक मन्दिर बने हुए हैं। ओंकार मान्धाता, महेश्वरतीर्थ भेदाघाट, शुक्लतीर्थ इत्यादि तीर्थस्थान नर्मदा के तट पर दर्शनीय है। महेश्वरतीर्थ पर महारानी अहिल्या देवी ने नर्मदा तट पर अनेक घाट बनवाए हैं। अहिल्या देवी की समाधि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सवाल चाहे लड़की की शादी का हो या बेटे की शिक्षा का या फिर आप घर बनाना चाहते हों,
इन सब का एक ही आसान जवाब है :
"बढ़ने वाला सावधिक जमा-खाता"

१. किसी भी डाकघर में हर महीने कुछ रकम (जो ५ से विभाजित की जा सके, लेकिन ३०० रु० से ज्यादा न हो) जमा करते जाइये। जमा करने की अवधि ५, १० या १५ वर्ष की हो सकती है। यह रकम आपको निर्धारित अवधि के बाद कर-मुक्त ब्याज के साथ मिल जायेगी।

२. आप एक तो बचत करते हैं। दूसरे, आपके १० और १५ वर्षीय खातों की रकमें, आपकी कुल कर-योग्य आमदनी का हिसाब करते समय उसमें नहीं जोड़ी जातीं।

३. आपकी जमा-रकमों पर सम्पत्ति-कर भी नहीं लगता।

आइये, आपकी मुश्किलें आसान करें !

आज ही निकटतम डाकघर में
एक
बढ़ने वाला सावधिक जमा-खाता खोलिये !

राष्ट्रीय बचत संगठन

davp 67/395

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाधिः तथा तया निर्मापितानि अनेकानि मन्दिराणि अस्मिन् स्थाने विद्यमानानि सन्ति। प्रतिवर्षं सहस्रशः यात्रिकगणाः नर्मदायाः परिक्रमां कुर्वन्ति।

महानदी–इयं महानदी मध्यप्रदेशस्य उत्कलप्रदेशस्य सर्वाभ्यः सुदीर्घतमा नदी अस्ति। रायपुरमण्डलस्य सिरावग्रामस्य एकस्मात् जलकुण्डात् महानद्याः उद्गमो भवति। कटकप्रदेशस्य समीपं अनेकासु धारासु प्रवहन्ती सा नदी पूर्वसागरे विलीना भवति।

गोदा–(गोदावरीनदी) सह्याद्रेः ब्रह्मगिरिनामकात् शिखरात्, यत् त्र्यम्बकेश्वर-नासिकक्षेत्रस्य समीपमेवास्ति, गोदावरी नदी निस्सरति। प्रभुरामचन्द्रेण गोदावर्यास्तटे पञ्चवटी क्षेत्रे निवासः कृतः। अस्मिन् स्थाने समर्थरामदासस्वामिना द्वादशवर्षाणि घोरं तपः कृतम्। गोदावरीनद्याः तटे नान्देडक्षेत्रे गुरुगोबिन्दसिंहस्य समाधिः विद्यमानोऽस्ति। आन्ध्रप्रदेशे गोदावरीनदी विशाल स्वरूपं धृत्वा पूर्वसमुद्रे मिलति। श्रद्धालुजनाः गङ्गागोदावरीमध्ये अभेदं मन्यन्ते। त्र्यम्बकेश्वरम्-नासिकं-पैठण (प्रतिष्ठानम्) कोटिपल्ली, राजमहेन्द्री, भद्राचलम् इत्यादीनि स्थानानि गोदावरीतटे पवित्रक्षेत्राणि मन्यन्ते। राजमहेन्द्रीस्थाने प्रतिद्वादशवर्षानन्तरं पुष्करनामकरो गोदास्नानस्य महोत्सवो भवति।

ब्रह्मपुत्रः–संसारस्य महानदीषु ब्रह्मपुत्रनद्याः गणना भवति। ब्रह्मपुत्रस्य उद्गमः मानससरोवरात् भवति। ९०० क्रोशपर्यन्तं हिमालयस्याञ्चलात् असमबङ्गप्रदेशयोरपि प्रवहन्ती एषा प्रचण्डा नदी पूर्वसागरे विलीना भवति। गौहाटीनगरे ब्रह्मपुत्रायाः तटे एकस्य पर्वतस्य शिखरे कामाख्यानाम्न्याः, भगवत्याः एकं श्रेष्ठं शक्तिपीठं विद्यते।

तथा उनके द्वारा बनाए गए अनेक मन्दिर इस स्थान पर विद्यमान हैं। प्रतिवर्ष हजारों यात्री नर्मदा की परिक्रमा करते हैं।

महानदी—यह महानदी मध्यप्रदेश तथा उत्कल प्रदेश की सबसे अधिक लम्बी नदी है। रायपुर के सिराव गांव के एक जलकुण्ड से महानदी का उद्गम होता है। कटक के समीप अनेक धाराओं में बहती हुई यह नदी पूर्व सागर मे विलीन होती है।

गोदा—(गोदावरी नदी) सह्याद्रि के ब्रह्मगिरिनामक शिखर से जो त्र्यम्बकेश्वर-नासिक क्षेत्र के समीप ही है, गोदावरी निकलती है। प्रभुरामचन्द्र ने गोदावरीतट पर पञ्चवटी क्षेत्र में निवास किया था। इस स्थान पर समर्थरामदास स्वामी ने बारहवर्ष तक घोर तप किया था। गोदावरीनदी के तट पर नान्देड क्षेत्र में गुरुगोबिन्दसिंह की समाधि विद्यमान है। आन्ध्रप्रदेश में गोदावावरी नदी विशाल स्वरूप धारण कर पूर्व समुद्र में मिलती है। श्रद्धालुजन गंगा और गोदावरी में अभेद मानते हैं। त्र्यम्बकेश्वर-नासिक पैठण (प्रतिष्ठानम्) कोरिपल्ली, राजमहेन्द्री भद्राचलम् इत्यादि स्थान गोदावरी तट पर पवित्र क्षेत्र माने जाते हैं। राजमहेन्द्री स्थान पर प्रत्येक बारहवर्ष के पश्चात् पुष्करनामक गोदास्नान का महोत्सव होता है।

ब्रह्मपुत्र—संसार की महानदियों में ब्रह्मपुत्र नदी की गणना है। ब्रह्मपुत्र का उद्गम मानस सरोवर से होता है। नौ सौ कोस १८०० मील हिमालय के अञ्चल से असम बङ्ग प्रदेश में भी बहती हुई यह प्रचण्ड नदी पूर्वसागर में विलीन होती है। गोहाटी नगर में ब्रह्मपुत्र के तट पर एक पर्वतशिखिर पर कामाख्यानामक भगवती का शक्तिपीठ विद्यमान है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

भारती

Regd. No. J 7
Licence No. PP.6
"Licenced to Post.
Without Prepayment"

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

शौचमुद्दिश्य

श्रीहरिशास्त्री, सम्पादकः

शौचं शुद्धिः पवित्रत्व—
मिति पर्य्यायनामभिः ।
एकमेव हि वैमल्य—
मादिशन्ति मनीषिणः ॥१॥

शौच शुद्धि पवित्रता ये शब्द एक निर्मलता के ही पर्यायवाचक हैं। ऐसा विद्वान् लोग कहते हैं। १

मनःशौचं हि शौचानां
सर्वेषामादि हीष्यते ।
एतद्विना न लोकानां
सफलाः सर्वशः क्रियाः ॥२॥

सर्वप्रथम आवश्यक मन का शौच (पवित्रता) है। इसके (मनः शोच के) विना मानवों की सभी क्रियाएं सफल नहीं होती हैं। २

निर्मलं हि मनो यस्य
स जनः सर्वतः शुचिः ।
समलं हि मनो यस्य
स स्नातोऽपि न शुद्ध्यति ॥३॥

जिनका मन पवित्र है वह सब तरह से पवित्र है। जिसका मन शुद्ध नहीं है, वह स्नान किया हुआ भी पवित्र नहीं होता है। ३

विशुद्धमनसां पुंसां
भूमौ तीर्थं पदे पदे ।
अशुद्धमनसां पापं
न तीर्थमपि कृन्तति ॥४॥

विशुद्ध मनवालों के लिए भूमण्डल पर पद पद पर तीर्थ हैं। अशुद्ध (मलिन) मनवालों के पापों को तीर्थ भी नहीं काटते है। ४

तस्मात्सर्वप्रयत्नेन
मनःशुद्धिर्विधीयताम् ।
एतयैव हि सेत्स्यन्ति
ध्यानज्ञानतपोमखाः ॥५॥

इस कारण सब से पहले सब तरह के प्रयत्नों से मनको शुद्ध रखना चाहिए। इस मनः शुद्धि से ही आपकी सब क्रियाएँ ध्यान ज्ञान जप-तप यज्ञादि सिद्ध (सफल) होंगी । ५

संस्कृत प्रचार में प्रयत्नशील

"भारती"

के प्रति शुभ कामनाओं के साथ

जनरल प्रोड्यूस कम्पनी लिमिटेड

इण्डिया एक्सचेंज, कलकत्ता—१

प्रकाशकः—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४९६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रि० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य

पालयन् धर्ममर्यादां यो जघान द्विषद्गणम् ।
धनुर्बाणकरः सोयं रामचन्द्रः प्रणम्यताम् ॥

र १८
: ६

वार्षिकमूल्यं सप्तमुद्राः ७
एकप्रतेः सप्ततिपणाः ०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठ संख्या
१.	मङ्गलम्, मासावतरणं,	श्रीहरिशास्त्री, सम्पादकः	१९१
२.	व्याकरणे कर्मसंज्ञा,	श्रीविश्वनाथमिश्रः, बीकानेरः	१९२
३.	पुस्तकालोचनम्,	श्रीगणेशरामशर्मा, डूंगरपुरम्	१९५
४.	दीप उच्चशिखो ज्वलति,	श्रीमधुकरशास्त्री, कोटा	१९७
५.	संस्कृतभाषामुपेक्ष्य भारती–यत्वमेवोपेक्ष्यते	वै० श्रीकल्याणदत्तशर्मा, खोरी	१९९
६.	भारतीप्रशस्तिः,	स्वामी श्रीलक्ष्मणशास्त्री, नागौरः	२०१
७.	मनोविनोदकणिका,	मधुपः, सहसम्पादकः,	२०१
८.	मातृस्तवनम्,	श्रीरुद्रदेवत्रिपाठी, दिल्ली	२०२
९.	श्रीशिवराज्योदये महाकाव्ये,	डा० श्रीधरभास्करवर्णेकरः, नागपुरम्	२०५
१०.	संगृहीताः समाचाराः,	श्रीगणेशरामशर्मा डूँगरपुरम्	२०८
११.	दिवङ्गतः श्रीदीनदयालुरुपाध्यायः	पूज्यश्रीगुरुजीमहाभागः,	२११
१२.	सम्पादकीयम्	मधुपः,	२१३
१३.	स्व० डा० श्रीकेशवबलिराम–हैडगेवारमहाभागस्यादेशः	श्रीहरिशास्त्री, सम्पादकः	२१५
१४.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	२१७
१५.	मातृस्तवः	श्रीसीतारामशास्त्री	२२५
१६.	सूक्तिसुधा	श्रीहरिशास्त्री, सम्पादकः	२२६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १८ | चैत्रः, विक्रमाब्दः २०२४ (अप्रैलः १९६८) | अङ्कः ६

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री,

मेषं प्राप्य रविर्वृषं शशधरो, नक्रं च भूमिसुतः
कन्यामेत्य बुधोऽप्युदञ्चति, गुरुः कर्केण यात्युच्चताम् ।
मीने भार्गव उच्चतीत्युपगता इत्थं ग्रहाः [1]कौलताम्,
हं हो वैष्णवबान्धवेष्वपि सदा कुर्वन्त्यलं मंगलम् ॥१॥

मासावतरणम्

दंभानां शैशिराणां सकलजनमनस्त्रासकाणां प्रमाथी
वासन्तीं च श्रियं यो भ्रमयति च मुदा सर्वतो भूतलेऽस्मिन् ।
सोऽयं पत्त्रैश्च पुष्पैरभित इव नवैः पादपान्वीरुधश्च
वासोभूषाभराढ्यानिव भुवि कलयन् माधवो मास आप्तः ॥१॥

---

१. ज्यौतिषशास्त्रानुसारमिमे सूर्यादयो ग्रहाः कौलधर्मिष्ठाः । मेषं मेषराशिं मेषाणामवीनां राशिं समूहम् । कौलमार्गे मांसमत्तुं पद्योक्तान् जीवान् भक्षणार्थे उपयुञ्जन्ति कौलाः । तथा हि रविर्भगवान् सूर्यो मेषराशिं प्राप्य उदञ्चति उच्चैर्भवति ज्यौतिषेऽपि मेषस्थो रविरुच्चः स्यात् । एवं वृषं अनडुहं पुंगवं प्राप्य शशधरो द्विजः चन्द्र उच्चैर्हर्षवान् भवति, एवं भूमिसुतो मंगलो ग्रहः मकरं प्राप्य उच्चो भवति बुधश्च विद्वानपि कन्यां प्राप्य कन्यां कुमारीं पूजयन्ति कौलाः साधनायां चोपयुजन्ति इति । गुरुः बृहस्पतिः कर्केण जलचरविशेषेण उच्चैर्भवति एवं भृगुर्मीने मीनराशिं प्राप्य उच्चैर्भवतीति सर्वं संयोज्यम् । इमे ग्रहाः कौलतां प्राप्ता अपि सर्वेषां वैष्णवादीनामपि बान्धवानां कृते मंगलं दिशन्त्येवेति शम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरणे कर्मसंज्ञा

ले० श्रीविश्वनाथमिश्रः, शार्दूलसंस्कृतविद्यापीठं, बीकानेरः

कर्मसंज्ञा हि कारकत्वव्याप्यसंज्ञा। सूत्रं च तद्विधायकं कर्तुरीप्सिततममिति पाणिनीयम्। अत्र सूत्रस्थे ईप्सितशब्दे सम्बन्धार्थकः आप्धातुः, ततश्च इच्छार्थकः सन् प्रत्ययः। इच्छार्थकात् धातोः यः क्तप्रत्ययो भवति तस्य तु विषय एवार्थः। एवञ्च ईप्सित शब्दस्य सम्बन्धेच्छाविषयरूपोऽर्थः विषयपदेन च विषयताश्रयस्य ग्रहणम्। विषयता चात्रोद्देश्यताख्या विवक्षिता। एवञ्च सम्बन्धविषयिणी या इच्छा तादृशीच्छीयोद्देश्यताश्रयः कर्म इति फलितं भवति। सम्बन्धश्च प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयत्वरूपकर्तृपदार्थकुक्षिप्रविष्टव्यापारद्वारक एव गृह्यते। यद्यपि कर्मत्वेन चिकीर्षितस्य कर्तृव्यापारेण सह साक्षात् सम्बन्धो वक्तुमशक्यः कर्तृव्यापारस्य तन्मात्रसमवेतत्वात्, तथापि अत्र व्यापारप्रयोज्यफलेन सह सम्बन्धोऽभिप्रेतव्यः।

एवञ्च कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयत्वप्रकारिका या इच्छा तादृशीच्छीयोद्देश्यं कर्म इति सूत्रार्थः पर्यवस्यति। "चैत्रः ग्रामं गच्छति" इत्यत्र चैत्रवृत्तिव्यापारः उत्तरदेशसंयोगानुकूलः। फलञ्च उत्तरदेशसंयोगरूपम्, तदाश्रयत्वप्रकारिकेच्छा च – "मद्वृत्तिव्यापारेण ग्रामः संयोगाश्रयीभूतो भवतु" इति। इयं च इच्छा संयोगरूपफलाश्रयत्वप्रकारिका ग्रामोद्देश्यिकेति भवति कर्मत्वं ग्रामस्य।

अत्र फलाश्रयता फलतावच्छेदकसम्बन्धेन विवक्षिता। फलतावच्छेदकसम्बन्धश्च कार्यतावच्छेदकः सम्बन्धः। येन सम्बन्धेनाधिकरणे कार्यमुत्पद्यते स सम्बन्ध एव फलतावच्छेदकसम्बन्ध इति स्पष्टोऽर्थः। "पर्वते तण्डुलं पचति चैत्रः" इत्यत्र समवायेन विक्लितेः तण्डुलेष्वेव सत्त्वेन समवाय एव फलतावच्छेदकसम्बन्ध इति समवायसम्बन्धावच्छिन्न–विक्लितिनिष्ठाधेयतानिरूपिताधिकरणताश्रयत्वात् तंडुलस्यैव कर्मत्वं न तु कालिकसम्बन्धावच्छिन्नाधिकरणतावतः पर्वतस्यापि।

न चैवं प्रयागतः काशीं गच्छति चैत्रे यत् संयोगरूपं फलमुत्पद्यते तस्य द्विष्ठत्वात् स्वरूपतः समवायतो वा यथा काश्यां वर्तनं तथैव चैत्रेऽपि इति काश्या इव चैत्रस्यापि फलाश्रयत्वात् जायतां कर्मत्वम्। किञ्च – चैत्रवृत्तिव्यापारेण यथा जायते संयोगः तथैव प्रयागतो विभागोऽपि समुत्पद्यते इति विभागरूपफलाश्रयत्वात् प्रयागस्य कथं न स्यात् कर्मत्वम्? एवमाशंकायां प्रत्यवतिष्ठन्ते केचित् – क्रियाजन्यफलाश्रयं हि कर्म। तत्र क्रियायां परसमवेतत्वं निवेश्यते। परत्वञ्च यस्य चिकीर्षितं कर्मत्वं तदपेक्षया ग्राह्यम्। "ग्रामं गच्छति चैत्रः" इत्यत्र ग्रामापेक्षया परः चैत्रस्तन्निष्ठक्रियाजन्यफलाश्रयत्वात् भवति कर्मत्वं ग्रामस्य। चैत्रस्तु न परसमवेतक्रियाजन्यफलाश्रयः, अपि तु स्वसमवेतक्रियाजन्यफलाश्रयः इति न भवितुमर्हति कर्मत्वं तस्य कथंचिदपि।

यत्र चैको मल्लः पूर्वतः समायातः अपरश्च परतः। आगत्य च तौ संयोगवन्तौ भवतस्तत्र संयोगस्तदनुकूलव्यापारश्चोभयनिष्ठः। परन्तु तत्र यदा एको मल्लः कर्मसंज्ञार्थं फलाश्रयत्वेन विवक्ष्यते तदा तदपेक्षया अन्यं मल्लं गृहीत्वा तत्समवेतक्रियाजन्यफलाश्रयत्वात् पूर्वस्य कर्मसंज्ञा। तथा यन्निष्ठक्रियामादायास्य कर्मसंज्ञा तस्य कर्तृसंज्ञा च विधीयते इति मल्लो मल्लं गच्छति इति प्रयोगो जायते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किन्तु मल्लः स्वं गच्छति इति प्रयोगस्तु नैव भवति, एकस्यैव फलाश्रयत्वात् व्यापाराश्रयत्वाच्च परसमवेतक्रियाजन्यफलाश्रयत्वाभावात्, न च स्वस्य स्वप्रतियोगिकभेदानधिकरणत्वेऽपि उभयाभावमादाय स्वः स्वघटोभयं नेति कृत्वा स्वोऽपि स्वस्मात् भिन्न एवेति एकस्मिन्नेव मल्ले यः संयोगः स तु परसमवेतक्रियाजन्यः सम्पन्न इति एकस्यैव कर्मसंज्ञायां कर्तृसंज्ञायाञ्च मल्लः स्वं गच्छति "चैत्रः चैत्रं गच्छति" इत्यादिप्रयोगापत्तिस्तदवस्थैवेति वाच्यम् ? परसमवेतक्रियेत्यत्र परत्वं भेदः। तत्र द्वितीया प्रकृत्यर्थस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनान्वयः । तथा च ग्रामत्वावच्छिन्नप्रतियोगिताकभेदवच्चैत्रसमवेतक्रियाजन्यफलाश्रयत्वात् यथा ग्रामस्य जायते कर्मत्वं न तथा स्वत्वावच्छिन्नप्रतियोगिताकभेदवान् स्वः, न वा चैत्रत्वावच्छिन्नप्रतियोगिताकभेदवांश्चैत्र इति नात्र कर्मत्वसंशीतिलेशोऽपि । गम्धातुप्रयोगस्थले विभागस्यावश्यं जायमानत्वेऽपि न तदाश्रयस्य कर्मत्वम् धात्वर्थतावच्छेदकफलाश्रयस्यैव कर्मत्वमित्यङ्गीकारेण विभागस्य धात्वर्थत्वाभावात् इति।

अत्र मीमांस्यते–कर्मणो लक्षणे परसमवेतत्वस्य निवेशेऽपि यथा गच्छन्तं प्रेरयति मैत्रे "गमयति ग्रामं चैत्रं मैत्रः" इति जायते प्रयोगः तथैव पचन्तं प्रेरयति मैत्रे चैत्रभिन्नमैत्रसमवेतविक्लित्यनुकूलव्यापारानुकूलव्यापारजन्यधात्वर्थतावच्छेदकीभूतं यत् विक्लित्यनुकूलव्यापाररूपं फलं तदाश्रयत्वात् चैत्रस्य कर्मत्वं कथं निवार्यताम् । यदि च "गतिबुद्धि" इत्यादिसूत्रोपात्तातिरिक्तधातुप्रकृतिकण्यन्तस्थले प्रयोज्यस्य कर्मत्वाविवक्षेति स्वीक्रियते तदोक्तदोषाभावेऽपि "तण्डुलं पचति चैत्रः" इतिवत् "तंडुलं पच्यते स्वयमेवेति प्रयोगापत्तिर्दुर्वारैव स्यात् । अत्र कर्मणः कर्तृत्वविवक्षया कर्तरि लटि कर्मवदतिदेशात् यगात्मनेपदे दृश्येते। न चात्र तंडुलस्य परसमवेतक्रियाजन्यफलाश्रयत्वं नास्तीति वाच्यम् ? अग्निसंयोगस्यापि पचधात्वर्थतया तंडुलभिन्नकाष्ठवृत्यग्निसंयोगरूपक्रियाजन्यफलाश्रयतया द्वितीयापत्तेः सुवचत्वात् ।

तस्मात् चैत्रस्य ग्रामस्येव फलाश्रयत्वेऽपि व्यापाराश्रयत्वस्याधिकस्यापि तत्र वर्तमानतया कर्तृसंज्ञया कर्मसंज्ञायाः बाधात् न तत्र द्वितीयेति सुगमः पन्थाः। द्वितीयोत्पत्त कर्मसंज्ञैव नियामिका न तु कर्मत्वलक्षणसत्तामात्रं द्वितीया नियामकम्। तथा सति "पाचयति देवदत्तेन विष्णुमित्रः" इत्यत्र णिजर्थ व्यापारे विशेषणीभूतविक्लित्यनुकूलव्यापाररूपफलाश्रयस्य देवदत्तस्य कर्मत्वमापद्येत । अतः प्रकृतधात्वर्थमुख्यव्यापारानधिकरणत्वे सति प्रकृतधात्वर्थफलाश्रयत्वं कर्मत्वमित्यङ्गीकार्यम् । तेन न काप्यनुपपत्तिः।

इदमपरमप्यत्र विज्ञेयम्–ईप्सिततमवत् समभिव्याहृतधात्वर्थप्रधानीभूतव्यापारजन्यतद्धात्वर्थफलाश्रयस्यानीप्सितस्यापि कर्मसंज्ञा विधीयते "तथायुक्तं चानीप्सितम्" इति सूत्रेण। अनीप्सितञ्च द्वेष्योदासीनभेदेन द्विविधम्। द्वेष्योदाहरणम् "चौरान् पश्यति" इति। अत्र चौराः दर्शनायोग्या अपि अकस्मात् दृष्टिपथमवतीर्णाः कथं कथमपि दृश्यन्त इति द्वेष्यास्ते। उदासीनं तु प्रथितमेव-ग्रामं गच्छन् तृणं स्पृशति ।

कुत्रचिच्च-दुहादीनां द्वादशधातूनां तथा नीहृकृषवहां च समभिव्याहारे अपादानादीनामविवक्षया तेषां कर्मत्वं विधीयते "अकथितञ्चेति सूत्रेण। तत्रापादानादिशब्दैः केवलम् अपादानम्, सम्प्रदानम्, अधिकरणञ्चेति कारकत्रयमेव गृह्यते। एषां त्रयाणामेवोक्तषोडशधातुकर्मणा युक्तत्वात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र कर्मणा योगो धात्वर्थव्यापारात् प्राग्भावी, कुत्रचिच्च पश्चाद्भावी अपि गृह्यते। यत्र च धात्वर्थव्यापारात् प्राग्भावी कर्मणा सह सम्बन्धः सुलभस्तत्र पश्चाद्भावी सम्बन्धो न ग्राह्यः। गां दोग्धि पयः इत्यत्र दुहधातोः कर्म पयः। तेन सह गोः सम्बन्धो दोहनात् प्रागासीदिति स्थाल्या सह जाते पश्चात् पयसः सम्बन्धे न भवति कर्मत्वं स्थाल्याः। ब्रूशास्धातुस्थले तु धात्वर्थव्यापारात् पश्चादेव कर्मणा सह सम्बन्धो जायते। ज्ञानानुकूलशब्दप्रयोगरूपो व्यापारः ब्रूत्रर्थः। तत्र कर्तृव्यापारानन्तरमेव ज्ञानेन युज्यते माणवकः।

अत्र प्राचीनैः अपादानादिभिरविवक्षां कृत्वा सम्बन्धत्वेन तेषां विवक्षा क्रियते। तत्र च प्राप्तां षष्ठीं प्रबाध्य 'अकथितञ्चे' ति कर्मसंज्ञायामपि सम्बन्धप्रकारक एव बोधोऽभ्युपगम्यते तैः, तेन "गां पयो दोग्धि" इत्यस्य गोसम्बन्धिपयः कर्मकं दोहनमिति बोधस्तेषां नये। नव्यास्तु कर्मसंज्ञायाः चिकीर्षायामपि कर्मत्वेन विवक्षा नेति कथनं वदतो व्याघात इति मन्वानाः अपादानत्वादिभिरविवक्षायां सत्यां कर्मत्वेनैव तेषां विवक्षेति वदन्तो गोकर्मकं पयः कर्मकञ्च दोहनमित्यभिप्रयन्ति। यत्र च अकर्मकधातुयोगे देशकालभावगन्तव्याध्ववाचिनां कर्मसंज्ञा भवति, तत्राधिकरणस्य कर्मत्वविधानात् मासाधिकरणकं चैत्रकर्तृकमासनमित्येव बोधः प्राचां नये। नव्यास्तु अत्र स्थले आस्धातोः आसनकरणकव्यापने शक्तिं स्वीकृत्य चैत्रः आसनेन मासं व्याप्नोतीति बोधं चाङ्गीकृत्य मासस्य कर्तुरित्यादिना सूत्रेणैव कर्मत्वमिति कर्मण्येवात्र द्वितीयेति वदन्ति।

"गतिबुद्धिप्रत्यवसानार्थ" इत्यादिना सूत्रेण तत्र परिगणितण्यन्तधातुसमभिव्याहारे यत्र प्रयोज्यस्य कर्मत्वं विधीयते तत्रापि प्रयोज्यस्य कर्तृवृत्तिव्यापारजन्यफलाश्रयत्वेन कर्तुरित्यादिनैव कर्मत्वं सिद्धमिति नियमार्थस्य गतिबुद्धीत्यादिसूत्रस्य विधिमुखेन प्रवृत्तिर्ज्ञेया।

यत्र क्वापि कर्मप्रवचनीययोगे दृश्यते द्वितीया, तत्र वस्तुतः फलाश्रयस्य कर्मत्वं न जायतेऽपि तु लक्षणादावर्थे द्योत्ये कर्मप्रवचनीयसंज्ञायां तद्योगे द्वितीयेति तत्रस्थद्वितीयया लक्षणादय एवार्थाः भासन्ते।

इदमत्र तत्त्वम्—साक्षात् व्यापाराश्रयः कर्तेत्युच्यते साक्षात् फलाश्रयश्च कर्म। किन्तु कर्तृकर्मद्वारा यो भवति फलाश्रयो व्यापाराश्रयश्च स उच्यते अधिकरणमिति। यथा कटे शेते चैत्रः इत्यत्र-कटवृत्तिचैत्रवृत्तिशयनक्रिया स्ववृत्तिवृत्तित्वरूपपरम्परासम्बन्धेन कटे वर्तत इति तस्याधिकरणत्वम्। एवम् स्थाल्यां वचतीत्यादौ स्थालीवृत्तिस्तण्डुलस्तद्वृत्तिविक्लित्यात्मिका क्रियेति स्ववृत्तिवृत्तित्वरूपपरम्परासम्बन्धेन स्थाल्याः फलाश्रयत्वात् जायतेऽधिकरणत्वम्। एवमेव यथा फलाश्रयस्य कर्मसंज्ञा भवति, तथैव फलाश्रयाश्रयस्य सम्प्रदानसंज्ञेति कर्मसम्प्रदानसंज्ञयोरपि पार्थक्यं बोध्यम्। यथा विप्राय गां ददाति इत्यत्र गौः भवति स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्ववान् इति तस्य फलाश्रयत्वात् कर्मत्वम्। किन्तु विप्रविषये दातुः समीहा भवति मद्वृत्तिव्यापारेण विप्रः गोमान् भवत्विति। इयञ्च इच्छा फलाश्रयाश्रयत्वप्रकारिका विप्रोद्देश्यिकेति तस्य सम्प्रदानत्वमिति सूक्ष्मदृशावधेयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—❀ पुस्तकालोचनम् ❀—

श्रीगणेशरामशर्मा, डूंगरपुरम् ।

अभिनव-कथा-निकुञ्जः इत्याख्यं कथा-संग्रह पुस्तकं, पं० शिवदत्तशर्मणा चतुर्वेदेन एम. ए., साहित्यव्याकरणाचार्येण, काशीहिन्दू-विश्वविद्यालयान्तर्गतस्य संस्कृतमहाविद्यालयस्य वाराणसीस्थस्य साहित्यशास्त्र-प्राध्यापकेन सम्पादितं, 'भारतीयविद्याप्रकाशनेन, वाराणसेयेन प्रकाशितं, रूप्यकषट्कमूल्यलभ्यम्, २१० पृष्ठात्मकम् ।

पुस्तकमिदं संस्कृतभाषायां लिखितानाम् सप्तविंशतिकथानां संग्रहस्वरूपं वर्तते । पुस्तकेऽत्र सम्पादकमहोदयेन केषांचित् संस्कृतसाहित्य-सेवकानां सुप्रतिष्ठाजुषां विद्वद्वरेण्यानां महालेख-कानां लेखनीप्रसूतानां कथानां संग्रहो व्यधायि । कथालेखकेष्वेषु खल्वाधिक्येन राजस्थानीया-स्ततो वाराणसेयास्तदनु बंगीया महाराष्ट्रियाः पञ्चाम्बु-प्रदेशीयाश्च लेखकास्तद्विरचिताः कथा-श्चात्र पुस्तकेऽभ्यन्तरीकृता वर्तन्ते । इत्थम-भिनवानां कथानां संग्रहोऽसौ संस्कृतभाषायाः समसामयिकस्य नवीनकथासाहित्यस्य प्रका-शनेन पाठकानां पुरतः कामपि सन्तोषावहां पाठ्यसामग्रीमुपस्थापयतीति स्वागतार्होऽयं पुरुषार्थः सम्पादकवर्यस्य ।

अथ कथासंग्रहेऽस्मिन् स्वर्धमाश्रितानां महामहोपाध्यायवाचस्पति-प्रभृतिनानोपाधि-विभू-षितानां महर्षिकल्पानां दार्शनिकसार्वभौमाणां-गिरिधरशर्मचतुर्वेदानां 'कश्चित् कविः, स्वर्गीयानाम् महामहोपाध्यायानां पण्डितप्रवर-नारायणशास्त्रिखिस्तेमहोदयानां 'प्रणय-पिपासा, गोलोकवासिनां कविशिरोमणीनां भट्टमथुरानाथशास्त्रिसाहित्याचार्याणां 'पश्य-तोहरः, 'शिवसायुज्यं गतानां सूर्यनारायण-शास्त्रिणां व्याकरणाचार्याणां 'वीरमतिः, स्वर्गीयाणां वृद्धिचन्द्रशास्त्रिव्याकरणधर्म-शास्त्राचार्याणां 'उमा, इत्येवविधाः कथा हीतः पञ्चाशद्वर्षेभ्यः पूर्वतनानां संस्कृतभाषाया वरिष्ठसाहित्यसेवकानां प्रतिभाप्रकर्षं, शैली-चमत्कारं, लेखनीवैभवं च परिचाययन्ति पाठ-केभ्यः । उपर्युक्तानां गुरुजनानां कथाभिस्तदेतत् सुनिश्चयेन वक्तुं शक्यते यद्धि संस्कृतसाहित्यस्य युगानुरूपसाहित्यसृष्टौ तद्विकाशे चास्माकं गुरुजनाः कथाविधायाः परिपूर्तयेऽपि चार्द्ध-शताब्दयाः प्रागेव लेखनस्य सूत्रपातं चक्रुरिति । इत्थंविधासु प्राचां लेखकानां कथासु गिरिधरशर्म-चतुर्वेदमहाभागानां 'कश्चित् कविः' इति कथा, कथावस्तु–वातावरण–चरित्रचित्रण–सम्वादादि कथातत्त्वानां निर्वाहदृशा किलैकादर्शभूता विद्यते कलकलालापकल्पनारुचिरा कथा । एव-मेवान्येषामपि स्वर्गतानां विद्वल्लेखकानां ता एताः सर्वाश्चाप्यत्र कथासंग्रहे सङ्कलिताः कथा भावभाषाशैलीचमत्काराणामादर्शानुपस्थापयन्ति स्वकीयैस्तैस्तैरशेषै गुणगणगरिममाहात्म्यैः ।

जीवत्सु लेखकेष्वथ महामहोपाध्यायानाम् श्रीमत्परमेश्वरानन्दशास्त्रिमहाभागानां 'मलेथा-ग्रामः, श्रीद्विजेन्द्रनाथमिश्रमहोदयानां 'चम्पा, श्रीबटुकनाथखिस्तेमहाभागानां 'वासन्ती, श्रीमद्व-लदेवोपाध्यायमहोदयानां 'अपाला आत्रेयी, द्राक्तरवर्यश्रीगजाननशास्त्रिमुसलगांवकरमहाभा-गानां 'शिक्षिताया अनुरोधः, श्रीनवलकिशोर-शर्मकाङ्करमहोदयानाम् 'आदर्शकन्या सुकन्या-इत्याद्याः कथाः संस्कृतभाषाया गद्ययुगस्य वर्तमानकालीनमपि सन्मध्यवर्ति स्वरूपं पाठ-केभ्यः परिचाययन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथाभ्य एताभ्योऽतिरिक्ताः संग्रहेऽत्र सम्पादिताः सर्वाः कथा अभिनवलेखकानां कथाकाराणां लेखनसौष्ठवेन साकमेव नवयुगीनं संस्कृतभाषायाः कथाविकाशं साक्षात्कारयन्ति पाठकानाम्। किं बहुना, श्रीनारायणशास्त्रि-काङ्कर-श्रीकलानाथशास्त्रि-श्रीश्रीधरप्रसादपन्त-श्रीदीनानाथत्रिवेदिमधुप — श्रीशिवदत्तशर्म-चतुर्वेदादीनां तास्ताः कथाः सर्वाः संस्कृतभाषाया नवीनतमस्य समसामयिकस्य कथासाहित्यस्य स्वरूपमाविर्भावयन्ति रसिकानां सहृदयानां च पाठकानां पुरतः।

अथ पुनर्येषां महानुभावानां संस्कृतसाहित्य-सेवकानां विदुषां कथाः संग्रहेऽत्र संगृहीताः सन्ति सम्पादकेन, ते सर्वेऽपि महान्तो दार्शनिकाः शास्त्राचार्याः शिक्षाशास्त्रिणः प्रौढाश्चिन्तकाः संस्कृतगद्यपरिष्कर्तारः शैलीनिर्माणकराः पत्र-काराः समर्था लेखकाः संस्थासंस्थापकाः कर्मठाः संस्कृतसेवकाः सम्पादकाचार्याश्च विजयन्ते। ततो नासौ कथासंग्रहो नाम केवलं संग्रह एव वरञ्च स एष कथासंग्रहः किलेतः पञ्चाशद्व-र्षेभ्यः पूर्वं आरभ्याधुनातनसमयपर्यन्तसंस्कृत-साहित्यसेविभिर्गद्यलेखकैः सर्वविधैर्नव्यैः प्राचीनैर्वर्तमानकालिकैश्च समये समये लिखि-तानां संस्कृतकथानां प्रातिनिध्यमावहतीत्य-परोऽस्य विशेषः।

अथ विषयदृष्ट्या संग्रहेऽस्मिन् कासांचन कथानां कथासूत्रं पौराणिकं कासांचिदितिवृत्त-स्पृशम्, कासांचन मानवमनोवैज्ञानिकं कासां-चिद् यथाथतावादि, राजतिनीकं सामाजिकं, शिक्षाप्रदं चास्ते। एवं कथास्वासु संग्रहान्त-र्गतासु मानवजीवनस्पृशां नानाविषयाणां कथा-वस्तुसमावेशो, भावभाषाशैलीशिल्पतन्त्र-गतानां कथोचितानाम् तत्तत्तत्त्वानां च सम्य-ङ्निर्वाहः पाठकानां हृदि कामपि राष्ट्रियताभावनां समाजसुधारस्फुरणां, कल्पनाप्रवणतां, स्वस्थां सुस्फीतां भावुकताम्, लेखनचमत्कृतिं, रसार्द्रतां, रमणीयतां चापादयति नाम नूनम्। समसाम-यिकमानवजीवनोचितानां भावानुभूतीनां कथा-लेखनविधया सक्षमा प्रौढा चाभिव्यक्तिः कथा-संग्रहेऽस्मिञ्जाता संस्कृतभाषाया हृद्यगद्यगतां प्रपुष्टामन्तः शक्तिमूर्ज्जस्वलां, ललितललितां चातुरीं कामप्यपूर्वां सहृदयतां तथा च कथा-लेखकानां सिद्धलेखकत्वं, वाङ्मयाराधने तत्परत्वं चाभिव्यनक्ति। इत्थमसौ कथासंग्रहः स्वागतार्हः प्रशंसनीयश्च वर्ततेतमाम्।

अथ च प्रकाशनदृशा-'अभिनव-कथानिकुञ्जः' इत्याख्यस्यास्य कथासंग्रहपुस्तकस्य प्रकाशनं खलु 'भारतीय-विद्या-प्रकाशन, वाराणसी' इति प्रकाशनसंस्थया कृतं कलात्मकं, मनोहरं, रमणीयं चास्ते। पुस्तकसज्जिका नयना-सेचनकरी सुचिक्कणकर्गदपृष्ठावलिविलसिता च वर्तते। अत्र प्रयुक्तानि मुद्रणाक्षराण्यपि च मनोहारीणि, रुचिराणि च विद्यन्ते। परमत्र 'शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि।' इति समीक्षा-सिद्धान्तानुसारं महता खेदखिन्नेन दूयमानेन च हृदयेनैतद्वक्तव्यं भवति यद्धि संग्रहपुस्तके-ऽस्मिन् सर्वतः सुन्दरे वर्तमानेऽपि च संस्कृत-भाषानभिज्ञानाम् वर्णसंयोजकानां तथा सुज्ञाना-मपि चाक्षरसंशोधकानां दृष्टिमान्द्यात् प्रमादा-दालस्याद्वा यत्र-तत्र पदे-पदेऽशुद्धयो जाताः सन्ति। ताश्चैता अशुद्धयः सहृदयानां सचेतसां पाठकानां हृदि खेदं जनयन्ति। संस्कृतभाषायाः प्रकृतिरेव तादृशी, यत्र सामान्यापि चाशुद्धिः खेदाय क्षोभाय क्लेशाय च भवति पाठकानां कृते। ततोऽत्र प्रकाशने जाता अशुद्धयो नैव सह्यतामुपगच्छन्ति। तस्मात्तदिदमतीवावश्यकं यद्धि संग्रहपुस्तकस्यास्य संस्करणान्तरे ता एताः सर्वा अशुद्धयो दूरीकरिष्यन्ते सावधानमित्या-शास्यते। सति सम्भवे शुद्धिपत्रं त्वधुनैवान्तिमे पृष्ठे दीयेत चेत्तदा दोषपरिमार्जनं स्यात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपरं च कथासंग्रहपुस्तकस्यास्यान्तिमेषु पृष्ठेषु परिशिष्टं प्रकल्प्य कथाक्रमानुसारं वाऽकारादिक्रमेण वा सर्वेषां कथाकाराणां लेखकानां संक्षिप्तःपरिचयश्चेददास्यत तदा पाठकानां कृते संस्कृतसाहित्यसेवापरायणानां विदुषां परिचितौ, तत्तल्लेखकानां कीर्तिरक्षणे च वाञ्छनीयं प्रयत्नजातं कृतमभविष्यन्नाम नूनम्। अस्तु।

अन्ते वयमेतदेव निवेदयामो यद्धि स एषोऽभिनवकथानिकुञ्जो नाम कथासंग्रहः सर्वथाभिनन्दनं स्वागतं चार्हति सर्वतः। यतः संस्कृतसाहित्यस्य, संस्कृतपत्रिकाणां, संस्कृतसमाचारपत्राणां, पुस्तकानां च प्रकाशनमद्यत्वे महता काठिन्येन, प्रयासानां शतैर्विरलविरलमेव भवति, तत्रापि च महर्घतापिशाच्यां मुखं व्यादायोज्जृम्भमाणायां कर्मण्यवंविधे धनविनियोगमपि कश्चित् साहसिक एव विरलो गुणज्ञः कुर्यात्। अत एवैतादृशस्याभिनवस्य समसामयिकस्य साहित्यस्य प्रकाशनोद्योगे महती हि कर्मनिष्ठाऽध्यवसायः पुरुषार्थो नानोपकरणसम्भारा गुणग्राहकता, शोधवृत्तिरित्यादयो गुणास्तत्त्वतो भवितुमर्हन्ति। इत्थंविधेषु सर्वेष्वपि काठिन्येषु विद्यमानेषु सत्सु श्रीशिवदत्तशर्मचतुर्वेदानाम् सोऽयं प्रयासो नानादृष्टिभिः श्लाघ्योऽभिनन्दनीयो वाञ्छनीयः प्रशस्यो विद्वद्भिः साहित्यसेविभिः सहृदयैः पाठकैः सर्वैःस धर्मभिश्च संस्कृतहितैषिभिरिति।

दीप उच्चशिखो ज्वलति

[श्रीमधुकरशास्त्री; आचार्यः, विद्याभूषणं, कोटा]

दीप उच्चशिखो ज्वलत्येको महावातेषु निभृतम्।
लक्ष – झञ्झावात – घाते—
ष्वप्यविचलो यः सदाऽभूत्
घन – घटानां घोर – रोषे
सूर्य इव सर्वंसहोऽभूत्
नित्य–नूतनमस्य रश्मिभिरुत्स्फुरति सुज्योतिरमृतम्।
अस्ति मुक्तेः सावधानः
प्रहर्युत कश्चन तपस्वी
स्वीय एवोद्देश्य उत
संलग्नहृत् कश्चन मनस्वी
स्नेह–गङ्गां वा प्रवाहयितुं हिमाद्रिर्गलति सुभृशम्।
तद्दिनं दूरे न, किरणा—
द्योतयिष्यन्त्यस्य धरणि
देश एव किमस्य हेतो–
विश्वमेष्यति गर्व – सरणि
भारतं विश्वास–भरितं चलति शान्ति–पथेऽद्य सततम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Cable : **BOWREAH** *Phone :* **22-9601 (6 lines)**

FOR NOBLE DURABLE QUALITIES

INSIST ON

Cotton Textiles and Yarns Manufactured by

BOWREAH COTTON MILLS CO., LTD.

BOVRIA.

★

Specialities :—

SIZED BEAMS AND HOSIERY YARN DEEPSHADE, POPLIN AND CORD COATING SHIRTING IN CHECKS & DOBBIES DYED AND PRINTED LAUNS AND CAMBRICS.

Managing Agents :

KETTLEWELL BULLEN & Co., Ltd.

21, STRAND ROAD,

CALCUTTA 1.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतभाषामुपेक्ष्य भारतीयत्वमेवोपेक्ष्यते

[वै० पं० श्रीकल्याणदत्तशर्मा, प्र० अ०, राजस्थानसंस्कृतविद्यालयः, खोरी

विषयेऽस्मिन् किमुच्यते नाम। आधुनिकसमये यदा वयं सर्वथा स्वतन्त्राः सञ्जाताः, देशोऽयं भारतवर्षं दासवृत्तिं परित्यज्य स्वाधीनदेशपंक्तिपर्यविश्य स्वमस्तकमुन्नमयति तदा को नाम भारतीयोऽस्ति यो न तावद् गर्वमनुभवेत्। अवगच्छन्तीदमखिला मानवा भारतीयास्तदितरे च यदस्य स्वातन्त्र्यामृतस्य लब्धयेऽनेन देशेन कीदृशं बलिदानमाचरितमिति। सहस्रशो नेतारः, अनेके युवानः शिशवश्च बहवः स्त्रियश्च कष्टपरम्परां प्राप्य प्रियप्राणान् जहुः। इत्थं बहुमूल्यविनिमयसम्भूतेयं स्वतन्त्रता भारतीयानस्मानद्यातितरां सुखयतीव। स्मारयति च मुहुर्मुहुस्तिलकभगतसिंहगान्धीजवाहरसुभाषराजेन्द्रलालबहादुरशास्त्रिप्रभृतीन् राष्ट्रनायकान् यैर्निजप्राणव्ययेनापि भारतमातुः स्वाधीनता सुरक्षिताऽभूत्।

इदानीं पूर्णस्वाधीनतायामुपस्थितायामपि हृदयमस्मदीयं चेखिद्यते नाम। यदमुष्मिन् स्वतन्त्रतायुगेऽपि भारतीयैर्भारतीयपरम्परा, भारतीयसंस्कृतिश्च तावदुपेक्ष्यते। बहूनां लोकानां प्रबलप्रयत्नेनापि हिन्दीभाषा न स्वाभीष्टस्थानमलभत। संस्कृतभाषायास्तु राज्यभाषात्वं स्यादेव कुतः। इदमिदानीं बाहुल्येनावलोक्यते यद् भारतीया एव स्वसंस्कृतिविषये स्वपरम्पराविषये चातीव वर्तन्त उदासीनाः। न जाने किमत्र कारणम्। मन्ये तावदांग्लानां प्रमुखः कूटनीतिचतुरो लार्डमैकालेमहोदय एवात्र कारणम्। स हि स्वशासनसमये तादृशीं शिक्षापद्धतिमाविश्चकार यया भारतीया वपुषा भारतीयाः सन्तोऽपि हृदयेनांग्लभक्ता भवेयुरिति। प्रयत्नश्च तस्य पूर्णरूपेण साफल्यमप्यवाप। अत एवाद्यापि पूर्णस्वाधीनताप्राप्तावपि न तावद् भारतीयानां मनांसि स्वदेशसंस्कृतौ तथा रमन्ते यथा विदेशीयसभ्यताचाकचिक्ये। आंग्ललेखकैर्विदेशीयलेखकैर्वा यादृश इतिहासो भारतमधिकृत्य लिखितस्तस्य परीक्षणं विनैव चक्षूंषि निमील्यैव च भारतीयैरूरीक्रियते। तदनुसारमेव कोमलमतयः शिशवो युवानश्चाध्याप्यन्ते। अतस्तेषां तादृश एव संस्काराः संजायन्तेऽपि। ते भारतीयपरम्परां संस्कृतिं च कथं नामावगच्छेयुः, कस्तेषां दोषो वराकाणाम्। समये समागते च तादृशशिक्षादीक्षितास्त एव देशस्य कर्णधारतामधिगम्य शास्तारो नेतारश्च जायन्ते। शिक्षा-प्रभावेण तमेव पन्थानं ते वरिष्ठं मन्वते, यं स्वपूर्ववर्तिनो मन्यन्ते स्म। अस्यां परिस्थितौ कः खलु भारतीयसंस्कृतेरुद्धारोपाय इति तु प्रज्ञावन्त एवोपदेक्ष्यन्ति।

मान्याः, भाषा केवलं भाषैव न भवति। यथा कामधेनुर्गौरेव किन्तु न सा सामान्या गौः 'अवेहि मां कामदुघां प्रसन्ना' मित्यभियुक्तोक्तदिशा भाषा देशस्य सभ्यताचारित्र्यादिविशिष्टगुणप्रकाशिका सती देशस्य गौरवमुद्वहति। भाषयैव भावा व्यज्यन्ते, साहित्यमुज्जृम्भते। संस्कृत-हिन्दीतरभाषासु चारित्र्यशिक्षणसामग्री कियती भवति, इति तु मया न निश्चप्रचं वक्तुं शक्यते। किन्तु संस्कृतं भाषायां मानवचरित्रमुद्दिश्यैव सम्पूर्णशास्त्राणां प्रवृत्तिरिति तु विदुषामपरोक्षम्। लघुपुस्तकमपि भवन्तः पश्यन्तु नाम। तत्र प्रथमं मंगलमाचरितं स्यात्। संस्कृतभाषायां मंगलाचरणविधिस्तावत्सार्वत्रिक एव। प्रयोजनं चास्य पाठकश्रोतॄणां कल्याणकामनाऽत्मनश्च विघ्नविनाशमुखेन ग्रन्थसमाप्तिः। एवं विचारेण सिद्ध्यति यत्संस्कृतभाषा भारतीयसभ्यतायां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नम्रत्वादिगुणान् स्थापयितुमतिशयेनोपयुज्यते। किंचाध्यात्मिकाधिभौतिकाधिदैविककर्मस्वपीयं मानवानां पथिप्रदर्शिकैव। मानवजनुषश्चरमोत्कर्षस्तावन् मोक्षप्राप्तिस्तस्या अपि दिग्दर्शनमियमेव देववाणी प्रदर्शयति। पुरुषार्थचतुष्टयस्य परिचयः, प्राप्तिसाधनमित्यादिविषयाः किं सन्तीतरभाषासाहित्ये यथा संस्कृतवाङ्मये प्रतिपदमुपलभ्यन्ते नाम।

एवं गुणगणवैशिष्ट्येऽपि भारतीयभाषेयं प्राचीनाऽस्ति, प्राचीनसंस्कारानियमुद्भावयति, नास्यां काचित् प्रगतिर्भवितुं शक्या। अत इयं नाधुना मानवसमूहमुपकर्त्तुमलमिति बहवो बुद्धिबहिष्कृता विदेशीयाः स्वदेशीयाश्च प्रलपन्तो मनसि मोमुदयन्ते। मान्याः? अत्रोच्यते, किमियं संस्कृतवाङ् न वस्तुतो लोकोपकारं कर्त्तुं समर्थेदानींतनेऽनेहसि? अस्योत्तरे मया पूर्वमेव स्पष्टीकृतं यदस्या ज्ञानेन सर्वथा शून्या एवाधिकारिणोऽस्मिन् समये प्रलपन्त्येव मिति। यदियं राष्ट्रभाषा राज्यभाषा वा स्यात्तदा संस्कृतपराङ्मुखाणां का गतिः स्यादित्येव भीतिः तेषां हृदि कृतावासा वर्तते। अन्यथा शासने वर्तमाना अनेकेऽधिकारिणः संस्कृतभाषायाः परमामुन्नतिमिच्छन्ति। इतस्ततः सम्मेलने महासम्मेलने च स्वीयमुद्गारं प्रकटयन्ति। किन्तु तादृक्षाणां वराकाणामिदं कथन'मरण्यरोदन' मिव शून्यफलायैव। ते च भाषणान्येव प्रदाय सन्तोषमावहन्ति।

किमिदं कृत्यं न तावद् भारतीयजनता मानसानि मथितुमलं यत् त्रिभाषाक्रमे (फार्मूलाख्ये) भारतीय परम्परापोषिकैषा संस्कृतभाषा स्थानमपि न प्राप्तवती। कस्यात्र दोषः? अस्या भाषायाः, भारतीयजनताया अथवा भारतशासनस्य? अत्रोत्तरदाने तु विचारवन्त एव प्रमाणम्।

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❋ भारती-प्रशस्तिः ❋

ले० स्वामी श्रीलक्ष्मणशास्त्री, संस्कृतविद्यालयाध्यक्षः, नागौरः (राजस्थानं)



या भाति तारानिकरैर्निशेव;
सुरम्यशब्दार्थविचित्रलेखैः ।
हितैरता मासिकपत्रिका हि,
प्रभातभास्वत्समसत्प्रसारा ॥ १ ॥
अतुल्यनिःस्वार्थपरोपकर्त्री,
स्वभावतः सन्मतिदा जनानाम् ।
स्वरम्य नाम्नैषु पदेषु गुप्ता,
सातीव हर्षं विदुषां विधेयात् ॥ २॥

मनोविनोदकणिका-

शिक्षक :— मातामहस्य जामाता सम्बन्धी तेऽस्ति को वद ? ।

छात्र :— एतादृशस्तु सम्बन्धो नास्माकं जायते गुरो ! ॥

लाभाशा

सरला— विमले ! अपि श्रुतं त्वया, डाकपत्त्राणां मूल्यं वृद्धिं गतम् ? इति

विमला— अयि श्रुतं मया, अद्यैव पञ्चाशद्रूप्यकाणां तानि क्रीतान्यपि ।

—मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातृ-स्तवनम्

लेखकः-श्रीरुद्रदेवत्रिपाठी, दिल्ली

जय हे ! विश्वस्य प्रथमराष्ट्र !
अयि चिरनवीन ! हे पुराचीन ! उपमाविहीन ! ते भवतु जयः ।
सकला सृष्टिस्तवैव पुरतः, शिशुवदखेलत् तत्कुतो भयः ?
जय जगन्मौलिमण्डन ! जय जय, पितृत्वभावधर परंम राष्ट्र !

प्राणेषु प्रथमं च तवैव, करुणास्रोतः कलकलमवहत्;
प्रथमवारमथ कविस्तवैव, कविता-पद्यं प्रथममकथयत,
सप्तस्वरपरमेशस्त्वमसि सङ्गीतकलायाश्चरमराष्ट्र !

तवैव शोधः प्रथमं भूमेरुर्वरतां ज्ञातुं प्रभुरभवत्;
प्रथमस्त्वं वैज्ञानिकोऽसि यो जड़ं चेतनं चैवाबुध्यत्,
तव गौरवमास्पृशन्ति देशाः दिवसद्वयजाः, सुगम-राष्ट्र !

तावक-बल-विक्रमयोः साक्षी, प्रत्येकं निधिरथवाऽस्त्यचलः;
अहिंसकस्त्वं परमः शान्तः, क्रान्तिमयस्त्वं परमः प्रबलः;
स्वस्यादर्शस्त्वमेव विश्वे त्वमसि महान् हे असम-राष्ट्र !

स्वर्गीयज्ञानस्य प्रथमं, तवैव गेहे दीपो ज्वलितः,
यस्यालोके मुग्ध इव स्वं, समर्पणार्थं लोकश्चलितः;
विनतं विश्वं तवांघ्रियुगले ऽध्यात्म-बोधधर ! हे अमरराष्ट्र !

जय हे—

दी अवध सूगर मिल्स लिमिटेड

निर्माता :—

प्रधान कार्यालय :—
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई-१

मिल्स :—
हरगांव
जिला-सीतापुर
उत्तरप्रदेश

शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मातृ-स्तवन

जय हे ! जगती के प्रथम राष्ट्र !
ओ चिर नवीन ओ पुराचीन, उपमा विहीन जय हो, जय हो !
तेरे ही सम्मुख सकल सृष्टि, शिशु सी खेली, फिर क्यों भय हो !
जय जगत-मौलि-मंडन जय-जय, पितृत्व भाव के परम राष्ट्र ॥१॥

तेरे ही प्राणों में पहले, करुणा का कलकल स्रोत बहा;
तेरे ही कवि ने प्रथमबार, कविता का प्रथम श्लोक कहा;
तू सप्त स्वरों का अधिकारी, संगीत कला के चरम राष्ट्र ॥२॥

तेरा ही पहला अन्वेषण, उर्वरा भूमि यह जान सका,
तू ही वह पहला वैज्ञानिक, जड़ चेतन को पहचान सका,
कर रहे स्पर्श तेरा गौरव, केवल दो दिन के अधम राष्ट्र ॥३॥

तेरे बल-विक्रम का साक्षी, प्रत्येक सिन्धु, प्रत्येक अचल,
तू परम अहिंसक शांतिशील; तू क्रांति-रूप, तू परम प्रबल.
तू है अपना आदर्श आप, तू है महान् तू असम राष्ट्र ॥४॥

तेरे ही घर में प्रथमबार, स्वर्गीय ज्ञान का दीप जला;
जिसके प्रकाश पर मोहित सा न्योछावर होने विश्व चला,
तेरे चरणों पर विनत विश्व, अध्यात्म ज्ञान के अमर राष्ट्र ॥५॥

गिरने से पहले उनकी रक्षा करें

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय ! इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तैल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल घने तथा लम्बे और आपके दाँत चमकीले तथा मज़बूत रहेंगे।

इलाज से बचाव बेहतर है !

आयुर्वेद औषधालय [illegible] लिमिटेड [illegible]

गाय

छाप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकता ही ताकत है!

गणराज्य दिवस आया और चला गया। आज जब हम उसके उल्लास भरे समारोहों को याद करते हैं, तब हमें यह नहीं भूलना चाहिये कि एकता में ही हमारी ताकत है और इसी के जरिये हम शान्ति व समृद्धि के अपने लक्ष्यों को प्राप्त कर सकते हैं। इस महान् देश के प्रति अपने गौरव और निष्ठा को दोहराते समय, आइये, हम सब मिलजुलकर अपने देश को एक महान् देश बनाने के पुनीत कार्य में जुट जाने का व्रत लें।

एक महान् देश हमारा, एक महान् राष्ट्र!



davp 67/449

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ श्रीशिवराज्योदये महाकाव्ये

२८ सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः, डी.लिट्, नागपुरम्

ततोऽफजुल्लः शिबिकाधिरूढः
मध्याह्नकाले प्रययौ सवेगम् ।
प्रतापदुर्गाध उपत्यकायां
नवोपकार्यां नयनाभिरामाम् ॥१॥

स्थले स्थलेऽरण्यपथे सुरम्ये
दासास्तदाज्ञापरिपालनार्थम् ।
शिवाज्ञया तस्थुरतीवनम्रा
वृक्षा इवोच्चैः फलभारवन्तः ॥२॥

केऽप्यन्वरुन्धन्नतिदूरदेश्यं
पुरातनं नूतनपुष्पगन्धिम् ।
द्राक्षासवं पातुमपीतपूर्वं
राजाधिराजैरपि दुर्लभो यः ॥३॥

अन्येऽनुनिन्युः सकृदेव भोक्तुं
पीयूषमाधुर्यरसोत्तराणि ।
अलौकिकास्वादसुगन्धवन्ति
गोमन्तकीयाम्रफलानि तानि ॥४॥

केचिद् ददुर्नागरुकोत्तमानां
विदर्भजानां भुवनश्रुतानाम् ।
दलानि सम्यग् दलितानि तस्मा-
यदृष्टपूर्वाणि विजापुरेऽपि ॥५॥

देशान्तरायातसुदाडिमानां
बीजानि माणिक्यवदुद्रुचीनि ।
तस्मै स्फुरद्राजतशुभ्रशुक्ति-
क्लृप्तेन पात्रेण ददुश्च केचित् ॥६॥

कादम्बरं मिष्टरसं च केचित्
सुपक्वजम्बीररसानुषिक्तम् ।
पानीयमानीय च नारिकेल-
फलोद्भवं केचन दातुमैच्छन् ॥७॥

तस्यासुरीं घोरतमां बुभुक्षाम्
अपक्वमांसाशनमात्रशाम्याम् ।
यथावदुत्तर्पयितुं विनीतैः
सम्प्रार्थितः कैश्चिदसौ तदानीम् ॥८॥

तन्त्रीमृदङ्गप्रमुखैः सुतूर्यैः
श्रोत्राभिरामध्वनिभिः सहावम् ।
नृत्यन्त उच्चैर्नटनर्तकानां
गणा यथास्थानमतोषयंस्तम् ॥९॥

सुखोपभोगैर्विविधैः प्रपूर्णे
वनेऽपि तस्मिन्नगरायमाणे ।
विन्दन् महानन्दमसौ प्रकामं
सुखेन तं मण्डपमाससाद ॥१०॥

बाह्यां स्फुरत्तोरणलोलमाला-
चञ्चत्पताकादिभिरुन्मिषन्तीम् ।
विचित्रशोभां पटमण्डपस्य
पश्यन् मुहुर्भूरि विसिष्मियेऽसौ ॥११॥

दृष्ट्वा बहिर्द्वारमनेकवर्णा
रङ्गावलीकल्पितचित्ररेखाः ।
कलानभिज्ञोऽपि गुणज्ञमानी
तत्कौशलं स स्तुतवान् मुहूर्तम् ॥१२॥

आदिश्य वीरान् दशरक्षिणः स्वान्
साकं समेतान् समयानुसारम् ।
स्थातुं यथास्थानकमप्रमादं
स मण्डपान्तः प्रविवेश धीरम् ॥१३॥

तमन्वगच्छंस्त्रय एव येषां
बण्डाभिधानो हि तदङ्गगोप्ता ।
कृष्णाजिरालेखनपत्रपाणिः
शिवस्य दूतः स च कम्प्रकायः ॥१४॥

तमुच्चकैर्मण्डपमन्तरङ्गे
काश्मीरजोर्णाकटिकोर्णभूमिम् ।
विचित्रचीनांशुकसद्वितानं
पाश्चात्यदेश्योत्तम चित्रवन्तम् ॥१५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुवासितं विश्रुतकान्यकुब्ज-
प्रदेश्यगन्धद्रवसिञ्चनेन ।
धूपायितं द्राविड़चन्दनेन
पश्यन् स आश्चर्यरसे ममज्ज ॥१६॥
व्यात्ताननान्याहतचित्रकाणां
परिस्फुरत्कृत्रिमलोचनानि ।
स्तम्भेषु पश्यन् सुनिवेशितानि
रौद्रप्रियोऽसौ नितरां जहर्ष ॥१७॥
माणिक्यमुक्तामणिलम्बकानां
प्रभाभिरभ्याहतनेत्रतेजाः ।
सविस्मयस्तान्यसकृत् कथञ्चित्
पस्पर्श रत्नानि स मत्सरीव ॥१८॥
मिलन्मिलिन्दानि मरन्दवन्ति
मनोज्ञगन्धीनि सरोरुहाणि ।
विचित्रगुच्छाकृतिगुम्फितानि
विलोलयामासुरमुष्य नेत्रे ॥१९॥
आसन्दिकाः काश्चन दन्तिदन्त-
विनिर्मितास्तत्र बृहत्प्रमाणाः ।
व्याघ्रत्वगाच्छन्नसुखासनाश्च
पश्यन् मुहुर्विस्मितवान् स धीरः ॥२०॥
स स्फाटिकान्युज्ज्वलकान्तिमन्ति
मैरेयपात्राण्यतिचित्रितानि ।
विलोक्य तेभ्यः स्पृहयांबभूव
तथा न तत्रत्यमधुद्रवेभ्यः ॥२१॥
अक्षोटबादामलवङ्ग-शुष्क-
द्राक्षानवांकोलफलप्रपूर्णम् ।
प्रफुल्लपद्माकृतिहैमपात्रं
फलानपेक्षोऽपि मनाग् ददर्श ॥२२॥
विलोक्य ताम्बूलकरङ्कमेकं
हंसाकृतिं रत्नसुवर्णकृप्तम् ।
अन्यं मयूरप्रतिमं विचित्रं
स शिल्पिनः कौशलमस्तुवीत ॥२३॥
वस्तूनि सर्वाण्यपि सुन्दराणि
यथाप्रदेशं विनिवेशितानि ।
विशेषतो तानि महार्हरत्ना-
न्यालोक्य वृद्धं चकितः स आह ॥२४॥

महत्तर! ब्रूहि वनेचरेण
त्वत्स्वामिना वित्तविवर्जितेन ।
कुतो नु सम्प्राप्तमिदं समस्तं
राजाधिराजैरपि दुर्लभं यत् ॥२५॥
पृथ्वीतलेऽस्मिन् न विजापुरीय-
सभालयाभं क्वचिदस्ति रम्यम् ।
यस्मिन् महर्द्धिर्विजयापुरस्य
चकास्ति पूर्वं परिलुण्टितस्य ॥२६॥
तत्रापि पात्राणि हिरण्मयानि
राजन्ति रत्नान्यथवासनानि ।
किन्त्वत्र लोकेऽहमलौकिकानि
यथा तथा तत्र न लोकितानि ॥२७॥
तदीषदीर्षाकलुषं तदीयं
वचो निशम्यैव स इंगितज्ञः ।
निर्दन्तवक्त्रस्फुटदट्टहासा-
स्फुटां कथञ्चिद्गिरमुज्जगार ॥२८॥
अहो महोदारविभूतिपात्र!
लक्ष्मीविलासालय! भाग्यशालिन्!
चकास्ति यद्यत् कमनीयमत्र
किं नास्ति तत्तद् भवदीयमेव ॥२९॥
महल्लकाः पर्वतदुर्गसद्मा-
न्येनाः भुवः सस्यविशेषरम्याः ।
यत् किञ्चिदर्ण्यजितसञ्चितं वा
मत्स्वामिनस्तद् भवदीयमेव ॥३०॥
यदि स्वयं दास्यमसौ भजेत
भावत्कमुत्सृष्टनिजाधिकारः ।
तत्तस्य सर्वं द्रविणं यदेतत्
तदस्ति नूनं भवदीयमेव ॥३१॥
पिबंस्तदीयं तदतीव हृद्यं
श्लक्ष्णं वचो मोहनमन्त्रकल्पम् ।
विहस्य भूयः स निजोरुदध्नाम्
आसन्दिकां काञ्चिदलंचकार ॥३२॥
चिरायमाणं शिवमुद्विभाव्य
स उच्चकैरुत्कलिकाकुलात्मा ।
बभाण वृद्धं किमहो कियन्तं
कालं विधेयाऽत्र मया प्रतीक्षा ॥३३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वार्धक्यनम्रः कटिलग्नपाणिः
सचिन्तवत्तं स्थविरः स ऊचे ।
मन्ये महाराज कथञ्चिदर्वाक्-
कालं नु जातो भवदागमोऽत्र ॥३४॥

स्वामी हि मे निश्चितकर्मकाला-
तिपातमद्धा सहते न जातु ।
फल्गूनि कर्माण्यपि कर्मदक्षः
सुनिश्चितेऽसौ समये करोति ॥३५॥

प्रायेण सम्प्रस्थित एव स स्यात्
तथापि तस्मै प्रहिणोमि दूतम् ।
विलम्बमानं तमसौ कथञ्चित्
भवन्निदेशात् त्वरयेत सद्यः ॥३६॥

इत्यूचिवानेव स मन्दमक्षि-
सङ्कोचसंज्ञामकरोदशब्दम् ।
यामीक्षमाणः क्षण एव तस्मिन्
पार्श्वस्थितः किङ्कर उज्जगाम ॥३७॥

निवृत्य शीघ्रं स्थविरस्य कर्णे
स मन्दमन्दं निजगाद किञ्चित् ।
श्रोतुं यदीषत् कथमप्यतीव
समुत्सुकोऽभूत् स तदाफञ्जुलः ॥३८॥

ह्रिया सभीत्येव महत्तरोऽसौ
कथञ्चिदस्पष्टगिरं जगाद ।
हं हो महावीर न वक्तुमीशे
स्वस्वामिनः कातरतामपाराम् ॥३९॥

भवत्सहायोऽयमतुल्यशक्तिः
शरीरगोप्ताऽत्र समीप एव ।
कृपाणपाणिः स्थित इत्यवेत्य
भीस्तस्य चेतः स्पृशतीव गूढम् ॥४०॥

एकान्त एकाकिनमेककोऽत्र
समीहते द्रष्टुमसौ समक्षम् ।
विपत्तिमूढा शरणागता हि
शरण्यमेकान्त अहो भजन्ते ॥४१॥

तदेष वीरो बहिरस्तु तावद्
यावद् भवद्भिः स करोति चर्चाम् ।
भवन्मनीषामनुसृत्य नूनं
सर्वस्वमन्ते रह एव दद्यात् ॥४२॥

अभ्यर्थनैषा समयेऽसमेऽस्मिन्
सुहृत्सुतस्येति निभालनीया ।
इत्येतदेकं जगदेकवीर
वृद्धोऽर्थयेऽहं प्रणतो भवन्तम् ॥४३॥

वस्त्रान्तराच्छन्नसुतीव्रशस्त्रं
संस्मृत्यं स्वं बाहुबलं च घोरम् ।
अहंयुरह्नाय मुदाभ्यनन्दत्
स प्रार्थनां तामविरोधमेव ॥४४॥

स्वदेहगुप्तौ कवचायमानं
बण्डाभिधं तं प्रबलं स्वदासम् ।
स्थातुं बहिर्मण्डपमत्यदूरे
सस्नेहहासं स हि निर्दिदेश ॥४५॥

इत्थं शिवेन रणनीतिविशारदेन
कौटिल्यतन्त्रमवलम्ब्य जयावहं तत् ।
संस्थापितः स्वरिपुरात्मवशे ससेनः
कृष्णेन कालयवनः स पुरा यथैव ॥४६॥

विज्ञाय व्यपगतदेहरक्षकं तं
दुष्टारिं निजवधलोलुपं क्षणेन ।
वेशान्तः कवचशिरस्त्रशस्त्रनद्धः
दुर्गाधस्त्वरितगतिः शिवः प्रतस्थे ॥४७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संगृहीताः समाचाराः

अनु० श्रीगणेशरामशर्मा, डूंगरपुर

'सन डाडनर्स' इत्याख्यं मृत्तरयानं लन्दननगरतो मोहमयीं समाजगाम। द्विशतप्रायं प्रतिघण्टात्मकेन जवेन तच्चचाल तथा द्वाविंशसहस्रमीलात्मकं पन्थानमतिलङ्घ्याजगाम .एतद्वस यानं. ९ सितम्बर ६७ दिने यात्रामारभ्य ६ नवम्बरदिने भारतं प्राप। समेषां बसयानयात्रिणां कथनमास्ते यदितो बस-यानमग्रेऽपि च यातायातं करिष्यति। इमे यात्रिणो ब्रूसेल्स-पेरिस मार्सेल-जिनेवा-यूगोस्लाविया-टर्की-ईरान-अफगानीस्तान-पाकिस्तानादीन् देशान् परिभ्रम्य अमृतसरोनगरं प्राप। ततो देहली-आगरा-जयपुर-इन्दोर-जलगांव (अजंताइलोरा) प्रभृतीनि स्थानानि परिभ्रमन्मोहमयीमाजगाम।

३०, जनवरी ६८ दिने हिन्दीभाषायः सुविख्यातः साहित्यसेवको नाट्यकारो महालेखकः सम्पादकः क्रांतिकारी च श्रीमाखनलाल चतुर्वेदमहाभागः स्वनिवासस्थाने खण्डवानगरे स्वर्गं जगाम। महाभागोऽसौ स्वराज्यान्दोलने गौराङ्गशासनाद्विरुद्धं गान्धिमहात्मना प्रवर्तिते सङ्घर्षे कारागारं गतवान्। हिंसात्मकक्रांतिकारिणां देशभक्तानां समये समये साहाय्यं चक्रे। 'प्रभा' कर्मवीर—प्रभृतीनां सम्पादनं च चकार। असावधुना भाषाविधेयक-विरुद्धं स्वाक्रोशप्रदर्शनाय भारतसर्वकारेण प्रदत्तं 'पद्मभूषणं' नामालङ्करणं चापि तत्याज। वयं तस्मै दिवंगताय चतुर्वेदाय सस्नेहं सश्रद्धं च सद्गतिं कामयामहे परमेश्वरात्।

भारतीय-जनसङ्घस्याध्यक्षो महामनीषी विद्वान् श्रीदीनदयालुरुपाध्यायमहाभागो दिनाङ्के ११ फरवरी ६८ दिने कैश्चिद्धतकैरपघातिभिर्दण्डादाण्डि प्रहृतो दिवं जगाम। मुगलसरायरेल-स्थानपरिसरेस्य शवः प्राप्तः। एवंविधाया राजनैतिकहत्यायाः कारणाद्देशेऽत्र महान् विरोधः क्रियमाणोऽस्ति प्रजाभिः। प्राक् जनसंघस्य भूतपूर्वाध्यक्षौ श्रीश्यामाप्रसादमुखोपाध्यायस्तथा द्रा. रघुवीरमहाभागोऽपि च रहस्य पूर्णया रीत्यापघातं नीतौ केनचित्। दीनदयालोः मरण-कारणज्ञानार्थं सर्वकारोऽनुनीतोऽस्ति जनताभिः। शोकसम्वादमिममाकर्ण्य सर्वेऽपि भारतीयाः प्रजाजनाः शोकं क्लेशमशांतिं चानुभवन्तो विषीदन्तो विद्यन्तेतराम्। स्वर्गवासिनोऽस्योपाध्याय-महाभागस्य निधनाद्देशेऽत्र सर्वत्र शोकसभाः क्रियमाणाः सन्ति। नेतृभिः प्रजाभिः सस्थाभिश्च श्रद्धाञ्जलयः समर्प्यमाणाः सन्ति। हा, हन्त! महादुःखप्रदोऽयं दुस्सम्वादः!!

अल्पवयस्काश्चापि महान्तः

ऊर्जस्वलं तत्त्वं निसर्गतः स्वविकाशाय प्रगतिपथे स्वयमेवोन्मुखं गतिशीलं च भवतीति सत्यमाहुस्तद्विदः। तस्मादेवोक्तम्—

"शिशुरपि सिंहो निपतति मदमलिनकपोलभित्तिषु गजेषु।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ॥१॥"

केषांचिन्महापुरुषाणां बाल्यकाल एव तत्तेजस्वित्वं, महत्त्वं, शौर्यमवगणनाऽसहिष्णुत्वं च प्राप्तकालं प्रगटयाम्बभूवेति वयमितिवृत्तपृष्ठेषु पश्यामः पठामश्च। अत्राद्य तावत् पाठकानाम्—विशेषतः स्वल्पाल्पं संस्कृतं परिचिन्वतां, बालपाठकानां च—आनन्दाय, मनोविनोदाय, ज्ञान-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृद्धये च कानिचिदुदाहरणान्यवतार्यन्ते। तथा हि—

महाराष्ट्रकेशरी च्छत्रपतिः शिवराजमहोदयः स्वायुषस्त्रयोदशवर्षमात्रे वयसि तोरणदुर्गं स्वपराक्रमेण विजिग्ये।

आंग्लभाषायां काव्यानि विरच्य विदेशेष्वपि ख्यातिं गतायाः सुश्रीचारुदताया वयोऽष्टादशवर्षात्मकं केवलमासीत्।

विश्वकवीन्द्रो रवीन्द्रनाथठक्कुरमहाभाग इङ्गलैण्डदेशस्य महाकवेर्विलियमशेक्सपीयरस्य 'मैकबेथ' इत्याख्यस्य सुप्रसिद्धस्य नाटकस्य बंगभाषामनुवादं स्वजीवनस्य चतुर्दशवर्षात्मके वयसि कृतवान्।

सुविख्यातो नाटकप्रणेता श्रीहरीन्द्रचट्टोपाध्यायमहाशयः स्वकीयं प्रसिद्धं नाटकं 'अबू हसन' इत्याख्यं स्वायुषश्चतुर्दशवर्षमिते वयसि लिलेख।

विश्वविजेता सम्राट् सिकन्दरो महान् स्वस्य सप्तदशवर्षात्मके वयसि 'शोरोनिया-युद्धं' जिगाय।

मुगलसम्राडकबरो महान् त्रयोदशवर्षमिते स्वायुषि राज्यसिंहासनाधिरूढो बभूव, स च साम्राज्यस्य शासनकार्यं षोडशवर्षात्मके वयसि शतपङ्क्तिप्रमाणां सुदीर्घाकारामेकां कवितामांग्लभाषायां जग्रन्थ।

महाराज्ञी—अहल्यादेवी राज्याधिकारप्राप्तिसमये केवलमष्टादशवर्षदेशीयासीत्।

जगद्गुरुः श्रीमदाद्यशङ्कराचार्यमहाभागः षोडशवर्षमिते स्वायुषि भारतवर्षदेशस्यास्य सर्वानपि पण्डितान्—शास्त्रार्थेषु पराजितवान्।

महाराष्ट्रप्रान्तोद्भवो महात्मा ज्ञानदेवो द्वादशवर्षात्मके वयसि श्रीमद्भगवद्गीतायाश्छन्दोमयीं ज्ञानेश्वरीति विख्यातां टीकां महाराष्ट्रभाषायां लिलेख।

सहृदयो मानवः फ्रैंकलिनमहाशयः

अपि भवन्तः कल्पनां कृतवन्तो यद्धि एक एव मनुष्यो लेखको, मुद्रकः, प्रकाशकः, पत्रकारो, वैज्ञानिको, राजनीतिज्ञो, दार्शनिको, भाषाशास्त्री, कृषिविद्याविशारदस्तथा च महानेव सेनानी भवितुमर्हतीति? सर्वतोमुखीं प्रतिभां दधानं पुरुषमिममितिहासो बेंजामिनफ्रैंकलिन इति नाम्ना स्मरति।

ज्ञान-विज्ञानयोस्तथा मानवजीवनस्य च विकास-सम्बन्धी कदाचिदेव कोऽपि क्रियाकलापः स्याद्यं फ्रैंकलिनमहाशयो न सम्पादितवान्। स्वजीवनेऽनेकानेककार्यकलापेभ्योऽतिरिक्तमसौ फ्रैंकलिनमहाशयो लोहकार-सूत्रधार-चर्मकार-पात्रनिर्मातृसुधालेपकादिरूपेणापि कार्याणि च सम्पादयामास। स्व किलैपण-दीपवर्तिकानिर्माणस्य कर्मशालानामपि संचालनं चकार। अतः परमाश्चर्यास्पदं त्विदमास्ते यत् स यत्किमपि कार्यं चक्रे तस्मिन्नेव कर्मण्येकां नव्यां गवेषणां चापि कृत्वा प्रादर्शयत्।

सन् १९३७ तमे ईषवीये वर्षे स एष फ्रैंकलिनमहाशयोऽमरीकाराष्ट्रस्योपनिवेशानां सर्वोच्चपत्रकार्यालयाधिकारी (Postmaster General) विहितः। तत्पदमधितिष्ठन्नसौ फ्रैंकलिनमहोदयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वतनीं पत्रवाहक-पद्धतिं परिसमाप्याधुनातन्याः पत्रवहनप्रणाल्या मूलाधारं संस्थापितवान्। स एव हि पत्रेषु चिटिकासंयोजनस्य प्रथामारेभे स खल्वनेकानि क्रान्तिकारीणि परिवर्तनानि चक्रे। तस्य समयं यावत् प्राकाश्यं व्रजन्त्यः सर्वाश्चापि पत्रिका अत्यन्तं नीरसा अनाकर्षकाश्चाभूवन्, स एव हि समाकर्षकान् सामयिकांश्च विषयानधिकृत्य लेखलेखनं प्रारब्धवान्। एवं स पत्रिकाणां सम्पादनस्य क्षेत्रेऽपि च मौलिकं योगदानं प्रददौ। पाठका भवन्तोऽत्रभवन्तो नाश्चर्यचकिता भवेयुर्यद्धि बैजामिनफ्रैंकलिन एव हि सर्वप्रथमो मानवोऽभूद्यः पत्रपत्रिकासु विज्ञापनानां प्रकाशनस्य प्रथां प्रारेभे।

अथ फ्रैंकलिनमहाशयस्य विश्वविख्यातेनाकाशविद्युदन्वेषणेन को वा परिचितो न स्यात्? एतज्ज्ञात्वा भवन्त आश्चर्यमावहेयुर्यदाकाशविद्युतोऽन्वेषणाय यदुपकरणं स प्रयुयोज तत्कौशेयसूत्रेणोत्थापितः कर्गदपतङ्गस्तथैकाकुञ्जिका चास्ताम्।

अथामरीकायाः स्वातन्त्र्ययुद्धे यावत्कार्यजातं जार्ज वाशिंगटनमहोदयः कृतवांस्तादेव फ्रैंकलिनमहाशयोऽपि चक्रे सन्धिविग्रहमन्त्रणासु तथा युद्धस्थलेऽपि च।

एभ्यः सर्वेभ्यः कार्यकलापेभ्योऽतिरिक्तं फ्रैंकलिनमहाशयस्य सुहृदस्तमेकं कुशलं संगीतज्ञं, चतुरङ्गक्रीडाप्रवीणं तथा हास्यविनोदप्रियं च जानन्ति स्म। आगम्यताम्, वयमपि च स सुप्रसिद्धो हास्यविनोदरसिकः फ्रैंकलिन इव जीवनं जीवितुं शिक्षेमहि यः स्वस्य स्यूते केवलं काकिणीत्रयमात्रमेव धनं दधानोऽपि च राजमार्गेऽकुतोभयं पूर्णतो निश्चिन्तः समदं यातायातं कर्तुं पारयामास। स हि स्वजीवनं सम्पूर्णेनाध्यवसायेन जिजीव तथा १७ अपरेल १७९० दिनाङ्के चतुरष्टाशीतिवर्षायुषि देहं तत्याज। तदानीमपि स युवकोचितं तारुण्यं धत्ते स्म। वार्द्धक्यं तमस्पृष्टमिवासीत्।

साप्ताहिक हिन्दुस्तानात्साभारम्

उपलब्धेर्विवरणम्

वाशिंगटननगरस्यैकस्मिन् समाचारपत्रे अमरीकारूषदेशयोः श्रमिकैर्जीवनस्यावश्यकानामुपकरणानां संग्रहे संयोजने वा कियत्कालं श्रमः कर्तव्यो भवतीत्यत्र विषये कश्चनैको लेखः प्रकाशितोऽस्ति। अस्य लेखकस्यासावभिनिवेशपूर्वकं कथनमास्ते यद्धि यदि क्षणक्षणगता गणना क्रियेत तदामरीकारूषदेशयोः श्रमिकाणां परिश्रमस्य तथा चोपलब्धेर्विवरणमित्थं भवति—

यदि चामरीकायां कश्चन श्रमिक एकं किलोग्राम-भारप्रमाणं पिष्टं कामयते तदैतदर्थं तेन षट्मिनट-समयं यावत् कार्यं कर्तव्यं भवति तथा रूषदेशे ४६ मिनट पर्यन्तम्, एककिलोग्रामप्रमाणडबलरोटिकार्थममरीकायां १३ मिनट तथा रूषदेशे ५६, अमरीकायामेककिलोग्रामप्रमाणशर्करार्थं ६ मिनट तथा रूषदेशे ११६ मिनट अमरीकायामेककिलोग्रामनवनीताप्राप्तयेऽमरीकायां ४४ मिनट तथा रूषदेशे ३६७ मिनट, अमरीकायामेकलिटरदुग्धलाभा ६ मिनट तथा रूषदेशे ३१ मिनट, अमरीकायामेककिलोग्राम आलूनां प्राप्तये ४ मिनट तथा रूषदेशे ११ मिनटपर्यन्तं परिश्रमः कर्तव्यो भवतीति।

सरिता—जनवरी ६८ नववर्षाङ्कः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिवङ्गतः श्रीदीनदयालुरुपाध्यायः

पूजनीयः श्रीदीनदयालुरुपाध्यायः

मनः प्रबलेन विषादेन आच्छन्नमभूत्। कथं एतादृशी मर्मभेदिनी घटना संघटिता? अस्या ज्ञानं तु ते ते शोधका एव करिष्यन्ति। किमपि शोधनं भवेत्, अस्माकं संघस्य एकनिष्ठः कार्यकर्ता दिवङ्गतः। स्वजीवनस्य यौवने, अग्रे च विविध-कार्याणां कौशलेन सम्पादनस्य कृते तस्य क्षमता वर्धमाना-ऽऽसीत्, किन्तु इदानीं तस्याः क्षमतायाः लाभस्य अभाव एव जातः।

द्वि-त्रिदिनेभ्यः पूर्वं तेन सहसाक्षात्कारो जातः। अतिप्रेम्णा वार्तालापः संजात आसीत्। मया पृष्टं 'युष्माकं अग्रे कः कार्यक्रमोऽस्ति? अग्रे कुत्र मिलिष्यसि? तेन प्रत्युत्तरम् 'अहं पटनानगरं गच्छामि। कतिपयदिनानन्तरं कानपुरनगरे मिलिष्यामि। तस्य पटनानगरगमनात्पूर्वमेव घटनैषा घटिता।

आदर्शः स्वयंसेवकः

बाल्यकालात् अर्थात् छात्रजीवनात् एव स्वयंसेवकस्य भूमिकया स्वकर्तव्यबोधं कृत्वा निजां समग्रां जीवनशक्तिं संघकार्यार्थमेव समर्पयन्तः ये स्वल्पसंख्यकाः जनाः सन्ति तेषु तस्य स्थानं महत्त्वपूर्णमस्ति। संघस्य स्वयंसेवकात् एषा अपेक्षा क्रियते यत् सः आत्मनि स्वयंसेवकोचितान् समग्रान् गुणान् धारयेत्, स्वसंघटनं प्रति दत्तावधानश्च स्यात् तथा तस्य विभिन्नानां कार्यक्रमाणां महत्त्वं हृदये प्रजागर्य तेषु सम्मिलितो भवेत्। स यदि अन्येषु कार्येषु अपि नियुक्तः कृतः स्यात् तर्हि स तानि पूर्णेन परिश्रमेण कुर्यात्। भवतु तत् कार्यं कस्यापि क्षेत्रस्य। स हि (श्रीदीनदयालुमहोदयः) राजनीतिके क्षेत्रे कार्यं कर्तुं आदिष्टोऽभूत्। तेन च तदेव कृतम्। कियत्या योग्यतया तत्कृतम्, तस्याः कल्पना केषांचिदेव जनानां हृदयेषु भवेत् केषाञ्चित् नैव, किन्तु यदि एतदुच्येत यत् इदानीं भारतीयजनसंघस्य नाम्ना अस्माकं देशे यत् राजनीतिकं संघटनं विद्यमानं वर्तते तत्तस्य योजनाबद्धपरिश्रमस्य एव परिणामोऽस्ति, तर्हि नात्र काऽपि अत्युक्तिर्भविष्यति। जनसंघे बहवः वक्तारः सन्ति, बहवः कठोरपरिश्रमशीलाः सन्ति, बहवः केवलं शोभावर्धकाः सन्ति, किन्तु आधारस्तम्भस्य प्रथमप्रस्तरात् कार्यारम्भं कृत्वा एतावतीं समुन्नतां मर्यादां यावत् कार्यप्रापणस्य श्रेयः यदि विशेषतया कस्यापि जनस्य कृते दीयेत तर्हि एतादृशः स एवासीत्, स तस्य सर्वोच्चमपि स्थानं प्राप्तवान्।

यद्यपि स अध्यक्षपदं गृह्णीयात् ममेच्छा नासीत् तथा तस्यापीयमिच्छा नासीत्। अहं तं प्रति उक्तवान् यत् 'आपद्धर्म इति मत्वा एकवर्षपर्यन्तं अध्यक्षपदं स्वीकर्तव्यम् त्वया'। अतः तेन एतत् पदं स्वीकृतम् नान्यथा। तस्य सम्मानस्य पदस्य वा लिप्सा नासीत्। अत एव तन्मनसि अध्यक्षपदग्रहणस्य नितराम्‌च्छैव नाभूत्। अहमपि नैच्छम्, परं कस्याश्चित् परिस्थित्याः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारणात् विवशो भूत्वा अध्यक्षपदग्रहणाय तमकथयम्। मयि उक्तवति च स्वयंसेवको यथा आदेशं पालयति तथा स तस्य पालनं कृतवान्।

तस्य अध्यक्षपदग्रहणानन्तरं स्वल्पतमे काले एव जनमानसेषु समीचीनः परिणामः दृष्टिगोचरोऽभूत्। महद्भिः विरोधिभिरपि विचारितं यत् 'अन्ततो गत्वा देशस्य शासनसूत्रस्य संचालक एष एव राजनीतिको दलः (जनसंघः) अस्ति। कैश्चित्तु इदमपि कथितम् यदस्य पृष्ठभागे राष्ट्रीयस्वयंसेवकसंघस्य या शक्तिरस्ति सा अस्य जनस्य स्वरूपे मूर्तिमती स्थिताऽस्ति।

बलिदानत्रयम्

एतत् दृश्यते यत् जनसंघस्य निर्माणं कठिनायां स्थितौ संजातमस्ति अस्य भाग्यं न शुभम्। प्रथमोऽध्यक्षः तस्य डा० श्यामाप्रसादमुखर्जीमहोदय आसीत् तस्य तादृशी राजनीतिकी हत्याऽभूत्। तदनन्तरं सौभाग्यात् डा० रघुवीरो मिलितः। तस्य प्रभावात् विदेशेष्वपि अस्य राजनैतिकक्षेत्रस्य वर्चस्वनिर्माणस्य सम्भावनाऽऽसीत्, किन्तु स्वल्पे एव काले तस्यापघातः संजातः। तदनन्तरं सर्वाङ्गपूर्णं कार्यं कर्तुं क्षमः सोऽयमध्यक्षः (श्रीदीनदयालुरुपाध्यायः) प्राप्तः किन्तु सोऽपि इत्थं दिवङ्गतः।

अहं तस्य देहं निरीक्षितुं काशीं गतवान्। विमानेन तस्य देहो यदा दिल्लीं प्रेषितः तदनन्तरम् अहं अत्र जौनपुरनगरं प्रत्यागतवान्। अहं अश्रूणि न अमुञ्चम्। अहं न जाने, जनैः मम विषये किं विचारितं भविष्यति। अस्माकं पुरातनेषु सुभाषितेषु एतद् वचन वर्तते यत् यः कार्यार्थी अस्ति स दुःखस्य सुखस्य च अवहेलनां कृत्वा कार्यमेव करोति। 'मनस्वी कार्यार्थी गणयति न दुःखं न च सुखम्। भगवत्कृपया मम मनसः एतादृशी एव स्थितिः संजाताऽस्ति। अहं च तां (दुःखस्य सुखस्य स्थितिं) परिपच्य अग्रे गन्तुं प्रस्तुतोऽस्मि। इदानीं अपरःकोऽपि तादृशः सुयोग्यः कार्यकर्ता अग्रे न आगमिष्यति इति तु न। कार्यं महदस्ति, संघटनस्य कार्यमस्ति। अनेकेषां कार्यकर्तॄणां परम्परा विद्यमानाऽस्ति। ये चावसरे उतरोत्तरं अग्रे आगमिष्यन्ति। किमपि स्थानं रिक्तं न स्थास्यति। अस्मिन् विषये अधिकं न वदिष्यामि। अधिकाधिकं कथनमपि मम स्वल्पमेवास्ति। अयमाघातस्तु कथमपि सोढव्य एव भविष्यति।

एतावद्वक्तुमपि मनसि नियन्त्रणस्य करणे मम अतिपरिश्रमो जातः। ईश्वरकृपया नियन्त्रणे सफलोऽभूवम्। तस्य परिणामः देहस्य क्लान्तिरूपेण अत्यधिकोऽभूत्। अहं प्रत्यक्षं करुणाजनकं दृश्यं विलोक्य आगतोऽस्मि। अतः तस्योल्लेखं सर्वेषां सम्मुखे कर्तुमैच्छम्।

सर्वाङ्गपरिपूर्णा योग्यता

अस्मासु प्रत्येकं एतावदनुभवेत् यत् तादृशी सर्वाङ्गपरिपूर्णा योग्यता अस्मास्वप्यागच्छेत् इति। तादृशीमेव दायित्वनिर्वाहस्य योग्यतां प्रत्येकं वर्धयेत्। मम कथनमिदं नास्ति यदहं सर्वान् जनान् राजनैतिकक्षेत्रे आकृष्टुं प्रेरयामि। वस्तुतः अस्मिन् विषये स्वल्पमपि आकर्षणं नोचितम्। यस्योल्लेखो मयाऽत्र कृतः तस्य राजनैतिके क्षेत्रे किञ्चिदपि आकर्षणं नासीत्। गतेषु वर्षेषु तेन बहुवारं मत्सम्मुखे कथितम् 'कस्मिन् संकटे अहं पातितः, मां पुनः स्वकीये प्रचारकार्ये नियोजयतु भवान्' इति। मया कथितम् 'भ्रातः त्वदन्यं अस्मिन् संकटे कं पातयेयम्?' संघटनकार्ये यस्य मनसि एतादृशी अविचला श्रद्धा, दृढा निष्ठा चास्ति स एव तस्मिन् संकटे स्थित्वा कर्दमे वर्तमानोऽपि कर्दमादस्पृष्टः सन् सुचारुरूपेण तत्रत्यं मार्जनं कर्तुं शक्नोति, अपरः कोऽपि कर्तुं न सक्षमः।' अतः अहं कथयामि यदहम् राजनैतिके क्षेत्रे कस्याप्याकर्षणं भवेत् एतदर्थं न कथयापि कमपि जनम्।

[१२ फरवरी दिनाङ्के जौनपुरनगरे पूजनीय—श्रीगुरूजीमहाभागानां प्रकटिता एते उद्गाराः—

इति प्रबन्धसम्पादकः]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिन्दुभिरपि हिन्दी समुपेक्ष्यते

हिन्दुस्थाननिवासिनो हिन्दवो हिन्दीभाषिणोऽपि हा हन्त ! हिन्दीं हृदयेन वस्तुतो नहि कामयन्ते। अत एवाद्य देशेऽत्र भाषाविवादः समुद्भूतः। बहुत्र दृश्यते यत् हिन्दीभाषणकुशला अपि महानुभावाः परित्यज्य हिन्दीमांग्लभाषां भाषमाणा आत्मानं धन्यं मन्यन्ते।

अत एव नगरेषु ग्रामेषु गृहेषु कार्यालयादिषु च यत्र तत्र सर्वत्र हिन्दी-वार्तालापप्रसङ्गेऽपि प्रायो मध्ये-मध्ये बहवः सज्जना हिन्दीसमर्थका अपि आंग्लभाषामुपयुञ्जते। जनानामेषा प्रकृतिरेव जाता यद् हिन्द्याः शब्दान् विहाय आंग्लशब्दान् भाषन्ते। शिक्षणालयेष्वपि प्रायोऽनुभूयते यद् बहवो महानुभावाः - 'किमहं अन्तः आगन्तुं शक्नोमि श्रीमन् ?' इत्यस्य स्थाने (मे आई कम इन सर) इति वदन्ति, प्रत्युत्तरमपि चास्य 'कम इन' इत्येव ददति। तथा च उपस्थितोऽस्मि श्रीमन् ! 'इति वक्तव्ये ते 'यस सर, प्रजेन्ट सर वा' इति वदन्ति।

किञ्च महापुरुषाणां गृहेषु चापि प्रायो मातापितरौ 'टाटा, वाय वाय, गुडवाय' इत्यादीनेव शब्दान् वक्तुं स्वशिशून् पुनः पुनः प्रेरयतः। तथा च स्नानागारं (वाथरूम), शौचालयं (लेवेटरी, लेटरिन वा), मूत्रालयं (यूरिनल), भोजनालयं (किचन), शयनागारं (वेडरूम), जलपानञ्च (लंच) मध्याह्नभोजनञ्च (डिनर) इत्येव बहवो वदन्ति

अस्यां स्थितौ सर्वकारोऽपि किं कर्तुं शक्नोति। यावज्जनता एव पूर्णरूपेण हिन्दीं न वाञ्छति, तदाऽस्याः समुद्धारो नैव कथमपि भवितुमर्हति। यदा हिन्द्या एव एतादृशी दशा सम्प्रति वर्तते, तदा संस्कृतस्य राष्ट्रभाषात्वं न कथमपि सम्भवि।

वस्तुतस्तु यदि संस्कृतं राष्ट्रभाषा भवेत्तदा तु निश्चितमेवेदं यद् भाषाविवादोऽपि समाप्तिं यायान्नूनम्, सहैव देशस्यैकतापि सुखेन सुरक्षिता स्यादेव, परं परमार्थतो नात्र सर्वकार एव ध्यानं ददाति, नापि जनतेति महद्दुर्भाग्यमिदमस्माकं भारतीयानाम्।

देशस्य संस्कृतेः संरक्षणं संस्कृतेनैव

दिल्लीस्थ-श्रीलालबहादुरशास्त्रि-राष्ट्रिय-संस्कृतविद्यापीठे (२४-२-६७) दिने प्रथमदीक्षान्तसमारोहे भाषणे केन्द्रीयपर्यटनमंत्रिणा **डा० श्रीकर्णसिंह**महाभागेन प्रतिपादितं यद् देशस्यास्य संस्कृतेः सुरक्षां संस्कृतमेव कर्तुं शक्नोति। अत एव संसारस्य समग्रा अपि प्राचीनाः संस्कृतयः सम्प्रति विनाशमुपयाताः, परं भारतमेवैक एतादृशो देशो वर्तते, यस्य संस्कृतिः संस्कृतस्य कारणेनैवाद्यापि सुरक्षिता विद्यते-इति।

स्व० श्रीदीनदयालुरुपाध्यायः

प्रयागे सम्पन्नायां शोकसभायां श्रीमान् **अटलविहारीवाजपेयीमहानुभावः** समवोचत् यत् नन्दादीपो निर्वाणतां गतः। इदानीमस्माभिर्निजजीवनप्रदीपं प्रज्वाल्य अन्धकारेण सह योद्धव्यं भविष्यति। सूर्योऽस्तं गतः, नक्षत्रप्रकाशे स्वमार्गोऽन्वेष्टव्यः, अस्माकं मित्रं, सखा, नेता मार्गदर्शकश्चाधुना लोकान्तरं गतः, अस्माभि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तदीयां स्मृतिं हृदि निधाय ध्येयमार्गेऽग्रे वर्धितव्यम् इति।

वाजपेयीमहानुभावेन भणितमग्रे यत्—उपाध्यायमहानुभावस्य जीवनं हि समर्पितमेकं जीवनमासीत्। तेन हि जीवनस्य प्रत्येकं कणः, जीवनकालस्य प्रत्येकं क्षणो राष्ट्रदेवस्य चरणयोः समर्पितः।

किञ्च समग्रोऽपि देशस्तस्य गृहमासीत्, सम्पूर्णः समाजश्चाभूत्तस्य परिवारः। तन्नयनयोश्चासीद् एक एव स्वप्नः, तस्य जीवनस्यैकमेव व्रतम्।

तदीयः स्वप्नोऽपूर्णः

किञ्च राजनीतिस्तु उपाध्यायमहानुभावस्य कृतेऽभूत् साधनं, न साध्यम्। स हि राजनीत्या आध्यात्मिकत्वं कामयते स्म। स च समुज्ज्वलादतीतात् प्रेरणां गृह्णाति स्म, तथोज्ज्वलतरस्य भविष्यतश्च निर्माणं वाञ्छति स्म। तदीया आस्थाश्च शताब्दीभ्यः पुरातनस्याक्षयस्य राष्ट्रजीवनस्य मूलतो रसमाददते स्म, परं नासीत् सरूढिवादपक्षपाती। भविष्यन्निर्माणार्थञ्च स महानुभावो 'भारतं समृद्धिशीलमाधुनिकं राष्ट्रं भवेत्' इति कल्पनामादायाग्रे वर्धते स्म।

अपि च स्व० श्रीदीनदयालुमहानुभावो महाचिन्तक आसीत्। चिन्तनात्मके च क्षेत्रे पूर्वसिद्धेन मार्गेण चलनं तस्मै नैव रोचते स्म। अत एव स भारतीयजनसङ्घस्यैतादृशं स्वरूपं व्यकासयत् यदतीतस्य स्वरूपस्य गौरवगरिमाणमादाय प्रचलति, यच्च श्वो भाविनोनां समस्यानां साम्मुख्यं (समाधानं वा) कर्तुमपि सन्नद्धमास्ते। अद्य जनसङ्घः सोऽयं यावान् यादृशश्च वर्तते, तत्र सर्वोऽप्ययं तस्यैव प्रभावः।

अग्रे च वाजपेयीमहानुभावेन भाषितं यत् कस्यापि पदस्य प्राप्तेरभिलाषश्च तस्य नासीत्। उपाध्यायः स संसत्सदस्यो नाविद्यत, परं तत्सदस्यानामासीत् निर्माता। अत एव महता प्रयत्नेन सोऽध्यक्षपदं कथञ्चित् ग्रहीतुं सन्नद्धोऽभूत्। पण्डितवरेण तेन यस्य कार्यस्य कृते गृहीतं जन्म, जीवनं धृतं, विविधं कष्टं च सोढं, तदर्थमेव च हुतात्मतामङ्गीकृत्यात्मनो जीवनव्रतं पूरितं, परं तदीयः स्वप्न इदानीमपि अपूर्ण एव वर्तते।

अपि च उपाध्यायमहानुभावस्य तस्य रक्तस्य प्रत्येकं बिन्दुं चन्दनरूपेण मस्तकेषु धृत्वा वयं कर्तव्यमार्गे अग्रेसरा भवेम। तच्चितायाश्च विनिर्गतमेकमेकं स्फुलिङ्गं हृदि निधाय परिश्रमस्य परां काष्ठां कुर्याम। अभिनवस्यास्य दधीचिमहर्षेः अस्थ्नां वज्रं विरच्य आधुनिकान् वृत्रापुरान् विनाश्यास्याः परिपूताया भारतभूमेः कलङ्कं क्षालयेम। स हि उपाध्यायमहानुभावो नेदानीं संसारेऽस्मिन् वर्तते, परं तदीयं कार्यमिदानीमप्यवशिष्टमास्ते। तदर्थञ्चात्मानं समर्प्यैव तस्मै परमार्थतस्तथ्यं श्रद्धाञ्जलिमर्पयितुं शक्ष्यामो नान्यथेति।

देशनीतीनां निर्माणं-विधेयम्

अखिलभारतीय-जनसङ्घस्य मन्त्री **श्रीसुन्दरसिंहभण्डारीमहोदयः** स्वभाषणे समवोचत् यत् स्व० श्रीमता उपाध्यायमहानुभावेन निर्मिता नियमपरम्परा तद्गमनानन्तरमपि स्थायिन्यासरूपेण विद्यमानास्ति। एकात्ममानवतावादस्य मन्त्रोऽपि यः श्रीपण्डितमहानुभावेन तेनास्मभ्यं प्रत्तः, सोऽस्माकं कृते वर्तते प्रकाशपुञ्जरूपः। समाजस्य सर्वानपि वर्गान् सहाऽऽदाय तेषां हितञ्च विचिन्त्य देशस्यास्य नीतीनां निर्माणं विधेयम्-उपाध्यायमहानुभावेन च जनसङ्घस्य विचाराणां मूले वार्ता एषैव रक्षितेति।

विनीतो
दीनानाथत्रिवेदी मधुपः
सहसम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रियस्वयंसेवकसङ्घस्याद्यसरसङ्घचालक—

स्व० डा० श्रीकेशवबलिराम हैडगेवारमहाभागस्य

चैत्रशुक्लप्रतिपदि जन्मदिवसमुद्दिश्य

कर्तव्यादेशः

पंचाधिविंशे नवभूमिवत्सरे संघस्य चास्याऽकलयत्प्रतिष्ठितिम् ।
श्रीहेडगेबारकुलीनकेशवो विधानतो वै बलिराम कोविदः ॥१॥

बाल्यं स्वरूपं तदमुष्य चाभवत्, सामान्यमेवैकपुरे प्रतिष्ठितम् ।
तदेतदाश्वेव विवृद्धिमागते प्रान्तेषु सर्वत्र गतं विशालताम् ॥२॥

आसीत्तदानीं वृटिशस्य राज्यं कुरीतयो हिन्दुषु च प्रसारिताः ।
सर्वा इमा इंग्लिशराज्यतः समं उम्मूलनीया इति चिन्त्यमास च ॥३॥

स डाक्टरश्चिन्तितवान् हृदीत्थं आत्मीयताऽभाव इवैष चास्मान् ।
पराभवं प्रापयतीह लोके ततो हि बाह्याक्रमकैर्वयं जिताः ॥४॥

तद्ज्ञानशून्याश्च वयं स्वमेव प्राहूय बाह्याक्रमकान्प्रलोभतः ।
देशस्य नष्टिं कृतवन्त एवं प्रतारिताः शून्यहृदोऽभवाम ॥५॥

यदा च राष्ट्रे विपदागता तदा एकात्मताया उदितास्तरंगाः ।
भवन्ति पाकाक्रमणस्य काले ह्यस्माभिरेकात्मकता हि दृष्टा ॥६॥

तत्पूर्वमेकात्मकता च चोन–देशाक्रमेऽपि स्फुरिता समाजे ।
अस्मासु चैषास्तितु निश्चयेन, बाह्यैर्विरोध र्न हि तां स्मरामः ॥७॥

स्मृतेस्तदास्याः करणं हि मुख्यं तदेतया सर्वकृतिः फलिष्यति ।
अस्मत्समाजो यदि जागरूको भूयात् पुनस्तस्य कृते यतिष्ये ॥८॥

धर्मस्तथा संस्कृतिरत्र काले जंजृभते केवलशब्द एव ।
एष प्रबोधोऽद्य न वै समाजे हीनप्रबोधो हि समाज एषः ॥९॥

यदि प्रबोधः प्रसरेदिदानीं एकात्मतायाः सहयोगितायाः
तदेष देशोऽप्यचिरं समृद्धिबलप्रतापान्वित एव भूयात् ॥१०॥

मतानि सर्वाणि च सम्प्रदायाः प्रबोधयन्त्यत्र हि तत्त्वमेकम् ।
इत्येष औदार्यभरो विचारः प्रायो विलुप्तऽत्र न सन्दिहन्ताम् ॥११॥

धर्मस्वरूपं मतदेवपूजास्तवादिरूपं हि विदन्ति लोकाः ।
परन्तु तद्व्यापकरूपमेते नबोधयन्ते न विचारयन्ते ॥१२॥

ज्ञाते हि धर्मे निजराष्ट्रसंस्कृति विज्ञायते नात्र विचारणा ध्रुवम् ।
तथापि देशस्य जने जनेऽधुना श्रद्धा तु दृश्यत्वमुपैति बाढम् ॥१३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इमां वयं भारतमातरं स्वकां प्रत्यक्षमीक्षामह एव तामिमाम् ।
प्रत्यस्मदीया सहजैव भक्ति र्भवत्यहो तन्न हि विस्मयावहम् ॥१४॥

सम्प्रत्यमुष्या जनुषो धरायाः कणं कणं रक्षितुमेव सर्वे ।
वयं भवेम स्थिरजागरूका इतीव सर्वेभ्य उपादिशामः ॥१५॥

अस्मत्समाजस्य हितं तदेकमेकं हि चैतिह्यमिति प्रबोध्यम् ।
सर्वे समा बन्धव एव लोकाः सन्तीति सद्भाव उपार्जनीयः ॥१६॥

भव्यैव भक्तिर्मम मातृभूमेरेकास्ति साम्यव्यवहाररूपा ।
एतेन सर्वे वयमाशु देशहिते भवेम प्रणिजागरूकाः ॥१७॥

ततो हि काषायिककेतनस्य छायातले सर्वजनैरुपेत्य ।
त्राणाय राष्ट्रस्य हिताय, बाढं भाव्यं ध्रुवं संघटितै र्भवद्भिः ॥१८॥

एवं प्रकुर्वत्सु भवत्सु बाढं भवेत्समाजस्य विराट्स्वरूपम् ।
यद्द्रष्टुमेते वयमब्दकेभ्यो वाञ्छामहे चेतसि वै बहुभ्यः ॥१९॥

परेऽधुना मोहमदाध्वनिष्ठाः अस्मत्समाजं बहु हन्तुमिच्छवः ।
बिहारवंगाऽसमप्रान्तमध्ये विशन्ति गूढं कुहकं किरन्ति ॥२०॥

अत्रत्यमौहम्मदिकाः किमग्रेऽकार्यं करिष्यन्ति, तदस्मदाशये ।
विराजते तत्सकलं हि कालो निर्द्दक्ष्यते वै भवतां समक्षम् ॥२१॥

चीनोऽपि देशः किल पूर्वभूमौ आक्रामकत्वं कलयत्यजस्रम् ।
अत्र स्थितास्तस्य समर्थका अपि साम्याश्रिता तं च निमन्त्रयन्ति ॥२२॥

इत्थं समुद्भूतपरिस्थितौ वयं स्वरक्षणे भारतरक्षणे च ।
समाजरक्षाकरणेऽपि वाढं सिद्धाः समर्थाश्च सुसंयताश्च (समाहिताश्च) ॥२३॥

भवेम चेत्सत्वरमेव देशं दीप्तं समृद्धं च विकासमाप्तम् ।
द्रक्ष्यामहे निश्चयमेव शीघ्रं निजोद्यमादेव हरेः प्रसादतः ॥२४॥

हिन्दूसमाजस्य विकासनाय संरक्षणायापि च वर्द्धनाय ।
श्रीहैडगेवारमहोदयेन चिकित्सितं पूर्वमहोरनेहसः ॥२५॥

अतो वयं धर्मधुरं वहन्तः सनातनीयाः स्वपथप्रदर्शकान् ।
अन्वीयमानाः निजपूरुषांश्च विभूषयामो न कलंकयामः ॥२६॥

गोल्वल्कराणामपि देशिकानां नेतृत्वमस्ति वहु दूरदर्शि ।
साफल्यदं तद्धि समाश्रयन्तो वयं तदादेशपरा भवामः ॥२७॥

आशुकवि–श्रीहरिशास्त्रीः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीगिरिराजशर्मा शास्त्री, जयपुरम् ।

अयोध्या मथुरा माया
काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव
सप्तैता मोक्षदायिकाः ॥९॥

अयोध्या :—प्रभु रामचन्द्रस्य इयं अयोध्यानगरी पाटनगरी आसीत् । अतः भरतवर्षस्य समस्तानां हिन्दूनामियं श्रेष्ठतीर्थस्थानमस्ति । महाकविः महात्मा श्रीतुलसीदासः कथयति

यद्यपि सब वैकुण्ठ बखाना ।
वेद पुराण विदित जगु जाना ।
अवध सरिस प्रिय मोहिन सोऊ ।
यह प्रसङ्ग जाने कोउ कोऊ ॥

अयोध्यानगरी मोक्षपुरीति नाम्ना कथ्यते जनैः । वाल्मीकिरामायणानुसारं मनुना स्वयं अस्य नगरस्य निर्माणं सरयूनद्याः तटे कृतम् । "मनुना मानवेन्द्रेण सा पुरी निर्मिता स्वयम्" । रामचन्द्रस्य समये एषा नगरी ऐश्वर्यसम्पन्ना तथा द्वादशयोजनदीर्घा त्रियोजन—विस्तीर्णा चासीत् । प्राचीने संस्कृतसाहित्ये तथा बौद्धानां पालीसाहित्ये अयोध्ययासम्बद्धाः शताधिकाः कथाः सन्ति । अद्यतनीयस्य अयोध्यानगरस्य निर्माणं विक्रमादित्येन कारितम् । गुप्तकाले इदं एकस्य राज्यस्य पाटनगरमासीत् । ऋषभनामकेन जैननृपतिना अयोध्यायां एकं विद्यापीठं स्थापितम् । जैनसम्प्रदायस्यापि इदं अयोध्यानगरं एकं तीर्थक्षेत्रमस्ति । प्रथमस्य चतुर्थस्य च तीर्थङ्करस्य इदं अयोध्यानगरं जन्मभूमिः मन्यते । चीनदेशस्य यात्रिणा युवांग च्यागमहो-

अयोध्या—प्रभु राचचन्द्र की यह अयोध्यानगरी राजधानी थी । इसलिये सम्पूर्ण भारतवर्ष के हिन्दुओं के लिये यह श्रेष्ठ तीर्थस्थान है । महाकवि सन्त तुलसीदास कहते हैं ।

यद्यपि सब वैकुण्ठ बखाना,
वेदपुराण विदित जगुजाना ।
अवध सरिस प्रिय मोहि न सोऊ
यह प्रसङ्ग जाने कोऊ-कोऊ ॥

अयोध्या नगरी मोक्षपुरी इस नाम से भी लोगों द्वारा बोली जाती है । बाल्मीकि रामायण के अनुसार मनुने स्वयं इस नगरी का निर्माण सरयू नदी के तट पर किया था । 'मनुना मानवेन्द्रेण सा पुरी निर्मिता स्वयम्' । रामचन्द्रजी के समय यह नगरी ऐश्वर्यसम्पन्न तथा बारह योजन लम्बी और तीन योजन चोडी थी । प्राचीन संस्कृत साहित्य में तथा बौद्धों के पालीसाहित्य में अयोध्या से संबंधित सैकड़ों कथाएं हैं । आज के अयोध्या नगर का निर्माण विक्रमादित्य ने कराया था । गुप्तकाल में यह एक राज्य का पाटनगर था । ऋषभनाम के जैनराजाने अयोध्या में एक विद्यापीठ स्थापित किया था । जैन सम्प्रदाय के लोगों के लिए भी यह अयोध्या नगर एक तीर्थक्षेत्र है । पहले और चौथे तीर्थङ्कर का यह अयोध्यानगरी जन्मभूमि मानी जाती है । चीन देश के यात्री युवागच्यांग महोदय ने अयोध्या में अनेक बौद्ध-विहार देखे थे । आज अयोध्यानगर में

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दयेन अयोध्यामध्ये अनेकानि बोद्धविहाराणि दृष्टानि । अद्य अयोध्यानगरे अनेकानि मठ-मन्दिरगुरुकुलानि च सन्ति । अत्र विरक्तानां सन्यासिनाञ्च अनेकानि क्षेत्राणि सन्ति शहाबुद्दीन-गौरीनम्ना । आक्रमकेण यदा अस्य नगरस्योपरि स्वाधिकारः कृतः तस्मात् कालादारभ्य १८५६ ख्रिष्टीयसंवत्सरपर्यन्तं इदं नगरं मुहम्मदीयानां अधीनमासीत् । विक्रमादित्येन स्थापितं सुविशालं रमणीयञ्च राममन्दिरं भङ्त्वा मुगलसम्राजा बाबरेण तस्मिन् स्थाने मुहम्मदीयपूजागृंह (मस्जिद) निर्मापितम् । तत् मुहम्मदीयं पूजागृहं वर्तमानसमयेऽपि विद्यामानं वर्तते । सीतारसोई, हनुमानगढी, कनकभवनम्; इत्यादीनि स्थानानि अद्यतनीये अयोध्यानगरे दर्शनीयानि सन्ति ।

मथुरा :—यमुनानदीतटे स्थिता मथुरानगरी वैष्णवानां अष्टोत्तरशतसंख्यकेषु तीर्थेषु सर्वश्रेष्ठं तीर्थं गण्यते । अस्मिन्नेव क्षेत्रे एकस्मिन् कारागारे भगवतः श्रीकृष्णस्य अविर्भावोऽभूत् । गोकुलक्षेत्रे बाललीलां समाप्य भगवता श्रीकृष्णेन स्वदुष्टमातुलं कंसनृपतिं अत्रैव निहत्य स्वस्य अवतारकार्यस्य श्रीगणेशः कृतः । मथुरानगर्यां द्वारकाधीशस्य जगन्मोहनस्य च विशाले मन्दिरे कृष्णभक्तानां श्रद्धाकेन्द्रे स्तः ।

माया—हरिद्वारस्यैव 'माया' अथवा मायापुरी इति नाम आसीत् । यस्मिन् वर्षे चन्द्रसूर्यौ मेष राशिं गुरुश्च कुम्भराशिं एकस्मिनैव काले प्रविशति तस्मिन् समये हरिद्वारे प्रचण्डकुम्भसम्मेलनं भवति । सर्वदा द्वादशवर्षानन्तरं इदं कुम्भपर्व आगच्छति । तस्मिन् समये सम्पूर्णदेशात् सुमहान् जनसमुदायो हरिद्वारे एकत्रितो भवति । मायापुरी, हरिद्वारम्, कनखलम्, ज्वालापुरम् भीमगोडा-एतेषां पञ्चानां स्थलानां संमिलितं हरिद्वारक्षेत्रं उच्यते जनैः । गंगादारम्, कुशावर्तम्, बिल्वेश्वरः, नील-

अनेक मठ, मन्दिर तथा गुरुकुल हैं । यहाँ विरक्त सन्यासियों के भी अनेक अखाड़े हैं । शाहबुद्दीन गौरी नामके आक्रामक ने जब इस नगर पर अधिकार किया उस समय से लेकर १८५६ ईसवीय संवत्सर तक यह नगर मुसलमानों के अधिकार में था । विक्रमादित्य के द्वारा स्थापित सुविशाल तथा सुन्दर राममन्दिर को तोड़कर मुगलसम्राट् बाबर ने उस स्थान पर मस्जिद बनवादी थी । वह मस्जिद अभी भी विद्यमान है । सीतारसोई, हनुमानगढ़ी कनकभवन, इत्यादि स्थान आज के अयोध्या नगर में दर्शनीय हैं ।

मथुरा—यमुनानदी के तट पर स्थित मथुरानगरी वैष्णवों के तीर्थों में सर्वश्रेष्ठ तीर्थ गिनी जाती है । इसी क्षेत्र में एक कारागार में भगवान् श्रीकृष्ण ने अपने दुष्ट मामा राजा कंस को यहीं मार कर अपने अवतार कार्य का श्रीगणेश किया था । मथुरा नगरी में द्वारकाधीश का जगन्मोहन का मन्दिर कृष्णभक्तों का श्रद्धाकेन्द्र है ।

माया—हरिद्वार का ही माया अथवा मायापुरी यह नाम था । जिस वर्ष में चन्द्रसूर्य मेष राशि में, गुरु कुम्भराशि में एक ही समय में प्रवेश करते हैं उस समय हरिद्वार में प्रचण्ड कुम्भ सम्मेलन होता है । सर्वदा बारहवर्षों के पश्चात् यह कुम्भ पर्व आता है । उस समय सम्पूर्ण देश से बहुत बड़ा जनसमुदाय हरिद्वार में एकत्र होता है । मायापुरी, कनखल, ज्वालापुर, भीमगोडा ये पांच स्थलों को मिलाकर लोग हरिद्वार क्षेत्र कहते हैं । गंगादार, कुशवर्त, बिल्वेश्वर, नीलपवत कनखलक्षेत्र ये पांच तीर्थ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्वतः कनखलक्षेत्रम् च इमानि पञ्चतीर्थ क्षेत्राणि प्रामुख्येन प्रसिद्धानि सन्ति। अत्रत्ये ब्रह्मकुण्डे स्नात्वा राज्ञा भर्तृहरिणा अमरत्वं प्राप्तम्। भर्तृहरेः भ्रात्रा विक्रमादित्येन इदं ब्रह्मकुण्डं आबद्धं कृतमासीत्। हरिद्वारस्य समीपमेव ऋषिकेशनामकं तीर्थक्षेत्रं अवस्थितमस्ति। पुराणानुसारं मैत्रेयेन ऋषिणा विदुराय तथा सप्तर्षिभिः नारदाय अस्मिन्नेव पवित्रे स्थले श्रीमद्भागवतं श्रावितम् आसीत्।

क्षेत्र मुख्यरूप से प्रसिद्ध हैं। यहां ब्रह्मकुण्ड में स्नान करके राजा भर्तृहरि ने अमरत्व प्राप्त किया। भर्तृहरि के भाई विक्रमादित्य ने इस ब्रह्मकुण्ड को आबद्ध किया था। हरिद्वार के समीप ही ऋषिकेश नामक तीर्थक्षेत्र स्थित है। पुराणों के अनुसार मैत्रेय ऋषि ने विदुर के लिए और सप्तर्षियों ने नारद को इसी पवित्र स्थल में श्रीमद्भागवत सुनाया था।

काशी :—'काश्यां मरणान्मुक्तिः' काश्यां यस्य मृत्युर्भवति तस्य जीवस्य मुक्तिर्भवतिः इति सुप्रसिद्धमस्ति। प्राचीनकालात् गंगातीरे स्थितायाः अस्याः नगर्याः एषा कीर्तिः सुप्रसिद्धा अतः अखिल-भारतीयहिन्दूसमाजस्य, विशेषतः शिवभक्तानां इयं परमश्रद्धाकेन्द्रमस्ति। काश्या उल्लेखः वेदेषु ब्राह्मणग्रन्थेषु उपनिषत्सु पातञ्जलभाष्येत्यादिषु प्राचीनतमेषु संस्कृतग्रन्थेषु बौद्ध-जैनसाहित्येऽपि सर्वत्र बाहुल्येन मिलति। महाभारते कथितं यत् दिवोदासाख्येन राज्ञा इन्द्रस्य आज्ञया अस्या नगर्याः निर्माणं कारितम्। पौराणिककथानुसारम् भगवतः शिवस्य इयं नगरी अतिप्रिया। अतः तस्य अत्र सर्वदा निवासोऽस्ति। काश्यां स्थितस्य विश्वनाथस्य द्वादश-ज्योतिर्लिङ्गेषु गणना भवति। भगवत्याः सतीदेव्याः दक्षिणं कुण्डलं अस्मिन्नेव क्षेत्रे त्रुटित्वा पतितम्। अतः काशीनगरी शक्तिपीठमपि मन्यते। जैनानां सप्तमतीर्थङ्करस्य सुपार्श्वनाथस्य त्रिंशतितमतीर्थङ्करस्य पार्श्वनाथस्याऽपि इयमेव जन्मस्थली। अतः जैनानामपि इदं तीर्थक्षेत्रमस्ति। भगवतः बुद्धस्य प्रथमं धर्मप्रवचनं काशीनगर्याः समीपस्थिते सारनाथक्षेत्रे अभूत्, अतः इदं बौद्धानामपि तीर्थक्षेत्रमस्ति।

काशी—'काश्यां मरणान्मुक्तिः' 'काशी में जिसकी मृत्यु होती है उस जीवकी मुक्ति होती है। यह सुप्रसिद्ध है। प्राचीनकाल से गंगातट पर स्थित इस नगरी की यह कीर्ति सुप्रसिद्ध है। इसलिये सम्पूर्ण भारतवर्ष के हिन्दुओं की विशेषरूप से शिवभक्तों की यह परमश्रद्धा केन्द्र है। काशी का उल्लेख वेद, ब्राह्मणग्रन्थ, उपनिषद् पातञ्जलभाष्य इत्यादि में प्राचीनतम संस्कृत ग्रन्थों में बौद्ध जैन साहित्यों में भी बहुत अधिक मिलता है। महाभारत में कहा है कि दिवोदास नामके राजा ने इन्द्र की आज्ञा से इस नगरी का निर्माण कराया था। पौराणिक कथा के अनुसार भगवान् शिवको यह नगरी अतिप्रिया है। अतः उनका यहां सदा निवास रहता है। काशी में स्थित विश्वनाथ को द्वादश ज्योतिर्लिङ्गों में गणना होती है। भगवती सती का दक्षिण कुण्डल इसी क्षेत्र में टूटकर गिरा था। अतः काशीनगरी शक्तिपीठ भी मानी जाती है। जैनों के सातवें तीर्थङ्कर सुपार्श्वनाथ तथा तेईसवें तीर्थङ्कर पार्श्वनाथ की भी यही जन्मस्थली है। अतः जैनों का भी यह तीर्थक्षेत्र है। भगवान् बुद्ध का प्रथम धर्म प्रवचन काशीनगरी के समीप ही सारनाथ क्षेत्र में हुआ था। इसकारण यह बौद्धों का भी तीर्थक्षेत्र है।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जगद्गुरु-श्रीआद्यशङ्कराचार्यस्य निवासः किञ्चित्कालपर्यन्तं मुगलानां शासनकाले कबीरः, रामानन्दः, तुलसीदासः, मधुसूदनसरस्वती, पण्डितराजजगन्नाथः इत्यादयः सत्पुरुषाः अस्याः काशीनगर्याः प्रतिष्ठां रक्षितवन्तः। अर्वाचीन-समयेऽपि महामनाः श्रीमदनमोहनमालवीय महोदय एवीबेसेंटादयश्च अस्याः महत्त्वं संवर्धितवन्तः।

जगद्गुरु श्री आद्यशङ्कराचार्य का निवास कुछ समय तक काशी में हुआ था। उस समय से काशी अद्वैत तत्त्वज्ञान का श्रेष्ठपीठ हो गयी। मुगलों के शासनकाल में कबीर, रामानन्द, तुलसीदास, मधुसूदन सरस्वती, पण्डितराज जगन्नाथ इत्यादि सत्पुरुषों ने इस काशी नगरी की प्रतिष्ठा को रखा है। वर्तमान समय में भी महामना श्री मदनमोहन मालवीय तथा एनी-बेसेंट इत्यादि ने इसके महत्त्व को बढाया है।

मुगलानां शासनकाले उत्तरभारते स्थितेषु विभिन्नेषु तीर्थक्षेत्रेषु यथा समये-समये विपद्-वृष्टिः अभूत् तथैव काशीनगरी अपि अनया विपद्वृष्टया परिप्लुता अभूत्। औरङ्गजेबाख्येन शासकेन विश्वेश्वरस्य मन्दिरं भङ्गत्वा तस्मिन्नेव स्थाने मुहम्मदीयपूजास्थलं (मस्जिद) निर्मापितम्। काश्यां विश्वेश्वरस्य दर्शनार्थं गच्छतः प्रत्येकं यात्रिणो हृदयं इदं मुहम्मदीय-पूजास्थलं विलोक्य व्यथितं भवति। छत्रपतिना श्रीशिवाजीमहाराजेन स्वस्य अन्तिमेच्छा इयमेव प्रकटितासीत् यत् "श्रीकाशी मुक्ता भवेत्" प्रथमेन माधवरावपेशवामहोदयेन इमां मोक्षपुरीं दासत्वेन मोचयितुं प्रबलामनीषा प्रकटितासीत्। औरंङ्गजेबेन विश्वेश्वरस्य मन्दिरं यदा विनाशितं तस्मात् कालात् शतवर्षपर्यन्तं काश्यां विश्वनाथस्य मन्दिरमेव नासीत्। अष्टादश-शताब्द्यां पुण्यश्लोकया अहिल्या देव्या यन्मन्दिरं निर्मापितम् तदेव अद्य विद्यमानमस्ति।

मुगलों के शासनकाल में उत्तरभारत में स्थित विभिन्न तीर्थक्षेत्रों पर जैसे समय-समय पर विपद वृष्टि हुई वैसे ही काशी नगरी भी इस विपद् वृष्टि से व्याप्त हो गई थी। औरंगजेब बादशाह ने विश्वेश्वर के मंदिर को तोड़कर उसी स्थान पर मस्जिद बनवाई थी। काशी में विश्वेश्वर के दर्शन हेतु गए हुए प्रत्येक यात्री का हृदय इस मस्जिद को देखकर व्यथित होता है। छत्रपति शिवाजी महाराज ने अपनी अन्तिम इच्छा यही प्रगट की थी कि 'श्रीकाशी मुक्त हो' प्रथम माधवराव पेशवा महोदय ने इस मोक्षपुरी को दासत्व से मुक्त करने की प्रबल इच्छा व्यक्त की थी। औरङ्गजेब ने विश्वेश्वर का मन्दिर जब विनष्ट किया उस समय से सौ वर्ष तक काशी में विश्वनाथ का मन्दिर ही नहीं था। अठारहवीं सदी में पुण्य-श्लोका अहल्या देवी द्वारा जो मन्दिर बनाया गया है, वही आज विद्यमान है।

महाराजेन रणजीतसिंहेन काश्यां शिव-मन्दिरे कलशस्थापनं कृतम्। काशीयात्रायां दशाश्वमेधघट्टः, लोलार्कः, केशवः, विन्दुमाधवः, मणिकर्णिकाघट्टः, ज्ञानवापी, दण्डपाणी, अन्न-पूर्णा, ढुण्ढिराजः, कालभैरवः – इत्यादीनि स्थानानि महत्वपूर्णानि सन्ति। पुराणानुसारं दशाश्वमेधघाटे ब्रह्मदेवेन दश अश्वमेधयज्ञा

महाराज रणजीतसिंह ने काशी में शिव-मन्दिर पर कलश स्थापना किया था। काशी यात्रा में दशाश्वमेधघाट, लोलार्क, केशव, बिन्दुमाधव, मणिकर्णिकाघाट, ज्ञानवापी, दण्डपाणी, अन्नपूर्णा, ढुंढिराज, कालभैरव इत्यादि स्थान महत्त्वपूर्ण हैं। पुराण के अनु-सार दशाश्वमेधघाट पर ब्रह्मदेव ने दस

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृताः। ऐतिहासिक-कालीखण्डे बुन्देलखण्डस्य भारशिवराजवंशेन चीन संस्कृतेः कुशाण-जातीया क्रमकान् पराजित्य दश अश्वमेधययज्ञाः सम्पादिताः। अतिप्राचीन कालात् काशी भारतस्य एकं प्रमुखं शैक्षणिकं केन्द्रमस्ति। संस्कृतवाण्याः तथा विद्यायाः प्रकाण्डपण्डिताः अद्यापि काश्यां विद्यमानाः सन्ति। चीनदेशीयो यात्री युवांगच्यांगः काश्यां आगतवान्, तदा तत्र त्रिंशत् (३०) बौद्धविहाराः शतं मन्दिराणि आसन्। तेषां मन्दिराणां मुगलशासनकाले विनाशोऽभूत्। किन्तु तेषां मन्दिराणां पुनर्निर्मणं जातम् वर्तमान समये काश्यां प्रायः सार्धसहस्रं मन्दिराणि सन्ति।

अश्वमेधयज्ञ किए थे। ऐतिहासिक समय में बुन्देलखण्ड के भारशिव राजवंश ने चीन संस्कृति के कुशाण जातीय आक्रामकों को पराजित करके दस अश्वमेध यज्ञ सम्पादित किए थे। प्राचीन समय से काशी एक प्रमुख शैक्षणिक केन्द्र है। संस्कृतभाषा तथा विद्या के प्रकाण्ड पण्डित आज भी काशी में विद्यमान हैं। चीनदेशीय यात्री युवांगच्यांग काशी में आया था। उस समय वहां ३० बौद्ध विहार और सौ मन्दिर थे। उन मन्दिरों का मुगल शासनकाल में विनाश हुआ। किन्तु मन्दिरों का फिर से निर्माण हुआ और इस समय काशी में प्रायः डेढहजार मन्दिर हैं।

काञ्ची—सप्तमोक्षपुरीषु काञ्ची दक्षिण-भारतस्य मोक्षपुरी अस्ति। अतिप्राचीनकालात् इयं काञ्चीपुरी शैव-वैष्णव-जैन-बौद्ध-सम्प्रदायानुयायिनां प्रसिद्धं तीर्थक्षेत्रं तथा विद्यापीठम् अस्ति। अस्या नगर्याः शिवकाञ्ची विष्णुकाञ्ची नामकौ द्वौ विभागौ स्तः। शिवकाञ्च्यां भगवता शङ्कराचार्येण संस्थापितं कामाक्ष्याः विख्यातं मन्दिरं अस्ति। अस्यैव मन्दिरस्य कारणात् काञ्चीवरम् एकं शक्तिपीठं मन्यते। अपरं प्रसिद्धमंदिरं काञ्च्यां एकाम्बरनाथस्यास्ति। अस्य मन्दिरस्य गोपुरं प्रायः ६३ गजपरिमितम् (१८८ फुट) समुन्नतमस्ति। अस्य सभामण्डपस्य मध्ये एकसहस्रं स्तम्भाः सन्ति। अत्र शिवलिङ्गस्य दुग्धेनाभिषेकः क्रियते। काञ्चीमध्ये अष्टोत्तरशत शिवस्य स्थानानिसन्ति।

काञ्ची—सात मोक्षपुरियों में काञ्ची दक्षिण भारत की मोक्षपुरी है। अति प्राचीनकाल से यह काञ्चीपुरी शैवों, वैष्णवों, जैन तथा बौद्ध सम्प्रदाय के लोगों का प्रसिद्ध तीर्थक्षेत्र तथा विद्यापीठ है। इस नगर के शिवकाञ्ची तथा विष्णुकाञ्ची यह दो विभाग हैं। शिवकाञ्ची में भगवान् शंकराचार्य द्वारा स्थापित कामाक्षी का विख्यात मन्दिर है। इसी मन्दिर के कारण काञ्चीवरम् एक शक्तिपीठ माना जाता है। दूसरा प्रसिद्ध मन्दिर काञ्ची में एकाम्बरनाथ का है। इस मन्दिर का गोपुर ६३ गज (१८८ फुट) ऊंचा है। इसके सभामण्डप में एक हजार स्तम्भ हैं। यहां शिवलिङ्ग का दूध से अभिषेक होता है। काञ्ची में एक सो आठ शिव के स्थल हैं।

विष्णुकाञ्चीमध्ये अष्टादशसंख्यकानि विष्णुस्थलानि सन्ति। वैष्णवानां कृते भगवतः वरदराजस्य मन्दिरं सर्वश्रेष्ठमस्ति विष्णुकाञ्ची ब्रह्मदेवस्य तपोभूमिः कथ्यते। एतदतिरिक्तं काञ्चीमध्ये एकसहस्रं गणेशस्थलानि सन्ति। एतेषां निर्माणं चोलराजवंशेन कृतमा-

विष्णुकांञ्ची में अठारह विष्णुस्थल हैं। वैष्णवों के लिये भगवान् वरदराज का मंदिर सर्वश्रेष्ठ है। विष्णुकाञ्ची ब्रह्मदेव की तपोभूमि कहलाती है। इसके अतिरिक्त काञ्ची में एक हजार गणेशस्थल हैं। इनका निर्माण चोल राजवंश ने किया था। चीनदेश के यात्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सीत्। चीनदेशीययात्रिणा युवांगच्यांगेन अत्र शतसंख्याका बौद्धसंघारामाः दृष्टाः। बौद्धपण्डितेषु नागर्जुनः, बुद्धघोषः, धर्मपालः, दिङ्नागः इत्यादीनां महापण्डितानां निवासस्थलं काञ्चीमध्ये एवासीत्। बौद्धजैनसम्प्रदाययोः प्रचारारम्भात् प्राक् काञ्चीमध्ये घटिकानामकाः प्रसिद्धाः वेदशालाः आसन्, यत्र कदम्बवंशस्य मयूरवर्मसदृशः महाराजः वेदाध्ययनं कृतवान्। पल्लववंशीयाः राजानः एभ्यः वेदविद्यालयेभ्यः प्रतिवर्षं विपुलं धनराशिं प्रदत्तवन्तः आसन्। काञ्चीविद्यापीठं निखिले भारतवर्षे प्रसिद्धम् आसीत्। ब्रह्माण्डपुराणे कथितं यत् काशी काञ्ची च भगवतः शिवस्य नेत्रे स्तः।

युवांग-च्यांग ने यहां सौ बौद्ध संघाराम देखे थे। बौद्ध पण्डितों में नागार्जुन, बुद्धघोष, धर्मपाल, दिङ्नाग इत्यादि महापण्डितों का निवास काञ्ची में ही था। बौद्ध-जैन सम्प्रदायों के प्रचार के आरम्भ होने से पूर्व काञ्ची में घटिका नामकी प्रसिद्ध वेदशालाएं थीं जहां कदम्बवंश के मयूरवर्मा सदृश महाराज ने वेदाध्ययन किया था। पल्लव वंशीय राजाओं ने इन वेद-विद्यालयों के लिये प्रतिवर्ष विपुल धनराशि दी थी। काञ्ची-विद्यापीठ सम्पूर्ण भारतवर्ष में प्रसिद्ध था। ब्रह्माण्ड पुराण में कहा है कि काशी और काञ्ची भगवान् शिव के नेत्र हैं।

अवन्तिका—इयं नगरी उज्जयनीति नाम्ना प्रसिद्धाऽस्ति। पुराणानुसारं अस्मिन्नेव स्थाने भगवता शङ्करेण त्रिपुरासुरस्योपरि विजयो लब्धः। अनेनैव कारणेन इयं पुरी उज्जयनीति नाम प्राप्तवती। उज्जयनी एका मोक्षपुरी मन्यते। भगवतः शिवस्य द्वादशज्योतिर्लिङ्गेषु महाकालनामकस्य शिवलिङ्गस्य इदं पीठमस्ति। भगवत्या सतीदेव्याः बाह्वोः एकांशो ऽत्र पतित आसीत्। अतः इयं पुरी एकं शक्तिपीठमपि अस्ति।

अवन्तिका—यह नगरी उज्जयिनी इस नाम से प्रसिद्ध है। पुराणों के अनुसार इसी स्थान में भगवान् शंकर ने त्रिपुरासुर पर विजय प्राप्त की थी। इसी कारण इसी स्थान को उज्जयिनी नाम प्राप्त हुआ। उज्जयिनी एक मोक्षपुरी मानी जाती है। भगवान् शिव के द्वादश ज्योतिर्लिङ्गों में महाकाल नामक शिवलिङ्ग का यह पीठ है। भगवती सती के बाहू का एकांश यहां गिरा था। इसलिये यह पुरी एक शक्तिपीठ भी है।

आकाशे तारकं लिङ्गं
पाताले हाटकेश्वरम्।
मृत्युलोके महाकालं
लिङ्गत्रय नमोस्तु ते॥

आकाशे तारकं लिङ्गं पाताले हाटकेश्वरम्।
मृत्युलोके महाकालं लिङ्गत्रय नमोस्तु ते॥

अस्य पौराणिकवचनस्यानुसारेण आकाशे तारकम्, पाताले हाटकंम् मृत्युलोके च महाकालनामकं शिवलिङ्गं वन्दनीयमस्ति। शिवपुराणे महाकालस्य माहात्म्यं वर्णयन्त्यो अनेकाः अद्भुता कथाः सन्ति। एतदतिरिक्तं हरसिद्धिमन्दिरं, सान्दीपनेराश्रमः (यत्र भगवान् श्रीकृष्णः विद्याध्ययनं कतवान्) चित्रगुप्तमंदिरम्

इस पौराणिक वचन के अनुसार आकाश में तारक, पाताल में हाटक और मृत्युलोक में महाकाल नामक शिवलिङ्ग वंदनीय है। शिवपुराण में महाकाल का माहात्म्य वर्णन करते हुए अनेक अद्भुत कथाएं हैं। इसके अतिरिक्त हरसिद्धि का मन्दिर, सान्दीपनि आश्रम (जहां भगवान् श्रीकृष्ण ने विद्याध्ययन किया) चित्र गुप्त मन्दिर, भर्तृहरिगुहा, सिद्धवट इत्यादि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भर्तृहरिगुहा, सिद्धवटेत्यादीनि प्राचीनस्थानानि उज्जयिन्यां दर्शनीयानि सन्ति। सिद्धवटवृक्षः क्षिप्रानद्यास्तटे अनादिकालात् विद्यमानोऽस्ति। अस्य वृक्षस्य निर्मूलनं कर्तुं जहांगीरेण तथा अन्यैः मुहम्मदीयशासकैः प्रयत्नाः कृताः किन्तु अयं सिद्धवटवृक्षः यथापूर्वं स्वस्थाने विराजमानो अस्ति। भारतीय ज्योतिषशास्त्रानुसारं भूमध्यरेखाया शून्यरेखांशस्य च केन्द्रबिन्दुः अस्या नगर्याः स्थाने मिलितोऽस्ति। महाकालस्य शिवलिङ्गं अस्य केन्द्रबिन्दोः द्योतकं मन्यन्ते विद्वांसः। अनेनैव कारणेन महाराणाजयसिंहेन अत्र वेधशालायाः निर्माण कारितमासीत्। प्रत्येकं द्वादशवर्षव्यतीतानन्तरं यदा गुरुः वृश्चिकराशिं प्रविशति तदा अवन्तिकानगरीमध्ये कुम्भपर्व आगच्छति।

इतिहासानुसारं मौर्यशासनकाले मालवप्रदेशस्य राजधानी उज्जयिनी आसीत्। अस्मिन् सुराष्ट्रस्य लाटाभिधस्य अर्थात् आधुनिकगुर्जरप्रदेशस्य सिन्धस्य कोंकणप्रदेशस्य समावेश आसीत्। सम्राजोऽशोकस्य पुत्रेण महेन्द्रेण कन्यया संघमित्रया च अस्यामेव नगर्यां प्रव्रज्याग्रहणं कृतमासीत्। मौर्यशासनस्यानन्तरं गन्धर्वसेन राजवंशस्य आधिपत्यं अत्र आसीत्। तदनन्तरं शकानां आधिपत्यं अत्र स्थापितमभूत्। विक्रमादित्येन शकान् पराजित्य उज्जयिनी पारतन्त्र्यात् मोचिता सीत्। प्रथमायां शताब्द्यां शकैः पुनः उज्जयिनी स्वायत्तीकृतासीत् तृतीयशताब्दीपर्यन्तं शकानां अत्र आधिपत्यमासीत्। चतुर्थ्यां शताब्दचां गुप्तसम्राजा चन्द्रगुप्त विक्रमादित्येन शकाः पराजिताः निष्कासिताश्च। तस्मात् कालादारभ्य उज्जयिनी विद्यायाः कलानां च केन्द्रस्थानमस्ति। कालिदासः, मेण्ठः, अमरसिंहः, वररुचिः, भर्तृहरिः भारवीत्यादीनां प्राचीनभारतस्य श्रेष्ठकवीनां अवन्तिकानगरीस्थः सम्बन्धः वर्ण्यते विद्वद्भिः

प्राचीन स्थान उज्जयिनी में दर्शनीय हैं। सिद्धवट वृक्ष क्षिप्रानदी के तटपर अनादिकाल से विद्यमान है। इस वृक्ष को निर्मूल करने को जहांगीर तथा अन्य मुस्लिम शासकों ने प्रयत्न किए थे, किन्तु यह सिद्धवटवृक्ष यथापूर्व अपने स्थान पर विराजमान है। भारतीय ज्योतिषशास्त्र के अनुसार भूमध्य रेखा का तथा शून्यरेखांश का केन्द्र बिन्दु इस नगरी के स्थान पर मिलते हैं। विद्वान् महाकाल के शिवलिङ्ग को इस केन्द्र बिन्दु का द्योतक मानते हैं। इसी कारण महाराज जयसिंह ने यहाँ वेधशाला का निर्माण कराया था। प्रत्येक बारहवर्ष व्यतीत होने पर जब गुरु वृश्चिक राशि में प्रवेश करता है तब अवन्तिका नगरी में कुम्भपर्व आता है।

इतिहास के अनुसार मौर्य शासनकाल में मालव प्रदेश की राजधानी उज्जयिनी थी इसमें स राष्ट्र का लाटनायक प्रदेश का अर्थात् आधुनिक गुर्जर प्रदेश का, सिन्ध का तथा कोंकण प्रदेश का समावेश था। सम्राट् अशोक के पुत्र महेन्द्र ने तथा कन्या संघमित्रा ने इसी नगरी में प्रव्रज्या ग्रहण किया था। मौर्यशासन के पश्चात् गन्धर्वसेन राजवंश का आधिपत्य यहां था। इसके पश्चात् शकों का आधिपत्य यहां हुआ। विक्रमादित्य ने शकों को पराजित करके उज्जयिनी को पारतंत्र्य से मुक्त किया था। प्रथम शताब्दी में शकों ने पुनः उज्जयिनी को अपने अधिकार में कर लिया था। तीसरी शताब्दी तक शकों का यहां आधिपत्य था। चौथी शताब्दी में गुप्त सम्राट् चन्द्रगुप्त विक्रमादित्य ने शकों को पराजित किया और भगा दिया। उस समय से उज्जयिनी विद्या का और कला का केन्द्र स्थान है। कालीदास, मेण्ठ, अमरसिंह, वररुचि, भर्तृहरि, भारवि इत्यादि प्राचीन भारत के श्रेष्ठकवियों का अवन्ती-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाकविना कालिदासेन स्वनिर्मितेषु मनोहर-काव्येषु उज्जयिन्याः वर्णनं अतीवात्मीयतया कृतमस्ति ।

द्वारावती—सौराष्ट्रस्य पश्चिमे समुद्रतटे स्थिता द्वारावती पुरी 'द्वारकापुरी' ति नाम्ना भारतवर्षे प्राख्यातास्ति। इयमेव नगरी भगवतः श्रीकृष्णस्य पाटनगरी आसीत् । पुराणानुसारं अस्मिन्नेव स्थाने रैवतनामकेन राज्ञा दर्भानास्तीर्य यज्ञः कृतः । अतः इयं भूमिः 'कुशस्थली' इति नाम प्राप्तवती । अत्रैव स्थले कुशनामकस्य राक्षसस्य वधः कृत आसीत् । द्वारकाधीश्वरस्य श्रीरणछोडरायस्य उत्तुङ्गं विशालञ्च मन्दिरं द्वारकायां विशेषेण दर्शनीयमस्ति । निष्पापकुण्डम्, श्रीकृष्णस्य प्रासादः तथा श्रीकृष्णचन्द्रस्य जीवनसम्बद्धाः अन्येषां विशिष्टजनानां मूर्तयः यात्रिणां कृते विशेषेण दर्शनीयाः सन्ति। श्रीरणछोडरायस्य मन्दिरे दोधूयमानो धर्मध्वजः संसारे सर्वेभ्यो विशालतमो ध्वजः मन्यते जनैः । अस्य मन्दिरस्य सीमान्तर्गतं जगद्गुरुणा श्रीमताद्यशङ्कराचार्येण स्थापितं शारदापीठमस्ति । सप्तमोक्षपुरीषु तथा चतुर्षु धामसु द्वारावतीपुर्याः गणना भवति ।

नगरी के साथ का सम्बन्ध विद्वानों के द्वारा वर्णित है । महाकवि कालिदास ने अपने निर्मित मनोहर काव्यों में उज्जयिनी का वर्णन अत्यन्त आत्मीयता से किया है ।

द्वारावती—सौराष्ट्र के पश्चिम समुद्रतट पर स्थित द्वारावती पुरी द्वारकापुरी इस नाम से भारतवर्ष में प्रख्यात है । यही नगरी भगवान् श्रीकृष्ण की पाटनगरी थी। पुराणों के अनुसार इसी स्थान पर रैवतक नामक राजा ने दर्भ बिछाकर यज्ञ किया था । इसलिये यह भूमि कुशस्थली इस नामवाली कहलाई । इसी स्थान पर कुशनामक राक्षस का वध किया था। द्वारकाधीश्वर श्रीरणछोडराय का उत्तुङ्ग और विशाल मन्दिर द्वारका का विशेष दर्शनीय है। निष्पापकुण्ड, श्रीकृष्ण का महल, तथा श्रीकृष्णचन्द्र के जीवन से सम्बन्धित अन्य विशिष्ट लोगों की मूर्तियां यात्रियों के लिये विशेष दर्शनीय हैं। श्री रणछोडराय के मंदिर में लहराता हुआ धर्मध्वज संसार में सब से विशाल ध्वज माना जाता है। इस मन्दिर की सीमा के अन्दर जगद्गुरु श्रीमद् आद्यशंकराचार्य द्वारा स्थापित शारदामठ है। सप्तमोक्ष पुरियों में तथा चार धामों में द्वारावती पुरी की गणना होती।

—※ ऋतुराजप्रशस्तिः ※—

कविरत्न पं० श्रीअमोरचन्द्रशास्त्री, साहित्याचार्यः, संस्कृतविद्यापीठं, दिल्ली

जाने ऋतुराजमुपमानं, मधुपतेरेकं सुसमानम् ।
सोऽप्यवाचि माधव इति नाम्ना, अनुनीतः फाल्गुनकृतसाम्ना ।
हन्त कलितकाकल्या, समं मुरली गायति गानम् ।। जाने० ।।
गोपगणा मधुपा इव परितः, कलगुञ्जनमुखरीकृतहरितः ।
राधयते राधेव, वनश्रीरेनं रममाणम् ।। जाने०।।
काम एनमनुयाति निकामं, रतिरनुगच्छति तं त्वविरामम्,
साधयतीयं चास्य, यशः सुमनःस्रक् स्मयमानम् ।। जाने० ।।
चारयते सुरभीरयमभितः, तारयते गोपीश्च विरहतः ।
नूनममीरश्चन्द्र-कविः स्तौत्येनं कल्याणम् ।। जाने० ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"श्रीमातृसंस्तव"

कवयिता—साहित्यभूषणः, भाषाप्रवीणः पिशुपाटि सीतारामशास्त्री "सुश्रीः"
बल्लारी (मैसूरः)

राकेन्दुसङ्काशमनोहरास्यां, कस्तूरिकाचुम्बितफालदेशाम् ।
मणीमयादर्शकपोलदेशां, कामेश्वरीं त्वां कलयामि नित्यम् ॥१॥

कामेशालिङ्गनोद्भूत, रोमाञ्चस्तनमण्डलाम् ।
पल्लवाधरनिष्यन्दत्सुधावाचामहं भजे ॥२॥

सिन्दूरारुणविग्रहा गिरिसुतावाणीरमाराधिता,
मुक्ताजालविभूषितस्तनवटीश्रीचन्दनारूषिता ।
फालेचन्द्रकलां करेषु दधतोपाशाङ्कुशेक्षुश्शरान्,
श्रीमाता कुरुतात् मदीयमनिशं चित्तं हि वासस्थलम् ॥३॥
(लीलागृहम्)

मन्दस्मितात्ते शिवकाममाये, मरुस्थलीतुल्यनृजीवितेऽपि ।
दिव्यं हि तेजस्समुदेति नूनं, मुह्यन्ति सर्वे तदुदीक्ष्य लोकाः ॥४॥

राकाशशाङ्कसङ्काशा दाननात्ते विनिस्सृताः ।
सुधांशुकणिकाजालाः—अमृतत्वं ददातु नः ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP.6
"Licenced to Post.
Without Prepayment"

सूक्ति-सुधा

कायशौचमुद्दिश्य

आशुकवि-श्री हरिशास्त्री

मलानामिन्द्रियोत्थानां
शरीरेषु प्रसज्जताम् ।
बाह्या वाभ्यन्तरासक्तिः
सा स्नानादिभिरस्यते ॥१॥

शरीर को इन्द्रियों के मल अंग प्रत्यंगो पर लगते हुए । बाहरी वा भीतरी लगाव और दबाव भी स्नानादि से दूर किये जाते हैं । आदि शब्द से मार्जन प्रक्षालन सभी समझिए । वेग होने पर भीतरी मल का दबाव भी मन को मलिन ही करता है । इसलिए आन्तरासक्ति को भी छुडाकर स्नानादि विधान किया है । १

यावद्गन्धस्य लेपस्य
न क्षयस्तावदेव हि ।
स्नानं च धावनं वाभि-
र्मार्जनं क्षालनं तथा ॥२॥

जब तक उन मलों का गन्ध और लेप न मिट जावे तब तक उसे धोना मसलकर जल क्षारादि से हटाना उचित है । स्नान करना, मार्जन, प्रक्षालनादि मयोपयोग समझें । २

सम्बिधाय त्रिराचम्य
प्राणायामं त्रिधा क्रियात् ।
एषा वै कायसंशुद्धिः
शास्त्रकारैरुदीरिता ॥३॥

ऊपर लिखे स्नानादि से शुद्ध होकर तीन-आचमन और ३ प्राणायाम करे । यह काय शुद्धि शास्त्रविज्ञों ने कही है । ३

अथवा—

अशूचीनां पदार्थानां
संसर्गो नैव जायताम् ।
जातं च तमपाकृत्य
स्नानमाचमनं तथा
प्राणायामं विधायैव
दैवं पित्र्यमुषश्चरेत् ।
कायशुद्धिरियं वै दिक्
विपश्चिद्भिः प्रशस्यते ॥४॥

अथवा-अशुद्धपदार्थों का संसर्ग न हो और हो जावे तो उसे हटाकर स्नान आचमन और प्राणायाम ३ वार कर लेवे । यह कायशुद्धि की रीति विद्वानों ने बताई है । ४

प्रकाशकः—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर । दूरभाष : ७५४९६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रि० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

13-5-68

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य



स्तम्भादाविर्भवन्दैत्यदंभानपहरन् हरिः
भक्तत्राणाय भगवान् नरसिंहवपुर्दधौ ॥१॥

वार्षिकमूल्यं सप्तमुद्राः ७.००

एकप्रतेः सप्तातिपणाः ०.७०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठ संख्या
१.	मङ्गलम्, मासावतरणं,	श्रीहरिशास्त्री, सम्पादकः	२२
२.	रूसदेशस्य मास्कोनगरे द्वौ संग्रहालयौ	श्रीगणेशरामशर्मा, डूंगरपुरम्	२३
३.	स्व० पं० श्रीरामेश्वरप्रसादस्य संक्षिप्त-जीवनवृत्तम्	श्रीचण्डीप्रसादाचार्यो जयपुरम्	२३
४.	मामुद्धर	श्रीहरिगोविन्दमिश्रः, छिंदबाड़ा	२३
५.	पवमान-नन्दनः	व्याकरणशिरोमणिः श्री के० पिञ्चुमणिः	२३
६.	न वित्तेन तर्पणीयः मनुष्यः	कु० श्रीजयन्तीजैनमहोदया	२३
७.	प्रवल्हिका–प्रवाहः	पं० श्रीप्रशस्यमित्रशास्त्री, कानपुरम्	२४
८.	महामूर्खसम्मेलनम्	श्रीगणेशशर्मा, डूंगरपुरम्	२४
९.	होलिकाष्टकम्	श्रीब्रह्मदत्तःशर्मा, जामनगरम्	२४
१०.	संगृहीताः समाचाराः	श्रीगणेशरामशर्मा, डूंगरपुरम्	२४
११.	राजतरंगिण्यां चित्रिता भारतकलाः	श्रीसुभाषो वेदालंकारः, जयपुरम्	२४
१२.	सम्पादकीयम्	मधुपः, सहसम्पादकः	२५
१३.	महाराणा राजसिंह	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	२५
१४.	लघुकथा	,, ,,	२५
१५.	सूक्तिसुधा	श्रीहरिशास्त्री, सम्पादकः	२६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १८ | वैशाखः, विक्रमाब्दः २०२५ (मई १९६८) | अङ्कः ७

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री,

स्फूर्ज्जच्छोणप्रवाहोपरि सितगरुतां मालिकां दर्शयन्ती,
नीलाम्भोजे प्रकामं शशिरुचिरुचिरां विद्युतं स्थापयन्ती ।
शैवं वक्षो विशालं प्रमुदितमनसा कुर्वती पादपीठं,
साऽस्मच्चेतः श्मशाने विलसतु सुतरामादिमा कादिविद्या ॥१॥

मासावतरणम्

तेजस्तिग्मकरस्य वर्द्धयति तद्वायौ निधत्ते परं
प्रासादोपरि शाययत्यपि जनान्, स्वप्रेयसीभिः समम् ।
लोकेभ्यो बहुधातडाग-तटिनी-कुल्या-मदात्रोचयन्
वैशाखाभिधमास एष धरणीं प्राप्तः सखे ! वीक्ष्यताम् ॥२॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूसदेशस्य मास्कोनगरे द्वौ संग्रहालयौ

अनु० श्रीगणेशरामशर्मा, डूंगरपुरम् (राज०)

हिन्दीभाषाया वरिष्ठेन साहित्यसेवकेन द्रावतरवर्येण श्रीनगेन्द्रमहोदयेन स्वस्य विदेश-यात्रायाः पर्यटनसंस्मरणानि वर्णयता रूषदेशस्य मास्कोनगरं गतवता तत्रत्ययोर्गोर्की-तालस्तायनाम्नोर्द्वयोर्विश्वविख्यातयोः साहित्यकारयोः संग्रहालयौ धर्मयुगनाम्नि हिन्दीभाषायाः साप्ताहिके पत्रे व्यावर्णितौ स्तः १८ फरवरी ६८ दिनस्याङ्के । तत एवोद्धृत्य कञ्चनाशं संस्कृत-भारतीपाठकानां पठनायानन्दाय ज्ञानवृद्धये-चात्रानुवादरूपेण साभारं प्रस्तूयते । तथाहि—

गोर्की-संग्रहालयस्य स्थापना सन् १९६१ ईषवीये वर्षेऽक्रियत । सोवियत-सर्वकारस्यैक-निर्णयानुसारं मास्कोनगरस्थं तद्भवनं, यत्र स एष महालेखको गोर्कीमहोदयः स्वजीवनस्यान्ति-मानि पंचवर्षाणि व्यतीयाय, गोर्कीस्मारक-रूपमाघोषितम् । तस्मिन् भवने गोर्कीमहोदयः स्वयमधस्तने खण्डे निवसति स्म, उपरि च तत्पुत्रो मैक्सिमअलिक्जेविच इत्यभिधानस्तत्पत्नी, द्वे कन्यके—मर्फा, डेरिया चेति—वसन्ति स्म । तद्भवनस्य द्वारस्य दीर्घामतीत्य वयं गोर्कीमहो-दयस्याध्ययनकक्षं प्राविशाम, यत्र हि मध्यभागे-किलैकं सुविशालं, विस्तृतं, दीर्घं च काष्ठफलकं संस्थापितमभूद्, भित्तौ खचितेषु पुस्तकाधार-विशेषेषु जापानचीनदेशयोः कलावस्तूनि, प्राचीना मुद्राः, पुरस्कारोपाधिप्रतीकादीनि च सुसज्जितरूपाणि संस्थापितान्यासन्, काष्ठ-फलकस्य तस्य समीपमेवैकं सुविशालं मञ्चासनं तथा कोमलानि काष्ठासनानि चासन्, यत्र गोर्की-महाभागः प्रायेण स्वातिथीनां साक्षात्कारं विधत्ते स्म । तदिदं काष्ठफलकं गोर्कीमहोदयस्य विशेषा-देशानुसारं तस्यावश्यकतानुसारमनुकूलं च विनिर्मितमभूत् । काष्ठफलकस्यास्योच्चतातस्मादेव समधिकं विहितासीद्यतो गोर्कीमहोदयस्य क्षयरो गाक्रान्ते फुप्फुसे खल्वारामं विन्देयातामिति । अस्य काष्ठफलकस्य दीर्घता विस्तारश्चातोऽधिकम भूताम् यतो गोर्कीमहाभागस्याध्ययनलेखनोपयुक्ता सामग्री यथास्थानं सावकाशं च संस्थाप्येत ।

यत्र महत् साहित्यं संसृष्टम्

लेखन-सामग्र्या अन्तर्गतेषु वस्तुषु द्वे दारु-निर्मिते लेखन्यौ तथा रक्तनीलवर्णाः सीसक-लेखन्यश्चासन् या गोर्कीमहोदयः स्वयमेव छुरिकया कर्तयित्वा वावच्छिद्य समस्थापयत् । कृष्णवर्णाः सीसकलेखनीः प्रायेण गोर्कीमहोदय-ष्टिप्पणीलेखने प्रयुयोज, तथा रक्तवर्णाभिर्लेखनी-भिः स पुस्तकेषु चिह्नानि चक्रे । मध्ये लेखनोप-युक्तानि सूक्ष्मरेखाङ्कितानि दीर्घाकाराणि कर्गदपत्राणि यथाक्रमं निहितान्यासन् येषां पार्श्वयोः पर्याप्तं जीवास्थानमभूत—जीवास्थाना-नामेतेषामुपयोगः संशोधनकार्यार्थं भवति स्म । पार्श्व एव लघुलघूनां कर्गदखण्डानां संहतयो-ऽभूवन्, येषु गोर्कीमहाभागो नवीनान् विचारान् सद्यः स्फुरतीः कल्पनाश्चाङ्कते स्म । यद्यपि गोर्कीमहोदयस्यायं कठोरो निर्देशोऽभूद् यत्त इमे लघुकर्गदखण्डा उपयोगानन्तरं तत्कालमेव विच्छिद्य खण्डशोविनष्टाः क्रियेरन्, स स्वयमपि च तथैव कुरुते स्म, तथापि तदात्मजः अलिक्जे-विचमहाशयो—यो हि प्रकारान्तरेण तस्य सचिवकार्यमपि सम्पादति स्म—कर्गदखण्डेभ्य एभ्यः कांश्चनोद्धृत्य संरक्षति स्म । अद्यत्वे रूषदेशस्यानेके किलालोचकाः शोधकाश्च तस्य महोपन्यासकथाकारस्य साहित्यसर्गक्रियामव-बोद्धुं कर्गदखण्डानामेतेषां सम्यमुपयोगं प्रकुर्वते।

अथ गोर्कीमहोदयः प्रातर्नववादनसमयेऽत्र भवनस्य कक्षमागत्य स्वस्य लेखनकार्यमारभते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्म तथा मध्याह्नोत्तरं द्विवादनसमये कार्यादस्माद्विरमते स्म। स हि पूर्वाह्णे नियमितरूपेण साहित्यरचनामेव करोति स्म। स्वजीवनस्यान्तिमेषु वर्षेषु सः पर्याप्तं परिश्रमं चक्रे, कियन्ति नाटकानि लिलेख तथा स्वस्यान्तिम महाकाव्यशैलीकं 'क्लिम' संज्ञकमुपन्यासं रचयामास, यं स पूर्णतां नेतुं न पारयामास। अपराह्णसमये स नवलेखकानां पाण्डुलिपीनां संशोधनं, व्यक्तिगतं, साहित्यिकं च पत्राचारं तथा पत्रपत्रिकादीनाम् सम्पादनं च कुरुते स्म।

अस्मादध्ययनकक्षात् कियद्दूरं गत्वाथ गोर्कीमहोदयस्य सुप्रसिद्धः पुस्तकालयः सन्तिष्ठते, यस्य बहुविधं महत्त्वमास्ते। अस्मिन् पुस्तकालये दशसहस्रसंख्याका ग्रन्था वर्तन्ते–समग्रस्य रूषदेशस्य व्यक्तिगतेषु पुस्तकालयेषु तालस्तायस्य पुस्तकालयानन्तरं खल्वस्यैव स्थानं विद्यते। अत्र पुस्तकालयेऽस्मिन्ननेके दुर्लभा ग्रन्थास्तेषां प्रथमसंस्करणानि तथा चानेकेषाममरग्रन्थानामुपहारप्रतयश्च समुपलभ्यन्ते या हि मूललेखकैः स्वहस्ताक्षरैः साकं गोर्कीमहोदयाय समर्पिता आसन्। दशसहस्रग्रन्थेष्वेषु प्रायेण द्विसहस्र ग्रन्थेषु गोर्कीमहोदयस्य स्वहस्ताङ्कितानि चिह्नानि विद्यमानानि सन्ति। गिबनमहोदयस्य सुप्रसिद्धं ग्रन्थं "रोमनसाम्राज्यस्यावनतिस्तदन्तश्च" इत्याख्यं गोर्कीमहोदयः सम्पूर्णेनावधानेनाधीयाय। अथ च पुश्किन-गोगोल-तालस्ताय-चेखवादयो गोर्कीमहाभागस्य प्रिया लेखका आसन्-एतेषु कांश्चन–यथा चेखबमहाशयस्य कथासंग्रहं स प्रायः स्वेन साकमेव ररक्ष, तार्लेनामकस्य लेखकस्य रचना 'नेपोलियन' इति कदाचिदन्तिमो ग्रन्थोऽभूद्यं स मृत्योः स्वल्पकालात् पूर्वमेव पपाठ। विश्वस्य महाकलाकारस्यैतस्य गोर्कीमहाभागस्य मेधाशक्तेस्तथा च तत्परिपोषकानामनेकेषां प्रभावसूत्राणामध्ययनार्थमेतेषां ग्रन्थानां सूक्ष्मं गभीरं च निरीक्षणमनिवार्यमास्ते। अत एव हि प्रस्तुतोऽसौ पुस्तकालयो गोर्कीसाहित्यस्याध्येतॄणां कृते नन्वेकं स्वाध्यायतीर्थमिवास्ते।

पुस्तकालयेनानेन संलग्नो भोजनकक्षो वर्तते, यस्यायामः पर्याप्तं सुविशालोऽस्ति, मध्यभागेऽस्य कक्षस्यैकं बृहत् काष्ठफलकं संनिहितमास्ते. यत्र गोर्कीमहोदयस्तत्परिजनाश्चातिथिभ्यः स्वागतसत्कारादिकमाचेरुः–रोम्यांरोलाँ-जॉर्जबर्नार्डशाह-प्रभृतीनाम् स्वागतसत्कारं गोर्कीमहोदयोऽस्मिन्नेव कक्षे चकार अत्रैव च सन् १९३२ ईसवीये वर्षे अक्टूबर मासे सोवियतसङ्घस्य लेखकानाम् सुबृहत् सम्मेलनं सम्पेदे। ततोऽतिरिक्तम् समाजवादि यथार्थदर्शनमधिकृत्यानेका महत्त्वपूर्णा गोष्ठयोऽपि चात्र समये समये भवन्ति स्म। अनयैव दृशा कक्षोऽयमपि चैकं महत्त्वपूर्णमैतिहासिकं स्थानं वर्तते।

अथ संग्रहालयस्यास्य मर्मस्थलं गोर्कीमहाभागस्य शयन-कक्षोऽस्ति अत्र गोर्की महोदयस्य शैय्या तद्वस्त्राणि चाद्यापि संरक्षितानि सन्तिष्ठन्ते। गोर्कीमहाभागस्य प्रायेणैकादशवादनसमये रात्रौ प्रपठत एव शयन-स्वभावो बभूव। शैय्यायाः समीपे समस्तरमेवैकः सुखासनमञ्चोऽस्ति निहितस्तस्य मञ्चस्य शिरोभागे लघ्वाकारमेकं काष्ठफलकमास्ते, यस्योपरि लेखकस्यास्य गोर्कीमहाभागस्य पौत्र्या मार्फानाम्न्याश्चित्रं संस्थापितमास्ते। शयन-कक्षे तदिदं चित्रमालोक्यानायासमेव मनसि मे गोर्कीमहोदयस्य विषयेऽनेकाः कोमलाः कल्पनाः प्रास्फुरन्। तदानीमेवास्माकं निर्देशिका काष्ठफलकस्य तस्यैकं दरमुद्घाटितवती, चित्र चैकमन्यन्निष्कास्य मत्पुरतो निदधे। तदिदं चित्रं गोर्कीमहोदयस्यैकमात्रस्य पुत्रस्य–मर्फायाः पितुः – अलोक्जेबिचस्यासीद्यो हि गोर्कीमहोदयस्य मृत्योर्वर्षद्वयात्प्रागेव दिगङ्गतो बभूव। चित्रमिदमवलोक्य मम कोमलाः कल्पना अश्रुभिरार्द्रा बभूवुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुणो हि गोर्कीमहाभागे (स्वपुत्रस्य) अलीकजे-विचस्य चित्रं दृष्ट्वा तज्जन्यमाघातं सोढुं शक्तिर्नावाशिष्यत अत एव हि स तच्चित्रं काष्ठफलकस्यान्तर्दरं निदधाति स्म तथा च मर्फायाश्चित्रेणावरणमिव परिकल्प्याघातमिमं सोढुं प्रयेते । अहमचिन्तयम् अपि रक्तक्रान्तेरसौ साहित्यिकः सेनानी वस्तुतस्तथाविधो दुर्बलोऽभूत् ? परन्तु मम मनस्तत्कालमेवोदतरत् यद्धि सोऽयं समाजवादिनो यथार्थदर्शनस्योद्गातुः सार्वजनिको व्याख्यानकक्षो नास्ति, वरञ्च 'माता' इत्यस्य ग्रन्थस्य प्रणेतुरसौ एकान्तशयनकक्षो वर्तत इति । गोर्कीसंग्रहालयस्यान्तरहं जिज्ञासायाः सम्भ्रमस्य भावान्नोत्वा तत्रागच्छम् परन्तु करुणार्द्रं हृदयमादाय ततो बहिरागच्छम् ।

शांतेः सेवकोऽपि क्रूरमृगयारसिकोऽपि च

तालस्तायमहाभागस्य मुख्य आवासस्तथा तस्य संग्रहालयो यास्नाया पोलियाना स्थाने वर्तते यो हि मास्कोनगरात् प्रायेण द्विशतमीटरप्रमाणे दूरेऽस्ति। तत्र गमनस्य मे प्रबलेच्छासीत् परन्तु मम सहयात्रिणस्तदर्थमेकं समस्तं दिनमपक्षपयितुमुद्यता नासन् । अतो मया मास्कोनगरस्थितेन तालस्ताय-संग्रहालयेनैव सन्तोषः कर्तव्योऽभूदगत्या। तदिदं स्थानं तालस्तायमहोदयस्य शीतकालीन आवासोऽभूद् यो हि विशाले किलैकस्मिन्नुद्याने वर्तमानोऽस्ति । अत्रैकतस्तालस्तायकुलस्य सामन्तोयो गरिमा तथाऽन्यतस्तस्य व्यक्तिगतस्य सक्रियजीवनस्य सरलतायाः प्रभावः स्पष्टरूपः परिलक्ष्यते । भवनस्यास्य भोजनकक्षः पर्याप्तं विशालोऽभूत्तथा सज्जोपकरणानि महर्घाणि समभूवन् । परिवारस्य प्रत्येकं सदस्यस्य कृते पृथक्-पृथक् कक्षा आसन्-एकः कक्षस्तस्य कनीयसः पुत्रस्य तदभिभाविकायाश्चासीद्यस्मिन् बालकस्य तस्य खेलनक्रीडनस्य, पठन-लेखनस्य च वस्तून्यद्यापि तथैव यथापूर्वम् संस्थापितान्यासन्। ऊर्ध्ववर्तिनि कक्षे मृगयोपयुक्तान्युपकरणान्यासंस्तेषु विविधान्याग्नेयनलिकास्त्राणि, भल्लूकानां चर्माणि चाभूवन् । अत्र स भल्लूकशबोऽप्यभूद्यस्मात् स्वप्राणरक्षार्थम् तालस्तायेन सङ्घर्षो महान् कर्तव्यः समभूत् । शांतेः सेवकोऽसौ तालस्तायमहोदयः क्रूरो निर्दयो हिंसापरायणो मृगयार्थी चाप्यासीत्-एतज्ज्ञात्वा मे महत्कौतूहलं बभूव। भवनस्यास्य मध्यभागे लेखकस्य (तालस्तायमहाभागस्य) तत्पत्न्याश्च शयनकक्षोऽभूद्यो हि राजसिकसज्जया सम्पन्न आसीत् । तालस्तायमहाभागस्य सारल्यस्थाने तत्पत्न्या राजसिक्याः प्रकृतेः प्रभावोऽत्र समीधिकं बभूव । तालस्तायमहोदयस्य पत्न्याः स्वभावो मनागाक्रामकोऽभूत् सा स्वपतेः साधुवृत्ति, दानशीलतां प्रति च नाधिकां सहानुभूतिं दधे, सा च प्रायेण तत्क्रियाविधिं विरुध्यमाणासीत्। परमन्यतः सा स्वभर्तुरचनानां पाण्डुलिपीः स्वयं सज्जीकर्तुं प्रबलमाग्रहं दधे । 'युद्धं शांतिश्च' इत्यस्य (विश्व-विख्यातस्य) ग्रन्थस्य पाण्डुलिपेः संशोधनानि तालस्तायमहाभागस्त्रिचतुर्वारं चक्रे, तथा प्रतिवारं सा राजरमणी (तालस्तायस्य पत्नी) स्वहस्तेनैव तत्पाण्डुलिपिं संसाधितवती। स्त्रीजातेर्मनोवृत्तिगतः स एष विरोधाभासो रोचकोऽपि सन् विचित्रो नाभूत् तस्या राजरमण्याः सामन्तपत्न्या मनो नन्वेकतः स्वपतेः साधुप्रवृत्तिभ्यो विरुद्धं यावद्विद्रोहं कुर्वाणमभूददपरतस्तस्य साहित्यिकस्य गौरवस्य सहभोगं कर्तुं तावदेव व्यग्रं चापि बभूव। तथापि मन्मुखाद्विनिर्गतम्-वराकस्य तालस्तायस्य गृह एव युद्धस्य शांतेश्चोपन्यासः सक्रियो वर्वर्तीति ।†

† १८ फरवरी ६८ दिनस्य 'धर्मयुगात्' साभारम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्व० दाधिमथपण्डितश्रीरामेश्वरप्रसादमहाभागानां संक्षिप्तं जीवनवृत्तम्

ले० श्रीचण्डीप्रसादाचार्यो दाधिमथः, म० सं० कालेजः, जयपुरम्

संस्कृतसमाजस्य सदस्या विद्वांसो जानन्त्येव यद्धि श्रीरामेश्वरप्रसादमहाभागश्चिरात् संस्कृतसाहित्यं, संस्कृतभाषां, संस्कृतसमाजञ्च सर्वात्मना संसेव्यमानोऽतियशस्वी विद्वानासीत्। स महाभागो व्याकरणशास्त्रे साहित्यशास्त्रे चाचार्यपदवीभाग् एव न, परञ्च न्याये, दर्शने, वैदिककर्मकाण्डे, काव्यकर्मणि च सुतरां व्युत्पन्नो विद्वान् इति गौरवास्पदमस्माकं सर्वेषां संस्कृतसेविसमाजस्य सदस्यानाम्।

तैस्तैर्विशिष्टगुणैः स्वल्पकाले एव समेषामपि संस्कृतविदुषां समादरणीयस्थानमाप। अध्ययनाध्यापनप्रसंगे मयेदमनुभूतं यद्धि संस्कृतस्य विद्वांसो महान्तोऽपि सन्तः कियत् सरलसरलमनाडम्बरं वस्त्रादिबाह्यप्रदर्शननिरपेक्षं, शीलसौजन्यनिर्मलसदाचारचारित्र्यसम्पन्नं जीवनं जीवन्तो निष्ठास्थापूर्वकं मौनसाधकत्वेन सुरभारतीं सेवमाना मोदमाना विराजन्ते भारते देशेऽस्माकम्। कारणमिदमत्र यदेतेषां प्राचीनविदुषां—

यदि सन्ति गुणाः पुसां विकसन्त्येव ते स्वयम्।
नहि कस्तूरिकामोदः शपथेन विभाव्यते॥

इत्येषः प्रगाढः सिद्धान्त आसीत्। अत एवानेके समर्था नौष्ठिकाश्च संस्कृतविद्वांसोऽपरिचिता अज्ञातनामानश्च संतिष्ठन्ते। एतच्चिन्तयित्वा कस्य सहृदयस्य चेतो न चेखिद्यते। अत एव तादृशस्य विशिष्टस्य विदुषः परिचयस्तावदपेक्षते साम्प्रतिकेऽस्मिन् युगे इति मनसि निधाय पाठकमहाभागानां पुरतः श्रीरामेश्वरप्रसादमहाभागानां विषये किमपि परिचायकं यथोपलब्धं सामग्रीजातमुल्लिखितुं सयत्नोऽस्मि।

सोऽयं महाभागः श्रीरामेश्वरप्रसादव्याकरणाचार्यस्तदानींतनशासकनृपैर्मिश्रपदे प्रतिष्ठितानां तपःस्वाध्यायाचारादिगुणगणविशिष्टानां शान्तानां वैदुष्यविवेकसम्पन्नानां प्रतिभाप्रकर्षशीलसंतोषगौरवगरीयसां कासल्यावटङ्कानां दाधिमथब्राह्मणानां सुपूज्ये 'श्रीसीताराम' इति नाम्ना नितरां ख्याते सम्मान्ये च कुले जनिं लेभे। स महाभागः संवत् १९७७ तमे विक्रमाब्दे, आश्विनमासे, नवम्यां तिथौ, सौम्यवासरे, जयपुरस्य समीप एव श्रीकल्याणाधिष्ठितस्य परमपावनडिग्गोतीर्थस्य क्षेत्रे वर्तमाने 'नोम्हेडा' इति ख्याते ग्रामेऽजनिष्ट। यत्र सत्यपि निर्धनत्वे संस्कृतेनैव स्वजीवनस्य साफल्यं मन्यमानानां द्विजवराणां समुदायस्तिष्ठति। स ग्राम एवाभिजनं तस्य महाभागस्य। प्रपितामहश्च तस्य चतुर्भुजो विष्णुरिव श्रीसीतारामः, पितामहो भरतः, पिता च श्रीबालमुकुन्दो मिश्रः, यो हि स्वजीवनेऽतिसरलो भगवदाराधनपरायणश्चासीत्। प्रथमं तस्य श्रीजगदीशशर्मा एवैकः पुत्रः समजायत। कृतरामेश्वरतीर्थेन मिश्रमहाभागेनापरमपि पुत्ररत्नं वार्धक्यातिनिकटे समवाप्य नितान्तं तुतुषे। रामेश्वरप्रसादलब्धोऽयं पुत्र इति मन्वानश्चायं मुकुन्दमिश्रः संजातस्य पुत्रस्य तन्नाम्नैव रामेश्वरप्रसाद इति अभिख्यां चक्रे। अस्य जननी सती साध्वी पाणिनिजननीव दाक्षीति नाम्नी अवर्तिष्ट।

अस्य दाधिमथमहाभागस्य सर्वमपि शिक्षादीक्षादिकं मुख्यतः संस्कृत एव बभूव। स्वपितुरेवाक्षरशिक्षां समासादितो माणवकोऽयं बाल्यकाल एवामरकोषमष्टाध्यायीञ्च पपाठ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य प्रमुखो विद्यागुरुः सुगृहीतनामधेयो विख्यातो विद्वत्तल्लजः श्रीमुरारिमिश्रमहाभागो वैशिष्ट्येनाभूत् । यो हि शेषावतारमहामहोपाध्याय-श्रीदेवनारायणत्रिपाठिमहाभागानां शिष्येष्वन्यतमः, स्वरूपचन्दपृथ्वीराजश्रेष्ठिभ्यां संचालित—बगडस्थरुंगटासंस्कृतमहाविद्यालयस्याध्यक्षपदमलं कुर्वाणो महावैयाकरण इति ख्यातिं गतो विद्वान्, अयमेवास्य जीवनविकासको विद्यागुरुरिति नितरां प्रपथे । एकस्मादेवास्मात् गुरो विविधा विद्याः समासादिता इति तस्य सर्वविद्यानिधित्वं सूच्यते । न केवलमेतेषां तत्त्वावधाने निवसन्नयं व्याकरणसाहित्यविशिष्टग्रन्थानेवाध्यगीष्ट, परञ्च तस्मिन्नेव काले छात्राध्यापनेन प्रौढं वैशिष्ट्यमाप । व्याकरणे साहित्ये चाचार्यपदवीभागयं दर्शने शास्त्रिपरीक्षां राष्ट्रभाषायाः प्रभाकरञ्च परीक्षाञ्चाप्युदतीतरत् । सत्संस्कारवानसौ समाराध्यगुरुणा प्रीत्या प्रयत्नैः सपरिश्रमञ्चाध्यापितो निसर्गत एव परं वैशिष्ट्यं भेजे । साङ्गोपाङ्गशुक्लयजुर्वेदस्य माध्यन्दिनीशाखामपि अस्मादेवाधीयाय । इत्थमध्ययनतत्परेणानेन व्याकरणसाहित्यादिविषयेषु शोभना कापि व्युत्पत्तिः सम्पेदे ।

कौटुम्बिकजनानामनुरोधात् ग्रामसमीप एव जीविकागवेषणतत्परेणानेन जयपुरस्थसनातनधर्मसंस्कृतमहाविद्यालये प्रधानाध्यापकपदत्वमलमक्रियत । उक्तविद्यालयस्य प्रधानपदे विराजमानेनाध्यापिता अनेके शिष्याः शास्त्रिणः, आचार्याः, नानाविद्यालयेषु महाविद्यालयेषु चाध्यापकत्वं प्राध्यापकत्वं च निर्वहमाना विद्यन्ते । तेषु दिल्लीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य निर्देशकपदे सम्प्रति समासीनस्य श्रीमण्डनमिश्रमीमांसकाचार्यस्याभिधानं परिगणितुं शक्यते । यो हि महता परिश्रमेण तैरेव पूर्वं व्याकरणमध्यापितस्तदनन्तरञ्च मीमांसाविषयमधीत्य विद्वत्तल्लजत्वं भजत इति सौभाग्यमस्माकं सर्वेषां राजस्थानीयविदुषाम् । मन्ये तेषां प्रेरणयैव जीवनमेतस्य परमश्लाघास्पदं जात मिति न तिरोहितं विदुषाम् ।

अत्र जयपुरेऽसौ सुविशालं विस्तृतं व्यापकञ्च कार्यक्षेत्रमासाद्य स्वस्य बौद्धिकस्य मानसिकस्य च विकासाय दिशि गतिशीलो बभूव । शिक्षकत्वेन शिक्षणसंस्थासु साहित्यसेवासंबंधात् साहित्यसंस्थानेषु, यत्र तत्र संयोजितासु व्याकरणगोष्ठीषु, सम्मेलनेषु वैदिककार्यकलापेषु च भाषणादिकौशलेन कायकलापसंपादनेन चात्रत्यविद्वज्जनानां सम्पर्कमधिकाधिकमासाद्य प्रयत्नपरस्तस्थौ । स हि संस्कृतभाषाया विशिष्टपत्रपत्रिकासु लेखान् सत्काव्यानि च लिखित्वा प्रकाशितुमुपचक्रमे । 'भारतविभूतयः' इति राजस्थानसर्वकारेण पाठ्यक्रमेष्वपि प्रचालितः । सत्यमयं यत्र कुत्रापि स्वकाव्यपाठैरनेकशो विद्वज्जनान् मर्मज्ञान् समतोषयत् । काव्यनिर्माणसौष्ठवमस्य परिलक्ष्यास्माकं गुरवोऽपि नितान्तं पर्यतुष्यन् ।

तादृशस्य विशिष्टविदुषो वैदुष्यपरिचयो नापेक्षते, यो हि अहर्निशं स्वजीवनं सरस्वत्याः समाराधनेनैव यापयति स्म । किं बहुना अष्टाध्यायीपारायणञ्चास्य नित्यकर्मणि संतिष्ठते स्म । अत एवास्य कौमुद्यामेतादृशः परिपूर्णोऽधिकार आसीत्, यं परिलक्ष्य समेऽपि विद्वांसो नितान्तं प्रभाविताः यत्र कुत्रापि गतेनानेन शास्त्रचर्या विहिता एवेति नूनं 'तस्माद्यः शब्द-संस्कारः सा सिद्धिः परमात्मनः' इति चरितार्थम् ।

(तत्रोक्तविद्यालये कार्यं कुर्वाणस्यास्याप्रतिहतवैदुष्यप्रभावितेन राजस्थानसर्वकारेण प्रख्याते जयपुरीयमहाराजसंस्कृतकालेजस्य प्रथमं व्याकरणाध्यापकपदेऽनन्तरञ्च व्याख्यातृपदे नियोजितः) यत्र स्थितोऽसौ अतिप्रौढ्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छात्रानध्यापयामास । न केवलं कालेज एव किन्तु वासरे निशायां वा निजगृहागतान् बहुछात्रान् विद्यार्पणेन निभालयाञ्चकार इति जानन्त्येव सर्वे । अस्याध्यापनशैल्या, सदाचारेण शीलसौजन्यादिना, व्यवहारपाटवेन, परिश्रमेण, गुणैश्च तदानींतनाः विपश्चितो नितरां प्रभाविता इति नातिशयोक्तिलेशः । वैदिककर्मकाण्डेऽपि स्वविद्यावैभवेन प्रभावयामास, कीर्तिश्रियञ्च लेभे ।

अस्य विद्वत्तल्लजस्य एकः पुत्रः, यो हि गर्भात्विसृत्य एव पञ्चत्वं गतः, एका च विजयेति नाम्नी कन्या । या शिक्षते सम्प्रति । श्रीमतो रामकन्यादेवी तस्य गृहिणी पतिसेवापरायणा शीलसौजन्यवतीतिसुखदमस्य गृहस्थजीवनम् ।

महाभागोऽसौ दाधिमथो विद्याव्यसनप्रसंगी विद्वत्तल्लजोऽनेकान् ग्रन्थान् प्राणैषीत् । येषु केचन परिगण्यन्ते—

(१) व्याकरणे–सिद्धान्तकौमुद्याः केवलकारकप्रकरणमाश्रित्य रत्नप्रभाख्या टीका ।

(२) साहित्ये–कुवलयानन्दस्य 'रसिकप्रिया' टीका (अपूर्णा) ।

(३) दर्शने–तर्कसंग्रहस्य 'ज्योतिष्मती' टीका प्रारम्भतो शब्दगुणकमाकाशम् ।

(४) साहित्ये–काव्यनिकुञ्जम्–यत्र विविधविषयानाधारीकृत्य अनेकविधाः कविता वर्तन्ते ।

(५) वेदे–वरुणसूक्तस्य हिन्दीभाषाकरणम् । अयं हि सूक्तः प्रथमं काशिक-संस्कृतपरीक्षासु निर्धारितः ।

(६) भारतविभूतयः — राष्ट्रिय-पुरुषाणां जीवनमिहातिनैपुण्येन कथारूपेण प्रतिपादितम् ।

(७) उद्बोधकशतक–इदं हि हिन्दीमहाकाव्यं निर्मितं महाभागेन, यस्य प्रत्येकं पद्यं उद्बोधकमेवेति ।

यथा–

पाठक विचारो तो जरा, निज देश की पूरब छटा ।
अब आज कैसी छा रही, अज्ञान की काली घटा ॥

(८) मेघनादवधम्–महाकाव्यस्यास्योपोद्घात लेखः ।

(९) अभिनवजयपुरवैभवम्–जयपुरवर्णनम् ।

प्रसादमाश्रित्य बुधा बुधत्वं
यस्या भजन्तोह सुधातिरिक्तम् ।
तेजोमयीन्तां रमणीं विरञ्चे-
श्चेतोऽध्वनीनां सततं विदध्मः ॥
(काव्यनिकुञ्जे सरस्वतीस्तवः)

न केवलं पद्यनिर्माण एवापि तु गद्यनिर्माणेऽपि अप्रतिहतं वैदुष्यं तस्य । यथा-अभिनवजयपुरवैभवमिति गद्यकाव्यं सिसृक्षया गद्यमिदं प्रायुङ्क्त—

'अस्ति पुण्यभूमेः कर्मभूमेश्च भारतस्य समस्तपत्तननिकषायमाणं ढूण्ढाभिधसरित्प्रवराऽऽढौकितवसुन्धरापुरन्दरेण सुग्राह्यनाम्ना तिरस्कृतारिवर्गधूमकेतुना क्षत्रियकुलावतंसद्युमणिवंशलब्धजनुषा चन्द्रशेखराऽऽराधनप्राप्तवैभवेन निर्जिताशेषसपत्ननिष्कण्टकराज्यभोगभोगिना विक्रमार्जितकीर्तिना हेतिततिव्याप्तसंहननसंहातिना माधोसिंहेन पालितं, स्वर्गिभिः भोज्यमानं न्यकृतपाकशासनपुरं जयपुरं नाम नगरम् ।

(अभिनवजयपुरवैभवे जयपुरवर्णनम्)

तस्य जीवनस्य इदमपरं वैशिष्ट्यमासीत् यदसौ विपन्नास्वपि परिस्थितिषु न कदापि स्वाभिमानं तत्याज । यो हि पण्डितराजजगन्नाथस्य "गिरिशिखिरगतापि काकपंक्तिः पुलिनगतैर्न समत्वमेति हंसैः" इत्येषः सिद्धान्तः, सदैव तेनापि स्वजीवने अनुसृतः । अयं हि विनोदप्रिय अट्टहासेन जनानन्ददायकश्चासीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतेन सह, सति वादविवादे तात्कालिक-समाधाने अप्रतिहतं वैलक्षण्यं तस्य।

परञ्च हा हन्त! अनवसर एव स्वजन्म-भूम्यां जनैः समायोजिते महति नवकुण्डयाग-कर्मणि आहूतः, २०१५ वैक्रमे वैशाखशुक्लस्य सप्तम्यां कालग्रासत्वं गतः। तादृशस्य विशिष्ट-स्यावसानेन सर्वेऽपि विद्वांसः, विशेषतश्च राजस्थानीया वयं दुःखपारावारे निमग्नाः। परञ्च तस्य परमात्मनः कृतौ किं कर्तुं शक्यते 'बलीयसी केवलमीश्वरेच्छा'। तेषामध्ययनाध्या-पनसामग्रीजातेनानुमीयते यत्तेषां व्याकरण-सरलीकरणस्य महती विशिष्टा योजनाऽऽसीत्। तादृशं सुगमतया व्याकरणज्ञानपरिचायकं चार्टादिकं विनिर्मितं तैः, येन संध्याद्विज्ञानं सरलेन यथा ज्ञातुं शक्यते। किं बहुना आसां पंक्तीनां लेखकस्यापि जीवनं तेषां प्रेरणयैव प्रास्फुरदिति तस्मै दिव्यात्मने वाङ्मयीमञ्जलिं समर्प्य विरम्यते मयेत्यलम्।

मामुद्धर

श्रीहरगोविन्दमिश्रः पाराशरः, छिंदवाडा

मृणु हेरम्ब! विलम्बं मा कुरु
मामुद्धर भो जगदाधार!

दिशि दिशि तव भवचित्रमपारं
भवसागरमतिदुस्तर वारम्,
केन तरेयमिमं संसारम्
बोधय पालय मे हृत्सार।
मामुद्धर भो जगदाधार ॥१॥

कुत्र गतस्त्वं हे भवनायक।
चित्तं मे हर नृहृदय हारक! ॥
मृणु तावत् शरणागत पालक!
निर्धन धन! त्वं हे सुखकार ॥
मामुद्धर भो जगदाधार ॥२॥

आत्मा मे रचयति इह लोके
भावचित्रकं नन्दनमेतम्।
विहर समेतं पार्षदगणकम्
एतस्मिन् हे कौस्तुभहार ॥
मामुद्धर भो जगदाधार ॥३॥

चरमनिवेदनमाकर्णय भो
जनसुखकर! विरचय आनन्दम्।
हर मेऽशान्तिं कुरु मे सुगतिम्
कथय कथय हे भवहितकार ॥
मामुद्धर भो जगदाधार! ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—❀ पवमान-नन्दनः ❀—

ले० व्याकरणशिरोमणिः श्री के. पिच्चुमणिः

मद्गुरीसागरतटे मन्दं मन्दं पवनो वाति स्म। नारायणाख्येन सुहृदा सह सन्ध्यामुपासितु महमपि तत्राऽगच्छम्। सन्ध्यामुपास्य अन्यानि च जपादीनि कर्माणि समाप्य तत्रैव आवां द्वावप्युपाविशाव। नारायणस्तु स्वकीयमधुरध्वनिना आञ्जनेयाष्टोत्तरशतनामावलिपारायणं कर्तुं प्राक्रमत। अहमपि सावधानेन मनसा तत्स्तोत्रश्रवणे मग्नः अभूवम्। समाप्ते पारायणे अहमप्राक्षं नारायणं—"प्रतिदिनं उभयोस्सन्ध्ययोः मारुतिः सश्रद्धेन मनसा त्वया पूज्यते। अस्ति वा कश्चन निदानविशेषोऽत्र?"

नारायणश्चाऽब्रवीत्—"अयि मित्र, बी.ए. परीक्षाविजयानन्तरं "बारिस्टर" परीक्षायामपि विजयमाकाङ्क्षमाणेन मया 'लन्दन' नगर गतं इति त्वं जानास्येव। तत्रैव आञ्जनेये दृढो विश्वासो ममाऽजनि। ईश्वरभक्तिश्च अचञ्चलत्वेन स्थापिता।"

एतेन वृत्तान्तेन संजातकुतूहलः "कृपया सर्वमपि वृत्तान्तं सम्यग् निवेदय" इति तं प्रार्थयामास। स च मत्प्रार्थनामङ्गी कुर्वाणस्तद्वृत्तान्तं वक्तुं प्रचक्रमे॥

"लन्दन" नगरे तत्रत्यमानवाः आस्माकीनभारतीयक्रमागताचारव्यवहारेभ्यः भिन्नामेव काञ्चन रीतिमनुवर्तन्त इति तव विदितमेव। मम मातापितरौ "ताः रीतयः सर्वदा सर्वथा वर्जनीया" इति उपदेशं प्रदायैव मां तत्र प्रेषयामासतुः। अतः यावच्छक्ति कुलक्रमागताचारानुष्ठानमविहायैव 'बारिस्टर' कक्षायामपि पठन्नासम्। न केवलं तत्रत्याः हूणाः परन्तु मत्सहपाठिनो भारतीया अपि मच्चरित्रविशेषं दृष्ट्वा परिहासगिरा मां नोदयामासुः। अहन्तु मदीयपाठपठन एव दत्तचितः कार्यान्तरमुपेक्षमाणोऽवर्ते।

एकदाऽहं भृशं ज्वरपीडितः अभूवम् दश दिनानि गतानि। तदाऽपि ज्वरस्य किञ्चिदपि शान्तिर्नैवाऽदृश्यत। तत्रत्यकलाशालाभिषग्वर्यः स्वकीयकौशलं सम्यगुपयुज्य मां अरोगं कर्तुं प्रायतत। परन्तु फलं किञ्चिदपि नैव ददृशे। अतश्च एकः महाभिषक् तत्राऽऽनीतः। स च मदीयास्सर्वा नाडीः परीक्ष्य "कुक्कुटरुधिरपानं कर्तव्य" मिति उपदिदेश। तद्वाक्यश्रवणमात्र एवाऽहं भृशमकम्पे।

"मर्तुमप्यहमस्मि सन्नद्धः, परन्तु मदर्थं अन्यजीवहिंसा नैव कर्तव्या" इति तन्महाभिषजे उत्तरं वाक्यमदाम्। स च किंकर्तव्यविमूढः किञ्चिदौषधं प्रदाय स्वभवनं निववृते।

बाल्य एव मन्माता विपदि संपदि च अनिलात्मजं वन्दितुमुपादिशत्। अतः अहमपि स्वकीयान्त्यदिवसं प्रतीक्षमाणः,

"गोष्पदीकृतवारीशं मशकीकृतराक्षसम्।
रामायणमहामालारत्नं वन्देऽनिलात्मजम्॥"

इति महामन्त्रं सहस्रशः जपन् आसम्। दिनत्रयान्तर एव, कथमिति अहमधुनाऽपि विस्मये स्वस्थशरीरः अभवम्। भिषजः सहपाठिनः सुहृदश्च मां प्राप्तारोग्यं दृष्ट्वा "यमसदनान्निवृत्तोऽयं महायमः" इति प्रशशंसुः तद्दिनादहं रामायणपारायणमपि अविच्छिन्नरूपेण कर्तुमुपाक्रमे।

एकदाऽन्योऽपि कश्चन विभ्रमजनकः वृत्तान्तः अभूत्। अस्मत्कलाशालावार्षिकोत्सवे एकं नाटकप्रदर्शनमभूत्। अहमासं कथानायकः। नायिकावेषधारणं काचन हूणकन्यका अकार्षीत्। स्वकीयाभिनयकौशल—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मण्याविष्कर्तुकामेनैव मया कथानायक वेष-धारणं स्वीकृतम्। सा च बहुशः "अत्राऽयं सन्देहः, तत्राऽयं सन्देहः "इति नाटकीयसंवादं हस्तेऽवलम्ब्य मदागारं गमनागमनाभ्यां विषयीकरोति स्म।

अहमपि तां स्वसारं मन्यमानः आलाप-गानादिभिः तत्सौहृदं वर्धयन् आसम्। एकदा सा सायं सार्धषड्घण्टावादनसमये मदागारं प्रविष्टा; तद्दिने वृष्टिरपि अतिवर्षति स्म। एकादश घण्टाः अभूवन्। परन्तु वृष्ट्याः शमनं नैवाऽभूत्। बहिः वाहनमपि किञ्चन नैव दृष्टि-पथं गतम्। किंकर्तव्यविमूढस्तत्पुरतः अहमपि उपविश्य संबद्धासंबद्धानि वाक्यानि भाषमाण आसम्। तदा.....न जाने.....विद्युच्छ-क्तिरिव काचन शक्तिः मच्छरीरं प्रविष्टेवाऽऽ-सीत्! किमिदम्?

तस्याः पादद्वयमपि मत्पादद्वयस्योपरि आसीत्। सा च समन्दहासा स्वकीय शिरः मद्वक्षसि निधाय मच्चिबुकमुन्नमयितुं प्रायतत।

भोः मित्र, सावधानेन मनसा शृणु। अहमासं तदा ब्रह्मचारी। अज्ञातनारीदेह-स्पर्शश्च। सा च अतिगौरवर्णा कनककुम्भ-निभकुचा कदलीकाण्डनिभोरूद्वयेन सह मदूरुद्वय-मपि संमेलयितुं.....नाऽहं वक्त मितः परं प्रभवामि।

परन्तु.....किमभूदिति त्वं मन्यसे? अहं तामालिङ्ग्याऽचुम्बमिति वा? नैव..... नैव.....एको ध्वनिः न जाने केन तत्र तदा उच्चारितः इति? को ध्वनिः – वाक्यरूपः – हाँ–वाक्यरूप एव ध्वनिः —

"शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम्"
"शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम्"
"शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम्"

—"कः इत्थं वदति" इति तद्बाहुबन्धादा-त्मानं विमोचयन् सर्वत्र दृष्टिं प्रासारयम्। हां हां–तत्र तत्र.....हनूमतः एकं चित्रं यद्रामा-यणपारायणार्थं मया भित्तौ उट्टङ्कितमासीत् तदेव चित्रं मामालोक्य किञ्चिद्वदन्निव–नैव, गभीरया वाचा आदिशन्निव अदृश्यत।

"नारायण, धाव धाव, सवेगं धाव "मनो हि हेतुस्सर्वेषामिन्द्रियाणां प्रवर्तने। शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम्॥" इति मां ध्यायन् धाव, धाव" इति आदिशन्निव स हनूमानदृश्यत। अहमपि तां बृहतीं वृष्टि-माण्यविगणय्य बहिरधावम्। .....अनन्तरं तस्याः कुलघातिन्याः मुखमपि नाऽद्राक्षम्। तद्दिनात् "मत्प्राणदाता, आपदामपहर्ता "इति आञ्जनेयमतिश्रद्धया पूजयन्नस्मि।

सफेद बाल काला

मैं अधिक प्रशंसा करना नहीं चाहता। हमारे 'सूर्य कान्ति' तेल से बालों का पकना रुक कर सफेद बाल जड़ से हमेशा के लिए काला हो जाता है। भविष्य में नये बाल काले निकलते हैं। यह दिमाग और आंखों को ताकत बढ़ाता है। हजारों प्रशंसा-पत्र प्राप्त हुए हैं। यदि आप सोचते हैं बाल काला करने के सभी तेलों जैसा ही है तो एक बार अवश्य मंगाकर देखें। गुणों के समक्ष इतनी कीमत कुछ नहीं है। मूल्य १०)। विश्वास न हो तो मूल्य वापस।

दुर्गा फार्मेसी पो० कतरीसराय (गया)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न वित्तेन तर्पणीयः मनुष्यः

लेखिका कु० श्रीजयन्तीजैनमहोदया बी ए.,

को न जानाति खलु लोकेऽस्मिन् धनस्य गौरवम् । संसारेऽस्मिन् समग्राणि कार्याणि धनेनैव सिध्यन्ति । धनेन विना न विद्यते कस्यापि वस्तुनः स्थितिः । मनुष्याणां प्रत्ययो वर्तते-अस्मिन् विषये यत् येषां जनानां समीपे धनं नास्ति तेषां जीवनस्य मूल्यं किं वर्तमानकाले ?

कालेऽस्मिन् स एव पुरुषः कुलीनः गुणज्ञः विद्वान् वक्ता, दर्शनीयः सर्वगुणसम्पन्नश्च गण्यते, यस्य पार्श्वे धनमस्ति । पश्यन्तु तावद् आधुनिकानां भारतीयानां राज्ञां दशाम् । विद्याविहीनाः परस्त्रीकामुकाः, परधनलोलुपाः अत्याचारिणः प्रजापडोकास्ते, महराज-महराजाधिराज-सर्वकारादिभिर्विविधाभिः संज्ञाभिः जनैः आहूयन्ते समाद्रियन्ते च । अत्र को हेतुः ? तेषां विपुलधनमेव, तेषां यशसो मूलकारणमस्ति । सत्यमेवोक्तं केनापि कविना यत्—

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ते ।

ब्रह्मचर्याश्रमे विद्याध्ययनाय गृहस्थाश्रये पालनपोषणार्थं स्वभार्यायाः स्वस्य च सुखेन निवासार्थं धनमीहते लोकः, किं बहुना संन्यासाश्रमेऽपि धनस्यावश्यकताऽस्त्येव । धनेन विना किमपि कार्यं न सिध्यति । राजनीतिकक्षेत्रे, सामाजिकक्षेत्रे धार्मिकक्षेत्रेऽपि च धनस्य संग्रहः आवश्यकः ।

राजनीतिकक्षेत्रे तु निर्वाचनार्थं धनस्य महती आवश्यकता वर्तते । सामाजिकक्षेत्रे धनेन विना समाजे प्रतिष्ठा न भवति । धार्मिकक्षेत्रेऽपि च यागार्थं भगवतः अर्चनार्थं धनस्य अत्यावश्यकता विद्यते । अस्मात् कारणात् धनम्-धनम् इति श्रूयते खलु सर्वेषु स्थानेषु ।

आधुनिकयुगे धनस्यैव प्रतिष्ठा विद्यते । किन्तु धनम् न सुखस्य कारणं वर्तते, अपि तु दुःखस्य कारणमेव । न जाने धनं प्राप्तुं कियन्तो वणिजः छद्मनेन, राजकीयपुरुषाः भ्रष्टाचारेण स्वर्णकाराः स्वहस्तकौशलेन, केचिद् जनाः अनशनभयेन, वाक्यपटुजनाः वाक्यचातुर्येण, येन केनापि प्रकारेण प्रतारयन्ति अन्यजनान्, किन्तु ते सर्वे न जानन्ति यत् धनं प्राप्य जनानां मृगतृष्णा एव वर्धते प्रतिदिनम् ।

भारतीया संस्कृतिरपि इति प्रमाणयति त्यागे एव सुखं विद्यते, न धनसंग्रहे । अस्मात् हेतोः ऋषिभिः आदिष्टाः जनाः धनस्य मोहं परित्यज्य सदैव ज्ञानप्राप्तये प्रयत्नशीलाः भवन्ति । तेषां न आस्था धनविषये, यतो धनमेव दुःखस्य कारणं न सुखस्य । केचिद् महात्मानः योगिनश्च मोक्षप्राप्तये गृहं त्यक्त्वा अरण्यवासं कुर्वन्ति तेषां आचारे व्यवहारे च सच्चरित्रता सत्यता च विद्यते । पुरा कालेऽपि ये महापुरुषाः गृहं त्यक्त्वा अरण्ये आश्रमं निर्माय निवसन्ति स्म । तेषां समीपे ग्रामात् नगरात् वा अनेके छात्राः आगत्य पठन्ति स्म । ते वसिष्ठवाल्मीकिवरतन्तुप्रभृतयो महापुरुषाः निःशुल्कं शिक्षयन्ति स्म छात्रान् ।

तेषाम् हृदये नासीत् धनस्य लालसा । ते सर्वदा छात्राणां परिचर्यां दृष्ट्वा आत्मानं गौरवान्वितं मन्यन्ते न ते धनलोलुपाः, अस्मात् हेतोः तेषां नामानि अद्यापि प्रसिद्धानि सन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये जनाः धनलोलुपाः सन्ति । ते न वा सुखिनः न वा परितुष्टाः, न च ते कीर्तिं प्राप्तुं समर्थाः । धने प्राप्ते सति केचित् जनाः असत्यवादिनः दुराचारिणः परस्त्रीकामुकाः अभिमानयुक्ताः भवन्ति । यद्यपि उपर्युक्तदोषयुक्ताः ते न स्युः, तथापि तेषां हृदये सदैव अनेकाः शंकाः वर्तन्ते । चेत् दुर्भाग्येण रात्रौ तेषां गृहस्योपरि एकस्य कंकणस्य ध्वनिः भवेत् तर्हि ते निद्रां विहाय किम् चौराः वर्तन्ते अत्र ईदृशेन भयेन रात्रौ चकिताः भयसम्पन्ना भवन्ति किं ते सुखिनः सन्ति ? चेत् ते सुखिनः तर्हि दुखिताः के सन्ति अस्मिन् लोके ?

अस्मिन् जगति महतो महदप्यल्पादल्पमपि कार्यं धनेन विना न कदापि सम्भवति। तथापि अतिधनं तु दुखःस्यैव कारणम् । बौद्धसंस्कृतौ च "अपरिग्रहवादः" इति नाम्ना विख्यातः सिद्धान्तो वर्तते यत् सुखं धनत्यागे तत् न धनसंग्रहे स्पष्टमेव वर्तते खलु लोकऽस्मिन् ते एव महापुरुषाः, ते एव धन्याः ये जानन्ति यत् धनेन तृप्तिर्न भवति, जानन्ति च संतोषः परमं सुखम् इति । यः संतोषी स एव महासुखी।

मनोविनोदकणिकाः—

हिन्दीसमर्थकः कश्चित् नागरिको महानुभावो हिन्दीविशेषज्ञं सज्जनमुपगत्य समवोचत् यत् 'मान्यवर ! इदानीम् अस्माभिः आंग्लभाषायाः 'बायकाट' बहिष्कारस्तु अवश्यं कर्तव्य एव। तदर्थञ्च कः शोभन उपायः सम्प्रति समनुष्ठेयः ? इति मां सम्यक् समादिशतु कृपया श्रीमान्' इति।

सज्जनः– इदानीन्तु अहं हिन्दीसाहित्यसम्मेलने भागं ग्रहीतुं बहिर्गच्छामि, ततः पुनः समागत्य स्वयमहमेव भवदन्तिके चोपस्थाय कर्तव्यं निर्देक्ष्यामि, परं कुत्र कदा च भवतः समागमो भूयो भविष्यति ?'।

हिन्दीसमर्थकः—'आपकी बांई साइड में ब्रदर इन ला की बिल्डिंग में सण्डे को डेली न्यूज सुनने को मैं आता हूँ'—इति वामदिशि (वर्तमाने) मम भगिनीपतेर्भवने रविवारे सदा समाचारं श्रोतुम् अहम् आगच्छामीति प्रत्युत्तरमदात्—

—मधुपः

शुभ कामनाओं के साथ

***

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Cable : **BOWREAH** *Phone :* **22-9601 (6 lines)**

FOR NOBLE DURABLE QUALITIES

INSIST ON

Cotton Textiles and Yarns Manufactured by

BOWREAH COTTON MILLS CO., LTD.

BOVRIA.

★

Specialities :—

SIZED BEAMS AND HOSIERY YARN DEEPSHADE, POPLIN AND CORD COATING SHIRTING IN CHECKS & DOBBIES DYED AND PRINTED LAUNS AND CAMBRICS.

Managing Agents :

KETTLEWELL BULLEN & Co., Ltd.

21, STRAND ROAD,

CALCUTTA I.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❋ प्रवाल्हका-प्रवाहः ❋

रचयिता—पं० श्रीप्रशस्यमित्रशास्त्री, नगरं-कानपुरम्

विवर्धते तु सततं व्ययेनैव शनैः शनैः ।
द्यामाप्नुवन्ति पुरुषाः प्राप्य यत् तद्धि किं स्मृतम् ? ॥१॥

सर्वेष्वथ तपःस्वेव किं तपः सुविशिष्यते ।
त्यद् ब्रूहि येन तपसा तपस्वी वै नरो भवेत् ॥२॥

मान्यः सत्त्वेषु को रूढः पृथिव्यां सर्वतोऽधिकः ।
तालाङ्कस्य† यशोदा का बभूव, वद सत्वरम् ? ॥३॥

दिनस्य स्रष्टा भुवि कः प्रसिद्धः,
वाप्यां च पद्मस्य विकासकः कः ।
करैश्च तिग्मैरिह युक्तवान् कः,
रतश्च को वै तमसां विदारणे ? ॥४॥

भीत्या रिपुः कस्य गदाप्रहारतः ।
महाबलस्याथ पलायते रणात् ॥
सेनापतिघ्नश्च बभूव को युधि,
नरश्च दुर्योधनभ्रातृनाशकः ॥५॥

शत्रुञ्जयोऽस्त्रेण च केन चाऽर्जुनः ।
रामोऽपि लंकाऽधिपतिं जिगाय ॥
सत्यं समाख्याहि किमस्त्रमुत्तमं ।
नभःस्थितश्चाप्यरिमाहते सदा ॥६॥

---

† तालाङ्कः = बलरामः कृष्णस्य ज्येष्ठो भ्राता ।

सर्वेषां प्रश्नानामुत्तरं तत्तत्श्लोकस्थप्रथमपंक्तेः प्रथमाक्षराणां क्रमशः संयोजनने प्राप्स्यते ।

यथा षष्ठश्लोकस्थप्रथमाक्षराणां क्रमशः संयोगेन-श रा स न = धनुः, इति शब्द उपपद्यते इदमेव च तत् श्लोकस्थप्रश्नस्य उत्तरमस्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महामूर्खसम्मेलनम्

ले० विद्याभूषणः पं० श्रीगणेशरामशर्मा, डूंगरपुरम् (राज०)

अनिश्चितायां तिथावकस्मात् संयोगान् महामूर्खसम्मेलनस्याखिलविश्वजनीनस्य संकटकालीनं बृहदधिवेशनं सहसा सम्पेदे । अधिवेशनेऽस्मिन् सर्वादौ गोमयगणेशस्य, कर्कशायाश्चण्डिकायाश्च पूजनादिकं विधाय कार्यवाहिनोसमारम्भस्य सूत्रपातोऽक्रियत ।

अत्राधिवेशने दोषदर्शनसार्वभौमाचार्याः प्रतिवादिसम्वादिविवाद्यनुवादिसर्ववादिभयङ्करा गालोगलास्फालनतर्ककर्कशधियः प्रज्ञाचक्षुषोऽपशब्दमहार्णवा वैरान्तकेशरिण उत्कोचविद्यावारिधयः सुरासुन्दरीसुवर्णसर्वस्वापहरणसर्वतन्त्रस्वतन्त्राः कलिकालतीर्थपादाचार्या भोजनभट्टा अश्लीलवावपतयः स्त्रैणशिरोमणयश्चाटुकारमन्त्रमिश्रपादा दिगम्बरचूडामणयो वाग्जालवितण्डाखण्डला देहात्मविज्ञानरत्नानीत्येवंविधाः प्रायः सर्वेऽपि स्वस्वाडम्बरतन्त्रेषु सर्वतन्त्रस्वतन्त्राः स्थूलधियो जडवादभयङ्करा गण्या मान्या धन्याः स्वात्मख्यातिप्रसिद्धा महामूर्खा उपतस्थिरे ।

प्राप्ते हि खलु साभापत्यप्रस्तावे कामकेलिकलानिधयस्त्यक्ताशेषविधयः स्वयंसिद्धास्तृष्णाधर्मधुरन्धरा ह्रीमन्तो वृथापुष्टमहाभागा बहूनाम् वैमत्येनाल्पीयसां बहुमतेन च निर्वाचिताः सभापतयो बभूवुः । सभापतीनामासनं काष्ठोलूकविष्टरे कल्पितमभूत् । सभापतिभिः कथमपि महतीभिरापत्तिभिः प्रदत्तेषु धिक्कारवादेषु कार्यक्रमपरम्परोत्क्रमेण क्रमशः प्रारभ्यत ।

अथ स्वागतकारिण्याः सभापतिभिः श्रीमदाद्यूनलम्बोदरभट्टाचार्यमहाभागैः प्रधानतोऽस्य महामूर्खसम्मेलनस्य सदस्यानुरूपां सेवासपर्यां साधयितुं संस्थायाः स्वस्य चासामर्थ्यं निवेदयद्भिः प्रोक्तम् यदद्यतने विनष्टभ्रष्टाचारयुगे सुविधाया असुविधायाश्च हेतोः सर्वैरपि मान्यैरतिथिभिरन्नपानशयनासनादिषु भोग्यविषयेषु सर्वेषु सर्वथाऽनासक्तैर्भाव्यम् । कामानां दुर्निवारतां विवृण्वानैस्तैरुक्तम् यदस्माभिरिदानीं विवृष्णैर्भूत्वा–"न जातु कामः कामानामुपभोगेन शाम्यति ।" "भोगा न भुक्ता वयमेव भुक्ताः" इत्यादीनि वचनानि संस्मृत्य-संस्मृत्यान्तेऽत्र स्वातिथ्यविषयः स्वयमात्मनेत्थं समुपहर्तव्यो नाम नूनम्—

"उत्तिष्ठन्ते विलीयन्ते हरिद्राणां मनोरथाः ।
बालवैधव्यदग्धानां कुलस्त्रीणां कुचाविव ॥"

श्रुत्वैतदातिथ्यस्वस्तिवाचनं सभायामुपविष्टाः केचित् सदस्याः 'साधु ! साधु !! इत्यूचुः, केचन 'विरम्यताम् वृथाप्रलापादस्मात् ।' इति प्रोचुस्तथान्यैः कैश्चिद्वयोवृद्धैर्दीर्घमुष्णं च निःश्वस्योक्तम्–'का हानिः ? सम्मेलनेऽत्र प्रसङ्गादुपवासचिकित्सालाभो, भोरुधर्मानुष्ठानम्, स्वस्य चात्मवर्गायापूर्वः कोऽपि त्यागो, बलिदानं च निष्काम सम्पद्यते यदि ?' इति समाहितम् ।

अथातः सम्मेलनस्य वार्षिकं विवरणं मूढो मन्त्री पपाठ । संक्षेपान्निष्कर्षस्तेन न्यवेदि प्रधानतः संसारेऽस्मिन् द्वितीयविश्वयुद्धानन्तरं मूर्खाणामस्माकं कश्चिदपकर्षोऽस्ति सञ्जातः । इदानीं युद्धोत्तरकालीनानां मूर्खाणां नवसंस्करणानि गुणतः कर्मतश्च पृथग्धर्माणि जायमानानि विश्वं सर्वतः परिदृश्यन्ते । अनेन पुराणो मूर्खता बतापहीयते ! यदि चैवमेव क्रमशो नव्यमूर्खाणां संख्यावृद्धिर्निर्बाधं जायेत, तदा सनातनानां महामूर्खाणामस्माकं संस्कृतानां भार-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीयानामधोगतिरवश्यमेव भाविनीति प्रश्नोऽसौ कदाचिदन्ताराष्ट्रियसमस्यारूपं प्रतिपद्येत। अपरं च-यद्यपि नव्यैर्मूर्खैः सहास्माकमस्य सम्मेलनस्य नास्त्येव कोऽपि प्राणान्तवैरकरो गम्भीरो हि विसम्वादो मतभेदो वान्ततो वर्णाश्रमधर्मानुसारं तथापि नव्यप्राचीनमूर्खाणां मध्ये मिथो वर्णसङ्करस्य, वर्गसङ्घर्षस्य च महती हि सम्भावना। अद्यत्वे ननु नव्या मूर्खाः सोपाधिकाः साटोपंसाडम्बरं च छलनादम्भप्रपञ्चं प्रचायन्तः सन्ततं समन्ततोऽधिकारश्रियं भुञ्जन्तोऽन्तः करणे प्राङ्मूर्खाणामल्पमत, स्ववर्गस्य च बहुमतं सम्पादयितुं दुश्चेष्टन्ते, विकत्थन्ते चेति हा हन्त हन्त! महती हि क्षतिर्बत सार्वभौममूर्खतावादस्य महानपकर्षोऽतीव खेदावह इति गतवर्षे विषयमिममधिकृत्य काचिदेकोपसमितिः स्थापिताभूत्। तस्याः समितेर्निर्णयमनुरोध्यैवात्राद्य सार्वदेशीयमहामूर्खाचार्याणामिदम् बृहत्सम्मेलनं विराडामन्त्रितमास्ते।

ततो मूढेन मन्त्रिणा पुनर्निवेदितं सनासाक्षिभ्रूसङ्कोचं यद्धि गतवर्षेऽस्य महामूढसमाजप्रतिष्ठानस्योद्देश्यविधाननियमावलिरचनार्थं या समितिर्न्ययोजि, सा स्वस्य विधानस्य प्रारूपमत्र सम्मेलने प्रस्तौति। सत्यप्येवमस्याः समितेः सभ्यानां मिथः प्राणान्तवैरो मतभेदो महान् व्यजृम्भत ततः 'शेषं क्रोधेन पूरयेत्।' इति भवन्तः सर्वे सर्वतः प्रारूपमेतत् संशोध्य, परिवर्त्य परिवर्ध्य चामूलचूलं स्वीक्रियताम्। विधानस्यास्य महामूर्खसम्मेलनस्य कश्चिदावश्यकोंऽशः काश्चन धाराश्च बंभण्यन्ते—

१-अस्य महामूर्खसम्मेलनस्य-'अखिलविश्वब्रह्माण्डमहामूर्खान्ताराष्ट्रियपरिषत्' इति शुभं नाम स्यात्।

२-परमाणुविज्ञानार्थशास्त्रराजनीति प्रधानेऽस्मिन् यन्त्रशासनतन्त्रप्रधाने युगे विगतमूर्खजनगणनाङ्कानुसारं प्रायः सर्वत्रैव वैज्ञानिका राजनीतिज्ञा अर्थशास्त्रवेत्तार एव सर्वे मन्त्रिणः सुधारकाः समाजवादिनः सर्वोदयसंस्थापकाः स्वात्मनि प्रच्छन्नां मूर्खतां सनातनीं दधानाश्चापि स्वबन्धून् सर्वानस्मान् पृथग्भूतानिव मत्वा स्वयमेव नेतारो भवन्ति, यथार्थतां चेमां पश्यन्तोऽपि न पश्यन्ति, फलतः सर्वविधानां मूर्खाणां विश्वबन्धुता बतापक्षीयमाणेव दरीदृश्यते। अतस्तिद्वरुद्धं प्रतिनिविष्टचेतसामस्माक विद्रोहात्मकमान्दोलाचरणं नाम जन्मतोऽपि पूर्वं स्वयं सिद्धोऽधिकारः। अस्यां दिशि कापि महाभैरवो क्रान्तिरेवास्य महामूर्खसम्मेलन प्रतिष्ठानस्य मुख्योद्देश्यं भवितुमर्हति।

३-साधनानि-अस्योद्देश्यस्य सिद्धये साधनानि—

अ-"घटं भिन्द्यात्पटं छिन्द्यात्कुर्याद्रासभरोहणम्।
येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत् ॥१॥"

आ-
"यावज्जीवेत्सुखं जीवेदृणं कृत्वा घृतं पिबेत् ॥"

इ-"मुखमस्तीति वक्तव्यं दशहस्ता हरीतकी ॥"

प्रचारनीतिः-अस्यास्माकं सम्मेलनस्य प्रचारनीतिस्तावदधो लिखितानुसारं स्यात्-

१-न भेतव्यं न बोद्धव्यं न श्राव्यं वादिनो वचः।
झटिति प्रतिवक्तव्यं सभासु विजिगीषुभिः ॥

२-असंभ्रमो विलज्जत्वमवज्ञा प्रतिवादिनि।
हासो मूर्खस्तवश्चेति पञ्च ते जयहेतवः ॥

३-अलभ्यं लप्स्यमानेन तत्त्वं जिज्ञासुना चिरम्।
जिगीषुणा ह्रियं त्यक्त्वा कार्यः कोलाहलो महान् ॥

मूढाचार्यो महामन्त्रिप्रवरः प्रचारनीतिं स्पष्टीकर्तुं पुनः संक्षिप्तं वक्तव्यमूचे-'मान्या मूर्खाधिराजाः! यद्यपि प्रचारनीतिविषये पूर्वं यदुक्तं तदेव सुष्ठु तथापि निम्नाङ्कितं विशेषेण स्मर्तव्यम्-

स्तोतारः के भविष्यन्ति मुर्खस्य जगतीतले?
न स्तौति चेत् स्वयं च स्वं कदा तस्यास्तुनिर्वृतिः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तावदेव कश्चन सदस्यमूर्खो मध्येसभमुत्थाय प्रचारनीतिविषये किमपि संशोधनमिवोपस्थापयञ्जगाद—

अयि मूढा मन्त्रिमहोदयाः! यद्यपि भवतोक्तं सर्वं स्थाने खलु परन्त्वस्मन्मते ये ये मूर्खा यस्मिन् यस्मिन् विषयविशेषे प्रवीणास्ते तत्तद्विषये स्वस्य विशिष्टेन प्रकारेण प्रचारं साधयेयुस्तदेवास्माकं मूर्खाणां सर्वदिग्विजयः सम्भवेत्। अतो ये हि मन्त्रसिद्धा मार्मिका मूर्खास्ते ऽवदधतु—

कौपीनं भसितालेपो दर्भा रुद्राक्षमालिका।
मौनमेकासनं चेति मूर्खसञ्जीवनानि षट्॥
आनन्दबाष्परोमाञ्चौ यस्य स्वेच्छावशंवदौ।
किं तस्य साधनैरन्यैः किंकराः सर्वमानवाः॥

विरोधिदलस्य नीतिस्तावदियमेव भवितुमर्हति—

परच्छिद्रेषु हृदयं परवार्तासु च श्रवः।
परमर्मणि वाचं च मूर्खाणामसृजत्प्रभुः॥

श्रुत्वैवैतद्वचस्तत्र मूर्खसम्मेलने सदस्याः 'साधूक्तं संशोधनम्! सम्यग् भणितम् मूर्खप्रकाण्डेनानेन महामूर्खमहाभागेन! प्रचारनीतावस्य संशोधनं सर्वैरस्माभिरेकमतैः स्वीक्रियते!!

अन्ततः सभापतिमहोदयः साटोपमुवाच अयि मान्या मूर्खशिरोमणयः सदस्यमहाशयाः! सम्मेलनाधिवेशनस्यास्य जायमानस्य समयोऽतीव व्यतीयाय। पुनः कैश्चित् सदस्यैर्द्यूतप्रतियोगितायां भागो गृहीतव्योऽस्ति, कैश्चिच्चाटुकारैर्मन्त्रिण आराध्या भवन्ति, केषांचित् सुराराधनसन्ध्यासमयोऽतिसंनिकटस्ततोधिवेशनस्यास्य कार्यकलापास्तावदद्यात्रैव विरमन्ताम्। सति सम्भवे श्वो वा परश्वो वा सप्ताहान्ते, मासान्ते, वर्षान्ते वाऽवशिष्टं कार्यजातं सम्मेलनस्य यथेष्टं सर्वमूर्खाणां सम्पत्स्यते। अत्राद्य यत्कार्यं सम्पादितं श्रीमद्भिः सर्वैर्मूर्खैस्तत्पुरुषत्रयाविध पर्याप्तमिवाभाति नः।

धन्या मूर्खाणामस्माकं सभापतयः। अनुक्तमपि सर्वमस्मद्धृदयगतं तत्त्वतो विदन्ति भवन्तः। साकमेव धिक्कारवादैर्धन्यवादाः प्रदीयन्ते श्रीमद्भ्यः!

अथ पुनः किमपि विवक्षुरिव मन्त्रिमहाशयो यावद्भाषणायोत्थाय रंगमञ्चमायाति तावदेव सर्वे मूर्खास्ततः पलायाञ्चक्रिरे। केवलं कार्यकारिण्याः सदस्या एव हि तत्र दिग्भ्रान्ता इव तस्थुर्मिथो मुखान्यवलोकमानाः सम्मेलनाधिवेशनस्य साफल्येन हृष्टाः प्रहृष्टाः सन्तः कृतकार्यतामात्मीयां प्रशंसन्तो हसन्तः साट्टहासं कोलाहलं च वितन्वानाः क्रमेण स्वाऽभीष्टा दिशो जग्मुः।

मान्या विद्वांसः! यद्यपि लेखस्यास्य प्रकाशनं होलिकावसर एव समुचितमासीत् तथापि, परिस्थितिवशात् न तथा कर्तुमपार्यत, अतः सम्प्रति सोऽयं लेखो 'भारती' पाठकानां विदुषां मनोविनोदाय प्रकाश्यते इति। —मधुपः

मनोविनोदकणिका—

सम्बन्धी

श्रीमान्— 'मार्गस्थं गर्दभं दृष्ट्वा कश्चिद् बाबूमहाशयः।
स्वभार्यामवदत् कान्ते! सम्बन्धी तव दृश्यताम्'।

श्रीमती— 'विवाहानन्तरं जातः सत्यं सम्बन्ध्ययं मम'॥ —मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ होलिकाष्टकम् ❀

गीतिकारः – श्रीब्रह्मदत्तः शर्मा, जामनगरम्,

द्रढयति सम्यग् गात्रं, छात्रं कुरुते गुणैस्तथा क्षात्रम् ।
दात्रं शिष्टगुणानां, श्रद्धापात्रं तदपि 'होली' ॥१॥

कपिलम् पिङ्गलकं वा, बभ्रु वा किंशुकाश्लिष्टम् पिष्टम् ।
कुङ्कुमाटलकं वा, धातकीकमलकिञ्जल्कवत् ॥२॥

सर्षपपीतं चित्रं, गोधूमसौवर्णं वपुर्दधती ।
पुष्पैरञ्चितमञ्चा, प्रकृतिनटी सुरोचतेतराम् ॥३॥

सुरभिमनोज्ञामोदा, सुमनोहरसुमनोनुदितमनोजा ।
उपहरति मनोजाय, रतिमति वितीकरोतीव ॥४॥

रक्तं यदि वा पीतं, हरितं नीलं च जम्बुफलसदृशम् ।
नारङ्गं कृष्णं वा, 'कोलतार' पूर्णं वाऽपि मेचकम् ॥५॥

एते रञ्जयन्ति वै परस्परं क्रीडन्ति मोदकामाः ।
रङ्गैश्चित्रितगात्राः, लोकाः प्रकृतिमनुकुर्वन्ति ॥६॥

रक्तमबीरगुलालम्, पाटलकालक्तकमनश्शिलाऽऽलम् ।
कालं वाऽपि करालं कियच्छोभते रङ्गजालम् ॥७॥

सकलं लुनातु विकलं, तनोतु नति सुनोतु सौमनस्यम् ।
चिनोतु साद्गुण्यचयम्, पुनातु 'होलिका' सर्वान्नः ॥८॥

गिरने से पहले उनकी रक्षा करें

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय ? इसके लिए **उदयपुर का गाय छाप ब्राह्मी आँवला तैल और काला दन्त-मन्जन** सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल घने तथा लम्बे और आपके दाँत चमकीले तथा मज़बूत रहेंगे।

इलाज से बचाव बेहतर है !

आयुर्वेद औषधालय [illegible] लिमिटेड [illegible]

गाय

छाप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संगृहिताः समाचाराः

काउण्ट जोसफ एल. लांगरेंज (१७३६–१८१३) स्वकीये सप्तदशवर्षात्मके वयसि इटाली देशस्य टोरिनोनामकस्य स्थानस्य आर्टिलरी सैनिक कालेज इति विद्यालये गणित-विषयस्य प्राध्यापकोऽभूत् ।

—०—

फ्रांसदेशस्य रेमायरमाउण्ट नामके स्थाने किलैकं प्रार्थनागृहं (चर्च) विद्यते, यद्धि शत-वर्षाणामनन्तरं केवलमेकवारमुदघाटचत । तदेतत् प्रार्थनाभवनं १९९ वर्षाणां समये केवलम् वारद्वयमेवोद्घाटितम् । अस्य प्रार्थनाभवनस्य निर्मातुः (१७६४) अयं निर्णयोऽभूद् यदेकस्यां शताब्द्यामेकैव प्रार्थना पर्याप्ता भवितुमर्हतीति।

—०—

द्वितीयविश्वयुद्धस्य समये केवलं जिब्राल्टर-मात्रमेवैतादृशं सैनिकं स्थानमभूद् यत्र कदापि अन्धकारो (ब्लेक आउट) नाक्रियत । स्पेनदेश-सीम्नः समागच्छत् प्रकाशो जिब्राल्टरस्य दुर्गम-न्धकाराच्छादित कर्तुमसम्भवमिव करोति स्म । परिणामतो दुर्गमिदं सुरक्षितं विधातुं सर्वतोऽ-स्मिन् दुर्गे तीव्रः प्रकाशो निःक्षिप्यते स्म ।

—०—

साउथ बोल्ड (इंगलैंड) स्थानस्य निवासी जेम्स मैग (१७९७–१८९०) नामा मानवः सदैव प्रातर्विलम्बेन जजागार । स्वस्य ९३ वर्षीये दीर्घायुषि स नैकवारमपि सूर्योदयं ददर्श ।

—०—

केनिया (अफ्रीका) देशे एकमात्रस्य कन्या-सन्तानस्य कर्णयोः प्रतिवर्षं नवीनं कर्णभूषण-युगलं जीवनपर्यन्तं परिधाप्यते ।

—०—

एनुअलरी कैटरपिलरनामा जीवविशेषः शृङ्खलाबद्धरूपानण्डान् सूते । सैषाण्डशृङ्खला मुद्रिकासंहतिरूपेण कस्यचित् फलवतो वृक्षस्य शाखां सर्वतो बलिता सन्तिष्ठते । इमेऽण्डाः परस्परमेतावद्दृढतया संयुक्ता भवन्ति यन्महान् प्रभञ्जनो वा झंझावातोऽपि च नेमानण्डान् पृथक्कर्तुं प्रभवति ।

—०—

इंगलैण्डदेशे एक्समूर-वनविभागस्य संरक्षको जेम्सबोवी (१६२२–१६९५) प्रत्येकस्य स्वप्नस्य लेखनाय दीपवर्तिकां प्रज्वाल्य, कर्गदं, लेखनीं मषीपात्रं च स्वसमीपे निधाय स्वपिति स्म । इत्थं स ४३ वर्षपर्यन्तं कुर्वाणोऽस्थात् ।

—०—

पैरिसनगरे १८३४ वर्षे इयोलिननामकमेकं मरुत्वरयानं परीक्षितमभूद्यस्य संचालनं वस्त्रा-ञ्चलैः क्रियते स्म ।

—०—

विख्यातस्य कवेः जोसफ एडीसनमहाशयस्य पुत्रो शर्लाट एडीसन (१७१९–१७९७) विक्षिप्तासीत् । सत्यप्येवं तस्याः स्मरणशक्ति-रेतावत्तीव्राभूद्यत् यत्तस्या ३०० पृष्ठात्मकः शब्दकोशोऽक्षरशः कण्ठस्थो बभूव सा च कर्मापि विषयं श्रुत्वा शब्दशस्तादावृत्तिं कर्तुं पार-यते स्म ।

अफगानिस्ताने हिंदुकुशपर्वतवासिनः श्येन-पक्षिण आखेटकर्तारः स्वदेहं श्येनस्यैव बृहदा-कारैः पक्षैराच्छाद्याखेटं कुर्वन्ति ।

—०—

सिनाई पर्वतस्य सेंटकेथराइननाम्नि मठे मानवमुण्डानां कूटं संस्थापितमास्ते । यदा कोऽपि च स्थानीयो निवासी म्रियते तदास्मिन्मुण्डकूटे मुण्डमेकं वृद्धिं गच्छति । नव्यः शवः सर्वतः प्राचीने शवगर्ते भूमिसात् क्रियते । तस्मिन् गर्ते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राक् संस्थापितस्य शवस्य मुण्डमुद्धृत्य कूटेऽस्मिन्निक्षिप्यते ।

—०—

बर्लिननगरे (शर्मण्यदेशस्य) एकेन पशुवंशस्य विशेषज्ञेन तथाविधः शशकः परिपालितो यस्य भारः सार्द्धषोडशपौण्डप्रमाणोऽभूत् ।

फरवरी १९६८ सरितापत्रिकातः साभारम् ।

—०—

अमरीकादेशेऽर्द्धनिर्मितस्यैकस्य युद्धपोतस्य 'सुपीरियर' इत्याख्यस्य घट्टे बन्धनाय नवसहस्रपौण्डभारो लोहरज्जुर्बभूव । स्वातन्त्र्य-युद्ध-समये-आंग्ल-जनानामधिकाराद्रक्षणाय सन् १८१३ ई० वर्षे शतसंख्याकाः सैनिकास्तमिमं लोहरज्जुं स्कन्धेष्वारोप्य दिनद्वये ओस्बेगोस्थानात् विंशमीलदूरमुत्थाप्य निन्युः । अस्य लोहरज्जोर्व्यासो द्वाविंश-इञ्च-प्रमाणोऽभूत् । येन पथा स एष लोहरज्जुरनीयत, तमद्यापि च 'केबलट्रैल' इति कथयन्ति जनाः ।

—०—

एम्पा लॉरेंसनामकात् स्थानादेका काचकूपिका (बोतल) सन् १९०६ ई० वर्षेऽन्धमहासागरे प्राक्षिप्यत । सैषा काचकूपिका त्रिंशन्मासानन्तरं दक्षिण-आस्ट्रेलियादेशस्य गिचेनखातस्थाने समुपालभ्यत । एतावति समये सैषा काचकूपिका त्रयोदशसहस्रमीलप्रमाणां यात्रां चकार तथाऽन्धमहासागरं हिन्दमहासागरं च पुप्लुवे ।

—०—

साल्ट लेक सिटी (ऊटाह) इतिनगरे सन् १८६७ ई० वर्षे ८० फुट-ऊर्ध्वा, २५० फुट-दीर्घा तथा १५० विस्तृता चैका मारमन-रक्षास्थली (बहुविवाहप्रथावतां रक्षार्थमाश्रयस्थलम्) विनिर्मिताभूत् । अस्याः पटलस्य नीचैर्मध्यगतः कोऽप्याधारो नासीत् । अत्र लोहकीलस्थाने काष्ठकीलास्तथा चर्मोपयुज्यते स्म । अस्य रक्षास्थलस्य ध्वनिगुणस्तावत् पूर्णोऽभूद्यदत्र एकाञ्चलतो जातः सामान्योऽपि ध्वनिरपराञ्चले सुस्पष्टं श्रूयते स्म ।

आर्चीबाल्ड लेटन (१७८४–१८४१) महाशयो न कदापि किमपि पुस्तकं लिलेख, तथापि सन् १८२२ वर्षे वस्त्रस्य पुस्तकाच्छादनं (जिल्द) आविष्कृत्य साहित्यस्य स्थायिकरणक्षेत्रे स्वस्थानं सुस्थिरं चकार ।

—०—

वियानानगरस्य जोहन्ना स्टीन इति कन्यैका तथा प्रच्छन्नरूपेण बालकव्यपदेशात् परिपाल्य संरक्षिता यदस्या उपपितापि औरसः पितापि च जातुचित् परिचेतुं नापारयामासतुर्यदसौ कन्यकासीदिति । सा आस्ट्रियादेशस्य-इग्लैंड-देशस्य च सेनयोः समस्थात् । सा सप्तवारं क्षतविक्षताभूत् तथा च वारत्रयं शत्रोरधिकार वशगा बभूव । तथापि सा २४ वर्षान् यावत् सैन्यस्य सैनिकत्वेन तस्थौ तथा गच्छति काले तदिदं रहस्यमज्ञायत यत्सा किलैका स्त्रीरभूदिति ।

—०—

मैडिसन (न्यूयार्क) स्थानस्यैको जनः फेनियास विलियम्स (१८०८–१९११) स्वस्य द्वादशवर्षात्मके वयसि सर्वविधेभ्यः कार्यकलापेभ्यो विश्रामवृत्तिं गृहीत्वा तटस्थो बभूव । ९३ वर्षायुषि सः प्रथमवारं स्नानमाचचार । १०७ वर्षमिते स्वकीये दीर्घजीवने स नैकवारमपि च रुग्णो बभूव ।

—०—

इंगलैण्डदेशे बारोब्रिजनामकस्य निवासी फ्रांसिस बोल्टनस्य (१७३७–१८२०) शिरस्तावदेतावदुष्णं बभूव यच्छीततौ ग्रीष्मे च सः स्वशिरोवस्त्रम् (हैट) हिमशीतलेन जलेन पूर्णतः सम्पूर्य परिदधे ।

—०—

मैगुईवृक्षस्य पादपो जन्मग्रहणे, वृद्धौ, पुष्पपल्लवफलपरिपाके तथा स्वजीवनसमाप्तौ च द्वादशवर्षात्मकं समयं व्यत्येति । अस्य पुष्पाणां मूलयष्टिका २० फुटप्रमाणा दीर्घा भवति या संसारे सर्वतोऽधिकं लम्बास्ते ।

अनु० श्रीगणेशरामशर्मा,

फरवरी ६८ सरितापत्रिकातः साभारम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजतरंगिण्यां चित्रिता भारतकलाः

ले० श्रीसुभाषो वेदालंकारः, जयपुरम्

नाट्यकला

काव्येषु नाटकं रम्यं, नाटकान्तं कवित्वम् इत्यादिवाक्यानि नाट्यकलामहत्त्वं प्रतिपादयन्ति। राजतरंगिण्यां चित्रिते भारते नाट्यकला चरमोत्कर्षं प्रापेति अनेकेषां नाटकानां, नाटकसिद्धान्तानां च उल्लेखेन दृष्टिगोचरो जायते।

राजतरंगिण्यां चित्रितः समाजः नाटकविलोकने अधिकां रुचिं दधौ। समये-समये नाटकानामभिनयो बूभव। इदं खलु नाटकं दशविधस्य रूपकस्य प्रधानतमो भेदो वरीवर्ति। **'अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते 'रूपकं तत्समारोपात्'** इति दशरूपक-वाक्यानुसारम्। किन्तु नाटकस्य गुणबाहुल्यं विलोक्य रूपकस्य व्यवहारः नाटकपदेन विधीयते। कल्हणः अपि क्वापि रूपप्रयोगं न चकार। नाट्यशब्दस्य[1] नाटकशब्दस्य वापि प्रयोगमकार्षीत्। नाटकं खलु तस्मिन् समये दर्शनीयमभूत् **"नाट्यं सर्वजनप्रेक्ष्यं"**, विविधोत्सवेषु तत्प्रदर्शनमजायत एतादृशेष्वसरेषु नटाः एकत्रीभूय प्रेक्षिलोकस्य मनोरंजनं चक्रुः। "क्रमात् प्रववृते सोऽथ नट-चारण-संकुलः। प्रेक्षिलोकसमाकीर्णस्तत्र यात्रामहोत्सवः १-२२२

नाट्यकलायाः मर्मज्ञस्य भरतस्य तत्प्रणीतनाट्यशास्त्रस्य चापि कविरुल्लेखमकार्षीत्। भरतशास्त्रानुसारं नाट्य-संगीतनृत्तप्रभृतीनां शिक्षाणामपि प्रचारः अभवत्। राजा जयापीडस्ता विद्या जज्ञौ[2]। तदिदमनुमीयते यन्नाट्यकलां प्रति महती रुचिरासीत् भारतीयसमाजे। कल्हणः केषांचित् नाट्यकलाविदां कवि-प्रवराणां तेषां नाटकानां चापि वर्णनं व्यधात्। द्वितीयतरंगे चन्दको नाम कविरुल्लिखितः यो हि सर्वजनप्रेक्ष्यं नाटकमेकं निर्ममे। अस्य नाटकस्यानेकशः प्रदर्शनमभूदित्यप्यनुमीयते। तृतीयतरंगे महाकविः भवभूतिः ससम्मानमुल्लिखितः। भवभूतेः महावीरचरितम्, मालतीमाधवम्, उत्तररामचरितम् चेति नाटकत्रयं सुविख्यातं नाम। राजतरंगिण्या भारते अपि तेषां सम्मानः प्रचारः चाभूत्। कालिदासमाघप्रभृतीनां नाटकान्यपि प्रचलितान्यभूवन्। एतेन नाट्यकलायाः चरमोत्कर्षः द्योत्यते। नाटकस्य साफल्यं तदैवामन्यत यदा तत् विद्वद्भिः प्रशंसां प्राप[3]। नाटकस्य महत्ता तत्प्रयोगे एवातिष्ठत्। सत्वादियुक्ततया तत्कालीनसमाजेन सह नाटकस्य घनिष्ठसंबंधः अभूत्।

नाट्यकलायाः विकासः — नाट्यस्य नाटकस्य वा प्रायेण सर्वेषामपि अंगानां, अनेकपारिभाषिकशब्दानां च प्रचलनं तदासीत्।

रंगः — सम्पूर्णनाट्यगृहग्रहणाय कविः रंग-शब्दस्य प्रयोगं करोति। रंगस्योल्लेखेनैव रंगमंच—अभिनेता-दर्शक-गणेति त्रयाणां संग्रहो जायते।

नाट्यमंडपः — नाट्यमंडपेन तत्स्थानं गृह्यते, यत्र नाटकमभिनीयते स्म। नाट्यमंडप एव भरतस्य नाट्यशास्त्रे प्रेक्षागृहं इत्यपि निगदितः।

प्रेक्षिलोकः — सर्वजनप्रेक्ष्यस्य नाटकस्य दर्शकः प्रेक्षिलोकः प्रेक्षको वा न्यगद्यत[4]।

(१) २-१६। (२) ४-४२२। (३) २-१६, ४-१४४। (४) ७-१६०६, ८-३४६, २८२५, ७-७०७; ८-८५८, १-१२२, ७-१६०६, २-१५६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेपथ्यम्—इदं तत्स्थानमभूत्, यत्र पात्राणि शृंगारं विधाय अभिनयं कर्तुं प्रस्तूयन्ते स्म। अद्यत्वे तदेव 'ग्रीनरूम' इति निगद्यते।

अभिनयः— नाटकस्य मूलपात्राणां, भावानां, अंगविक्षेपाणां, अवस्थानां चानुकृतिरेव **अभिनयः** निगद्यते, **अवस्थानुकृतिर्नाटयम्** इति दशरूपकवाक्यात्। कल्हणः अभिनयस्योल्लेखं 'नाट्यम्' इति मूलशब्देनैव चकार। स चासौ अभिनयः आंगिक-वाचिक-सात्विकभेदैः त्रिविधः प्रोक्तः **विडम्बना** पदेनापि कविः अभिनयोल्लेखं करोति।[५]

अभिनेता— अभिनयस्य कर्ता एव अभिनेता कथ्यते, स च नाटकेषु शैलूषः नटश्चाभिहितः, कविः उभावपि शब्दौ प्रयुज्य तदुल्लेखमकार्षीत। **"शैलूषस्यैव राज्यरंगेऽस्मिन्" "नटस्येव विडम्बनाम्"**। नटते अभिनयं करोतीति नटः इति तत्व्युत्पत्तिः।

"छन्दोनुवृत्या स प्राप नटस्येव विडम्बनाम्" इति पद्यार्थे कविः नटस्य वेषपरिवर्तनं सूचयति। वेषपरिवर्तनं विधाय नटित्वा च नटः जनानुरंजनमकार्षीत्[६]।

जवनिका—अयं शब्दः त्रिषु स्थलेषु कविः प्रायुंक्त। भाषायां 'पर्दा' इति प्रसिद्धा एव जवनिका-पदेन नाटकेषु प्रयुज्यते। जवनिकायाः पतनमेव नाटकेषु पटाक्षेप इत्यस्ति।[७]

संगीतम्—संगीतमपि नाट्यकलायाः प्रधानमंगमासीत् अस्य च विस्तरेणोल्लेखः संगीतकलाप्रसंगे विधास्यते।

हास्यम्—नाटकस्य प्रधानं लक्ष्यं जनानामनुरंजनमासीत् अत एव नाटकेषु संगीतेन समं हास्यमपि प्रयुज्यते स्म, तदर्थमेव च नाटकेषु विदूषककल्पना क्रियते। कविः हास्योल्लेखमप्रत्यक्षेण चकार।

नर्म— हास्योत्पादनाय कैशिकीवृत्तिः प्रयुज्यते नाटकेषु, तत्रापि च नर्मकथाः प्रायेण प्रायुज्यन्त। **"वैदग्ध्यक्रीडितं नर्म प्रियोपच्छन्दनात्मकम्। हास्येनैव स शृङ्गारमयेन विहितं त्रिधा॥"** इति सभेदं तल्लक्षणं प्रतिपादितं दशरूपके। कल्हणः स्थानद्वये,[८] नर्मशब्दप्रयोगं विधाय तन्महत्वं सूचयामास।

इत्थं च स्फुटः ननु भारते नाट्यकलायाः महान् प्रचारः उन्नतिश्चेति।

संगीत-कला

"ललितकलासु संगीतस्य महन्महत्त्वं पुराकालादस्ति। कविः कल्हणः अपि नाट्यकलावत् संगीतकलाया गरिमाणमनुभूय, तत्प्रचारस्यासकृत् संकेतान् ददाति। भारतीयविचक्षणानां मते भाषा संगीतं चेति एकस्या एव विद्याया द्वे अंगे खलु। संगीतव्याकरणयोः तत्त्वसूत्रं माहेश्वरसूत्राण्येव वर्तन्ते। व्याकरणे अ-इ-उ-ऋ-लृ इति पंच शुद्धस्वराः सन्ति। ए-ओ-ऐ-औ चेति मिश्रितस्वरा निगदिताः। प्रथमस्य स्वरत्रयस्य अ-इ-उ इत्यस्य दीर्घरूपाः आ-ई-ऊ इति विद्यन्ते। इत्थं च द्वादश स्वरा भवन्ति। संगीतस्य सप्तस्वरेष्वपि मध्यम-गान्धार-ऋषभ-षड्ज-धैवताख्याः पंच प्रधानस्वराः, पंचम-निषादौ गौणस्वरौ, च वर्तन्ते केचित्तु धैवतं निषादं च गौणं मन्यन्ते अवशिष्टाश्च पंच प्रधानास्तेषां मते। काकली-अन्तरस्वराख्यौ द्वौ मिश्रितस्वरौ स्तः। इत्थं च संगीतशास्त्रे अपि स्वरा द्वादश एव। कल्हणः स्वराणामेतेषां प्रत्येक्षेणाप्रत्यक्षेण च संकेतं चकार। नाट्यप्रसंगे सः संगीतमप्युल्लिलेख। वस्तुतः अपूर्णं खलु नाट्यं भवति संगीतं विना त्रिविधं च तत् प्रोक्तं गीत-वाद्य-नृत्यभेदेन।

क्रमशः

(५) २-१६, ७-७०७, ८५८, ५-२०८। (६) ८-३४६ १-१२२, ७-१४१३, १७३१, ८-२८२५, २-१५६, ५-२०८, ३-२१८। (७) ७-८५३, १७३१, ८-२८८३। (८) द्वितीय-प्रकाशः श्लोक ४८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Phone : **23-5661 (3 LINES)**

FOR THE BEST

CARPETS, SOFA-CUM-BEDS
UNIFORMS

FOR HOME, OFFICE, INDUSTRY,
FOLDING ALUMINIUM FURNITURE.

ASK

HALL & ANDERSON

Props : **SHREE MADHUSUDAN MILLS LTD.**

Park Street, CALCUTTA-16

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपने संस्थापक की पुण्य स्मृति में

राष्ट्रधर्म

– का –

पं० दीनदयाल श्रद्धांजलि अंक

(जून में प्रकाश्य)

जिसमें आपको

- महामनीषी, विचारक एवं कृतिकार श्री दीनदयाल जी की अर्थनीति, राजनीति एवं एकात्म मानववाद संबंधी लेखन का एक साथ अनूठा चयन,
- माने जाने व्यक्तियों द्वारा उनके सर्वांगीण व्यक्तित्व का अनेक क्षेत्रों में मूल्यांकन,
- आधिकारिक और अंतरंग व्यक्तियों द्वारा प्रेरक एवं मार्मिक प्रसंग,
- अब तक अलभ्य, अज्ञात ऐसे अनेक चित्र एवं व्यक्ति-जीवन तथ्य

तथा

- कवियों एवं प्रबुद्ध लेखकों द्वारा अर्पित भावमय शब्द चित्र मिलेंगे

जिसे

- आप चिर काल अपने पास सुरक्षित रखेंगे।
- मित्रों को भेंट करना चाहेंगे।

पाठक एवं अभिकर्तागण अभी से अपनी प्रतियाँ सुरक्षित करायें।

पाठकों और लेखकों से निवेदन है कि श्री दीनदयाल जी से संबंधित संस्मरण, प्रेरक प्रसंग, उनके महत्वपूर्ण पत्र तथा चित्र कृपया शीघ्र भेजें।

वर्ष प्रतिपदा के शुभ अवसर पर—

२९ मार्च, १९६८ को जालन्धर से

नए हिन्दी दैनिक

★ जन-प्रदीप ★

का शुभारम्भ

* देश-विदेश के ताजा समाचार

** उच्चस्तरीय सामयिक लेख तथा टिप्पणियां

*** सुरुचिपूर्ण एवं मनोरंजक सामग्री से भरपूर सप्ताह में तीन विशेष संस्करण।

मूल्य केवल १५ पैसे प्रति परचा

वार्षिक चन्दा	....	५४.००
छः माही	....	२७.००
त्रैमासिक	....	१४.००
मासिक	....	५.००

सचित्र, प्रदीप लिमिटेड, जालन्धर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पण्डितश्रीपाददामोदरसातवलेकरमहाभागस्य

* अभिनन्दनम् *

राजधान्यां दिल्ल्यां गतरविवारे (अप्रेलमासस्य १४ तारिकायां) सायं श्रीराष्ट्रपतिद्वारा पद्मभूषणोपाधिना सम्मानितस्य १०१ एकाधिकशतवर्षात्मके वयसि वर्तमानस्य वेदपण्डितस्य **श्रीसातवलेकर**महाभागस्य विशिष्टैर्नागरिकैस्तथा विभिन्नाभिश्च संस्थाभिर्भव्यमभिनन्दनमक्रियत ।

अभिनन्दनावसरे चास्मिन् राजधान्याः प्रमुखाः साहित्यकाराः पत्रकारास्तथा राजनीतिकार्थिकक्षेत्राणां सम्मान्याः सज्जनाः समासन् समुपस्थिताः । **श्रीमतोपराज्यपालेन आदित्यनाथझामहाभागेन** च श्रीसातवलेकरमहानुभावायाभिनन्दनग्रन्थः समर्पितः । सहैव च तदानीं श्रीमदक्षयकुमारजैन–श्रीमौलिचन्द्रशर्म–श्रीमण्डनमिश्र — श्रीजैनेन्द्रकुमारजैनप्रभृतिभिर्महानुभावैः पुष्पमालाः सादरं समर्प्यन्त ।

तत्र च सरसंघचालक–श्रीमाधवराव–सदाशिवगोलवलकरमहोदयः प्रमुखो वक्ता समवर्तत । भाषितश्च श्रीगुरुजीमहाभागेन यत् श्रीसातवलेकरमहाभागस्य सङ्घेन सह प्राक्तनो घनिष्ठश्च सम्पर्कः पूर्वत एवास्थात् । तथा च सोऽयं श्रीसातवलेकरमहाभागो महर्षिदयानन्दस्य परम्परायां वेदानामुद्धारं कृतवान् । सहैव सोऽयं महाभागो दीर्घजीवी कर्मशीलः सेवापरायणो राष्ट्रनिर्माणश्च स्वजीवनस्य ध्येयं मन्वानो मानवो वर्तते । अतोऽस्माभिः सर्वैरपि भारतीयैः सहयोगमार्थिकं प्रदायास्य महाभागस्य स्वाध्यायमण्डलस्य कृतेऽवश्यं साहाय्यं कर्तव्यमिति ।

किञ्चावसरेऽस्मिन् महापौर–श्रीहंसराजगुप्तमहोदयेन श्रीसातवलेकरमहोदयस्य कृते एकपञ्चाशत्सहस्ररूप्यकात्मकस्य धनराशेः समर्पणस्य घोषणाऽक्रियत । तथा चान्तेऽभिनन्दनसमितिसंयोजकेन श्रीवसन्तरावमहोदयेन समुपस्थितेभ्यो महानुभावेभ्यो धन्यवादाः प्रादोयन्त ।

गोहत्यानिरोधार्थं सत्याग्रह आवश्यकः

हरिद्वारे सम्पन्नस्यार्धकुम्भस्यावसरेऽत्र **जगद्गुरुशङ्कराचार्य-श्रीनिरञ्जनदेवतीर्थस्वामि** महाराजस्याध्यक्षतायां समायोजिते द्विदिवसीये सम्मेलने निर्णयोऽयं जातो यत् 'केन्द्रीयसर्वकारद्वारा संघटिता गोरक्षासमितिर्यदि शीघ्रमेव गोहत्यानिरोधार्थं सर्वकारानुरोत्स्यति तर्हि समितिः सत्वरमेव शांतिपूर्वकं सत्याग्रहं प्रारप्स्यते' इति ।

सम्मेलने चात्र ज्योतिष्पीठाधीश-जगद्गुरुशङ्कराचार्य-स्वामि **श्रीकृष्णबोधाश्रमहाराज**धर्मसङ्घसंस्थापक **श्रीकरपात्रिमहाराज**-श्रेष्ठि-**श्रीगोविन्ददास** प्रभृतिभिर्महानुभावैःसर्वकारो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽनुरुद्धो यद् यावद् गोहत्यायाः कलङ्को देशादस्माद् न दूरीभविष्यति तावज्जनता न सुखेन स्थास्यति' इति । तथा चात्र सम्मेलनेऽनेके धर्माचार्याः सन्तो महान्तो नेतारस्तथा प्रतिनिधयश्च समुपस्थिताः समभूवन् ।

गुरुकुलशिक्षापद्धेः आवश्यकता

गुरुकुलकांगड़ीविश्वविद्यालयस्य वार्षिकोत्सवे दीक्षान्तभाषणं कुर्वता **शिक्षाराज्यमंत्रिणा प्रो० श्रीशेरसिंहमहोदयेन** प्रतिपादितं यत् 'वर्तमानेऽस्मिन् युगेऽपि गुरुकुलशिक्षापद्धत्याः सुमहती उपयोगिता विद्यते, यतो हि गुरु शिष्ययोः पारस्परिको घनिष्ठः सम्बन्धः सञ्जायते । सहैवाध्ययनाध्यापनयोर्विशिष्टया शैल्या च गुरुकुलस्यच्छात्राणां कृते शिक्षा सुलभा तथा स्वल्पव्ययसाध्या वर्तते । एवमेव चात्रत्यानां छात्राणां चारित्र्यस्य तथा भाविजीवनस्य च आधारशिला सुदृढा भवतीति' ।

स्वतुतः प्रचलन्त्या अस्याः शिक्षाप्रणाल्या एवायं प्रभावो वर्तते यत् सम्प्रति छात्रा गुरून् नाद्रियन्ते, गुरवोऽपि प्रायश्छात्रेषु यथापूर्वं न स्निह्यन्ति । स्थाने-स्थाने प्रायः छात्रेषु अनुशासनहीनताया एव साक्षात्कारो भवति । अत एव विद्याध्ययनस्य समुचितं फलमपि गुरुभक्तिपराङ्मुखैश्छात्रैर्लब्धुं न शक्यते । पुरा हि 'विद्या ददाति विनयं .....इत्यादिसूक्तनुसारेण लब्धविद्याश्छात्राः सुविनीता भवन्ति स्म । अतो गुरुकुलशिक्षापद्धत्याः साम्प्रतमपि वर्तते महती आवश्यकतेति ।

—मधुपः

आप 'भारती' के लिए क्या कर सकते हैं

१. ७) रु० भेजकर ग्राहक बनिये ।

२. अपने परिचित मित्रों को सम्मानार्ह संरक्षक, विशिष्ट संरक्षक, साधारण संरक्षक, सन्मान्य सहायक, सहायक, आजीवन सदस्य अथवा स्थायी ग्राहक बनने को प्रेरित कीजिए ।

३. अपनी सुन्दर व विद्वत्तापूर्ण रचनाएं 'भारती' में भेजिए ।

४. 'भारती' में अपने व्यवसाय के लिए विज्ञापन दीजिये व दूसरों को प्रेरित कीजिये ।

५. धन भेजकर भारती को स्वावलम्बी बनने में सहायता कीजिये ।

६. 'भारती' के अभिकर्ता (प्रचारक) बनिए ।

७. 'भारती' की कमियाँ तथा सुधार के लिए हमें समय समय पर आपकी बहुमूल्य सम्मतियों से अवगत कराते रहिए ।

८. आपके नगर के बिद्वानों को 'भारती' में लेख सामग्री भेजने को प्रोत्साहित कीजिए ।

हमें विश्वास है कि श्रीमान् एक अथवा अनेक रीतियों से 'भारती' की सहायता के लिये अग्रसर होते रहेंगे ।

विनीत—**गिरिराज शर्मा, प्रबन्ध सम्पादक**

भरती भवन—गोपालजी का रास्ता, जयपुर (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाराणा-राजसिंहः

श्रीगिरिराजशर्मा शास्त्री, जयपुरम् ।

विक्रमसंम्वत् १७१० तः १७३७ वर्षपर्यन्तं मेवाडप्रदेशे महाराणा-राजसिंहः सिंहासनारूढ आसीत् । एष महाभागः स्वपूर्वपुरुषमहाराणा-सांगामहाराणाप्रतापसिंहवत् दिल्लीसिंहासनारूढैः मुगलशासकैः सह प्रबलानि युद्धानि कृत्वा समस्ते भारतवर्षे स्वबाहुबलस्य प्रख्याति प्रसारितवान् ।

महाराणाराजसिंहः राज्यसिंहासनारोहणानन्तरं मुगलशासनस्य मालपुरामण्डले आक्रमणमकरोत् । तात्कालिकः शाहजहांख्यो शासकः दिल्लीसिंहासनारोहणात् पूर्वं यदा एकदा विपद्ग्रस्तः आसोत् तदा तं महाराणाश्रीजगत्सिंहः उदयपुरे शरणं दत्तवान् । अतः सः तेन सह भ्रातृवत् व्यवहारं राज्यारोहणानन्तरमपि कृतवान् । अतः दिल्लीशासकेन शाहजहांमहोदयेन प्रत्याक्रमणस्य स्थाने केवलं इदं कथितम् 'राजसिंहः मम भ्रातृपुत्रोऽस्ति । यदि तेन किमपि बालसुलभं कृत्यं कृतं तर्हि नाऽस्ति मे चिन्ता । तेन प्रत्याक्रमणं न कृतम् ।

विक्रमसम्बत् १७१३ तमेऽब्दे शाहजहांशासकः अस्वस्थोऽभूत् तस्य पुत्रेषु सिंहासनार्थं संघर्षो यदाऽभूत् तदा तस्य एकेन पुत्र औरंगजेबः महाराणाराजसिंहं साहाय्यं याचितवान् किन्तु शाहजहांशासकस्य विरुद्धं श्रीराजसिंहेन सहयोगो न दत्तः ।

१७१७ विक्रमाब्दे भयानकं दुर्भिक्षं यदा सर्वत्र प्रदेशेऽभूद् तदा लक्षावधिजनान् दुर्भिक्षपीडितान् दृष्ट्वा महाराणाराजसिंहेन एकस्य विशालस्य जलाधारस्य निर्माणम् आरब्धम् । निर्माणे च सप्तवर्षाणि व्यतीतानि जातानि । नवनवतिलक्षरूप्यकाणि अस्य निर्माणे व्ययितानि जातानि । अस्य बन्धस्यावरोधेन यो जलाशयो निर्मितोऽस्ति तस्य नाम 'राजसमद-झील' इत्यस्ति । अस्य विस्तारः षड्क्रोशपरिमितोस्ति । इदं उदयपुरनगराद् द्वादशक्रोशदूरे उत्तरस्यां दिशि वर्तते ।

आम्बेरनरेशस्य महाराजस्य जयसिंहस्य तथा जोधपुरनरेशस्य महाराजयशवन्तसिंहस्य च परलोकगमनानन्तरं औरङ्गजेबशासकेन हिन्दुसमाजे एकः "जजिया" नामकः करः स्थापितः । केवलं मुहम्मदीया एव अस्मात् करात् मुक्ता आसन् । अस्य विरोधे महाराणाराजसिंहेन औरङ्गजेबं प्रति तत् प्रख्यातं पत्रं लिखितमासीत्-यस्य प्रसिद्धे तिहासलेखकेन कर्नलटाडमहोदयेन मुक्तकण्ठं प्रशंसा कृता ।

जोधपुरस्य महाराजजशवंतसिंहस्य बालपुत्रं अजीतसिंहं औरङ्गजेबः स्वाधिकारे कर्तुमैच्छत्, किन्तु श्रीदुर्गादासः महाराणाराजसिंहस्य साहाय्येन तं बालं दिल्लीतः सुरक्षितं मारवाडराज्ये आनीनवान् । अनेन अतिक्रुद्धः औरङ्गजेबः मेवाडप्रदेशे आक्रमणं कृतवान् ।

१७३५ विकमाब्दे औरङ्गजेबेन सम्पूर्णं मेवाड़प्रदेशं विनाशियतुं अतिप्रबलसैन्येन सह आक्रमणं कृतम् । राजसिंहोपरि संक्रुद्धः स स्वपुत्रं अकबरं बङ्गप्रदेशाद्, अजीमं काबुलात् तथा मुअज्जमं दक्षिणप्रदेशात् सम्पूर्णेन सैन्येन सह आहूतवान् । एतान् च सैन्यसमूहान् स्वसैन्येन सह सम्मेल्य सः स्वपुत्रैः सह मेवाडप्रदेशेऽपि आक्रमणं अकरोत

चित्तौडगढं, माण्डलगढं, मन्दसौरगढं इत्यादीनि अनेकानि गढानि विजित्य स समतलां भूमिं परित्यज्य पश्चिमदक्षिणसीमास्थानां पर्वतानां सन्निकटं प्रापत् । तत्र महाराणाराजसिंहः स्वसैन्यं त्रिषु विभागेषु सज्जितं कृत्वा नियोजितवान् । एकं भागं कुमारस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जयसिंहस्य नेतृत्वे अर्बुदपर्वतस्य शिखरे अवस्थापितं कृतवान् द्वितीयं भागं द्वितीयकुमारस्य भीमसिंहस्याधिकारे पश्चिमे सोमाप्रदेशे प्रस्थापितवन्, तेन गुर्जरप्रान्तादागतस्याक्रमणस्य अवरोधार्थं इयं रणसज्जा कृतासीत् । तृतीयस्य सैन्यभागस्य नेतृत्वं स्वयं महाराणाराजसिंहेन कृतमासीत् । वेनयानघट्टस्य क्षेत्रे स एतदर्थं सुसज्जितः आसीत् यत् 'यदा मुगलसैन्यं दैबारोघट्टे प्रवेशं कुर्यात् तदा तस्योपरि प्रबलाक्रमणं स्यात्' ।

अकबरः पञ्चशतसैन्यन सह दैबारीघट्टं प्रविश्य उदयपुरनगरं प्राप्तवान् । मार्गे तस्योपरि आक्रमणं न संजातम् । उदयपुरे अकबरेण मन्दिराणां ध्वंसार्थम् आज्ञा प्रदत्ता । तत्रस्था अवशिष्टाः क्षत्रिया अन्ये च तेन सह युद्धं कृत्वा आत्माहुतिं दत्तवन्तः । अकबरो यदा तत्र निश्चिन्तो भूत्वा अतिष्ठत् तदा कुमारः जयसिंहः तस्योपरि सहसा आक्रमणं कृतवान् । तेन समग्रान् मुहम्मदीयान् तत्र युद्धे निहत्य अकबरं गृहीतवान्, स च सन्धेः वचनं दत्त्वा मुक्तोऽभूत् ।

औरङ्गजेबस्य सैन्यस्य द्वितीयो भागो दिलाबरखानस्य अधिकारे मारवाडप्रदेशस्य दिशया देसूरोघट्टं प्रविश्य मेवाडभूमिं प्रविष्टवान् । तस्य सैन्यस्यापि च तत्र प्रथमं तु आक्रमणेनावरोधो न कृतः किन्तु किञ्चित् कालानन्तरं महाराणाराजसिंहस्य प्रख्यातेन वीरेण श्रीविक्रमसिंहसोलंकीमहोदयेन श्रीगोपीनाथराठोड़महोदयेन च आक्रमणं कृत्वा तत् सैन्यं द्वितीयवारं पराजित्य पलायने बाध्यं कृतम् । तेषां समस्तं शस्त्रादिकं गृहीतम् । आक्रमणस्य उभयस्थं विजयवृत्तं श्रुत्वा महाराणाश्रीराजसिंहेन स्वयं औरङ्गजेबस्य सैन्योपरि आक्रमणं कृतम् यः दैबारीघट्टस्य समीपे स्वसैन्येन सह अवस्थित आसीत् । तस्मिन् समये दुर्गादासराठोडः अपि महाराणाराजसिंहेन सह तत्र आसीत् । मुगलसैन्ये च युरोपदेशीयाः शतघ्नीचालकाः कुशलाः सैनिका आसन्, किन्तु ते सर्वे महाराणाराजसिंहस्य आक्रमणस्याग्रे स्थातुं नाशकन् । अनेकानि शतघ्नीत्यादीन्यस्त्राणि अन्यत् वस्तूजातञ्च त्यक्त्वा तैः पलायितम् । तस्य सहस्रशः सैनिकाः पञ्चत्वं गताः । महाराणाराजसिंहस्य सहस्रशः नरवीराः सैनिका अपि च दिवङ्गताः । तदनन्तरं चित्तौडगढस्य समीपं शीशोदियासैनिकैः पुनः तस्योपरि आक्रमणं कृतं, तत्राऽपि च पराजयं प्राप्य औरङ्गजेबः मेवाड़भूमिं त्यक्त्वा अजमेरनगरं गतवान् ।

कुमारो भीमसिंहः महाराष्ट्रप्रदेशस्य सूरतनगरात् परावृत्य अकबरस्योपरि प्रबलेन पराक्रमेण आक्रमणं कृतवान् । अकबरः औरङ्गजेबेन प्रेषितेन अपरिमितसैन्येन सह सज्जितः आसीत् । अनेकबारं तं अकबर रणाङ्गणे पराजित्य तं भीमसिंहः हतोत्साहं कृतवान् तदनन्तरं अकबरः राजपुत्रैः सह सन्धिं कृतवान् । इत्थं स्वल्पे एव काले सर्वत्र विजयं प्राप्य महाराणाराजसिंहः राठोडवीराणां सम्मत्या अकबरेण सह गोपनीयां वार्तां कृत्वा तं औरङ्गजेबस्य स्थाने दिल्लीसिंहासने आरोहणार्थं सर्वविधसाहाय्यस्य वचनं दत्तवान्, किन्तु कालान्तरे इदं कार्यं सम्पन्नं नाऽभूत् ।

अकबरः दक्षिणप्रदेशं गत्वा छत्रपतिश्रीशम्भाजीमहाराजेन सह मिलितोऽभूत् । अनेन औरङ्गजेबः अत्यधिको खिन्नोऽभूत् तेन राजस्थानीयां युद्धेच्छां समाप्य महाराणाराजसिंहस्य समीपे सन्धिपत्रेण सह बीकानेरनरेशं श्रीश्यामसिंहम् प्रेषितवान्, किन्तु श्रीश्यामसिंहस्य तत्र प्रापणात् पूर्वमेव महाराणाराजसिंहः परलोकं गतोऽभूत् । तस्य ज्येष्ठः कुमारः श्रीजयसिंहो मेवाड़सिंहासनं आरूढोऽभूत् । महाराणाराजसिंहः इत्थं वीरः, धीमान् प्रबलप्रतापी चासीत् । विजयस्तस्य अग्रे एव धावमान आसीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in any language, it's sweet



In old French it was called ZUCHRE. In Arabic and Persian it is SUKKAR and SHAKAR respectively. It is SHARKARA in Sanskrit and SAKKHARON in Greek.

One does not have to be a scholar to notice the evident phonetic resemblance of the words. It is perhaps not surprising, since all of them mean the same thing—SUGAR, the universal sweetening agent which in some form or other has been known to mankind from the neolithic age.

Today SUGAR usually means crystalline sucrose —the kind you use in your home every day. It is an essential item in your diet with a high energy value of 1,794 kilocalories per pound. There is no other satisfactory substitute for sugar.

Issued by :

- UPPER GANGES SUGAR MILLS LTD.
- THE OUDH SUGAR MILLS LTD.
- NEW INDIA SUGAR MILLS LTD.
- THE NEW SWADESHI SUGAR MILLS LTD.
- BHARAT SUGAR MILLS LTD.
- GOBIND SUGAR MILLS LTD.

Managing Agents :

BIRLA BOMBAY PVT. LTD.

Industry House, 159, Churchgate Reclamation, Bombay-1.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान प्राच्यविद्या प्रतिष्ठान, जोधपुर

शोध, सन्दर्भ एवं दुर्लभ्य महत्वपूर्ण ग्रंथों का राजस्थान पुरातन ग्रंथमाला के अंतर्गत प्रकाशन

प्रकाशित ग्रंथो की सूची

(क) संस्कृत-प्राकृत

प्रकाशन का नाम	सम्पादक	मूल्य
दशकण्ठवधम्	श्रीगंगाधर द्विवेदी	रु० ४-००
श्रीभुवनेश्वरीमहास्तोत्रम्	श्रीगोपालनारायणबहुरा	,, ३-७५
रत्नपरीक्षादिसप्तग्रंथसंग्रहः	श्रीपद्मश्रीमुनिजिनविजय, पुरातत्वाचार्य	,, ९-२५
स्वयम्भूछंद	प्रो० एच० डी० वेलणकर	,, ७-७५
वृत्तजातिसमुच्चय	,, ,, ,, ,,	,, ५-२५
कविदर्पण	,, ,, ,, ,,	,, ६-००
वृतमुक्तावली	स्व० पं० श्रीमथुरानाथभट्ट	,, ३-७५
कर्णामृतप्रपा	अद्मश्रीमुनिजिनविजय, पुरातत्वाचार्य	,, २-२५
पदार्थरत्नमंजुषा	पद्मश्रीमुनिजिनविजय, पुरातत्वाचार्य प्रस्तावना-श्री दलसुख मौलवणिया	,, ३-७५
त्रिपुराभारती-लघु-स्तव	पद्मश्रीमुनिजिनविजय, पुरातत्वाचार्य	,, ३-२५
प्राकृतानन्द	,, ,, ,,	,, ४-२५
इन्द्रप्रस्थ-प्रबन्ध	डा० दशरथशर्मा	,, २-२५
एकाक्षर-नामकोश-संग्रह	पन्यासप्रवर मुनि रमणीकविजय	,, ९-००
वासवदत्ता कथा	जे० एम० शुक्ला	,, ४-५०
वृत्तमौक्तिक	म० विनयसागर	,, १८-२५
चांद्रव्याकरण	पं० वेचरदास दोशी	,, ७-००

पुस्तक विक्रेताओं को २५ प्रतिशत कमीशन दिया जाता है।

(राजस्थान सरनार द्वारा प्रसारित)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्रीगिरिराजशर्मा, जयपुरम्

प्रयागं पाटलीपुत्रं विजयानगरं पुरीम्
इन्द्रप्रस्थं गयां चैव प्रत्यूषे प्रत्यहं स्मरेत्
॥१०॥

प्रयाग, पाटलीपुत्र, विजयनगर पुरी इन्द्रप्रस्थ और गया इन्हें प्रातःकाल के समय प्रतिदिन स्मरण करें।

प्रयागः – प्रयागो गंगायमुनयोः संगमे अवस्थितः श्रेष्ठं तीर्थक्षेत्रमस्ति। पुराणानुसारेण अस्मिन् क्षेत्रे प्रजापतिना यज्ञः कृतः। तदनन्तरं एतत्क्षेत्रं 'प्रयाग' इति नाम्ना ख्यातमभूत्। पञ्चाम्बुप्रदेशस्य नैऋत्यभागे गुप्तरूपत्वं प्राप्तायाः सरस्वत्याः नद्याः गंगायमुनयोः संगमस्थले दर्शनं भवति। अतः इदम् क्षेत्रं त्रिवेणीसंगमः कथ्यते। वनवासात् अयोध्यां प्रति परावर्तनस्य समये भगवता श्रीरामचन्द्रेण भरतेन सह अत्रैव प्रथमं साक्षात्कारः कृतः। त्रिवेणी, माधवः, सोमेश्वरः भारद्वाजेश्वरः, वासुकीश्वरः अक्षयवटः वेणीमाधवः इत्यादीनि पवित्राणि स्थानानि प्रयागक्षेत्रे दर्शनीयानि सन्ति। त्रिवेणीसंगमे सुवासिन्यः स्त्रियः वेणीदानं कुर्वन्ति। ईस्वीयत्रिशतवत्सरेभ्यः पूर्वं तत्र निर्मितं एकं शोभनीयं दुर्गं प्रयागस्य संगमस्थले विद्यमानमस्ति। अस्मिन् दुर्गे एक उत्कृष्टः शिलास्तम्भोऽस्ति यत्र समुद्रगुप्तस्य वर्णनमङ्कितमस्ति। अत्र स्थितस्य अक्षयवटस्य विनाशार्थं जहांगीरेण प्रयासः कृतः। माघमासे प्रतिवर्षं अत्र जनसम्मेलनं भवति। षड्वर्षानन्तरं अर्धकुम्भपर्व द्वादशवर्षानन्तरं च पूर्णकुम्भपर्व प्रयागक्षेत्रे भवति। एतेषु कुम्भपर्वावसरेषु अनेकलक्षमिता यात्रिणः अत्र समवेताः भवन्ति।

प्रयागः – प्रयाग गंगायमुना के संगम पर अवस्थित एक श्रेष्ठ तीर्थ क्षेत्र है। पुराणों के अनुसार इस क्षेत्र में प्रजापति ने यज्ञ किया था। इसके पश्चात् इस क्षेत्र का प्रयाग यह नाम विख्यात हुआ। पंजाब प्रदेश के नैऋत्य भाग में गुप्तता को प्राप्त हुई सरस्वती नदी का गंगा यमुना के संगमस्थल पर दर्शन होता है इसलिये इस क्षेत्र को त्रिवेणी संगम कहते हैं। बनवास से अयोध्या को लौटते समय भगवान् श्रीरामचन्द्रको भरत के साथ यहीं प्रथम भेंट हुई थी। त्रिवेणी, माधव, सोमेश्वर; भारद्वाजेश्वर, वासुकीश्वर, अक्षयवट, वेणीमाधव इत्यादि पवित्र स्थान प्रयाग क्षेत्रे में दर्शनीय है। त्रिवेणी संगम पर सुवासिनी स्त्रियां वेणीदान करती हैं। ईश्वीय संवत् के तीन सौ वर्ष पूर्व वहां बना हुआ एक शोभनीय किला प्रयाग के संगमस्थल पर विद्यमान है। इस दुर्ग में एक उत्कृष्ट शिलास्तम्भ है। जहाँ समुद्रगुप्त का वर्णन अंकित है। यहां के अक्षयवट के विनाश के लिये जहांगीर ने प्रयास किया था। माघमास में प्रतिवर्ष यहां मेला होता है। छ वर्ष के पश्चात् अर्धकुम्भ पर्व और बारहवर्ष के पश्चात् पूर्णकुम्भ प्रयाग क्षेत्र में होता है। इन कुम्भपर्व के अवसरों पर अनेक लाख यात्री यहां एकत्रित होते हैं।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाटलीपुत्रम्ः – ईस्वीयवत्सरात् पूर्वं षष्ठ्यां शताब्द्यां अस्य नगरस्य निर्माणं अजातशत्रुनामकेन राज्ञा कृतम् । इदं नगरं बिहारप्रदेशे गंगायाः शोणभद्रनद्याश्च संगमेऽवस्थितमस्ति । प्रारम्भादेव इदं नगरं मगधराज्यस्य पाटनगरमासीत् । मौर्यशासनकाले इदं नगरं प्रायः समस्तस्य भारतवर्षस्य पाटनगरमासीत् । प्राचीनग्रन्थेषु अस्य नगरस्य कुसुमपुरम्, पुष्पपुरम्, कुसुमध्वजम् इत्यादिभिः अनेकैः नामभिः उल्लेखो मिलति । चन्द्रगुप्ताशोकसदृशानां महतां सम्राजां तथा आर्यभट्टसदृशानां विदुषां च इदमेव स्थानमस्ति । अस्य नगरस्य निर्माता अजातशत्रोः भगवतः बुद्धस्य शिष्य आसीत् । अस्य नगरस्य उत्कर्षस्य भविष्यत् कथनं भगवता बुद्धेन स्वयं कृतम् । इदानीं पाटलीपुत्रनगरं "पटना" इति नाम्ना ख्यातं बिहारप्रदेशस्य पाटनगरमस्ति । स्वतन्त्रभारतवर्षस्य प्रथमराष्ट्रपतेः श्रीराजेन्द्रप्रसादमहोदयस्य इयमेव नगरी कर्मभूमिरासीत् ।

पाटलीपुत्र – ईस्वीय सन् के पूर्व छटी शताब्दी में इस नगर का निर्माण आजतशत्रुनाम के राजा ने किया था । यह नगर बिहारप्रदेश में गंगा और शोणभद्रा नदी के संगम पर बसा है । प्रारम्भ से ही यह नगर मगधराज्य की राजधानी था । मौर्यशासनकाल में यह नगर प्रायः समस्त भारतवर्ष की राजधानी था । प्राचीनग्रन्थों में इस नगर का कुसुमपुर, पुष्पपुर, कुसुमध्वज इत्यादि अनेक नामों से उल्लेख किया मिलता है । चन्द्रगुप्त अशोक जैसे बड़े सम्राट् तथा आर्यभट्ट सदृश विद्वानों का यही स्थान है । इस नगर के निर्माता अजातशत्रु भगवान् बुद्ध के शिष्य थे । इस नगर के उत्कर्ष का भविष्यत् कथन भगवान् बुद्धने स्वयं किया था । आजकल पाटलीपुत्र नगर 'पटना' इस नाम से बिहार प्रदेश की राजधानी है । स्वतन्त्र भारतवर्ष के प्रथम राष्ट्रपति श्रीराजेन्द्रप्रसाद महोदय की यही नगरी कर्मभूमि थी ।

विजयनगरम्ः – भारतवर्षस्य दक्षिणे भागे मुहम्मदीयानां आक्रमणानि चतुर्दशशताब्द्या आरभ्य अभूवन् । तान्याक्रमणानि उत्तरोत्तरं प्रबलतराणि संजातानि । हरिहर–बुक्करायनामकौ द्वौ वीरौ एतेषामाक्रमणानां प्रतिकारार्थं कृतनिश्चयौ अभूताम् । स्वस्य परमवन्दनीयस्य गुरोः श्रीविद्यारण्यस्वामिनः आशीर्वादं प्राप्य तस्य मार्गदर्शनानुसारं च हरिहर-बुक्करायमहोदाभ्यां तुङ्गभद्रानद्याः दक्षिणे तटे नवं स्वतन्त्रनगरं प्रस्थापितम्, तस्य च नाम विद्यानगरमिति प्रदत्तम् । इदं नाम विद्यारण्यगुरो र्भक्त्याः कारणात् रक्षितम् । विद्यानगरस्य प्रथमोऽधिपतिः हरिहरः आसीत् । हरिहरस्य पश्चात् बुक्करायः तदनन्तरञ्च तस्य वीरः पुत्रः कम्परायः विद्यानगरस्याधिपतिरभूत् । कम्परायः 'द्वितीयो हरिहरः' इति नाम्ना

विजयनगरः – भारतवर्ष के दक्षिणभाग में मुसलमानों के आक्रमण चोदवी शताब्दीं से आरम्भ हुए । वे आक्रमण उत्तरोत्तर प्रबल होते गए । हरिहर-बुक्कराय नामके दो वीरों ने इन आक्रमणों के प्रतिकार के लिए निश्चय किया था । अपने परमवंदनीय गुरु श्रीविद्यारण्यस्वामी का आशीर्वाद प्राप्त करके उनके मार्गदर्शन के अनुसार हरिहर-बुक्कराय ने तुङ्गभद्रा नदी के दक्षिणतट पर नवीन स्वतंत्र नगर बसाया और उसका नाम विद्यानगर यह दिया । यह नाम विद्यारण्यगुरु की भक्ति के कारण रखा था । विद्यानगर का प्रथम अधिपति हरिहर था । हरिहर के पश्चात् बुक्कराय उसके पश्चात् उसका वीरपुत्र कम्पराय विद्यानगरी का अधिपति हुआ । कम्पराय दूसरा हरिहर इस नाम से प्रख्यात हुआ था । अपने असा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



चिट्ठी जल्दी पहुंचाने का एक तरीका है!

चिट्ठी 'लैटर बाक्स' में जल्दी डालिये। आप शायद नहीं जानते कि डाकघरों में सबसे ज्यादा परेशानी शाम के समय हो जाती है। वजह ये है कि ज्यादातर लोग चिट्ठियाँ रखे रहते हैं और शाम को डालते हैं। इससे रात की डाक बहुत भारी हो जाती है और देर अलग लगती है।

चिट्ठी जल्दी डालने से आपकी चिट्ठी दिन की डाक से ही निकल जायेगी और जल्दी पहुंचेगी।

इसलिये,

चिट्ठी जल्दी डालिये। शाम तक इन्तजार न कीजिये

डाक व तार विभाग

davp 67/537

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रख्यातोऽभूत् । स्वस्य असाधारणेन कर्तृत्वेन अनेन द्वितीयहरिहररायेण विद्यानगरस्याधिराज्यं चतुर्षु दिक्षु विस्तृतं कृत्वा दिक्षिणभारते एकं हिन्दूसाम्राज्यं स्थापितम् । स्वकीयानां दिग्विजयानां स्मरणार्थं विद्यानगरं विजयनगरमिति नाम्ना उद्घोषितम् । हिन्दूधर्मस्य संस्कृतेश्च संरक्षणं संवर्धनं चास्य नवोदितस्य साम्राज्यस्य उद्देश्यम् आसीत् । द्वितीयस्य हरिहरस्य पश्चात् संगमवंशस्य आधिपत्यं समाप्तमभूत् । तदनन्तरं च नरसिंहरायस्य सालुववंशस्याधिपत्यं विजयनगरे संजातम् । अस्यानन्तरं तुलुवनामकस्य वंशस्याधिपत्यमभूत् । तुलुववंशस्य वीरपुरुषेण श्रीकृष्णदेवरायमहोदयेन विजयनगरसाम्राज्यस्य चतुर्षु दिक्षु उत्कर्षः सम्पादितः । मुहम्मदीयाक्रामकैरुद्ध्वस्तानां समग्राणां मन्दिराणां जीर्णोद्धारश्च अनेन नृपतिना कारितः । ईसवीयसंबत्-१३३६ तः १५६५ पर्यन्तं विजयनगरसाम्राज्येन दक्षिणभारते हिन्दूधर्मस्य संस्कृतेश्च सर्वंकष उत्कर्षः कृतः । २२ जनवरोदिने १५६५ ख्रिष्टाब्दे तालीकोटस्थानस्य युद्धमभूत् । श्रीरामरायः तस्मिन् समये विजयनगरस्याधिनायक आसीत् । अस्मिन् समये दक्षिणभारतस्य आदिलशाही कुतुबशाही–इमादशाही–निजामशाही-बरोदशाही इत्यादिभिः नामभिः प्रख्याताः पञ्च मुहम्मदीयाः शासकाः विजयनगरस्य विरोधपक्षे संघटिता अभूवन् । आभ्यन्तरिकभेदस्य कारणात् रामरायस्य पराभवोऽभूत् । मुहम्मदीयशासकैः विजयनगरसाम्राज्यस्य सम्पूर्णरूपेण विध्वंसः कृतः । पञ्चवर्षपर्यन्तं अत्रत्यं धनैश्वर्यं अपहृतमभूत् । अस्य पराभवस्यानन्तरमपि शतवर्षाणि यावत् विजयनगरराज्यस्य अस्तित्वमासीत्; किन्तु तस्मिन् प्राणशक्तेरभाव एवासीत् ।

धारण कर्तृत्व से इस द्वितीय हरिहरराय ने विद्यानगर के अधिराज्य को चारों दिशाओं में फैलाकर दक्षिण भारत में एक हिन्दूसाम्राज्य प्रस्थापित किया ।

अपनी दिग्विजयों के स्मरणार्थ विद्यानगर को विजयनगर इस नाम से घोषित किया । हिन्दूधर्म और संस्कृति का संरक्षण और संवर्धन इस नवोदित साम्राज्य के उद्देश्य थे । द्वितीय हरिहर के पश्चात् संगमवंश का आधिपत्य समाप्त हो गया । इसके पश्चात् सालु वंश के नरसिंहराय का आधिपत्य विजयनगर पर हुआ । तुलुववंश के वीरपुरुष श्रीकृष्णदेवराय ने विजयनगर साम्राज्य का चारों दिशाओं में उत्कर्ष किया । मुस्लिम आक्रामकों द्वारा तोड़े गए सारे मन्दिरों का जीर्णोद्धार इसीराजा ने कराया था । ईसवीय सम्बत् १३३६ से १५६५ पर्यन्त विजयनगर साम्राज्य ने दक्षिण भारत में हिन्दूधर्म और संस्कृति का सर्वंकष उत्कर्ष किया था । २२ जनवरी १५६५ ईसवीय सन् में तालीकोट स्थान का युद्ध हुआ । श्रीरामराय उस समय विजयनगर का अधिनायक था । इस समय दक्षिणभारत के आदिलशाही-कुतुबशाही-इमादशाही-निजामशाही बरोदशाही इत्यादि नामों से प्रख्यात पांच मुस्लिम शासक विजयनगर के विरुद्ध संघटित हो गए । आन्तरिक भेद के कारण रामराय का पराभव हुआ । मुस्लिम शासकों ने विजयनगर साम्राज्य का पूरी तरह से विध्वंस कर दिया । पांच वर्ष तक यहाँ के धन ऐश्वर्य को लूटा । इस पराभव के पश्चात् भी सौ वर्ष तक विजयनगर राज्य का अस्तित्व था । किन्तु उसमें प्राणशक्ति का अभाव हो था ।

पुरी – (जगन्नाथपुरी) :—पूर्वसागरस्य तटे अवस्थिता जगन्नाथपुरी जगन्नाथमन्दिरस्य

पुरी – (जगन्नाथपुरी) पूर्व सागरे के तट पर अवस्थित जगन्नाथपुरी जगन्नाथ मन्दिर के

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारणात् भारतस्य एकं प्रमुखं तीर्थक्षेत्रमस्ति। जगद्गुरु- शंकराचार्यस्य गोवर्धनमठं तथा चैतन्यमहाप्रभोः मठं इत्यादीनि अनेकानि पवित्र-स्थानानि पुरीनगर्यां सन्ति। वर्तमानं श्रीजगन्नाथमन्दिरं शिल्पकलायाः एकं अद्भुतं वस्तु अस्ति। अस्य मन्दिरस्य निर्माणं चतुर्दश्यां शताब्द्यां गंगवंशीयनृपतिना श्रीअनन्तचोलगंगमहोदयेन कारितम्। अस्मिन् मन्दिरे श्रीकृष्णस्य, बलरामस्य सुभद्रायाश्च काष्ठमय्यो मूर्तयः सन्ति। जगन्नाथस्य महती रथयात्रा भारतस्य एका प्रमुखा रथयात्राऽस्ति। अयं अतिविशालो रथः सहस्राधिकैर्जनैः समाकृष्टो-भूत्वा चलति। प्राचीने समये बहवः भाविकाः भक्ताः अस्य रथस्य अधस्तले स्वस्यात्मसमर्पणं कुर्वन्ति स्म। जगन्नाथस्य काष्ठमयप्रतिमामध्ये भगवतः श्रीकृष्णस्य अस्थीनि अवस्थितानि सन्ति इति भाविकानां मध्ये श्रद्धापूर्वको विश्वासोऽस्ति। शैव-वैष्णव-बौद्धसाम्प्रदायिकानां भक्तानां कृते जगन्नाथमन्दिरं परमश्रद्धायाः केन्द्रमस्ति। अतः पुरीमध्ये वर्षपर्यन्तं प्रतिदिनं सहस्रशः यात्रिणः भारतस्य प्रत्येकं कोणात् सम्मिलिता भवन्ति। साम्प्रतञ्चात्र शङ्कराचार्याः जगद्गुरवः श्रीनिरञ्जनदेवतीर्थस्वामिमहाराजाः वर्तन्ते।

कारण भारत का एक प्रमुख तीर्थ क्षेत्र है। जगद्गुरु शंकराचार्य का गोवर्धनमठ तथा चैतन्यमहाप्रभु का मठ इत्यादि अनेक पवित्र-स्थान पुरी नगरी में हैं। वर्तमान जगन्नाथ मन्दिर शिल्पकला की एक अद्भुत वस्तु है। इस मन्दिर का निर्माण चौदहवीं शताब्दी में गंगवंशीय राजा श्रीअनन्तचोलगंग महोदय ने कराया था। इस मन्दिर में श्रीकृष्ण की बलराम की और सुभद्रा की काष्ठमयी मूर्तियां हैं। जगन्नाथ की महान् रथयात्रा भारत की एक प्रमुख रथयात्रा है। यह अतिविशालरथ हजारों मनुष्यों द्वारा खींचाजाकर चलता है। प्राचीन समय में बहुत से भाविक भक्त इस रथ के नीचे अपना आत्मसमर्पण करते थे। जगन्नाथ की काष्ठमय प्रतिमा के अन्दर भगवान् श्रीकृष्ण की अस्थियां अवस्थित हैं। यह भाविकों के मध्य में श्रद्धापूर्वक विश्वास है। मन्दिर परमश्रद्धा का केन्द्र है। अतः पुरी में वर्षपर्यन्त प्रतिदिन हजारों यात्री भारत के प्रत्येक कोने से सम्मिलित होते हैं। इस समय यहां शङ्कराचार्य जगद्गुरु श्रीनिरञ्जनदेव तीर्थस्वामी महाराज हैं।

इन्द्रप्रस्थम्: — वर्तमानस्य दिल्लीनगरस्य समीपं प्राचीनसमये एतत् इन्द्रप्रस्थनगरमासीत्। धर्मराजयुधिष्ठिरेण खाण्डवनामकस्य वनस्य दहनं कारयित्वा अस्य इन्द्रप्रस्थनगरस्य निर्माणं कारितम्। तत्र च राजसूययज्ञोऽपि कृत आसीत्। महाभारते अस्य नगरस्य सौन्दर्य-वर्णनं मिलति। यदा द्वारकापुर्याः समुद्रमध्ये निमग्नस्य प्रक्रिया आरब्धाऽभूत् तदा श्रीकृष्णः समस्तान् यादवगणान् निवस्तुं इन्द्रप्रस्थं प्रति प्रेषितवान्। युधिष्ठिरस्यानन्तरं पाण्डववंशस्य सप्तशासंकानाम् इन्द्रप्रस्थोपरि आधिपत्य-

इन्द्रप्रस्थः — वर्तमान दिल्ली नगर के समीपे यह इन्द्रप्रस्थ नगर था। धर्मराज युधिष्ठर ने खाण्डव नाम के वन का दहन करवाकर इस इन्द्रप्रस्थ का निर्माण कराया था। और वहां राजसूय यज्ञ भी किया था महाभारत में इस नगर का सौन्दर्य वर्णन मिलता है। जब द्वारकापुरी का समुद्र के बीच में निमग्न होने की प्रक्रिया प्रारम्भ हुई थी तब श्रीकृष्ण ने समस्त यादव गणों को रहने को इन्द्रप्रस्थ में भेजा था। युधिष्ठिर के पश्चात् पाण्डववंश के सात शासकों का इन्द्रप्रस्थ के ऊपर आधिपत्य था।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मासीत् । अस्मिन् एव नगरे हुमायूं मुगलशासकेन 'दिनपन्हा' नामकस्य दुर्गस्य निर्माणं कारितम् । अस्य नगरस्य संरक्षणं यस्मात् स्थानात् पाण्डववीरेण अर्जुनेन क्रियते स्म । तत्रैव स्थाने हुमायुँना निर्मापिता 'किलाकोना' नाम मुहम्मकंदीयपूजास्थलं (मस्जिदम्) अवस्थितमस्ति ।

गयाः — बिहारराज्ये फल्गुनद्याः तटे अति प्राचीनकालात् इयं नगरी अवस्थिताऽस्ति । पुराणेषु, महाभारते तथा बौद्धसाहित्ये च गयानगर्या उल्लेखो मिलति । गयनामकेन राजर्षिणास्या नगर्याः निर्माणं कारितम् । वायुपुराणे गयानगर्या उत्पत्तिविषये एका कथा वर्णिताऽस्ति । पुरा गयासुरनामकः एको विशालकायः महापराक्रमी राक्षसः एकसहस्रवर्षपर्यन्तं घोरं तपः कृत्वा भगवन्तं विष्णुं प्रसन्नं चकार । वरश्च याचितः तेन यत् 'स संसारे सर्वाधिकः पुण्यवान् स्यात्' । तेन वरेण सः गयासुरः पुण्यमयो बभूव । तस्य शरीरस्य स्पर्शात् जनाः पुण्यवन्तो भूत्वा स्वर्गलाभं प्राप्नुवन् । परिणामतः यमलोकः निर्जनोऽभूत् । अस्याः आपत्तेः निवृत्त्यर्थं भगवता विष्णुना गयासुरः प्रार्थितः यत् तव शरीरं यज्ञाय दीयताम् । गयासुरेण प्रार्थना स्वीकृता । तस्य विशाले शरीरे एकं महद् शिलाखण्डं रक्षितम्, तस्योपरि च सर्वे देवाः आरूढवन्तः । गयासुरस्य अनेन महात्यागेन सर्वे देवगणाः प्रसन्ना बभूवुः । ते सर्वे देवाः 'वरं ब्रूहि' इति प्रार्थयामासुः । तेन याचितम् यत् तस्य शरीरे सर्वेषां देवानां निवासः स्यात् । तत् स्थानं मम नाम्ना प्रसिद्धं भवेत् । अस्मिन् स्थाने यस्य श्राद्धं स्यात् स निष्पापो भूत्वा ब्रह्मलोके निवसेत् । भगवता श्रीरामचन्द्रेण धर्मराजयुधिष्ठिरेण च गयाक्षेत्रे गत्वा पितृश्राद्धं कृतम् । अनादिकालात् सहस्रशः यात्रिणः अत्र आगत्य स्वपितॄणां हितार्थाय श्राद्धविधिं कुर्वन्ति । गयाक्षेत्रस्थस्य श्रेष्ठमन्दिरस्य नाम

इसी नगर में मुगलबादशाह हुमायूँ ने 'दिन पन्हा' नामके किले का निर्माण कराया था । इस नगर की रक्षा जिस स्थान से पाण्डववीर अर्जुन करता था उसी स्थान पर हुमायूं की बनाई हुई 'किलाकोना' नामक मस्जिद है ।

गया — बिहार राज्य में फल्गुनदी के तट पर अतिप्राचीन काल से यह नगरी अवस्थित है । पुराणों में, महाभारत में तथा बौद्धसाहित्य में गया नगरी का उल्लेख मिलता है । गय नाम के राजर्षि द्वारा इस नगरी का निर्माण कराया गया । वायु पुराण में गया नगरी की उत्पत्ति के विषय में एक कथा वर्णित है । पहले गयासुर नामके एक विशालकाय महापराक्रमी राक्षस ने एक हजार वर्ष तक घोर तप करके भगवान् विष्णु को प्रसन्न किया । और उसने वर मांगा कि 'वह संसार में सर्वाधिक पुण्यवान् हो' । उस वर से वह गयासुर पुण्यमय हो गया । उसके शरीरस्पर्श से लोग पुण्यवान् होकर स्वर्गलाभ पाने लगे । इसके परिणाम से यमलोक निर्जन हो गया । इस आपत्ति की निवृत्ति के लिए भगवान् विष्णु ने गयासुर से प्रार्थना की कि 'तुम्हारा शरीर यज्ञके लिए दे दो' । गयासुर ने प्रार्थना स्वीकृत करली । उसके विशाल शरीर पर एक विशाल शिलाखण्ड रखा गया और उसके ऊपर सारे देव चढ गए । गयासुर के इस महात्याग से सारे देवगण प्रसन्न हो गए । उन सब देवताओं ने 'वर मांगों' यह कहा । उसने वर मांगा कि उसके शरीर में सारे देवताओं का निवास हो । वह स्थान मेरे नाम से प्रसिद्ध हो । इस स्थान पर जिसका श्राद्ध हो वह निष्पाप होकर ब्रह्मलोक में निवास करे' । भगवान् श्रीरामचन्द्र ने धर्मराजयुधिष्ठिर ने गया क्षेत्र में जाकर पितृश्राद्ध किया था । अनादिकाल से हजारों

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णुपदमन्दिरमस्ति । अस्य मदिरस्य बहिः प्रदेशे श्राद्धविधेः सम्पादनार्थं द्वौ विशालौ मण्डपौ स्तः । साध्व्या अहल्यादेव्या होल्करेण अस्य मन्दिरस्य जीर्णोद्धारः कारितः । एतदतिरिक्तं अक्षयवटः, धर्मारण्यं, सूर्यमन्दिरम्, प्रेतशिला, रामशिला, रामकुंडं ब्रह्मकुण्डं, इत्यादीनि ४५ श्राद्धवेदिकाः गयाक्षेत्रस्य प्रमुखाणि स्थानानि सन्ति । गयानगर्याः दक्षिणस्यां दिशि सार्धत्रिक्रोशानन्तरं बुद्धगया वर्तते अवस्थिता । भगवता बुद्धेन अस्मिन्नेव स्थाने स्वतपश्चर्या पूर्णतां नीता । तस्मिन् स्थाने स प्रसिद्धो बोधिवृक्षस्तथा भगवतः बुद्धस्य विशालं मन्दिरं च इदानीमपि विद्यते ।

यात्री यहां आकर अपने पितरों के हित के लिए श्राद्ध विधि करते हैं। गया क्षेत्र के श्रेष्ठ मन्दिर का नाम विष्णुपद मन्दिर है। इस मन्दिर के बाहर के प्रदेश में श्राद्धविधि करने के लिए दो विशाल मण्डप हैं। साध्वी अहल्यादेवी होल्कर ने इस मन्दिर का जीर्णोद्धार कराया था। इसके अतिरिक्त अक्षयवट, धर्मारण्य, सूर्यमन्दिर, प्रेतशिला, रामशिला, रामकुण्ड, ब्रह्मकुण्ड इत्यादि ४५ श्राद्धवेदिकाएं गया क्षेत्र के प्रमुख स्थान हैं। गया नगरी की दक्षिण दिशा में सात मील पर बुद्धगया अवस्थित है। भगवान् बुद्ध ने इसी स्थान पर अपनी तपश्चर्या पूर्ण की थी। उस स्थान पर प्रसिद्ध बोधि वृक्ष तथा भगवान् बुद्ध का विशाल मन्दिर अभी विद्यमान है।

शोभन उपायः

कृपणशिरोमणेः कस्यचिद् धनिकस्य दासी रुग्णा जाता । पञ्च वा षड् दिनानि व्यतीतानि। तदा धनिकेन तस्याः चिकित्सार्थं निजः पारिवारिकः द्राक्तरः समाहूतः । स द्राक्तरः तां सेविकां यथैव हस्तं गृहीत्वा द्रष्टुं प्रवृत्तः, तथैव सा समवदत् यत् 'द्राक्तरमहाशय! वस्तुतः अहं न अस्मि रुग्णा, अपि तु षण्णां मासानां वैतनिकं द्रव्यं नायं कृपणः स्वामी मह्यं दत्तवान् । अतः तावद् अहम् अस्य गृहे एवम् एव रुग्णा स्थास्यामि, यावत् एष मह्यं मम सर्वं द्रव्यं न दास्यति' इति ।

द्राक्तरः—यदि एवं तदा तु अहम् अपि अत्र एव निपतामि, यतो हि मम औषधशुल्कपत्राणां (बिल) रुण्यकाणि अपि अद्यावधि अनेन न दत्तानीति—

—मधुपः

—: सफेद दाग का मुफ्त इलाज :—

विद्वानों ने सच कहा है परिश्रम का फल कभी बेकार नहीं जाता। वर्षों कठोर प्रयत्न कठिन खोज के बाद हमने सफेद दाग की दवा पर पूर्ण शक्ति प्राप्त करली है। यह इतनी तेज है कि इसके ३ दिनों के लगाने से दाग का रंग बदल जाता है और बहुत जल्द जड़ से हमेशा के लिए मिट जाता है। आप स्वयं एक बार दवा लगाकर देख लेंगे कि दवा कितनी शक्तिशाली है। हजारों ने लाभ पाया है। अभी प्रचारार्थ १ फायल दवा मुफ्त दी जा रही है। शीघ्रता करें।

नक्कालों से सावधान।

ब्रिटेन आयुर्वेद भवन, पोस्ट कतरी सराय (गया)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP.6
"Licenced to Post.
Without Prepayment"

शुद्धिमुद्दिश्य सूक्ति-सुधा

आशुकवि-श्रीहरिशास्त्री सम्पादकः

मनस्तनूद्रव्यमन्त्र-
कर्मपूर्वा हि शुद्धयः ।
ख्याताः पंचैव विद्वद्भि-
र्निगमागम — वेदिभिः ॥१॥

तत्र पूर्वं मनःशुद्धि-
स्ततः कायविशोधनम् ।
ततः पदार्थ – संशोधो
मन्त्रशुद्धिस्ततः परा ॥२॥

अन्तिमा हि क्रियाशुद्धि
रिति पंच क्रमोद्भवाः ।
अथैतासां विवेकोऽपि
यथाशास्त्रं निवेद्यते ॥३॥

कर्म कर्तुं प्रवृत्तस्य
पुंसश्चेतसि संस्थिताः ।
पूर्वस्थाः प्राप्नुवन्तोऽपि
निःसार्याः कार्यजातयः ॥४॥

अहो ! मन स्त्वया सम्प्रत्य-
स्मिन् कार्ये नियुज्यताम् ।
कृतपूर्वं करिष्यच्च
न संस्मर कदाचन ॥५॥

इत्याज्ञाय मनो बाढं
युञ्जानस्य क्रियादिषु ।
मनः शुद्धं भवत्येषा-
मनःशुद्धिरुदीरिता ॥६॥

१-निगम और आगम के विद्वानों ने ५ पांच शुद्धियां कही हैं वे क्रम से समझो-१. मनः शुद्धि २. काय शुद्धि ३. द्रव्य (पदार्थ) शुद्धि ४. मन्त्र शुद्धि ५. क्रिया शुद्धि। ये क्रमशः शुद्धियां करनी चाहिये।

२-इनमें सर्वप्रथम मनःशुद्धि है। दूसरी शरीर शुद्धि है ३ तीसरी पदार्थ (द्रव्य) शुद्धि है। ४ मन्त्र शुद्धि और ५वीं क्रिया शुद्धि है।

३-इनका विवेचन यथाशास्त्र संक्षेप से कहते हैं—

४-किसी कर्म करने को उद्यत हुए या होते हुए मानव को चाहिये कि अपने मनसे पूर्वस्थित कर्म जाल को या आने (होने वाले) वाले कर्म की चिन्ताओं को बाहर निकाल देवे। अर्थात् कृत कर्मों का और आगन्तुक कर्मों का चिन्तन न करै।

५-और मनको सम्बोधित कर यह आदेश करै कि हे मन तुझे अभी इस क्रियमाण कर्म में ही लगना (संयुक्त होता) है। पूर्व कृत और करने को आगे आने वाले कर्म को मत यादकर उधर मत जा। ऐसी आज्ञा करै।

६-दृढता से कर कर्म में लगजाना। प्रस्तुत कर्म के अतिरिक्त इधर-उधर मनको न जाने देना और जाते हुए मनका प्रत्याहार कर लेना ही मनकी शुद्धि है। यह पांच शुद्धियों से मनः शुद्धि प्रथमा कही है।

प्रकाशकः—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४६६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रिं० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य



अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥
अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान् बादरायणः ॥

१८

वार्षिकमूल्यं सप्तसमुद्राः ७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

एकप्रतेः सप्ततिपणाः ०

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनदः–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठ संख्या
१.	मङ्गलम्	श्रीदीनानाथत्रिवेदी मधुपः सहसम्पादकः	३११
२.	कर्मकौशलम्	श्रीगणेशरामशर्मा, डूंगरपुरम्	३१२
३.	श्री शिरोमणिस्तोत्रम्	श्रीकृष्णलालशर्मा, रजिस्ट्रार अजमेरः	३१७
४.	भजत संस्कृतम्	श्रीखंडविल्लि सूर्यनारायण शास्त्री, पूर्वगोदावरी	३२०
५.	शिक्षा	श्रीदुर्गादत्तशर्मा, मैथिलः, जयपुरम्	३२१
६.	संस्कृत-व्याकरण-पद्धतीनामुत्पत्तिः विकासश्च	पं० श्री दुःखिश्यामपट्टनायकः, उत्कलविश्वविद्यालयः	३२५
७.	काव्यस्वरूपम्	श्रीमहेन्द्रभा, सिरोडी (सिरोही)	३२९
८.	अथश्रीशिवराज्योदये महाकाव्ये, ३० सर्गः	डा० श्रीधरभास्करवर्णेकर, नागपुरम्	३३१
९.	विचित्राः समाचाराः	श्रीगणेशरामशर्मा, डूंगरपुरम्	३३३
१०.	राजतरंगिण्यां चित्रिता भारतकलाः	श्रीसुभाषोवेदालंकार, जयपुरम्	३३७
११.	सम्पादकीयम्	श्रीमधुपः; सहसम्पादकः	३४३
१२.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	३४५
१३.	सूक्तिसुधा	श्रीहरिशास्त्री, सम्पादकः	३५४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १८ | आषाढः, विक्रमाब्दः २०२५ (जुलाई १९६८) | अङ्कः ९

मङ्गलम्

दीननाथत्रिवेदी मधुपः, सहसम्पादकः

यो बाल्ये स्तनपानतोऽपि हतवान् पापां पुरा पूतनाम्
भक्तानामवनाय येन च सदा दुष्टा हता दानवाः ।
तस्मात्कष्टशताकुलं जगदिदं सत्यप्रतिज्ञोऽधुना
गीतावाक्यमनुस्मरन् स भगवान् कृष्णो द्रुतं रक्षताद् ॥

मासावतरणम्

मेघान् व्योम्नि समाह्वयन्नविरतं वात्याश्च यः संहरन्,
लोकानातपपीडितांश्च रमयञ्छायाप्रदानेन यः ।
क्षीराब्धावपि शाययंश्च जगतामाधारभूतं हरिं,
आषाढो हलपूजनाय कृषकान् स प्रेरयन्नागतः ॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ कर्मकौशलम् ❀

ले. विद्याभूषणः श्रीगणेशरामशर्मा, डूँगरपुरम् (राज०)

एकदा ग्रीष्मर्तौ वयं केचन नागरिकाः सुहृदः सायन्तन-वायु-सेवनार्थं नगराद्बहिर्गन्तुं प्रस्थिताः। पथि गच्छद्भिरस्माभिः सरोवरतटे विद्यमानाया धर्मशालायाः प्रवेशद्वारपुरतः किलैको हृष्ट-पुष्ट-गात्रः प्रसन्नचेताः प्रौढवयाः पुरुषोऽवलोकितः। स खल्वस्मभ्यमञ्जलिं बध्वा नमस्कारान् व्यधत्त। सर्वथाऽपरिचितस्यापि तस्य नमस्कारादिकं सम्भ्रान्तं शिष्टजुष्टं व्यवहार-वर्तनमालोक्य सभ्यतानुरोधाद्वयं तस्य वन्दन-मकरवाम। स ततोऽस्मत्समीपमागत्यास्मान् सङ्केतेन धर्मशालां नेतुमाह्वयत्। अपरिचितेन तेन नवागन्तुकेनामन्त्रिता वयं किञ्चिदिव विस्मयं सङ्कोचं चानुभवन्तोऽपि सावकाशत्वात् कुतूहला-कृष्टमानसास्तमन्वगच्छाम। धर्मशालाया द्वारदेशं प्राप्तः सोऽस्मान् बभाण—"मान्या नागरिकाः! अहं हि बङ्गप्रदेशाभिजनः श्रीशतीशचन्द्रमुखो-पाध्याभिधानो भूगर्भविद्याविशारदः कृषिशास्त्रो-द्यानविज्ञानप्रवीणोऽत्र भवत्प्रान्ते खनिजतत्त्वानां गवेषणार्थमायातोऽस्मि साम्प्रतम्। धर्मशालाया अस्या व्यवस्थापकमहाशयः स्थानाभावान्न मेऽत्रावस्थानाय स्थानं प्रदातुं पारयते। नात्र नगरे मामकीनोऽस्ति केनापि सह परिचयविशेष-स्ततोऽत्र भवन्तो भवन्तो नागरिकसत्तमा यदि मम निवासोचितं क्वचित् कुटीरं वा कक्षमेकं वा प्रदापयेयुश्चेत्तदा भवतां मयि यात्रिजने महती कृपा स्यात्।"

अथास्माभिस्तस्या धर्मशालायास्तथान्येषां केषाञ्चन विश्रामगृहादीनां व्यवस्थापकाः पृष्टाः परन्तु सर्वत्रैव सर्वथा स्थानाभावोऽभूदिति स्वयमेवास्माभिः सर्वतोऽवलोक्य विश्वस्तम्। नवागतेन तेन यात्रिणा साकं वर्तालापं विदधा-नैरस्माभिः परिलक्षितम् यत् स हि यात्रिवर्यो विज्ञः सुज्ञः सभ्यः सुशिक्षितो दीक्षितश्चापि स्व-निवासयोग्यं स्थानमनासादयन् खिन्नो दीनोऽशांत-मना इव वर्तत इति। तावदेवास्माकमेकं मित्रं श्रीसदानन्दनामा कृषकः प्रोवाच—

"जानन्त्येव भवन्तो यदितो गव्यूतिप्रायेऽ-नतिदूरे स्थले मम वाटिकाभूमिरास्ते। तत्रैव मे वाटिकाकुटीरे स्वनिवासं कल्पितुमर्हन्ति।"

श्रुत्वैवैतत् श्रीसतीशचन्द्रमुखोपाध्याय-महाशयस्तत्कालमेव स्वमञ्जूषां विष्टरं च स्व-स्कन्धयोः समारोप्य ततः प्रस्थातुं तत्परो बभूव। सदानन्दस्तमतिथिं स्वात्मना सह नीत्वा स्ववाटि-कास्थलं गन्तुं मार्गमवाललम्बे। वयमपि च तावन्वसराम।

अथ वाटिकास्थलं प्राप्तास्माभिरवलोकितं यत्तत्रैकं जीर्णं शीर्णं मृत्कुटीरमात्रमेव भग्नाव-शेषमिवासीत्। वस्तुतस्तन्न कस्यापि मनुजस्य कृते निवासोचितं स्थानमभूद्यस्तत्र वाटिका-परिसरे भूमिप्राङ्गणं विषमधरातलमनुर्वरञ्च समभूत्। अतोऽस्माभिः श्रीसतीशचन्द्रस्तत्राव-स्थानाय नानुमतो वरञ्चसर्वात्मना निषिद्धः। सोऽस्माकमभिप्रायं ज्ञात्वोवाच—"मान्याः, निष्कारणबन्धवः! सज्जनाः!! नागरिकश्रेष्ठाः!!! तदिदं श्रीसदानन्दमहाशयस्यास्य वाटिका-स्थानं ममातिथेर्निवासाय सर्वथा समुचितमेव वर्तते। अहन्त्वत्रैव स्थातुं कृतनिश्चयोऽस्मि। श्रीमद्भिरेतत् स्थलं मम निवासायानुमन्यमानै-रहमतीवोपकृतोऽस्मि। आभारं कृतज्ञतां चावहामि वः।"

एवमुक्त्वैव श्रीसतीशचन्द्रमुखोपाध्याय-स्तत्र वाटिकाया भग्नकुटीरे स्वसम्भारान् किलैकस्मिन् कोणे निधाय तत्रैव विश्रमितुमुप-चक्रमे। तस्य तमिममुत्साहं दृष्ट्वा सोऽस्माभिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनरपि चैकवारं प्रोक्तः "महाशय ! सतीशचंद्र-महाभाग !! कथमिव भवानत्रैकल एवास्मिन्निर्जने स्थले सर्पवृश्चिकादिसरिसृपैः सर्वतः सङ्कुले ननु वस्तुमुत्सहते बत ? नैतत्स्थानं भवन्निवासयोग्यमिति मन्यामहे वयम् । तद्भवान्नगरमागत्यास्माकं गृहमधिवसतु रात्रावेतस्याम् । श्वोभूते धर्मशालायां विश्रामगृहे वा यत्र कुत्रापि स्थानान्तरे वा स्वावासं कल्पतां भवान् ।" सोऽवदत्-"अयि मान्याः ! भूगर्भविद्याजनानः खनिजतत्त्वान्वेषणकर्ताहं वर्ते । ततो मत्कृते स्थानमेतद्भवतां नागरिकाणामिव नांशतोऽप्यसुविधाकरमास्ते । मम निवासाय सर्वथा सुयोग्यमेतत् स्थानम् । मा चिन्तिता भवन्तु भवन्तोऽत्र विषये ।"

एवमुक्त्वैव सः स्वसम्भारपोट्टलिकातः पात्रमेकमादाय वाटिकायास्तस्याः कोणे विद्यमानाया वाप्या गर्तपूरितं स्वल्पाल्पशेषं जलमादातुं सयत्नो बभूव । स हि क्षणमेकमपि व्यर्थमकुर्वाणो यथोपलब्धेन जलेन जलपात्रमापूर्य शौचविधिं निर्वर्तितुं जगाम । वयं तद्विषये, तस्य च तत्र निवासविषये च चिन्तयानास्तद्विषयगतं वार्तालापं कुर्वाणाश्चातिष्ठाम । तावदेव सतीशचन्द्रः शौचविधिं परिसमाप्य वाप्या जलेन कर्दमाक्तेनैव हस्तपादं प्रक्षाल्य स्नात्वा च पुनः कुटीरमागत्य धौते वाससी परिधाय पाषाण-पट्टिकायामेकस्यां स्वविष्टरमास्तीर्य सम्मुखमुपविवेश । अथ कांश्चित् क्षणांस्तमालपन्तस्तं सम्भावयन्तस्तच्चिकीर्षितुं चावलोकयन्तो वयमतिष्ठाम । ततोऽन्ते तस्य तत्रैवावस्थाने सुदृढं सङ्कल्पं स्थिरनिश्चयं च स्वहृदि जानन्तो वयं तं तत्रावस्थातुमनुमन्य स्वगृहान् प्राप्ताः । सदानन्दः स्वगृहं गत्वाऽतिथेस्तस्य भोजनार्थं कांश्चन भोज्यपदार्थान्नीत्वा पुनर्वाटिकामागत्य तस्मै प्रापयितुं प्रायतत परन्तु तावति समयान्तरे सतीशचन्द्रः स्वात्मना सहानीतं पाथेयं भक्षयित्वा स्वविष्टरमधिशयानोऽभूत् । तद्दृष्ट्वा सदानन्दोऽतीवाश्चर्यचकितः सन् भोजनपदार्थान्नीत्वा पुनः स्वगृहमाजगाम ।

अथान्येद्युर्वयं सर्वेऽपि सुहृदः पुनः सान्ध्यवायुसेवनक्रमे मुखोपाध्यायस्य तस्य सतीशचन्द्रस्य प्रवृत्तिज्ञानार्थं तत्समीपमगच्छाम, तत्र च वाटिकायां तत्स्थितिविषये किमपि ज्ञातुमचेष्टामहि । तदानीमस्माभिरालोकितं यद्धि वाटिकायां तस्यां तद्विषमधरातलं सतीशचन्द्रेण शर्कराकण्टकलोष्टादिकं दूरीकृत्य समीकृतमासीत् । वाप्या मूलतलात् कर्दमकण्टकोच्चारादिकं बहिष्कृत्य स जलशुद्धिं चाप्यकरोदिति । ततोऽस्माभिः स पृष्टः—"किमर्थं भवानत्र वाटिकाक्षेत्रे नन्वेतावत् परिश्राम्यति ? यात्रिणो भवतोऽतिथेरनेनायासेन प्रयासेन वा किं प्रयोजनम् ??"

स हि प्रोक्तवान्—"महाभागाः ! अहमत्र क्षेत्रे खनिजतत्त्वान्वेषणं कर्तुमिच्छामि । आदौ कांश्चन पाषाणखण्डान्मृल्लोष्टांश्च संगृह्य तान् विश्लेषणार्थं कालिकातानगरे वर्तमानां भूगर्भप्रयोगशालां प्रति प्रेषयितुकामोऽस्मि । ततो मयात्र कर्मण्यस्मिन् व्यापृतेन मासप्रायं मासाधिकं वा समयं स्थातव्यमवश्यमेव भवति । तावत्पर्यन्तमत्र स्थितोऽहं तामेतां वाटिकाभूमिं स्वावकाशसमये यदि परिष्करोमि, तदा कोऽत्र दोषः ?"

वयम्-"दोषस्तु तावन्नास्त्येवान्ततः परन्तु प्रयासेनानेन भवान् कं वा भौतिकं लाभं लप्स्यते ? प्राप्तकालमितः प्रस्थानसमये किं वात्रत्यं वस्तु श्रीमता सह नेतुं शक्ष्यते ??"

सः—"अथ गच्छति काले भवन्तः स्वयमेव हि द्रक्ष्यन्ति यन्मया कृतस्य परिश्रमस्य फलमहमत्रैवोपभुज्य यास्यामीति ।"

एवमेव तस्य श्रीसतीशचन्द्रमुखोपाध्यायस्य तच्चिकीर्षितं ज्ञातुं वयं प्रायेण नित्यमेव हि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्सविधे यातायातं कुर्वन्तोऽभवाम। दिनत्रयानन्तरमस्माभिस्तत्र वाटिकायामवालोकि यद्धि सतीशचन्द्रो मुखोपाध्यायमहाशयस्तां समस्तामपि वाटिकाभूमिं समीकृत्य, परिष्कृत्य, हलेनाकृष्य च तस्यां कानिचिद् बीजानि निचिक्षेपेति। तस्यां हि भूमौ पृथक पृथक् क्षेत्राणि विरच्य, यथोचितं विभज्य, केदाराणि च विरचयामास सः। ततः क्षेत्रसीमानं परितः कण्टकजालैस्तृणगुल्मसमूहैस्तद्रक्षापङ्क्तिं चाप्यकल्पत। समस्तं दिनं स परिश्रमपूर्वकं विशिष्टरीत्या जलसेकं कृत्वालवालेषु जलमापूरितवान्। तत्सर्वमवलोक्य वयं तं मुखोपाध्यायं श्रीसतीशचन्द्रमहाशयं प्रारम्भशूरं मोघारम्भकर्तारं व्यर्थायासप्रयासविधायकमकिञ्चित्करं श्रमस्य शक्तेश्चापव्ययं कुर्वाणमर्द्धविक्षिप्तमिवातिशयभावुकात्मानमिव सम्भावयन्तस्तत्कार्यपद्धतिमवगणयन्तस्तद्विषये तुच्छताबुद्धिमकरवाम। परिणामतोऽस्माभिस्तस्या वाटिकायाः स्थले नित्यं सायङ्काले गमनं स्थगितम्। इत्थमेकं सप्ताहं यावद्वयं तत्र नागच्छाम। सप्ताहान्ते पुनरेकदा तत्प्रवृत्तिं जिज्ञासमाना वयं तत्रागच्छाम। तत्र चास्माभिर्यदवलोकितं तद्दृष्ट्वाश्चर्यकौतुकमिश्रितं चमत्कारमिवापश्याम। तथा हि–

समग्रापि सा वाटिकाभूमिर्लतापादपपत्रपुष्पैः श्यामायमाणासीत्। प्रत्येकं क्षेत्रे काष्ठवलिभिर्वंशदण्डैर्लतापादपानामाश्रयार्थमाधारा उपकल्पिता आसन्। वाप्या जलसिञ्चनार्थं क्षेत्रगामिनीः प्रणालिका मृण्मया निर्मिता अभूवन् यासु स्फटिकोपमं स्वच्छं शुद्धं च जलं धारावाहिप्रवाहं प्रवहदभूत्। जलनिष्कासनार्थमरघट्टयन्त्रं वापीमुखे काष्ठनिर्मितं संयोजितमभूत्। स्वयं महाशयः सतीशचन्द्रमुखोपाध्यायस्तदानीम् स्वच्छेन शीतलेन च जलेन सानन्दं स्नानमाचरन्नभूत्।

अथास्मांस्तत्र प्राप्तानवलोक्य सतीशचन्द्रः समन्दहासमुत्फुल्लाभ्यां नेत्राभ्यां विलोकयन्नुवाच–"स्वागतम् महाभागानाम्! आगम्यताम्!! चिरादागता भवन्तोऽत्र भवन्तः। साधु कृतम्। अद्य तावद् वाटिकामेतां निरीक्ष्यताम्। क्षणमेकं प्रतीक्ष्यताम्! अहमधुनैवागच्छामि!" एवमुक्त्वा स कुटीरं प्रविश्य वस्त्राणि परिधार्य बृहदाकारामेकां लोहमञ्जुषामेकं कर्गदपत्रं (chart) निष्कास्यास्मान् प्रत्यूचे–

"आम्, आगच्छन्तु महाभागाः। भवन्तो वाटिकामिमां पश्यन्तु।" एवमुक्त्वा स खल्वेकं क्षेत्रं प्रविश्य तत्रोद्गतान् हस्तप्रायमुच्छ्रितान् पादपान्, सर्वतो व्याततान। लताः फलशाकादींश्च वर्णयितुमारेभे :—

"दृश्यताम् महोदयाः! एतत् किलशाकपत्रादीनां क्षेत्रमास्ते। अस्मिन् क्षेत्रे वृन्ताकानां पञ्चदश पादपाः गृञ्जनानां दश, मरीचानां दश, कूष्माण्डानां दश, भिण्डिकानां दश तथा कोशातकीनां च दश पादपाः सन्ति।

"तदिदमपरं क्षेत्रं विद्यते। अत्र जम्बीरकर्कटिका–पालक्या–मेघनाद–मेथिका–लशुनपलाण्डु-टिण्डिसादीनां पञ्चाशत्पादपा वर्तन्ते। "पादपेष्वेषु केचन पक्षान्तरे, केचिन्मासान्तरेऽन्ये च सार्द्धमास-मासद्वयान्तरे च फलपत्रादिभिर्भोज्या उपयोगिनश्च भविष्यन्ति। अहमेवात्र निवसन्नेतानि भोक्ष्ये नाम नूनम्।"

अथास्माभिस्तत्सर्वमवलोक्य कौतुकाविष्टचेतस्कैः परिपृष्टम्–"महोदयाः! कथमिव त एते पादपा भवदुप्ता नियतकालखण्डाभ्यन्तर एव फलपत्रादीनि दातुं क्षमाः स्युः? अधुना नास्त्येव वर्षर्तुः। तत्कथमिव भवद्भिः रारोपिताः पादपाः सुनिश्चिते कालावधौ विनिश्चितायां मात्रायां फलशाकपत्रप्रदातारो भवेयुः?"

स उवाच–"महाभागाः! मयात्रोद्यानविद्याविज्ञानोक्तपद्धतिनियमानुसारं क्षेत्रपरिष्कार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृत्वा मृत्तिकां विशोध्य पादपानां मूले रासायनिकं खाद्यद्रव्यमर्पितम् । तदुक्तप्रकारेणैव विद्युद्धारोष्मजलमासिञ्चितम् । तथोक्तविधिनैव वायु-प्रकाशच्छायातपप्रदानस्य व्यवस्था विहिता । पुनरहम् पादपेष्वेषु कानिचित् तरलरसायनानि सूचीवेधविधिना प्रतिदिनं प्रदत्तवानस्मि । उद्यानविद्यायां कृषिविज्ञाने च सुतरां व्युत्पन्नोऽहं सुनिश्चितमेव स्वानुभवसिद्धमात्मविश्वासानुसारमिदमित्थं वक्तुमुत्सहे यद्धि पादपा एते मम सङ्कल्पानुरूपमेव यथासमयं पुष्पिताः पल्लविताः फलिताश्च सन्तो यावदाकांक्षितमभीष्टं साफल्यं प्रदद्युरेव । नास्त्येवात्र विषयेऽणीयानपि संशीतिलवलेशो मम हृदि" एवमुक्त्वा सोऽस्मद्दिशि मार्मिक्या गभीरया च दृशा परिपश्यन्नुन्मुक्तभावेनोच्चैर्जहास ।

तदुक्तमेतत् सर्वं निशम्य स किलास्माभिः पुनरपि च पृष्टः—"महोदयाः ! नन्वेतत्सर्वं कुतोऽथ भवद्भिरधीतचरमुद्यानविज्ञानम् ?"

स उक्तवान्—"अहं हि विज्ञानविषयमधिकृत्य विश्वविद्यालयपरीक्षामुत्तीर्ण एम. एस. सी. इत्युपाधि प्रथमश्रेण्यां प्राप्तवानस्मि । पुनारसायनविद्यायां तु मम साधीयानेवाधिकारो वर्वर्ति । अथ चास्माकं बंगप्रदेशे शाकपत्रफलादीनामुत्पादनं सर्वर्तुषु प्राचुर्येण क्रियते लोकैः । मम कुटुम्बिनः सर्वे प्रतिगृहं सदैवेत्थं भोग्यानि शाकपत्रादीन्युत्पादयन्ति तानि चाहरहः समुपभुञ्जन्तो मोमुद्यन्ते । ततोऽहं स्वावश्यकतानुरोधादत्रैवं चेष्टमानोऽस्मि भोः !" एवमुक्त्वा स भूयोऽपि साट्टहासं जहास ।

तद्दिने वयं तदुक्तं सर्वमाकर्ण्य स्वगृहानागच्छाम । अथ दशदिनानन्तरं वयं पुनस्तद्वाटिकाश्रमं गताः सतीशचन्द्र मुखोपाध्यायमहाशयस्तत्र वाण्याः समीपे स्वच्छपाषाणपट्टिकासने प्रशांतभावेन निषण्णोऽभूत् । स खल्वस्मांस्तत्र प्राप्तानवलोक्य समन्दस्मितं नमस्कारवन्दनादिकं शिष्टाचारं व्यधात् । ततः सः स्वकुटीरं गत्वा कानिचित् फलानि शाकपत्रपुष्पादीन्यादाय पुनरागत्यास्मानवदत्—

"महाशयाः ! गृह्यन्तामिमानि शाकफलपुष्पपत्राणि । स्वगृहान्नीत्वा तान्येतानि सानन्दमुपभुज्यन्ताम् । श्रीकृष्णो भगवान् गीतायामाह-'पत्रं पुष्पं फलं तोयं···' तथैवैतानि भवद्भ्योऽर्पयाम्यहम् ।"

एवं कथयित्वा सः पुनरपि साट्टहासं जहास । अथ पुनरित्थं वक्तुमारेभे—

"अहमिदानीं सप्ताहान्ते कालिकातानगरं गमिष्यामि, यतो मयेतो यानि यानि खनिजतत्त्वानि विश्लेषणार्थं कालिकातायां परीक्षणप्रयोगशालां प्रति प्राहीयन्त तेषां परीक्षणानन्तरं तद्विषयकं सविस्तरम् प्रतिवेदनमहमत्रासादयम् । अत्रत्याः खनिजपदार्था नोपयोगिनो मूल्यवन्तश्चेति प्रतिवेदकानामभिप्रायोऽस्ति । ततोऽधुना नाहमत्रैतत्सम्बन्धिनः कार्यकलापान् विस्तारयितुमुत्सहे न चात्र कर्मणि धनविनियोगं कर्तुम् ममेच्छास्ते । वस्तुतो बहुधनं मया स्वेन साकमानीतमभूत्, खनिजतत्त्वानां शोधकर्मसु तथा तद्व्यवसायवाणिज्ये च द्रव्यस्यैतस्य विनियोगकरणमपि चिन्तितमासीत् परन्तु प्रतिवेदनस्य प्रामाण्यात् कर्मण्यत्र न मे लाभलवलेशः सम्पत्स्यत इति तात्त्विकं किमपि कठोरं सत्यं मत्पुरतो विजृम्भमाणमास्ते । तत एव मयेतः प्रस्थातव्यमेव ।"

अथैवमुक्त्वा सोऽस्मभ्यं प्रचुरपरिमाणे शाकफलादीनि सानन्दं सहर्षं च प्रददौ । ततः सोऽस्मान् सर्वान् विलोक्य स्वस्वभावानुसारम् साट्टहासं जहास । तदनु सोऽस्मान् कुटीराभ्यन्तरं निन्ये । अथोपविष्टेष्वस्मासु तत्र तेन स्वमञ्जूषां बृहदाकारामुद्घाट्य तदन्तः संहतीकृत्य संरक्षितानि स्वकीयानि विश्वविद्यालयेभ्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्तानि प्रमाणपत्राण्यस्मभ्यं प्रदर्शितानि । ततोऽन्यस्यां मञ्जूषायां संस्थापितानि कानिचिन्महामूल्यानि संसिद्धान्यमोघानि रसायनान्यपि च काचकूपिकान्तर्निहितानि नः प्रादर्शयत् । स्वनामाक्षरोट्टङ्कितमेकं नलिकास्त्रमपि चास्मभ्यं प्रादर्शयत् सः । ततोऽपरस्यां मञ्जूषायां प्रयत्नपूर्वकम् संगृह्य सुरक्षिताः पञ्चाशत्सहस्राधिकाः कर्गदमुद्राश्चापि तेन प्रदर्शिताः । परिणामतोऽस्माभिः सुविनिश्चयेन ज्ञातम् यदसौ मुखोपाध्यायमहाशयो महाधनिको लक्षाधिपतिः वैज्ञानिकोत्तमः कृषिकर्मविशारदो वाटिकोद्यानरचनाविज्ञाने विशेषज्ञः संगीतनाट्यकलाप्रवीणो महालेखकः प्रतिभावान् साहित्यसेवको ग्रन्थनिर्माता नानाभाषाशास्त्राभिज्ञः सफलो रासायनिको दार्शनिको महान् विद्वांश्च वर्तत इति । दृष्ट्वा ज्ञात्वा चैतत् सर्वं वयमतीव चमत्कारचाकचक्यप्रभावितचेतसः श्रद्धावनताश्चाभवाम ।

अथ तद्दिने तेनानुज्ञाता वयं वाटिकायास्तस्या नगरं प्रति परावर्तामहि । मार्गे व्रजतोऽस्मान् प्रति सुहृदस्माकं सदानन्दः प्रोक्तवान्—"अहो ! मुखोपाध्यायमहाशयस्यास्य वैदुष्यम् ! अहो, कलाप्रावीण्यमस्य !! अहोऽस्य विद्यानुरागः !!! अहो ! निरभिमानोऽस्य सरलसरलो मधुरोऽपि च विनयशीलो गम्भीरः स्वभावः !!! सर्वतोऽधिकं श्रमशीलत्वं कर्मकौशलं त्वस्य धन्यधन्यमेव !!!"

अथ सप्ताहप्रायसमयानन्तरं वयं पुनरप्येकवारं सायंसमये श्रीसतीशचन्द्रमुखोपाध्यायमहाशयस्य दर्शनेच्छया तत्प्रवृत्तिञ्च ज्ञातुकामास्तां वाटिकां प्रति गन्तुं प्रस्थिता नगरात् । यावद्वयं सरोवरसमीपं मृत्तरयानानां यातायातकेन्द्रस्थलम् (Bus-Stand) प्राप्तास्तावदेवैकस्य मृत्तरयानस्याग्रासने तत्सञ्चालकस्य पार्श्वतो निषण्णो मुखोपाध्यायः प्रोच्चैः स्वरमस्मान् सम्बोध्य-सम्बोध्यामन्त्रयामास । वयं च तं तत्र तथा वर्तमानमवेक्ष्य तत्समीपं गताः । क्षणमेकं वार्तालापं कृत्वा गमनोद्यताय तस्मै प्रस्थानमङ्गलमाचक्ष्महि । तावदेव मरुत्त्वरयानं घर्र घर्र....शब्द ध्वनिं विदधद्गतिशीलं समभूत् । इत्थं श्रीसतीशचन्द्रमुखोपाध्यायोऽस्माकं नगराद्यात्रार्थं प्रतस्थे ।

अथ प्रस्थिते तस्मिन् कौतुकाद्वयं तद्दिनेऽपि तां वाटिकामगच्छाम । तत्र गत्वा वयमपश्याम तद्वाटिकास्थानं पूर्ववज्जनशून्यं नीरवं स्तब्धं जडमिवासीत् । गृहीतशेषाणां लतापादपादीनामुच्चारराशयो यत्र तत्र विकीर्णा आसन् । कुटीरञ्च तज्जीर्णं शीर्णं भग्नप्रायं पूर्ववदेव तूष्णीं स्थितमासीत् । वाटिकायाः क्षेत्रेषु यत्र तत्र केचन पशवस्तृणपादपलतादीनामवशेषान् भक्षयन्ति स्मेति ।

मनोविनोदकणिका—

दत्तसंकेता

युवा— संकेतितस्य कालस्य पालनं कुरुषे न किम् ? ।
आगच्छसि विलम्बेन नित्यं कान्ते ! ममान्तिके ।।

युवतिः— यदीष्टं नियते काले तवास्त्यागमनं मम ।
तदा त्वं घटिकायन्त्रं देहि मे प्राणवल्लभ !।।

—मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

-: श्रीशिरोमणिस्तोत्रम् :-

श्रीकृष्णलालशर्मा एम. ए. रजिस्ट्रारः, अजमेरः ।

अयि भवभञ्जन वारिजलोचन संकटमोचन शीलनिधे !
नवनलिनीदलकोमलकुड्मलकान्तिधराधर वेणुधर ।
जगदघनाशक संसृतिशासक दैत्यविनाशक ब्रह्मसख !
जय जगदीश शिरोमणि देव दयादयितेश्वर पाहि वियो ॥१॥

अभिलषितं प्रददातु नखेन नमूचिविदारितदेहलतं
सुरसरिद्धाराधर धरणीधरः मस्तकनृत्यनतं सुखदम् ।
पदकमलं कमलानिलयं कलिकल्मषनाशकरं शिवदम्
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥२॥

त्वयि रमतां रमणे सुखदे वनितेव मतिर्मम मञ्जुमते
ह्यविनयमाशु विनाशय शोषय पापविपाककलापमज ।
अनुनयममृतदीधिति-सदृश सुन्दरवक्त्रधर शृणु मे
जय जगदीश शिरोमणि देव दयादयितेश्वर पाहि विभो ॥३॥

अयि वृषभानुसुता दर्शित पथ भानुसुतातटकुञ्जगत
व्रजरमणीसुकटाक्षमनोहर पङ्कजपूजन तृप्तिमनाः ।
तव शरणं शरणागतरक्षक यामि दयाधन मेघतनो
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥४॥

मदजलचञ्चलचन्द्रमुखीचलनेत्रवशीकृतमत्तमनाः
अहरहवानरवद् व्यथितो विकलो विदधद् बहुनृत्यकलाम्
अहमधुना शरणं करुणामय यामि तवाङ्घ्रिसरोजयुगं
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥५॥

तव करुणा करुणावरुणालयकल्पतरोरधिका गदिता
ह्यभिलषितादधिकं न कदापि ददाति तरुर्यु सदां वरद ।
दिशति परं मनसा यदचिन्त्यमहर्निशमच्युत ते करुणा
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥६॥

तरति तरीमधिरुह्य मखीव कृतीव जगज्जलधेः कुकृती
चरणतरी भवतारणकारणमागमवेदगिरा गदिता ।
भवजलधौ पतिताय जनाय ददातु भवान् भवतारकतां
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जलधरवर्ण सुकर्ण दयार्णव पर्णतिरस्कृतकान्तकर !
प्रणतजनार्तिहरौ विमलौ वरदौ विदितौ भवतः सुकरौ ।
श्रियमतुलां दिशतां सुखदां सुरनायकसायकचापधरौ
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥८॥

भवदवदाह-वितप्ततनुर्द्युसरिद् भुवनं शिशिरं सुखदं
तव युगलं चरणं कमलं शरणं करवाणि गुरो जगतः ।
हर ममतां मम तां जडतां भुवि या मम तापसहस्रकरा
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥९॥

रविसुतकिङ्कर उन्नतकन्धर एति निहन्ति गदाधर मां
वरद विगर्जति तर्जति धर्षति कर्षति पाशनिबद्धतनुम् ।
अघहरणं मरणे शरणं दिश ते चरणं भवतारक मे
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥१०॥

वितरतु भद्रमभद्रहरो विधिरुद्रसुपूजितपद्मपदो
मम जनुषो दुरितं दलयत्वघमल्लविमर्दन मत्तभटः ।
अवतु खलाद्दुरिताद्विषमाज्जलवारणतारण मुक्तखग !
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥११॥

मम मधुसूदन मत्तमनो विषयेषु रतिं कुरुते सततं
हरिणदृशां वशतां प्रगतं परवानिव नृत्यति भोगरतम् ।
दमय दयामय तद्दयया गुणसागर नागर छिन्धि गुणं
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥१२॥

प्रलयपयोद विमुक्तपयो जननाशनिवारण शैलधर
शरदि वने निशि रासकृते मुरलीमधुरध्वनिरन्ध्रतः ।
जयति सुदर्शन चक्रधरस्सुरमानुषदुःखहरस्सुकरः
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥१३॥

मम तव भक्तिरतस्य हरे यमकिङ्करतो न भयं प्रभवेत्
त्वयि वरदे सति नास्ति भयं भवसागरसंचरतस्तरतः ।
सवितरि खे सति खेलति खादति निर्भयतस्तिमिराद्धि खगः
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥१४॥

अयि भगवन्नवतारवता कतिधा ह्यवता भवता न जनाः
द्रुपदसुताम्बरकर्षणतो द्विरदोप्यवतो मकराननतः ।
अहमपि भोगभुजङ्गहतो गरुडासन रक्षणयोग्यजनो
जय जगदीश शिरोमणिदेव दयितेश्वर पाहि विभो ॥१५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तनभरनाभिनिरीक्षणतः सुतनोर्मुदमञ्चति चित्तमज
मदरसमादकतां पिबतो व्यसने सुरते मम याति वयः।
मम कुमतिं ममतापहतां हर सार्थकतां नय नाम हरे
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥१६॥

रतिरसमुत्तरलीकरणे सरसा सुभगा रुचिरा ललनाः
सदसि भजन्ति जनं सुकृतिं रमते स नरोऽपि रतो निशि ताः।
परमखिलं सुखमेतदिहेश्वर ते कृपयैव नरो लभते
जय जगदीश शिरोमणि देव दयादयितेश्वर पाहि विभो ॥१७॥

दनुजवनी भवमार्गनिरोधक कंसकुकण्टकनाशकरी
यदुकुलकैरव-चन्द्रमणेर्वसुदेवगृहे सुरकार्यकृते।
जयति जनिर्जगतोधिपतेः शतकोटिहुताशनधामधर
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥१८॥

हरिणदृशां कलकान्तिजुषां वलचित्त विकर्षणकामशरं
नयनयुगं नयनोत्सवदं नलिनीदलनिन्दितकान्ति चलम्।
प्रतिदिनमक्षि भवेत्सफलं मम सुन्दरदर्शनतस्तव तद्
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥१९॥

भवविपिने भ्रमतो भ्रमतः शिथिलालयतां तनुतां भजतः
बहु यशसस्तव रूपधृतः प्रतिमाक्षिगता मम नो सुखदा ?
नयनधृतां फलमच्युत दर्शय ते प्रतिमां सगुणामगुण !
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥२०॥

अमितगुणस्य रहस्यमयस्य यशो महिमास्तवनं क्व हरेः
क्व च भवभामिनि-भोगविलास गतिः कुटिला मम कृष्ण यतिः
सलिलनिधेस्सलिलार्पिततर्पणवत्तवदत्तवचः स्तवनं
रसयतु पापविदारि मनोमलहारि सुपाठरतान् वरद ॥
जय जगदीश शिरोमणिदेव दयादयितेश्वर पाहि विभो ॥२०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भजत संस्कृतम्

ले० श्रीखंडविल्लि सूर्यनारायणशास्त्री, पूर्वगोदावरी

(१)

अमरसेवितं मुनिभिरर्चितं अमृतसम्मितं प्रकृतिसुंदरम् ।
वेदशास्त्रसन्मंदिरं परं मधुरवाङ्मयं भजत संस्कृतम् ॥

(२)

रुचिरशब्दजं शब्दशक्तिजं विश्वविस्तृतं विश्वभाषितम् ।
सर्वशास्त्रसद्विषयबोधकं सर्वतारकं भजत संस्कृतम् ॥

(३)

विश्वभावनाविलसितं परं तत्त्वभासकं श्रुतिसमीहितम् ।
नवरसान्वितं नवनवोदयं भारतीपदं भजत संस्कृतम् ॥

(४)

आद्यसत्कवीश्वरवरैर्वृतं कांक्षितार्थदं कलुषनाशकम् ।
मार्दवान्वितं महितशक्तिदं भुवनवंदितं भजत संस्कृतम् ॥

(५)

प्राच्यसंस्कृतिं भव्यरीतिभिः भासयत्सदा कीर्तितं परैः ।
सर्वसौख्यदं सर्वजीविनां भुक्तिमुक्तिदं भजत संस्कृतम् ॥

(६)

ऐकमत्यदं देशवासिनां सर्वजीविषु प्रेमभाजनम् ।
विश्वशांतिदं विश्वपुष्टिदं विश्वतुष्टिदं भजत संस्कृतम् ॥

(७)

"माक्समुल्लरु" प्रभृतिपंडितप्रेमभाजनं "गैटे" पंडितम् ।
तांडवक्रियापुलकितकृतं पश्यत प्रजाः भजत संस्कृतम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ शिक्षा ❀

आचार्यः श्रीदुर्गादत्तशर्मा, मैथिलः, जयपुरम्।

असारे खलु संसारे सतीषु बह्वीषु भोगयोनिष्वपि एका मनुष्ययोनिरेव कर्मयोनौ-आगच्छति भोगयोनिषु केवलं दुःखमेव जायते तासु कर्म विधाय बन्धनाद् विमुक्तिर्न भवति मनुष्ययोनौ आगत्य तु प्राणी कर्म कृत्वा बन्धनान्युच्छेतुं पारयति। अत एव मनुष्य-जन्मनो वैशिष्ट्यम्। एतादृशस्य मनुष्यस्य जन्मत एव शिक्षाया आवश्यकता भवति। प्रयोज्यप्रयोजकवृद्धयोरावापोद्वापाभ्यामेव बालकस्य पूर्वं शक्तिग्रहो भवति। ततश्चायुषा, साकं ज्ञानप्राप्त्यर्थं भवति शिक्षणस्यावश्यकता। शिक्ष विद्योपादाने इत्यस्माद् धातो भावेऽङि कृते शब्दोऽयं निष्पद्यते। शक मर्षणे शक्लृ व्याप्तौ एत्येताभ्यामपि धातुभ्यां सन्नन्ताभ्यामङि कृते सति रूपमिदं सिद्धं भवति तत्र विद्योपादान रूपाया एव शिक्षाया विषये किञ्चिद् विविच्यते अस्माकं स्मृतिषु चतुर्दश विद्या निर्दिश्यन्ते—

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।

अत एवास्मासु–आर्येषु – उपवीतानन्तरमेव ब्रह्मचर्यावस्थायां प्रत्यंकं द्विजातिबालकस्य कृते गुरुकुलमुषित्वासां विद्यानामध्ययनमावश्यकमासीत्। यासामध्ययनेन ईश्वरे विश्वासः, पित्रोः देवभावः भूतेषु दया-इत्यादयोऽस्माकं संस्कृतिमूलका धर्माः प्रादुर्भवन्ति स्म।

पुरुषार्थसाधनेषु धर्मार्थकाममोक्षेषु नैपुण्यं गतिश्च भवेतामीदृशीं शिक्षामस्मत्पूर्वजा अदुः। ते भोगवादं निकृष्टं मत्वा वैराग्यमेवाभयमवोचन्। अतो निर्विवादं सिद्धयति यदस्माकं संस्कृतौ त्यागस्य विशिष्टं स्थानमास्ते। देशप्रेम्णा तेषां मानसं परिपूर्णं भवति स्म। धर्म्ये कर्मणि लोकानां भूयानादर आसीत्। 'सा विद्या या विमुक्तये' इत्यनुसारं जना मोक्षे धर्मे च विशेषेणोत्सुका आसन्। ऐहिक सुखसाधनप्रवृत्ताः परमार्थमपि साधयन्ति स्म। तदा धनधान्यपूर्णमासीत् अस्माकं भारतम्। पर्जन्यश्च काले वर्षी आसीत्। दुर्भिक्षस्य का कथा। अकाले मरणमपि न भवति स्म। समृद्धः स काल आसीत्, यस्मिन् अस्माकं संस्कृतिमूलिका शिक्षा प्रवर्तितासीत्।

अत एव वयं संस्कृतविपचितस्तारस्वरेण कथयामो यत्पुनरपि संस्कृतशिक्षया भवितव्यम्। स्वातन्त्र्यप्राप्तेरविंशति वर्षाणि व्यतिगतानि, किन्तु आवश्यके शिक्षाविषयेऽद्यापि न स्थैर्यमायातम्। महान्तो नेतारः शिक्षाविशारदाश्च पौनःपुन्येन आधुनिकी शिक्षापद्धतिः परिवर्तनीयेति कथयन्ति किन्तु परिवर्तनस्वरूपनिर्धारणात्ते बिभ्यति। स्वातन्त्र्यप्राप्त्यनन्तरमपि आङ्गलभाषादासत्वमापन्नं तेषामस्तिष्कं वर्तते। आङ्गलभाषामोहं त्युक्तुं न ते वाञ्छन्ति। अतोऽस्माभिरुद्घुष्यते भारते भारतीयसभ्यतासंस्कृतिमूलिकयैव शिक्षया भवितव्यम्। सा च शिक्षा संस्कृतमेव यतो हि भाषया साकं तद्देशीयसभ्यतासंस्कृत्योरनवच्छिन्नः सम्बन्धो भवति। अतः सभ्यतासंस्कृत्योरुज्जीवनाय तद्देशीया मूलभाषा रक्षणीया यस्या माध्यमेन अस्माकं वेदाः, पुराणानि इतिहासग्रन्थाश्च लिखिता वर्तन्ते—

इदानीमेव योऽयं छात्रान्दोलनरूपो झंझावातः सर्वस्मिन् देशे प्रचलितोऽभूत् को नाम विपश्चित् तेनापरिचितः। किन्तु सगर्वमस्माभिरिदं कथयितुं शक्यते 'नास्मिन् मनागपि संस्कृतच्छात्राः सम्मिलिताः संस्कृताध्ययनेन तेषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशं प्रति तादृशं प्रेम (श्रद्धा) उत्पद्यते येन विवेकिनस्ते विघटनकार्ये प्रवृत्ता न भवन्ति।

बालकानां शिक्षाकालो विकासकालशब्देन व्यवह्रियते। अत एषां यया शिक्षया सुचारुरूपेण विकासो भवेत् सैवाश्रयणीया। अस्माकं संस्कृत भाषायामीदृशास्तात्त्विका गुणाः सन्ति येषां समावेशेन मानवो वास्तविकरूपेण मानव इति संज्ञाधारणे प्रभुर्भवति।

आधुनिकाः शिक्षाशास्त्रिण आङ्गलभाषामधीत्यैव महत्त्वमापन्नाः सन्ति। खादत, पिबत आनन्दं कुरुत इत्येवैषां सिद्धान्तः। अर्थकामयोः पूर्तिमेवेच्छन्त इमे आङ्गलशिक्षामेवाद्रियन्ते तस्या एव च समर्थनं कुर्वन्ति। नैतदुचितं प्रतिभाति-अवलोक्यताम्-प्रत्येकस्मिन् स्वतन्त्रदेशे स्वदेशीयभाषामाध्यमेनैव शिक्षा प्रदीयते। वैज्ञानिक युगेऽपि ते देशाः रूस, इजराइलप्रभृतयो न पश्चात्पदा जाताः अतोऽनुवादं विधाय विज्ञानशिक्षापि प्रदातुं शक्यते। धर्मसंस्कृतिविघातकस्य टालस्टायनिर्दिष्टसाम्यवादस्यावरोधेऽस्माकं संस्कृतिरेव क्षमा या पूर्वजन्मत्रादकर्मवादौ आधारीकृत्य स्थिता। अथेदानीं विचार्यते प्रचलिता संस्कृतशिक्षा सर्वाङ्गपूर्णा आहोस्वित् परिवर्त्तनसापेक्षेति तत्र परिवर्तनपक्षमनुसरता किञ्चिन्निवेद्यते अस्माकमाप्तानां सिद्धान्ते ह्रासवादो वर्तते वयं प्रत्यक्षमवलोकयामो यदस्मासु स्वजनकवत् विद्याबुद्धिबलादीनामभावो वर्तते कन्तु हठादापतितं ह्रासमवलोक्याध्यापनकर्मणि प्रवृत्ता वयं नितान्तं स्तब्धाः स्मः। अत्र युगस्यापि मुख्यं कारणत्वमास्ते। स्वातन्त्र्यप्राप्तेरनन्तरमपि आङ्गलभाषायास्तादृश एव प्रचार प्रसारश्च दृष्टिपथमायाति यादृशं आङ्गलशासनकाले आसीत्। प्रत्युत एधमान एव परिलक्ष्यते। सर्वत्र तद्भाषाविदामेव प्रभुत्वम्। सर्वेषु कार्यालयेषु तयैव भाषया कार्यं प्रचाल्यते। संविधाने स्वीकृताया अपि हिन्दीभाषाया दशामवलोकयन्त्येव भवन्तः। संख्या विना तस्या अपि अग्रेसरणं दुःशकम्। तदा को नाम वराको महर्धतायुगेऽस्मिन् केवलं पारमार्थिकज्ञानार्जनाय संस्कृतं प्रति कृतादरो भविष्यति। उदरदरीपरिपूरणचिन्ताकुलाः कथं संस्कृतं भजेरन्।

अद्यत्वे शास्त्रचाचार्यपदवीका अपि संस्कृतविपश्चितोऽध्यापनकर्मणि प्रवर्तमाना यथाकथञ्चिदेव साफल्यमाप्नुवन्तो दृश्यन्ते। लोकेऽपि भीतभीता इह दृग्गोचरतामायान्ति ते अस्यां शताब्द्यामपि कूपमण्डूकादिविविधसंज्ञया ते व्यवह्रियन्ते। अनेन ज्ञायते किञ्चित्-शिक्षायामेवैतादृशं दूषणं वर्तते येन ते शास्त्रे निष्णाता न भवन्ति लोकेऽपि च नैपुण्यं न वहन्ति। तत्र प्रथमं शास्त्रीयज्ञानमेव पर्यालोचयामः देशे कालस्य दुर्दमनीयः प्रभावो भवति। पाश्चात्यसभ्यताचाकचक्येन नितान्तं मुग्धाः संस्कृतच्छात्राः स्वात्मनि हीनत्वमवगणयन्तो भीतभीता इव अध्ययनकर्मणि प्रवृत्ता भवन्ति। ऐकान्तिकाध्ययनाभावेन तत्र सौष्ठवं नापादयंति। तेषां हृदये विविधविषयसमावेशत्वान्नैर्मल्याभावो भवति। अतो न याथार्थ्येन तत्र प्रवर्तन्ते। प्रवृत्तिता अपि स्वकं नैराश्ययुतं भविष्यमवलोक्य सापेक्षं श्रमं न कुर्वन्ति एतादृश्यां विषमपरिस्थितौ हन्त! पाठका अपि आलस्यवशात् स्वधर्मान्नूनं प्रच्यविताः परिलक्ष्यन्ते यतो हि वक्तुरेव हि तज्जाड्यं यत्र श्रोता न बुद्ध्यते।

अतः परिवर्तनसापेक्षा शिक्षा वर्तते।

इदानीं नवसंस्कृतविपश्चितो व्याकरणमेव दृढं निरोधकं स्वीकृत्य तत्सारल्यायैव कृतप्रयत्ना दृश्यन्ते।

नेदमुचितम्। एवन्तु स्वपादयोरेव कुठाराघातं ते कुर्वन्ति। व्याकरणमन्तरा न कोऽपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजतरंगिण्यामुल्लिखितेषु सहस्रशःविहारेषु एते प्रमुखाः सन्ति। विहाराणां निर्माणे स्वर्णस्यापि अतिमात्रं प्रयोगः व्यधीयत। रेखांकितानां विहाराणामवशेषा मया कश्मीरयात्रायां दृष्टा आसन्। १-१४२।

चैत्यम्—कोषेषु चैत्यं, आयतनं देवमन्दिरं यज्ञस्थानं चाभिहितम्। अस्मिन् देवायतने मृत्तिकामयी मूर्तिः स्थाप्यते स्म। भरतस्तावत् मृदां देवकुलं चैत्यमाह। एतादृशं च मयापि नालन्दाविश्वविद्यालयस्य अवशेषेषु दृष्टं, यत्र मृत्तिकानिर्मिता बुद्धमूर्तिरपि विराजते। एतानि चैत्यान्यपि बहुशः उल्लिखितानि ननु राजतरंगिण्याम्। वास्तुकलायाश्च रमणीयं चित्रं प्रस्फुटी कुर्वन्ति। तानि खलु प्रायेण विहारेषु एव निर्मीयन्ते स्म। अशोकनृपतिना धर्मारण्यविहारे गगन-चुम्बि चैत्यं निर्मितमासीत्। तुरूष्कान्वयोद्भूतैः हुष्कजुष्ककनिष्कैः नृपतिभिः शुष्कलेत्रादिदेशेषु बहूनि चैत्यानि कृतानि। तृतीयतरंगे युधिष्ठिर-द्वितीयस्य मन्त्रिभिः निर्मितानि चैत्यानि वर्णितानि सन्ति। चतुर्थतरंगे ललितादित्यनिर्मितानां बृहच्चैत्यानामुल्लेखः कविना विहितः। क्वचित् तेषु निवासस्योल्लेख अपि कविना कृतः।[५] प्रतीयते यत् समोपस्थ – विहारनिवासिनः स्नानादिविधिं सम्पाद्य पूजायै चैत्येषु आययुः। नालन्दा-विहारस्य चैत्यदर्शने अपि मया तदेवानुभूतम्।

मठः – कोषेषु मठन्ति वसन्ति छात्रादयः अत्र इति मठव्युत्पत्त्या, छात्रादिनिलयः मठः निगदितः। आदिपदेन परिव्राजकक्षपणकादीनां ग्रहणं क्रियते। तस्मात् छात्र-परिव्राजक क्षपणक-यात्रिणां वासस्थलं एव मठः इति अवगम्यते स्म।[६] राजतरंगिण्यां विद्यमानाः शतशः मठाः एतमर्थमेव प्रकटीकुर्वन्ति। मठा अप्येते वास्तुकलायाः दृष्टान्ता वर्तन्ते। वर्तमानसमये "सराय" धर्मशाला इति वा प्रसिद्धः पुराकालस्य मठः आसीत्। मठेषु पूजाकर्म अपि व्यधायि। केषांचित् प्रधानमठानामप्युल्लेखः विभिन्नेषु तरंगेषु कविना कृतः।

राजतरंगिण्यां वर्णिता मठा अधस्तनाः सन्ति।

मठ-नाम	निर्माता	विशेषता	स्थानं	संकेतः
सुभटामठः	सुभठा (सूर्यमती)	—	वितस्तापुलिने	७-१८०
मठद्वयं	सूर्यमती	विजयेश्वरा	अमरेश समीपे	७-१८३
मठः	हलधरः	स्वर्णालंकृतः	वितस्ता-सिन्धु-संगमे	७-२१४
भावन्मठः	—	—	—	७-१६७८
मठः	उच्चलः	प्रतिष्ठासमये स्वर्णादिदानं,	सुकृतसिद्धये,	८-२४२,४४ ८-२४६,४७
नवमठः	जयमती	विहारे निर्मितः	—	८-२४६, ४७
नागमठः	—	—	—	८-६७३, ७८२,
मठः	जयसिंहः	—	—	८-२४०१, २४०८

(५) श. क. दु. भाग २ पृ० ४६२, १-१०३, १७०, ३-३८०, ३८१, ४-२००, २०४।
(६) श. क. दु. भाग ३ पृ० ५६८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मठनाम	निर्माता	विशेषता	स्थानं	संकेत
मठः	धन्यः	—	सुरेश्वरी क्षेत्रे	८–२४१९
मठः	उदयः	—	सुकेश्वरी क्षेत्रे	८–२४२०, २४२१
मठः	शृंगारः	—	श्रीनगरे	८–२४२२
मठः	अलंकारः	—	—	८–२४२३
शृंगारमठः	शृंगारभट्टः	—	—	८–२४३६
भट्टारकः	,,	—	—	८–२४३६
वैकुंठमठः	रत्नादेवी	सुकृतप्राप्तिः	रत्नापुरे	८–२४३३, ३४
मठः	भुट्टः	सविहारमठोदग्रवेश्मः	भुट्टपुरे	८–२४३१
रत्नामठः	रत्नादेवी	अलंकृतः	—	८–२४४२
नैकमठाः	जयसिंह	शिल्पकलायुक्तः	—	८–२४४७
मठः	उच्चलः	कोषयुक्तः	—	८–३३१७
मठः	जयसिंहः	तपोधनभूषितः,	रुद्रलोकातिशायी	८–३३५०
मठः	मंरवकः	—	—	८–३३५४
मठद्वयं	सुमना	—	भूतेश्वरे, त्रिग्राम्यां च	८–३३५६
मठाः	हुष्कजुष्ककर्निष्काः	—	शुष्कलेत्रादिषु	१–१७०
मठाः	रावणः	सचतुःशालः, वटेश्वरलिंगयुक्तः	—	१–१९५
खेरीमठः	बकः	शतकपालेशयुक्तः, समातृचक्रः, बकबलिस्थानं,	खेरी	१–३३५
मठाः	संघियान्	—	येदा, भीमादेवी	२–१३५
मेघमठः	मेघवाहनः	—	—	३–८
मठः	रणारम्भा स्वामिदेवौ	पाशुपतनिवासः	प्रद्युम्न शिखरे	३–४६०
ब्रह्ममठः	ब्रह्मा	—	—	३–४७६
मठः	जयदत्तः	आचेश्वरा शिवप्रतिष्ठा	जयपुरे	४–५१२
मठः	गुणादेवी	—	पद्मपुरे, विजयेश्वरे	४–६९६
शूरमठः	शूरः	शूरेश्वरस्थापना, तपस्विभोगाय	सुरेश्वरीक्षेत्रे, सुगन्धापुरे	३–२४,३८ ५–२४
नन्दामठः	नन्दा	छात्रावासः, मठाधिपतियुक्तः, मृत्युसमये यशस्करागमनं,	—	६–८७,८८,९९,१०४
दिद्दामठः	दिद्दा	मध्य-लाट-गौडदेशीचानां निवासः,	दिद्दापुरे	६–३००
मठः	,,	दैशिक–द्विज–निवासः	वितस्ता-सिन्धु-संगमे	६–३०४,३०५, ६–३०८
तिलोत्तमामठः	लोठिका	—	श्रीनगरे	७–१२०,१४१, ८–४३५
लोठिका मठः	,,	—	,,	,, ,,
मठद्वयं	श्रीलेखा	—	—	७–१४२
अन्धमठः	उत्पलः	—	—	७–१४९
मठः	आसमती	—	त्रिपुरेश्वरे	७–१५१
वल्गामठः	वल्गा	—	—	६–३०८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिलाभि. श्वेतप्रस्तरैः (संगमरमर) वा निर्माताः, शिल्पिभिः विरचितास्ते मठाः विविधकला-कौशलपरिपूर्णा अभूवन्। भारतीयवास्तुकला-याश्च रमणीयं रूपं दधुः।

स्तूपाः—विहारेषु, धर्मक्षेत्रेषु च निर्मिताः स्तूपा अपि स्थापत्यकलायाः द्योतकाः सन्ति। अशोकमेघवाहन-ललितादित्य-प्रभृतीनां राज्य-काले, निर्मितानामनेकस्तूपानां कविरुल्लेखं चकार। ते स्तूपाः विविधकलाभिरलंकृता अभूवन्। एतादृशाः मया नालन्दाविश्व-विद्यालये दृष्टा ननु।[७]

मन्दिराणिः—राजतरंगिण्यां वर्णितानि सहस्रशः मन्दिराणि अपि स्थापत्यकलायाः हृदयावर्जकं चित्रं प्रस्तुवन्ति। तेषु अनेकेषां मया, धर्मप्रसंगे विस्तरेणोल्लेखः कृतः। मन्दि-राणि खलु, समृद्धानि, रत्नस्वर्णरजतालंकृतानि, गगनचुम्बीनि, प्राकारवेष्टितानि चाभूवन्।

सेतुः—नदीषु निर्मिताः सेतवः (पुल-बांध-वाच्याः) जलबन्धा वापि स्थापत्यकलाया रूपं प्रदर्शयन्ति, कविः अनेकेषामश्ममयानां सेतूना-मुल्लेखं चकार। तोयविप्लवशान्तये, बन्धवाच्याः सेतवः निर्मीयन्ते स्म। केचित् सेतवः नदीः उत्तरणाय विरचिता अभूवन्। कुशलाः शिल्पिनः प्रस्तरैस्तन्निर्माणं चकुः।[८]

वापी-कूप-उद्यान-सरांसिः— कविः बहुषु स्थानेषु वापीकूपोद्यानप्रभृतीनां वर्णन-मकार्षीत्। प्रायेण नगरेषु ते निर्मीयिते स्म।[९]

कुल्याः—कुल्यानां निर्माणमपि बहुश उल्लिखितं अनेककुल्याश्चापि कविना वर्णिताः।[१०]

गृहम्ः— गृहनिर्माणकलायां महती उन्नतिः कृतासीत् भारतवासिभिः, अट्टालिकासौध-गेह-कुटि-भवन-हर्म्य-वेश्म-प्रभृतीनां भिन्नानां गृहाणां रूपाणि वर्तन्ते कल्हणकृतौ। गृहाणां निर्माणे प्रस्तराणामिष्टिकानां च प्रयोगः प्रचु-र्येणाभवत्। तेषां भित्तिषु शिल्पिभिः चित्रकला व्यधायि। सुधाधवलिताश्च ते व्यधीयत। गृहेषु शौचालयस्नानागार-भोजनालय-शयनकोष्ठ-चतुः शालाप्रभृतयः पृथक् पृथक् विभागा बभूवुः तेषामाकारः रमणीयः आकर्षकश्चाभूत्।[११]

प्रकारः पारिखा सोपानम्ः—प्राकाराः खलु परितः नगरं निर्मीयन्ते स्म। ते हि प्रस्तर-मया आसन्, प्राकारात् बहिः नगररक्षायै परिखाः अभूवन्। यत्र सदा जलं प्रावहत्। भवनेषु सोपानान्यभूवन्।[१२]

दुर्गाः—शतशो दुर्गाणां दुर्गपदेन कोट्टपदेन च कल्हणेन्नोल्लेखः कृतः। प्रस्तरैः निर्मिताः ते हि अतीवसुदृढाः अभूवन्। युद्धसामग्री, योद्धारश्च तत्रातिष्ठन्। प्रायेण दुर्गाः पर्वतेषु व्यधीयन्त। लोहरदुर्ग-दुग्घात-वाणशालाप्रभृतयः दुर्गास्तत्र विशेषमुल्लेखनीया ननु। (८-१६-६६)

इत्थं च प्राचीनभारतस्य वास्तुकलायाः चरमोत्कर्षः राजतरंगिण्याः नगर-प्रासादो-पवन-प्राकार-मंदिर-दुर्ग-विहार-स्तूप-चैत्य-मठ-प्रभृतिभिः निश्चीयते।

(७) १-१०२, ३-१०, १३, ४-१८८, १२१। (८) ३-३५४, ४८३, ५-१२०, १-१५६, ५७, ५९। (९) १-१३०, २०३। (१०) १-३१८, ३२९। (११) १-३०१, २-११९, १-२९८, ४, ७०, २-५०, १-२४७, ३८, ५७, ४-१७, १९, १-४२, १९५। (१२) २-१२३, १-१०५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यूनिट खरीदने से आपका धन बढ़ता जायेगा !

यूनिट खरीदिये और फिर देखिये कि आपका धन कितनी तेजी से बढ़ता है। यूनिटों में पैसा लगाना सुरक्षित है। इन्हें खरीदने से नियमित लाभांश मिलता है। यूनिटों को आसानी से भुनाया जा सकता है। करों में छूट भी मिलती है क्योंकि १,००० रु० तक की आय पर आयकर नहीं देना पड़ता। यूनिट खरीदना आसान है। इन्हें १४,००० डाकघरों और प्रमुख बैंकों की ४,००० शाखाओं में बेचा जा रहा है। यूनिटों को एजेन्टों और स्टाक दलालों के जरिये भी खरीदा जा सकता है।

यूनिट ट्रस्ट आफ इण्डिया

बम्बई • नई दिल्ली
कलकत्ता • मद्रास



davp 68/1CE

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोरक्षार्थं सत्याग्रहः

गतमासे दिल्ल्यां सीतारामबाजारे जगद्गुरु-पुरी-शङ्कराचार्य—**श्रीनिरञ्जनदेवतीर्थस्वामि-महाराज**स्याध्यक्ष्ये समायोजितायां सभायां भूतपूर्वकेन्द्रीयगृहमन्त्री **श्रीगुलजारीलालनन्दा**-महोदयो गोहत्यायां पूर्णः प्रतिबन्धः परमावश्यकः इत्यस्य समर्थनं कुर्वाणः स्पष्टं समभाषत यत्—यदि गोरक्षान्दोलनं पुनः प्रारप्स्यते, तदा अहमपि श्रीशङ्कराचार्यमहाभागैः सह सत्याग्रहे भागं ग्रहीष्यामीति।

श्रीजगद्गुरुभिश्च प्रतिपादितं यत्—श्रीनंदा-महानुभावस्य कथनानुसारेण यदि सर्वकारस्य समितिः गोहत्यायां प्रतिबन्धमायोजयितुमनुशंसां न करिष्यति तदा वयं पुनः आन्दोलनं विधातुं विवशा भविष्यामः—इति।

संस्कृतं भारतस्यात्मा

विगते मईमासेऽस्मिन् तेल्लिचेरी (पाण्यानूरे) महादेवदेसाईवाचनालये आयुर्वेदस्य पण्डिततिलक-वी० पी० श्रीकन्दपुदुवालस्य चित्रस्यानावरणमाचरन् केन्द्रीयपरिवहनमन्त्री डा० वी० के आर० वी० रावमहोदयः समवोचत् यद् भारतस्य संस्कृतौ तथा परम्परायाञ्च संस्कृतस्य सुमहद् योगदानं वर्तते, यत् संस्कृतेन विना भारतमिदं पतिहीना नारी इव सम्पत्स्यते। तथा शिक्षा-संस्थासु च संस्कृतस्योपेक्षायाः करणादेव तासामभूत्सम्प्रति पतनम्। किञ्च वेदानां तथोपनिषदाञ्च भाषायां संस्कृते एव भारतस्य तथ्य आत्मा समभिव्यञ्जितो भवतीति।

प्रशंसार्हः प्रतापः

गतेऽस्मिन्नेव मासे दिल्ल्या 'अखिलभारतीय-महाराणा-प्रताप-स्मारक-संस्थान' द्वारा समायोजिये महाराणाप्रतापस्य ४२८ तमे जयन्ती-समारोहे संसदीय-कार्यसञ्चारमन्त्रिणा डा० श्रीरामसुभगसिंहमहानुभावेन भाषितं यत् मेवाडस्य महाराणाप्रतापस्यानुपमस्त्यागः पराक्रमश्चानुकरणीयो विद्यते। तेन हि प्रतापमहानुभावेन सुकठिनतमे तस्मिन् समये भारतस्य मानमर्यादां स्वातन्त्र्यञ्च सुरक्षितुं यः प्रयत्नः समनुष्ठितः, स नूनं वर्तते प्रशंसार्ह एव। स जनानां कृते तदानीं स्वतन्त्रतायाः भावनां पूजयितुं प्रेरणाञ्च दत्तवानिति।

किञ्चास्मिन्नेवावसरे वित्तमन्त्रालये उपमन्त्रि-श्रीजगन्नाथपहाडियामहोदयेन कथितं यत् श्रीप्रतापो न केवलं राजस्थानस्यैव, अपि तु समग्रस्यापि देशस्यासीत्—इति।

एवं दिल्लीस्थितो महापौरः ला० श्रीहंसराज-गुप्तमहोदयः समवोचद् यत् महाराणप्रतापस्तदानीं राज्यसिंहासनमारूढवान् यदा हि देशेऽत्र वैदेशिकानां राज्यं पूर्णतया बद्धमूलमजायत। तदानीं तेन वीरेण च जनानां सङ्घटनं विधाय मुगलसम्राजोऽकबरस्य साम्मुख्यं महतोत्साहेन कृतमिति।

तथा च राजस्थानसर्वकारस्य जनसम्पर्क-निदेशकः श्रीराजेन्द्रशङ्करभट्टमहोदयस्तदानीं प्रतिपादितवान् यत् 'आततायिनां सदा विरोधः कर्तव्यः' इत्येषा अस्माकं प्राचीना परम्परा अवर्तत, तेन महाराणाप्रतापेन सैषा परम्परा संरक्षितेति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्तुतो येऽपि महापुरुषाः कायेन वाचा मनसा च सदा मातृभूमेः संरक्षणाय स्वजीवनमपि समर्पितवन्तस्ते नूनमाकल्पान्तं संस्मरणार्हाः समभिनन्दनीयाः प्रशंसार्हाश्च सन्ति। अतः स महाराणाप्रतापो दिवंगतोऽपि –

भूपोचितान् बहुविधान् विषयोपभोगान्,
त्यक्त्वा स्वजन्मधरणीपरिरक्षणाय
योऽसह्यदुःखशतमाप यशःशरीरो
– ह्यद्यापि जीवति स वीरवरः प्रतापः

रोबर्ट-कनेडीमहोदयस्य देहावसानम्

मईमासस्यास्य ६ तारीकानां—अमेरीकीयसेनेटर-रांबर्ट-कनेडीमहोदयस्य देहावसानं जातम्। तस्य मस्तिष्के सिरहानामकेन दुष्टेन घातुकेन गुलिकाभिः प्रहारः कृत आसीम्। यद्यपि रांबर्टकनेडीमहोदयस्य प्राणरक्षार्थं २५ घण्टात्मकं कालं यावत् कुशलैर्द्रावितरैः समुहान् प्रयत्नोऽपि कृतः परं स दुर्दैवतो निष्फल एव जातः। यदा तत्र दुःखप्रदोऽयं समाचारः प्रासरत् तदा तत्र सर्वत्र नैराश्यं दुःखञ्च व्याप्तमभूत्। एवमेवास्य स्व० ज्येष्ठभ्रातुः भू० पू० राष्ट्रपतिजानकनेडीमहोदयस्यापि जाता हत्या।

'समाचारपत्रैश्चेदं विदितमस्ति यद् अमेरिकायामद्यावधि चतुर्णां राष्ट्रपतीनां हत्या समपद्यत। वस्तुतः गर्हाहा सेयं हत्या राजनीतिके सामाजिके जीवने च अमेरिकायामेव भवति, नैषा वार्ता, अपि त्वस्माकं परमपवित्रे भारतेऽपि बहूनामेव महापुरुषाणां महात्म-गांधीप्रभृतीनां पूर्वं जाता। गतदिनेष्वेव च श्रीदीनदयालुरुपाध्यायमहोदयोऽप्येवमेव केनापि नरपिशाचेन हतः। अतः सर्वथात्र सर्वकारेण विशेषतया ध्यानं दातव्यम्।

द्विजशब्दमीमांसा

अयि विद्वांसः!

पूर्वं 'भारती' पत्रिकायां (वर्षं १५, अङ्कः १२) दिल्लीस्थितानां श्रीचूडामणिशास्त्रिमहोदयानां 'किं द्विजशूद्रभेदो वैदिकः?' इति लेखः प्रकाशितोऽभूत्। तस्य समाधानार्थञ्च मयापि विद्वांसोऽनिरुद्धाः।

तस्य समाधानार्थमेव प्रपूर्णावास्तव्यस्य मम सुहृद्वरस्य पण्डितप्रवरस्य श्रीबद्रीप्रसादशास्त्रिणः सोऽयं 'द्विजशब्दमीमांसा' इति लेखो गतेऽष्टमेऽङ्के भारतीपाठकानां पुरस्तात् समुपास्थाप्येत।

अन्ते चाहमाशासे यत् श्रीशास्त्रिमहानुभावस्य लेखमिमं समनोयोगमधीत्य श्रीचूडामणिशास्त्रिमहोदयस्तथा तन्मतानुयायिनश्च ये केचित् तेऽपि सन्तोषमवश्यमवाप्स्यन्ति। सहैव चात्र मुद्राणलयस्यासावधानतया यास्त्रुट्यः सञ्जातास्ताः संशोध्य पठनीयाः पण्डितैरिति निवेद्य विरमति—

विदुषां विधेयो
दीनानाथत्रिवेदी मधुपः, सहसम्पादकः

सफेद बाल काला

मैं अधिक प्रशंसा करना नहीं चाहता। हमारे 'सूर्यं कान्ति' तेल से बालों का पकना रुक कर सफेद बाल जड़ से हमेशा के लिए काला हो जाता है। भविष्य में नये बाल काले निकलते हैं। यह दिमाग और आंखों को ताकत बढ़ाता है। हजारों प्रशंसापत्र प्राप्त हुए हैं। यदि आप सोचते हैं बाल काला करने के सभी तेलों जैसा ही है तो एक बार अवश्य मंगाकर देखें। गुणों के समक्ष इतनी कीमत कुछ नहीं है। मूल्य १०)। विश्वास न हो तो मूल्य वापस।

दुर्गा फार्मेसी पो० कतरीसराय (गया)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

लक्ष्मीरहल्या चन्नम्मा
मीरा दुर्गावती तथा ।
कण्णगी च महासाध्वी
शारदा च निवेदिता ॥१२॥

लक्ष्मीः, अहल्या, चन्नम्मा, मीरा, दुर्गावती, कण्णगी, महासाध्वी शारदा, निवेदिता इमाः सर्वाः निरन्तरं वन्दनीयाः सन्ति ।

लक्ष्मी–(झांसीराज्यस्य सा महाराज्ञी लक्ष्मीबाईति नाम्ना प्रख्याता एकोनविंशशताब्द्यां इयं अभूत्) मोरोपन्त-ताम्बे नामकस्य पेशवामहोदयस्य आश्रितब्राह्मणस्य इयं कन्या मनुबाईति नाम्ना बाल्यकाले प्रथितासीत् । मनुबाईदेव्या विवाहः बाल्यावस्थायामेव झांसो नरेशेन श्रीयुतगंगाधरराव–नेवालकरमहोदयेन सह संजातोऽभूत् । विवाहानन्तरं मनुबाई झांसीराज्यस्य राज्ञी लक्ष्मीबाई इति नाम्ना प्रख्याताऽभूत् । स्वल्पकालानन्तरमेव लक्ष्मीबाई वैधव्यदुःखं प्राप्तवती सा एकं बालकं आत्मनो दत्तकपुत्रं कृतवती । अस्य दत्तकपुत्रस्य अधिकारः समिति (कम्पनी) सवकारेण अमान्यः कृतः तथा झांसी-राज्यस्योपरि च स्वाधिकारोऽपि सम्पादितः । लक्ष्मीबाई नाम्न्यै महाराज्ञ्यै केवलं पञ्चसहस्ररजतमुद्राणां प्रतिमास वेतनस्वरूपेण प्रदानस्य स्वीकृति र्दत्ता तैः आंग्लशासकैः समितिसर्वकारस्य विरुद्धं युद्धारम्भः कृतः । अस्मिन्नेव समये नानासाहबपेशवा, तात्याटोपे इत्यादिवीराणां नेतृत्वे १८५७ ख्रिष्टाब्दस्य विश्वविख्यातं ऐतिहासिकं युद्धमभूत् ।

लक्ष्मी, अहल्या, चन्नम्मा, मीरा, दुर्गावती, कण्णगी, महासाध्वी शारदा तथा निवेदिता सदा वन्दनीय हैं ।

लक्ष्मीः–(झांसीराज्य की महारानी लक्ष्मीबाई इस नाम से प्रसिद्ध १९ वी शताब्दी में ये हुई थी मोरोपन्त ताम्बे नामके पेशवा महोदय के आश्रित ब्राह्मण को यह कन्या मनुबाई इस नाम से बाल्यकाल में प्रसिद्ध थी । मनुबाई का विवाह बाल्यावस्था में ही झांसो नरेश श्री गंगाधरराव नेपालकर महोदय के साथ हुआ था । विवाह के पश्चात् मनुबाई झांसीराज्य की रानी लक्ष्मीबाई इस नाम से प्रख्यात थी । थोडे समय के पश्चात् ही लक्ष्मीबाई वैधव्य दुःख को प्राप्त होगई । उसने एक बालक को अपना दत्तकपुत्र किया । इस दत्तकपुत्र का अधिकार कम्पनी सरकार ने अमान्य कर दिया और झांसो राज्य के ऊपर अपना अधिकार भी उसने कर लिया तथा लक्ष्मीबाई महारानी को केवल पाँच-हजार रुपये प्रतिमाह वेतन स्वरूप देना उन अंग्रेज सरकार के लोगों ने स्वीकार किया । महारानो ने कम्पनी सरकार के विरुद्ध युद्ध आरम्भ कर दिया । इसी समय नानासाहब पेशवा, तात्या टोपे इत्यादि वीरों के नेतृत्व में १८५७ ईसवी में विख्यात ऐतिहासिक युद्ध हुआ । पुरुषवेश में महारानी लक्ष्मीबाई झांसीराज्य से बाहर आकर काल्पी क्षेत्र में स्वातन्त्र्य सैनिकों के साथ मिलकर अंग्रेज आक्रमणकारियों के विरुद्ध युद्ध करने लगी । स्वातन्त्र्य वीरों की वह वीर सेना महारानी लक्ष्मीदेवी के नेतृत्व से

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषवेशे महाराज्ञी लक्ष्मीबाई झांसीराज्यात् बहिरागत्य काल्पीक्षेत्रे स्वातन्त्र्यसैनिकैः सह सम्मिल्य आंग्लाक्रमकाणां विरुद्धं युद्धरताऽभूत्। स्वातन्त्र्यवीराणां सा वीरसेना महाराज्ञाः लक्ष्मीदेव्याः नेतृत्वेन सुशोभिताऽभूत्। ग्वालियरराज्यस्य जयाजीशिहेमहोदयः आंग्लाक्रमकैः सह युद्धरत आसीत्। राज्ञ्या ग्वालियरराज्यस्य दुर्गं हस्तगतं कृतम्। तस्मात् स्थानात् सा महाराज्ञी अश्वोपरि आरुह्य दुर्गात् बहिः आगतवती। मार्गे सा एकस्या लघुनद्याः तटे आंग्लसैनिकैः कृतावरोधाऽभूत्। तत्र युद्धे सा महाराज्ञी वीरगतिं प्राप्तवती। शस्त्राघातानन्तरं तस्या मृतदेहं आंग्लसैनिकाः स्पर्शं न कुर्युः एतदर्थं महाराज्ञ्याः सेवकैः तस्याः मृतदेहस्य तत्कालमेव अग्निसंस्कारः कृतः केवलं त्रयोविंशद् (२३ वर्षात्मके अल्पायुष्ये महाराज्ञ्याः लक्ष्मीदेव्याः कीर्तिः तस्या असाधारणशौर्येण, धैर्येण, संघटनकौशलेन, देशभक्त्यादिदिव्यगुणैश्च साऽपि अजरामरवत् संजातासीत्।

अहल्या – (अहल्यादेवी होल्करः) अष्टादशशताब्द्यां अहल्याबाई माणकोजीशिन्देनामकस्य प्रमुखस्य (पटेलस्य) कन्या आसीत्। इन्दौरराज्यस्य अधिपतेः मल्हाररावहोल्करस्य पुत्रेण श्रीखण्डेरावहोल्करेण सह तस्याः पाणिग्रहणसंस्कारोऽभूत्। श्रीखण्डेरावहोल्करस्य नाम्ना तस्य (स्थाने) राज्यशासनं कृतवती आसीत्। स्वल्पे एव समये पुत्रोऽपि परलोकगामी अभूत् तदनन्तरं अहल्याबाई होल्करः इन्दौर राज्यस्य शासिकाऽभूत्। पुण्यपत्तनस्य (पुना) रघुनाथरावपेशवामहोदयः इन्दौरराज्यं स्वहस्तगतं कर्तुम् ऐच्छत्। किन्तु अहिल्याबाई होल्करस्य राजनैतिकचातुर्येण स आक्रमणं कर्तुं नाऽशकत्।

अहल्याबाई होल्करस्य राज्यशासनं

सुशोभित हुई। ग्वालियर के राज्य के जयाजोशिंदे महोदय आंग्ल अक्रामकों के साथ रह कर युद्ध कर रहे थे। रानी ने ग्वालियर राज्य के दुर्ग को हस्तगत कर लिया। उस स्थान से वह महारानी घोडे पर बैठ कर किले से बाहर आई। मार्ग में उसको एक छोटी नदी के तट पर अंग्रेज सैनिकों ने रोका। वहां युद्ध में वह महारानी वीरगति को प्राप्त हुई। शस्त्राघात के पश्चात् उसका मृतदेह अंग्रेज सैनिक स्पर्श न करें इसलिये महारानी के सेवकों ने उसके मृत देह का तत्काल अग्नि संस्कार कर दिया। केवल २३ वर्ष की अल्पायुष्य में महारानी लक्ष्मीबाई की कीर्ति उसका असाधारण शौर्य, धैर्य, संगठन कौशल्य, देशभक्ति इत्यादि दिव्य-गुणों से वह अजर अमर हो गई थी।

अहल्याः– (अहल्या होल्कर) अठारवीं शताब्दी में अहल्याबाई माणकोजी शिंदे नाम के पटेल की लड़की थी। इन्दौर राज्य के अधिपति मल्हारराव होल्कर के पुत्र श्रीखण्डेराव होल्कर के साथ उसका पाणिग्रहण संस्कार हुआ था। श्री खण्डेराव होल्कर एक युद्ध में वीरगति को प्राप्त हो गए थे। अहिल्याबाई होल्कर अपने पुत्र मालेराव होल्कर के नाम से उसके स्थान पर राज्यशासन करती थी। थोडे ही समय में पुत्र भी परलोकगामी हो गया। इसके पश्चात् अहिल्याबाई होल्कर इन्दौर की शासिका हुई। पूना के रघुनाथराव पेशवा महोदय ने इन्दौर राज्य को हस्तगत करने की इच्छा की। किन्तु अहिल्याबाई होल्कर के राजनैतिक चातुर्य के कारण वह आक्रमण नहीं कर सका।

अहिल्याबाई होल्कर का राज्य शासन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी

त्रिंशद्वर्षपर्यन्तं चलितम्। तस्याः अत्यन्तिक-न्यायनिष्ठायास्तथा प्रजावात्सल्यस्य कारणात् सम्पूर्णाः प्रजाजनाः सुखिनः आसन्। अहल्या-बाईहोल्करस्य विशिष्टं कार्यमासीत् प्राचीनानां देवमन्दिराणां जीर्णोद्धारः। काशीविश्वेश्वरः, सोरटी सोमनाथः। विष्णुपदी (गया) परली बैजनाथः इत्यादीनां मन्दिराणां जीर्णोद्धारम् तया स्वद्रव्येण कारयित्वा भारतीयसंस्कृतेः पुनरुद्धारस्य असाधारणं कार्यं कृतम्। भारत-वर्षस्य अनेकेषु तीर्थक्षेत्रेषु ये यात्रिणः गच्छन्ति तान् सर्वान् अहल्याबाईहोल्करस्य पुण्यस्मरणं भवत्येव।

तीस वर्ष पर्यन्त चला। उसकी आत्यन्तिक न्यायनिष्ठा तथा प्रजावात्सल्य के कारण सम्पूर्ण प्रजाजन सुखी थे। अहिल्याबाई होल्कर का विशिष्ट कार्य था—प्राचीन देव मन्दिरों का जीर्णोद्धार। काशी विश्वेश्वर, सोरटी सोमनाथ, विष्णुपदी (गया) परली-वैजनाथ इत्यादि मन्दिरों का जीर्णोद्धार उसने अपने द्रव्य से करवाकर भारतीय संस्कृति के पुनरुद्धार का असाधारण कार्य किया। भारतवर्ष के अनेक तीर्थक्षेत्रों में जो यात्री आते हैं उन सबको अहिल्याबाई होल्कर का पुण्यस्मरण होता ही है।

चन्नम्मा – (केलादीक्षेत्रस्य राज्ञी) शिवाजीमहाराजस्य मृत्योः पश्चात् औरंगजे-बेन महाराष्ट्रस्योपरि आक्रमणं कृतम्। सम्भाजी महाराजस्य वधं कृत्वा सः शिवाजीमहाराजस्य द्वितीयपुत्रस्य श्रीराजाराममहाराजस्योपरि आक्रमणं कृतवान्। श्रीराजारामः दक्षिणभागे जिंजीदुर्गम् प्रति प्रस्थानम् अकरोत्। मार्गे मुगलानां सैन्यं तस्य सैन्यस्य पृष्ठभागे आक्रमण-रतमासीत्। श्रीराजारामः कस्यापि प्रबलपुरुष-स्य साहाय्यं अपेक्षते स्म। अस्यां घोरविपद वस्थायां केलादीक्षेत्रस्य राज्ञ्या श्रीमत्या चन्नम्मा-देव्या निजदुर्गमध्ये आश्रयो दत्तस्तस्मै। तया च स्वसैन्येन आक्रमकाणां मुगलसैनिकानां प्रखरः प्रतिकारः कृतः। श्रीराजारामस्य मार्गो निष्कंट-कोऽभूत्। सः निर्विघ्नः सन् जिंजीदुर्गं प्राप्तवान्। श्रीमत्या चन्नम्मादेव्या राजारामस्य रक्षणं कृत्वा नवोदितस्य शिवराज्यस्य अप्रत्यक्षं संरक्षणं कृतम्।

चन्नम्माः– (केलादी क्षेत्र की रानी) शिवाजी महाराज की मृत्यु के पश्चात् औरंगजेब ने महाराष्ट्र के ऊपर आक्रमण किया था। सम्भाजी महाराज का वध कर उसने शिवाजी महाराज के द्वितीय पुत्र श्री राजाराम महाराज के ऊपर आक्रमण किया। श्री राजाराम ने दक्षिण भाग में जिंजीदुर्ग के प्रति प्रस्थान किया। मार्ग में मुगलों की सेना उसकी सेना के पीछे आक्रमण कर रही थी। श्री राजाराम किसी भी प्रबल पुरुष की सहायता चाहते थे। इस घोर विपत्ति की अवस्था में केलादी क्षेत्र की रानी श्रीमती चन्नम्मा देवी के दुर्ग में उसने आश्रय प्राप्त किया। उसने (चन्नम्मा ने) अपनी सेना से आक्रामक मुगल सैनिकों का प्रखर प्रतिकार किया। श्री राजाराम का मार्ग निष्कण्टक होगया। वह निर्विघ्न होकर जिंजी-पहुंचा। श्रीमती चन्नम्मा देवी ने राजाराम की रक्षा करके नवोदित शिवराज्य सा अप्रत्यक्ष संरक्षण किया।

अपरा चन्नम्मा (कित्तूरस्य राज्ञी) कर्ना-टकप्रान्ते कित्तूरमण्डलस्याधिपति-मल्लसर्ज देसाईमहोदयस्य धर्मपत्नी चन्नम्मादेवी एका

दूसरी चन्नम्मा–(कित्तूर की रानी) कर्नाटक प्रान्त में कित्तूर मण्डल के राजा मल्लसर्ज देसाई महोदय की धर्म पत्नी चन्नम्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुप्रख्याता वीराङ्गना आसीत्। एकोनविंशत्यां शताब्द्यां आंङ्गलशासकैः स्वाधिपत्यविस्तारं कर्तुं भारतवर्षे चतुर्षु दिक्षु यत्न आरब्धः। अनेकेषु लघु-बृहद्राज्येषु येन केनाऽपि निषेण (बहाने से) समिति (कम्पनी) सर्वकारेण स्वाधिकारस्थापनार्थं प्रयत्न आरब्धः। चन्नम्मादेव्याः पत्युः अकाल-मृत्योरुत्तरं समितिसर्वकारस्य राजनीतिकेन प्रतिनिधिना कित्तूरराज्यं स्वाधिकारे कर्तुं ऐष्यत। आङ्गलसैनिकैः कित्तूरनगरोपरि आक्रमणं कृतम्। चन्नम्मादेव्यापि स्वसैन्यसंघटनं कृत्वा आंग्लसैन्येन सह भीषणं युद्धं कृतम्। आङ्गलशासकैः चन्नम्मादेवी सन्धिकर्तुम् अयाच्यत। सन्धेः पणा (शर्त) नुसारं चन्नम्मादेव्या अष्टादशांग्लाधिकारिणः मुक्ताः कृताः। कालान्तरे कृतघ्नैः आंग्लशासकैः चन्नम्मादेव्याउपरि द्वितीयं आक्रमणं कृतम्। अस्मिन् समये आंन्तरिकेन कलहेन चन्नम्मायाः परिभवोऽभूत्। तां स्वाधिकारे कृत्वा आंग्लैः बैलहोंगलदुर्गस्य कारागारे रक्षिता सा। तस्मात् दुर्गात् मुक्तिप्राप्त्यर्थं चन्नम्मादेव्या द्विवारं प्रयत्नः कृतः। किन्तु सा सफला नाऽभूत्। चन्नम्मादेव्याः पराक्रमं व्यक्तित्वं च समस्ते कर्नाटकप्रान्ते महत् स्फूर्तिप्रदं आसीत्, अस्ति च। बेलग्रामनगरे अस्याः स्वातन्त्र्यनिष्ठवीरमहिलायाः अश्वारूढप्रतिमायाः १९६० तमे ईस्वीयवसत्रे स्थापना कृता यस्याः राज्ञ्या लक्ष्मीदेव्याः चन्नाम्मादेव्याश्च जीवनगाथायां शतप्रतिशतं साम्यं दृश्यते।

मीरा – षोडश्यां शताब्द्यां अस्माकं देशे समुपस्थितेषु सन्तसमाजेषु मीरादेव्याः स्थानं भगवद्भक्तेषु असाधारणमस्ति। मीरादेव्याः पितुः नाम रत्नसिंहराठौडः आसीत्। बाल्याव-

देवी सुप्रख्यात वीराङ्गना थी। उन्नीसवीं शताब्दी में अंग्रेजों ने अपना राज्य विस्तार करने के भारतवर्ष में चारों दिशाओं में यत्न किया। अनेक छोटे बडे राज्यों में जिस किसी भी बहाने से कम्पनी सरकार ने अपना अधिकार स्थापित करने का प्रयत्न आरम्भ किया। चन्नम्मादेवी के पति की अकाल मृत्यु के पश्चात् कम्पनी सरकार के राजनैतिक प्रतिनिधि ने कित्तूरराज्य को अपने अधिकार में करना चाहा। अंग्रेज सैनिकों ने कित्तूरनगर पर आक्रमण कर दिया। चन्नम्मा देवी ने भी अपना सैन्य संगठन कर अंग्रेज सैनिकों के साथ भीषण युद्ध किया। अंग्रेज सैनिकों ने चन्नम्मा देवी से सन्धि करने की याचना की। सन्धि की शर्त के अनुसार अंग्रेजों के अठारह अधिकारी चन्नम्मा देवी द्वारा मुक्त कर दिये गए। कालान्तर में कृतघ्न अंग्रेजों ने चन्नम्मा देवी पर द्वितीय आक्रमण किया। इस समय आन्तरिक कलह के कारण चन्नम्मा का पराभव हुआ, उसको अपने अधिकार में कर अंग्रेजों ने बैलहोल दुर्ग के कारागार में रखा। उस दुर्ग से मुक्ति प्राप्त करने का चन्नम्मा देवी ने दो बार प्रयत्न किया। किन्तु वह असफल रही। १८२९ ईसवी में चन्नम्मा देवी का उस ही दुर्ग में निधन हुआ। चन्नमा देवी का प्रराक्रम और व्यक्तित्व समस्त कर्नाटक प्रान्त में महान् स्फूर्तिप्रद था और है। बेलगांव नगर में इस स्वातन्त्र्यनिष्ठ वीर महिला की अश्वारूढ़ प्रतिमा १९६० ईसवी सन् में प्रस्थापित की गयी थी। रानी लक्ष्मीबाई और चन्नम्मा देवी की जीवनगाथा में शतप्रतिशत साम्य देखा जाता है।

मीराः–सोलहवीं शताब्दी में हमारे देश में समुपस्थित सन्त समाज में मीरादेवी का स्थान भगवद्भक्तों में असाधारण था। मीरा देवी के पिता का नाम रत्नसिंह राठौर था।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थायामेव मीरादेवी एकेन सत्पुरुषेण भगवतः श्रीकृष्णस्य मूर्ति प्राप्तवती आसीत्। तस्यै श्रीकृष्णस्य मूर्त्यै मीरादेवी आत्मनः सर्वस्व-समर्पणं कृतवती। महाराणा सांगामहोदयस्य पुत्रेण श्रीभोजराजेन सह मीरादेव्याः पाणि-ग्रहणसंस्कारः सुसम्पन्नोऽभूत्। किन्तु श्रीमीरा-देव्या भगवतः श्रीकृष्णादतिरिक्तः कोऽपि पतिः स्वीकृतः नाऽसीत्। श्रीभोजराजेन द्वितीयो-विवाहः कृतः किन्तु अल्पकाले एव तस्य देहा-न्तोऽभूत्। श्रीमीरादेवी नित्यं भगवद्भक्त्यां व्यग्रा तल्लीना च आसीत्। तां परावर्तयितुं तस्याः (देवर) राणाविक्रमार्जितमहोदयेन घोरः प्रयासः कृतः। किन्तु प्रत्येकं प्राणसंकटे भगवतः असीमकृपया मीरादेव्याः संरक्षणं संजातम्। सन्ततुलसीदासः, जीवगोस्वामि-महोदयः, इत्यादयः समकालीनाः साधुपुरुषाः मीरादेव्याः योग्यतां मन्यन्ते स्म। राजस्थाने तथा अन्येषु हिन्दीभाषाभाषिक्षेत्रेषु मीरादेव्याः भक्तिरसपूर्णगीतानां तस्याश्च विभूतिमत्त्वस्य च असाधारणः प्रभावोऽस्ति।

बाल्यावस्था में ही मीरा देवी ने एक सत्यपुरुष से भगवान् श्री कृष्ण की मूर्ति प्राप्त की थी। उस श्रीकृष्ण की मूर्ति को मीरा देवी ने अपना सर्वस्व समर्पण कर दिया था। महाराणा सांगा महोदय के पुत्र श्री भोजराज के साथ मीरादेवी का पाणिग्रहण संस्कार सम्पन्न हुआ था। किन्तु मीरादेवी ने भगवान् श्रीकृष्ण के अतिरिक्त अन्य किसी को भी पति स्वीकार नहीं किया था श्री भोजराज ने दूसरा विवाह किया किन्तु थोडे ही समय में उनका देहान्त हो गया। श्री मीरा देवी नित्य भगवद्भक्ति में व्यग्र तल्लीन रहती थी। उसको इससे लौटाने का उसके (देवर) राणा विक्रमाजित महोदय ने घोर प्रयास किया किन्तु प्रत्येक प्राण संकट के समय भगवान् की असीम कृपा से मीरा देवी का संरक्षण हुआ। सन्त तुलसीदासजी व गोस्वामी जी, इत्यादि समकालीन साधु पुरुष मीरा देवी की योग्यता को मानते थे। राजस्थान में तथा अन्य हिन्दी भाषाभाषी क्षेत्रों में मीरा देवी के भक्तिरस पूर्ण गीतों का और विभूतिमत्ता का असाधारण प्रभाव हैं।

दुर्गावती — षोडश्यामेव शताब्द्यां महोबा-क्षेत्रस्य चन्देलवंशीय—क्षत्रियनरेशस्य राज्ञः कीर्तिसिंहस्य कन्या दुर्गावती अतीव रूपसुन्दरी आसीत्। गढा-मंडला-मण्डलस्य क्षत्रियस्य कच्छवाहशाखीयस्य दलपतशाहेन सह तस्याः पाणिग्रहणसंस्कारोऽभूत्। चतुःपञ्चवर्षानन्तर-मेव दुर्गावती वैधव्यं प्राप्तवती। साम्राज्य-विस्तारस्य पिपासुना मुगलसम्राजाअकबरेण अकारणमेव दुर्गावतीदेव्या गढामण्डलराज्यो-परि स्वाधिकारप्राप्त्यर्थं आसफखाननामकः सेनानायकः विशालया सेनया सह प्रेषितः। तेन शत्रुसैन्येन सह दुर्गावतीदेव्या अत्यन्तं वीरता-पूर्णः संग्रामोभूत्। गजारूढा सा वीरक्षत्रिया परमोत्साहेन युद्धरतासीत्। आक्रमणस्य

दुर्गावती:—सोलहवीं शताब्दी में महोबा क्षेत्र के चंदेलवंशीय क्षत्रिय नरेश राजा कीर्ति-सिंह की कन्या दुर्गावती अत्यन्त रूपसुन्दरी थी। गढा मंडला क्षेत्र के क्षत्रिय कछवाहाशाखीय दलपतशाह के साथ उसका पाणिग्रहण संस्कार हुआ। चार पांच वर्षों के पश्चात् ही दुर्गावती वैधव्य को प्राप्त हो गई। साम्राज्य विस्तार के पिपासु मुगल सम्राट् अकबर ने अकारण ही दुर्गावती देवी के गढामंडला राज्य के ऊपर स्वधिकार प्राप्त करने के लिये आशिफखान नाम के सेनानायक को विशाल सेना के साथ भेजा। उस शत्रु सेना के साथ दुर्गादेवी का अत्यन्त वीरतापूर्ण संग्राम हुवा। गजारूढ वह क्षत्राणी परम उत्साह के साथ युद्धरत थी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रबलता वृद्धिङ्गता। ऐक्यस्याभावः कृतघ्नता च अत्रापि प्रविष्टाऽभूत्। अन्ततो गत्वा स्वशरीरं पापाचारिणां मुगलानामाक्रमणकारिणां स्पर्शेन रक्षणार्थं दुर्गावतीदेव्या स्वखड्गे नैवात्मबलिदानं कृत्वा वीरगति र्लब्धा।

कण्णगी – तामिलनाडप्रदेशे "वंजिन-नगरम्" नामके एकस्मिन् प्राचीनमन्दिरे कण्णगीदेव्या मन्दिरमस्ति। तस्मिन् प्रदेशे अन्यान्यस्थानेष्वपि च कण्णगीदेव्याः मन्दिराणि सन्ति। तत्र एका महासती पतिव्रता चासीत् इति कृत्वा तस्याः पूजां कुर्वन्ति जनाः। कण्णगीदेव्याः अद्भुतं रम्यं च चरित्रं द्वितीयस्यां शताब्द्यां महाकविना इलंगोमहोदयेन लिखिते 'शिलप्यधिकारम्' नामके उत्कृष्टकाव्यग्रन्थे उपलब्धमस्ति तस्याः काव्यकथाया अनुसारं कण्णगी एकस्य वैश्यस्य कन्याऽसीत्। कोवलन् (कुवलयन) नामकेन वैश्यपुत्रेण सह तस्या विवाहोऽभूत्। माधवीति नाम्ना प्रथितायाः वाराङ्गनायाः प्रेमपाशे बद्धो भूत्वा एषः कोवलन् पुरुषः निर्धनोऽभूत्। पश्चात्तापेन दग्धो भूत्वा स पतिपरायणां पत्नीं कण्णगीं स्वेन सार्धं नीत्वा मदुरानगर्यां उद्योगार्थमगमत्।

तस्मिन् एव समये मदुरायाः पाण्ड्यनृपतेः नेंडूचेलियन्महोदय प्रधानराज्ञ्या एकं नूपुरं विलुप्तमभूत्। कोबलन् स्वपत्न्या नूपुरं विक्रेतुं राजमार्गे गतः आसीत्। एकेन सुवर्णकारेण नूपुरस्य चौर्यारोपः तस्योपरि स्थापितः राजाधीनश्च स कृतः। राज्ञ अविवेकेन अस्य कोवलन्जनस्य वधः कारितः। इमां वार्तां पतिपरायणा कण्णगीदेवी श्रुत्वा सा पत्युः निधनेन शोकसागरे मग्ना राज्ञः अन्यायेन च संक्रुद्धा विवशा भूत्वा राज्ञः सम्मुखं उपस्थिताऽभूत्। स्वसमीपस्थं द्वितीयं नूपुरं राजानं प्रदर्श्य

आक्रमण की प्रबलता बढी। एकता का अभाव और कृतघ्नता यहां भी घुसी। अन्त में अपने शरीर को पापाचारी मुगल आक्रमणकारी लोगों के स्पर्श से बचाने के लिये दुर्गावती देवी ने अपने खड्ग से ही अपना आत्म बलिदान करके वीरगति प्राप्त की।

कण्णगीः—तामीलनाड प्रदेश में वंजीनगरम् नाम के एक प्राचीन मन्दिर में कण्णगी देवी का मन्दिर है। उस प्रदेश में अन्यान्य स्थानों पर भी कण्णगी देवी के मन्दिर हैं। वहां वह 'एक महासती पतिव्रता थी' इस प्रकार उसकी पूजा अर्चा लोग करते हैं। कण्णगी देवी का अद्भुत् और रम्य चरित्र द्वितीय शताब्दी में महाकवि इलंगो महोदय द्वारा लिखे 'शिलप्यधिकारम्' नाम के उत्कृष्ट काव्य ग्रन्थ में उपलब्ध है। उस काव्यकथा के अनुसार कण्णगी एक वैश्य की कन्या थी। कोवलन् (कुवलयन) नाम के वैश्य के पुत्र के साथ उसका विवाह हुवा। माधवी इस नाम से प्रसिद्ध वैश्या के प्रेमपाश में बद्ध होकर यह कोवलन व्यक्ति निर्धन हो गया। पश्चात्ताप से दग्ध होकर वह अपनी पतिपरायणा पत्नी कण्णगी को अपने साथ लेकर मदुरा नगरी में उद्योग के लिए गया। उसी समम मदुरा के पाण्ड्य राजा नेडूचेलियन् महोदय की प्रधान रानी का एक नूपुर खो गया था। कोवलन अपनी पत्नी का नूपुर बेचने बाजार में गया था। एक सुवर्णकार ने नूपुर के चोरी का आरोप उस पर लगा दिया और राजाधीन करा दिया। राजा के अविवेक से इस कोवलन का वध कर दिया गया। इस बात को पतिपरायण कण्णगी देवी ने सुना और पति के निधन से शोकसागर में मग्न हो राजा के अन्याय से संक्रुद्ध तथा विवश हुई राजा के सम्मुख उपस्थित हुई

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकमपि वाक्यं वक्तुं क्षमः। अतो व्याकरणे न किमपि परिवर्तनापेक्षा। यदि व्याकरण-नियमेषु शैथिल्यं विधास्यते तदानवस्थया स्वैराः प्रयोगा प्रचालिता भविष्यन्ति। येषामर्थ-बोधोऽपि दुःशको भविष्यति। रामायणमहा-भारतादिमहाकाव्यानां रघुवंशादिमहाकवि-प्रणीतानां काव्यानाञ्चार्थबोधेऽक्षमा भविष्यन्ति।

अतो मद्विचारे तु सिद्धान्तकौमुद्या अध्य-यनं सर्वेषां कृते आवश्यकत्वेन विधातव्यम्। तदैव व्युत्पन्नाः संस्कृतपाण्डिता भविष्यन्ति सारल्यसरणिमनुसरन्तः कामं टीकाग्रन्थाना-मध्यापने केनचित्-शैथिल्येन भवितव्यम्। मध्ययुगे महाराजानामुपरञ्जनार्थं येयं दुरूहा शास्त्रार्थ परिपाटी नव्यन्यायपथमाश्रित्य ग्रन्थ लेखने प्रवर्तिता तया काठिन्यमापतितम्। तदध्ययनप्रवृत्तानां कृतेऽपि व्यवस्था भवेदेव पृथक् रूपेण।

एवं सति वेदान्त ग्रन्थानां ज्योतिषग्रन्था-नामपि पाठ्यविधौ समावेशेन भवितव्यम्।

एवं स्वसभ्यतासंस्कृतिपरिरक्षणदक्षा व्युत्पन्ना संस्कृतपण्डिता भविष्यन्ति।

अतः शिक्षापरिषदि अस्यां विद्वद्भिः संभूय संस्कृतशिक्षाप्रसाराय दृढपरिकरै भव्यिम्।

आधुनिकविषयाणामपि समावेशस्या-वश्यकता वर्तते अनेन व्यावहारिकं ज्ञानं तेषां भविष्यति यस्य विद्यते परमावश्यकतेति विरम्यते।

फैशन और उपयोग में अद्वितीय

'सेंचुरी' के अनूठे वस्त्र

हिज चॉईस-हर चाईस—सर्वोत्तम इजिप्सीअन रूई से निर्मित-मर्सराईज्ड, सेंचुराईज्ड (प्रीश्रंक) पौपलिनें।

हर हाईनेस—सफेद और रंगीन, मर्सराईज्ड सेंचुराईज्ड पॉपलिन।

रुबी—सुगंधित पौपलिन डोबी और चेक शर्टिङ्ग, सफेद, रंगीन और छपी हुई केम्ब्रिक्स।

परमसुख—सुपर फाईन धोतियों में सर्वश्रेष्ठ।

लेक्स ब्यूटी—सर्वोत्तम बारीक मलमल।

हर चॉईस—महिलाओं के वस्त्रों के लिए मनमोहक कपड़ा।

निराला—और "स्विस चैक" सिकडुन रोधक और गण्डी।

निर्माता :

दी सेंचुरी स्पिनिंग एण्ड मैन्युफेक्चरिंग कम्पनी लि०

इण्डस्ट्रीज हाउस

१५९, चर्चगेट रिक्लेमेशन, बम्बई—१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान प्राच्यविद्या प्रतिष्ठान

शोध, संदर्भ एवं दुर्लभ महत्वपूर्ण ग्रंथों का

राजस्थान पुरातन ग्रंथमाला के अन्तर्गत प्रकाशन

प्रकाशित ग्रंथों की सूची

(क) संस्कृत–प्राकृत

प्रकाशन का नाम	सम्पादक	मूल्य
दशकण्ठवधम्	श्रीगंगाधर द्विवेदी	रु० ४–००
श्रीभुवनेश्वरीमहास्तोत्रम्	श्रीगोपालनारायणबहुरा	,, ३–७५
रत्नपरीक्षादिसप्तग्रंथसंग्रह	श्रीपद्मश्रीमुनिजिनविजय, पुरातत्वाचार्य	,, ९–२५
स्वयम्भूछंद	प्रो० एच० डी० वेलणकर	,, ७–७५
वृतजातिसमुच्चय	,, ,, ,, ,,	,, ५–२५
कविदर्पण	,, ,, ,, ,,	,, ६–००
वृत्तमुक्तावली	स्व० पं० श्री मथुरानाथभट्ट	,, ३–७५
कर्णामृतप्रपा	पद्मश्रीमुनिजिनविजय, पुरातत्वाचार्य	,, २–२५
पदार्थरत्नमंजूषा	पद्मश्रीमुनिजिनविजय, पुरातत्वाचार्य प्रस्तावना–श्री दलसुख मौलवणिया	,, ३–७५
त्रिपुराभारती–लघु–स्तव	पद्मश्रीमुनिजिनविजय, पुरातत्वाचार्य	,, ३–२५
प्राकृतानन्द	,, ,, ,,	,, ४–२५
इन्द्रप्रस्थ–प्रबन्ध	डॉ० दशरथशर्मा	,, २–२५
एकाक्षर-नामकोश-संग्रह	पन्यासप्रवर मुनि रमणीकविजय	,, ९–००
वासवदत्ता कथा	जे० एम० शुक्ला	,, ४–५०
वृत्तमौक्तिक	म० विनयसागर	,, १८–२५
चांद्रव्याकरण	पं० वेचरदास दोशी	,, ७–००

पुस्तक विक्रेताओं को २५ प्रतिशत कमीशन दिया जाता है।

(राजस्थान सरकार द्वारा प्रसारित)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"संस्कृत-व्याकरण-पद्धतीनामुत्पत्तिः विकासश्च"

पं० श्रीदुःखिश्यामपट्टनायकः, संस्कृतविभागः, उत्कलविश्वविद्यालयः

पूर्वानुवृत्तम्

एषु शाकल्यः खलु ऋक्संहितायां पदपाठकर्तृतया प्रसिद्धः। परं तेन न किमपि व्याकरणं निबद्धं कृतम्, किञ्च सन्धिविषये तस्य क्वचिद्विभिन्ना विचारा एव प्रसिद्धाः स्युः। एवं बहुधा पाणिनेः पूर्वं व्याकरणं नासीदिति मतावलम्बिभिः शाकटायनादयोऽपि न व्याकरणकर्त्तारः इति प्रतिपादितम्। परन्तु पाणिनेः पूर्वमपि व्याकरणानि आसन् इति युधिष्ठिरमीमांसकादीनां मतं समुचितं प्रतिभाति, सहसैकस्य पूर्णाङ्गव्याकरणस्याविर्भावासम्भवात्। यद्यपि तत्पूर्वभवं सर्वाङ्गपूर्णं किमपि व्याकरणं नोपलब्धम्, तथापि व्याकरणसत्तायाः बहुभिः प्रमाणैः सिद्धत्वात् व्याकरणमासीदिति निश्चप्रचम्। तथा हि भगवान् पाणिनिः "आङि चापः" इति तृतीयाविभक्तेरेकवचनमाङ् शब्देनाह, किन्तु तेन तृतीयैवचनं "टा" इति पठितम्, न तु 'आङ्' इति। तत्र "आङिति टा-संज्ञा प्राचाम् इत्युक्तम्" इत्युपलभ्यते बालमनोरमादिटीकायाम्, येनेदमेव सिद्ध्यति यत्प्राचीनेषु व्याकरणेषु तृतीयैकवचनम् 'आङ्' इति श्रुतमासीत्, तत्स्वपरिभाषायां ङित्वप्रयुक्तानि कार्याणि परिहर्तुं पाणिनिना 'टा' रूपतां प्रापितम्। परं पूर्वभव-व्याकरण-संस्कारवशात् तस्यापि स्मरणसंरक्षणार्थं वा 'आङ्' अपि निर्दिष्टः। तथैव "औङ आपः" इत्यत्रापि—'औङ्'—प्रत्ययः प्रथमाद्वितीययो द्विवचने नोल्लिखितः तेन स्व-व्याकरणे। प्राक्तनव्याकरण-संस्कारादेव "औङः" इति सूत्रे व्यवहृतम्। पुनश्च 'ति तुत्र तथसिसुसरकसेषु च' (सू ३१६३) इति दशसु कृत्प्रत्ययेषु इण निषेधः पाणिनिना कृतः, परमेषु बहवः प्रत्ययाः कृत्प्रत्ययेषु पाणिनिना न पठिताः। यद्यपि अष्टाध्याय्यान्न पठितास्तथापि उणादिषु पठितत्वाद् वस्तुतस्तेषाम्पाणिनीयत्वमिति चेत् नेति अपरपक्षीयाः। यतः तदपि व्याकरणान्तरमेव। तस्माद् व्याकरणान्तरस्था अण्यत्रानूदिता इत्येव वक्तव्यं स्यात्। किमन्यत् 'कर्मणि द्वितीया' कर्तृकरणयोस्तृतीया' इत्यादिषु द्वितीया-तृतीयादिनाम्ना विभक्तयः पाणिनिना विहिताः न तु द्वितीया-तृतीयादिसंज्ञाः स्वशास्त्रे कृताः। तत्रापि प्राक्तन-व्याकरणदृष्टसंज्ञाभिरेवात्र व्यवहार इति व्याचक्षन्ते व्याख्यातारः। अनेन ते पाणिनिमेव पूर्वभवव्याकरणसत्तायाः प्रमाणत्वेन प्रतिपादयन्ति।

पुनश्च ऐन्द्र-व्याकरणस्यापि सूत्रं कुत्रचित्कुत्रचिद् उद्धृतं दृश्यते। विक्रम-प्रथमशताब्द्युद्भवेन भट्टारक हरिचन्द्रेण स्वचरक-व्याख्यायां "शास्त्रेष्वपि 'अथ वर्णसमूहः' इति ऐन्द्रव्याकरणस्य" इत्युल्लिखितम्, येनेदमेव ऐन्द्रव्याकरणस्य प्रथमं सूत्रमिति प्रमाणं मिलति। तथैव स्वनिरुक्तवृत्तिप्रारम्भे "नैकं पदजातम् यथा 'अर्थः पदम्' इत्यैन्द्राणाम्" इति दुर्गाचार्येणोद्धृतम्। तदेव कलापचन्द्रे सुषेणविद्याभूषणेनोल्लिखितम्—"'अर्थः पदम्' आहुरैन्द्राः, 'विभक्त्यन्तं पदम्' आहुरापिशलीयाः 'सुप्तिङन्तं पदम्' पाणिनीयाः" इति पुनश्च नन्दिकेश्वर-स्मृतकाशिकवृत्त्याः तत्त्वविमर्शिण्यामुल्लिखितमुपमन्युना-"तथा चोक्तम् इन्द्रेण अन्तर्वर्णसमुद्भूता धातवः परिकीर्तिताः" इति। डॉक्टर-बर्नल्महोदयानां मतं तु तामिलभाषायाः प्रथमं व्याकरणं तावत् ऐन्द्रव्याकरणानुसारम् इति कलापव्याकरणञ्चापि ऐन्द्रम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तानुगमिति हरप्रसादशास्त्रिणां मतम्। अतः पाणिनेः पूर्वं व्याकरणानि आसन्, किन्तु तेषां पद्धतिः क्लिष्टा आसीत्, नासीच्च सा स्वयं सम्पूर्णेति युक्तमभ्युपगन्तुम्।

पाणिनेः पूर्वं प्रातिशाख्ये वैदिकव्याकरणस्यालोचना आसीत्। प्रतिशाख्यात्पूर्वं तु शिक्षादिषु वैदिकमन्त्रोच्चारणस्य प्रक्रिया आसीत्। किन्तु प्रातिशाख्यं हि वैदिकव्याकरणमुच्यते। अत्र वैदिकशब्दानां व्युत्पत्ति-व्याकृति-निर्वचनोच्चारणादीनां विवेचनं वर्त्तते। वेदानां रक्षार्थमपि एषां प्रातिशाख्यानां प्रवृत्तिः। वेदानां प्रत्येकशाखमधिकृत्य प्रवृत्तत्वाद्धि शास्त्रमिदं प्रातिशाख्यमुच्यते। शाखां शाखां प्रति प्रतिशाखं, प्रतिशाखमधिकृत्य प्रवृत्तम्प्रातिशाख्यमिति तद् व्युत्पत्तेः। प्रातिशाख्यानां सूत्राणि सरलेन सुबोध्येन च विधिना उपगुम्फितानि, परमेतेषां रचनायाः प्राथम्येन केचिद् व्याकरणविषयाः परित्यक्ताः, यथा-तद्धिताः। सूत्राण्यपि न वैज्ञानिकरीत्या संयोजितानि। पुनश्चात्र केवलं वैदिक-विषयाणां विमर्शत्वेन लौकिकभाषाविचारः नोपन्यस्तः। तथापि एतानि अस्माकं परवर्त्तिव्याकरणपद्धतीनामुद्गमस्य प्रथमकारणरूपेण प्रतिभान्ति। अस्मादपूर्णाङ्गादेव क्रमशः व्याकरणं पूर्णाङ्गतामाप, ततः यास्कस्य निरुक्तं जातम्। निरुक्तं हि नाम पदविभाग-मन्त्रार्थदेवतानिरूपकं निघण्टोः व्याख्यारूपं च शास्त्रम्। निरुच्यते निःशेषेणोपदिश्यते निरपेक्षतया तत्तदर्थावबोधनाय पदजातं येन यत्र वा तन्निरुक्तम्। किन्त्वस्य पृथगङ्गस्वीकारतया व्याकरणात् पृथक्त्वं प्रतिपन्नं भवति। अत्र यास्काचार्यः वैदिकानां शब्दानां नामाख्यातोपसर्गनिपातरूपेण प्रविभक्तानाञ्च निर्वचनरूपेणार्थादिकं निरूप्य निरूपिताश्च तान् उदाहरणेनोपपादयन् पूर्वाचार्याणाञ्च मतभेदं प्रदर्शयन् तदुपरि पूर्वपक्षमुद्भाव्य तञ्च क्वचित्खण्डयन् उपपन्नेषु क्वचिन्मण्डयन् स्वकीयं निर्वचनप्रकारमवगमयति। निरुक्तस्य तु मतं यत्-सर्वाणि खलु नामानि धातुजान्येव। प्राचीनवैयाकरण-शाकटायनस्यापि आसीत् मतमिदम्। तथा हि-

"तत्र नामानि आख्यातजानीति शाकटायनो निरुक्तसमयश्च" —इति निरुक्तम् (१।१२।२)

"नाम च धातुजमाह-निरुक्ते व्याकरणे शकटस्य च तोकम्" इति महाभाष्यञ्च।

अत्र कतिपयलौकिकानामपि शब्दानां व्याख्यानं दत्तम्। यथा—

नरकः – न्यरकं नीचैर्गमनम्, नास्मिन् रमणं स्थानमल्पमण्यस्तीति वा।

नाकं–कमिति सुखनाम तत्प्रतिषिद्धं प्रतिषिद्धचेत।

जठरं–जठरमुदरं भवति जग्धमस्मिन् धीयते। इति।

किन्त्वस्मिन्नपि समग्राणां वैदिकलौकिकानां शब्दानां व्याकरणविषयाः नान्तर्भुक्ताः। अतः व्याकरणरचनायाः आवश्यकता सर्वैरत्यन्तमनुभूता। ततः महामतिः पाणिनिः अक्षरसमाम्नायादारभ्य लोकवेदोभयभाषां नियन्तुं व्याकरणं प्रणिनाय। तदा पाणिनिकाले अस्माकमियं संस्कृतभाषा एवं सुव्यवस्थिता नासीत्। विविधा विचित्राश्च प्रयोगा अस्यां भाषायां प्रचलिता आसन्। तेषु येऽत्यन्तं विरलाः ते पाणिनिना परित्यक्ताः, ये तु कथञ्चिदपि प्राप्तप्रचलनाः, ते विकल्पादिना संगृहीताः। यथा कृ-धातोरुत्तमपुरुषे 'कुर्मि' इत्यपि वाल्मीकीये रामायणे दृश्यते। तेन 'कुर्मि, कुवः, कुर्मः" इति त्रितयमण्यासीत् व्यवह्रियमाणम्। तत्र 'कुर्मि' इति त्रितयमण्यासीत् व्यवह्रियमाणम्। तत्र 'कुर्मि' इत्येतदतिविरलप्रचारं मत्वा समुपेक्षितं पाणिनिना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MINISTRY OF EDUCATION
SANSKRIT UNIT
RESEARCH SCHOLARSHIP FOR SANKRIT STUDIES
UNION MINISTRY OF EDUCATION

The Government of India have decided to award scholarships to the products of traditional system of Sanskrit Education to carry on Research in Sanskrit during 1967–68. The value of each scholarship will be Rs. 200/- p.m. (The award will be made on the recommendations of the Central Sanskrit Board).

Candidates must have obtained degree/Diploma (other than M.A. in Sanskrit) in the highest examination in Oriental Learning conducted by a University or State Government. Those who have appeared or intend to appear at such an examination this year may also apply.

The last date for the receipt of the applications in the Union Ministry of Education is 20th August, 1968. **No application will be entertained after the expiry of this date.** Further details and application forms may be had on a request from the Section Officer, Sanskrit Unit, Miuistry of Education (Room No. 330, C Wing, Shastri Bhawan) New Delhi. A self addressed envelop of the size 23cm×10cm may be sent along with the request for application form.

davp 68/35

शुभ कामनाओं के साथ

*** इन्डो फॉरेन एजेन्सीज् ***

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

–: सफेद दाग का मुफ्त इलाज :–

विद्वानों ने कहा है परिश्रम का फल कभी बेकार नहीं जाता। वर्षों कठोर प्रयत्न कठिन खोज के बाद हमने सफेद दाग की दवा पर पूर्ण शक्ति प्राप्त करली है। वह इतनी तेज है कि इसके ३ दिनों लगाने से दाग का रंग बदल जाता है और बहुत जल्द जड़ से हमेशा के लिए मिट जाता है। आप स्वयं एक बार दवा लगाकर देख लेंगे कि दवा कितनी शक्तिशाली है। हजारों ने लाभ पाया है। अभी प्रचारार्थ १ फायल दवा मुफ्त दी जा रही है शीघ्रता करें।

नक्कलो से सावधान

ब्रिटेन आयुर्वेद भवन, पोस्ट कतरी सराय (गया)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(बताकर) सा निजपतेः निरपराधत्वं आसाधयत्। स्वस्य अन्यायं विलोक्य राजा मूर्च्छितो भूत्वा पञ्चत्वं गतः। कण्णगीदेवी स्वपतेः शवस्य समीपं गतवती अभूत। अस्या नैष्ठिकपतिव्रतायाः स्पर्शेन तस्याः भर्तुः मृतदेहः सजीवोऽभूत्। कण्णगीदेव्याः पातिव्रतधर्मस्य अद्भुतं प्रभावं विलोक्य जनसमाजः चकितोऽभूत्। किञ्चित् कालानन्तरं कोलवान्देहः पुनः निर्जीवोऽभूत्। तत्र राज्ञः चितायां स्वदेहं प्रज्वाल्य महाराज्ञ्या सहगमनं कृतम्। कण्णगीदेव्याः शोकस्तु शान्तोभूत् किन्तु क्रोधस्तु यथापूर्वं प्रज्वलित एवासीत्। तेन क्रोधेन विवशया तया स्वशरीरात् अग्निनिर्माणं कृतम् तं चाग्निमादिशत् यत् वृद्ध-बालक-सज्जन-धार्मिकान् जनान् पतिव्रतधर्मपरायणं स्त्रीसमाजं च अस्पृष्ट्वा इमां मदुरानगरीं भस्मसात् कुरु। कण्णगीदेव्या आज्ञां परिपालयता ऽग्निदेवेन मदुरानगरी भस्मसात् कृता। चतुर्दशदिवसानन्तरं कण्णगीदेवी दिव्यरूपं धृत्वा स्वर्गलोकमगमत्। यस्मिन् स्थाने तया इहलोकस्य त्यागः कृतस्तत्र तस्याः मन्दिरं निर्मितमभूत्। पतिधर्मपरायणता भारतीयसंस्कृतेः श्रेष्ठं जीवनमूल्यमस्ति। तस्याः पातिव्रत्यधर्मस्य संदेशः कण्णगादेव्या जीवनगाथया सह दक्षिणभारते प्रसृतोऽभूत्।

शारदाः—(श्रीशारदा मां) भगवतः श्रीरामकृष्णपरमहंसस्य धर्मपत्नी श्रीशारदादेवी आधुनिकयुगस्य महासती आसीत्। श्रीरामकृष्णसदृशेन वीतरागपरमहंसेन सह विवाहानन्तरं तस्य परमार्थप्रवणे जीवने शारदादेवी वास्तविकेऽर्थे तस्य सहधर्मचारिणी आसीत्। श्रीरामकृष्णदेवः शारदादेवीं साक्षात् जगदम्बायाः स्वरूपं मन्यते स्म। तां षोडशीदेवी-

अपने पास का दूसरा नूपुर राजा को बताकर उसने अपने पति का निरपराधी होना सिद्ध कर दिया। अपने द्वारा हुए किए अन्याय को देख कर राजा मूर्च्छित होगया और मृत्यु को प्राप्त होगया। कण्णगी देवी अपने पति के शव के समीप गई। उसके नैष्ठिक पतिव्रता के स्पर्श से उसके पति का मृत देह सजीव होगया। कण्णगी देवी के पतिव्रतधर्म के अद्भुत प्रभाव को देख कर जन समाज चकित होगया। कुछ समय के पश्चात् कोलवान का देह फिर निर्जीव होगया। वहां राजा की चिताग्नि में अपना देह जलाकर महारानी ने सहगमन किया। कण्णगी देवी का शोक तो शान्त होगया किन्तु क्रोध तो यथापूर्व प्रज्वलित हो था। क्रोध के विवश उसने अपने शरीर से अग्नि निर्माण की और अग्नि को आदेश दिया कि 'वृद्ध-बालक-सज्जन-धार्मिक जन और पातिव्रतधर्मपरायण, स्त्रीसमाज को स्पर्श न करते हुए इस मदुरानगरी को भस्म कर'। कण्णगी देवी की आज्ञा का पालन करते हुए अग्निदेव ने मदुरा नगरी को भस्मसात् कर दिया। चौदह दिवस पश्चात् कण्णगी देवी दिव्यरूप धर कर स्वर्ग लोक चली गई। जिस स्थान पर उसने इहलोक का त्याग किया था वहां उसका मन्दिर निर्मित हो गया। पतिपरायणता भारतीय संस्कृति का श्रेष्ठ जीवन मूल्य है। उसके प्रतिव्रतधर्म का संदेश कण्णगी देवी को जीवन गाथा द्वारा दक्षिण भारत में प्रसृत हुआ।

शारदाः—(श्री शारदा मां) भगवान् श्री रामकृष्णपरमहंस की धर्मपत्नी श्रीशारदा मां आधुनिक युग की महासती थी। श्रीरामकृष्ण सदृश वीतराग परमहंस के साथ विवाह के पश्चात् उनके परमार्थप्रवण जीवन में शारदा देवी वास्तविक अर्थ में उनकी सहधर्मचारिणी थी। श्रीरामकृष्ण देव शारदा देवी को साक्षात् जगदम्बा का स्वरूप मानते थे। उसको षोडशी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ति मत्वा शारदादेव्याः पूजा श्रीरामकृष्णेन कृताऽऽसीत् । शारदामाता स्वदिव्यपतिं साक्षात् जगदीश्वरं मन्यते स्म । श्रीरामकृष्णदेवः यदा समाधिस्थोऽभूत् तदा तस्य विवेकानन्दादि-शिष्याणां पुत्रवत् परिपालनं तथा मार्गदर्शनं च शारदादेव्या कृतमासीत् । स्वपतिदेवस्य च आध्यात्मिकं कार्यं सुचारुरूपेण सम्पादितम् ।

भगिनी निवेदिताः– एकोनविंशत्यां शताब्द्यां आयर्लैंडदेशस्य रेवंड नोबलमहोदयस्य कन्या मार्गरेटदेवी, स्वामिविवेकानन्दस्य विभूतिमत्त्वेन प्रभाविता भूत्वा ईसवीय १८९८ वत्सरे तस्य शिष्या अभूत् । स्वव्यक्तित्वं पूज्यस्य स्वामिनः चरणयोः समर्प्य सा तेन सह हिन्दुस्थानं आगतवती । आश्रमीये जीवने सा 'भगिनी निवेदिता' इति नाम प्राप्तवती । बंगीयभाषायाः हिन्दीत्यादिभारतीयभाषा-समूहस्य, आध्यात्मिकसाहित्यस्य, भारतीयस्य सांस्कृतिकैतिहासस्य अध्ययनं कृत्वा तथा भारतीय समाजजीवनेन सह समरसा भूत्वा 'Web of Indian Life' इत्यादीनां उत्कृष्ट-ग्रन्थानां रचनां निवेदिता कृतवती । स्वामि-विवेकानन्दस्य विचारधारा तया पूर्णतया आत्मसात्कृता आसीत् । कलकत्तानगरस्य क्रांतिकारिकार्यकर्तृसमूहोऽपि तया निवेदिता-देव्या मार्गदर्शनं लभते स्म । हिन्दूधर्मस्य दीक्षां गृहीत्वा भगिनीनिवेदितया अस्य धर्मस्य श्रेष्ठता समस्ते संसारे स्पष्टतया प्रकटितासीत् । हिन्दु-धर्मस्य आधुनिकनवजागरणस्य कृते भगिनी निवेदितायाः स्थानं उच्चकोटिकम् आसीत् इति कथनं सर्वथा योग्यम् अस्ति ।

देवी यह मानकर शारदादेवी की पूजा श्रीराम-कृष्ण ने की थी शारदामाता अपने दिव्य पति को साक्षात् जगदीश्वर मानती थी । श्रीराम-कृष्ण देव जब समाधिस्थ हो गए तब उनके विवेकानन्दादि शिष्यों का पुत्रवत् परिपालन तथा मार्गदर्शन शारदादेवी ने किया था । उन्होंने अपने पति देव के अध्यात्मिक कार्य को सुचारु रूप से सम्पन्न किया ।

भगिनी निवेदिताः–उन्नीसवीं शदाब्दी में आयरलैंड देश के रेवरंड नोबल महोदय की कन्या मार्गरेटदेवी, स्वामीविवेकानन्द के विभूति-मत्व से प्रभावित होकर ईसवीय १८९८ सन में उनकी शिष्या हुई । अपना व्यक्तित्व पूज्य स्वामीजी के चरणों में समर्पित करके वह उनके साथ हिन्दुस्थान में आगई थी । आश्रम के जीवन में उसने 'भगिनी निवेदिता' इस नाम को प्राप्त किया था । बंगला भाषा का, हिन्दी इत्यादि भारतीय भाषा समूह का, अध्यात्मिक साहित्य का, भारतीय सांस्कृतिक इतिहास का अध्ययन करके तथा भारतीय समाज जीवन के साथ समरस होकर 'वेब आफ इन्डियन लाइफ' इत्यादि उत्कृष्ट ग्रन्थों की रचना निवेदिता द्वारा की गई । स्वामी विवेकानन्दकी विचारधारा उसने पूर्णतया आत्मसात् की थी । कलकत्ता नगर के क्रांतिकारी कार्यकर्ता समूह भी इस निवेदिता देवी द्वारा मार्गदर्शन प्राप्त करते थे । हिन्दू धर्म की दीक्षा ग्रहण करके भगिनी निवेदिता ने इस धर्म की श्रेष्ठता समस्त संसार में स्पष्टतया प्रगट की थी । हिन्दुधर्म के आधुनिक नवजागरण के लिये भगिनी निवेदिता का स्थान उच्चकोटि का था यह कथन सर्वथा योग्य है ।

समाचार–पत्रों पर बढ़ाई गई अढ़ाई गुनी डाक दर समाचार-पत्रों पर एक घातक प्रहार है ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP.6
"Licenced to Post.
Without Prepayment"

सूक्ति-सुधा

वैद्यमुद्दिश्य

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

विश्वोपकारनिरतो
ह्यातुरान्सुखयत्यलम् ।
स हि वैद्यवरोऽन्ये तु
भिषजां दम्भधारिणः ॥१॥

विश्व के उपकार में जिसका मन लगा है और जो आतुरों को सदा सुख पहुंचाता रहता है। वही श्रेष्ठ वैद्यराज है अन्य वैद्य तो केवल दम्भधारण करने वाले हैं ॥१॥

धर्माय यशसेऽर्थाय
स्वास्थ्य संरक्षणाय च
वैद्य विद्येव सर्वासां
विद्यानां तिलकायते ॥२॥

धर्म के लिए, यश के लिए, धन के लिए तथा स्वास्थ्य संरक्षण के लिए तो जगत में वैद्य विद्या ही सब विद्याओं को तिलक है (सर्वश्रेष्ठ है)॥२॥

ये नरा केवलं वित्त-
मुपार्जयितुमौषधैः
क्रीडन्तीवातुरप्राणै-
र्नदृश्यास्ते दुराशयाः ॥३॥

जो लोग केवल वित्त उपार्जन करने के लिये औषधों द्वारा रोगियों के प्राणों से खिलवाड़ करते हैं। उन दुर्जनों का मुख भी नहीं देखना चाहिये ॥३॥

आश्वासनं रोगिचर्यां
भेषजं चानुपानकम्
सम्यग्दिशन्ति ते वैद्या
वन्दनीया मनीषिभिः ॥४॥

रोगी को आश्वासन और रोगी की चर्या (उपचार) दवा और उसका अनुपान सम्यक् प्रकार समझा कर देता है। वह वैद्य सज्जनों के बुद्धिमानों के वन्दनीय है ॥४॥

वैद्यो हि जगतां सर्व-
श्रेष्ठो हितकरो मतः ।
प्राणत्राणात्परः कोपि
नोपकारस्तनूभृताम् ॥५॥

निश्चय से लोकों का सब में उत्तम हित करने वाला वैद्य माना गया है। क्योंकि शरीरधारियों की प्राण रक्षा से बढकर कोई उपकार नहीं है ॥५॥

प्रकाशकः—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४९६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रि० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य



आर्यसंस्कृतिसुरक्षणदक्षः पारतन्त्र्यनिगडप्रतिहन्ता ।
केसरीव बलवीर्य [illegible] कमान्यतिलकस्तिलकोऽयम् ॥
जन्मसिद्धोऽधिकारो नः स्वराज्यमिति सर्वतः ।
प्रथमं घोषणा येन कृता वीरः स नम्यताम् ॥

वार्षिकमूल्यं सप्तमुद्राः ७.०
एकप्रतेः सप्तविंशतिः [illegible]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान–मध्यप्रदेश–गुजरात–महाराष्ट्र–मद्रास–आंध्र–उत्तरप्रदेश–
बिहार–पञ्चनद–सर्वकारैः स्वीकृता—

विषय-सूची

क्र० सं०	लेखाः	लेखकाः	पृष्ठ संख्या
१.	मङ्गलम्	आशुकवि श्रीहरिशास्त्री, सम्पादकः	३५७
२.	जये	श्रीनरेन्द्रकुमारपण्ड्या गनोड़ा,	३५८
३.	ममता	वैद्यश्रीरामस्वरूपजोक्षी, कोट-सवाईमाधोपुरम्	३५९
४.	"संस्कृत-व्याकरण-पद्धतीनामुत्पत्तिः विकासश्च"	पं० श्रीदुःखिश्यामपट्टनायकः, ओत्कलिः	३६१
५.	मनोव्यथा	श्रीलक्ष्मीशंकरत्रिपाठी, चूरुः	३६५
६.	वर्षावर्णनम्	श्रीरामदत्ताचार्यः, टोंकः	३६५
७.	बालकस्य सत्यत्वम्	श्रीराजकुमारोजैनः, जयपुरम्	३६६
८.	अथश्रीशिवराज्योदये महाकाव्ये, ३१ सर्गः	महाकविः डा० श्रीधरभास्करवर्णेकरः, नागपुरम्	३६९
९.	राजस्थान–साहित्य–संगमस्य दशाब्दी-महोत्सवः	श्रीगणेशरामशर्मा, डूंगरपुरम्	३७३
१०.	संगृहीताः समाचाराः	श्रीगणेशरामशर्मा, डूंगरपुरम्	३७७
११.	सम्पादकीयम्	मधुपः; सहसम्पादकः	३८१
१२.	श्रद्धापुष्पोपहारः	श्रीदुर्गादत्तशर्मामैथिलः, जयपुरम्	३८४
१३.	गणितस्य चमत्कारः	वैद्यश्रीरतनलालमिश्रः, जोध्यासी	३८५
१४.	वर्षा-विलासः	श्रीराधाकृष्णशर्मा, जयपुरम्	३८६
१५.	लघुकथा	श्रीगिरिराजशर्मा शास्त्री, जयपुरम्	३८७
१६.	सूक्तिसुधा	आशुकवि श्रीहरिशास्त्री, सम्पादकः	३९२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १८ | श्रावणः, विक्रमाब्दः २०२५ (अगस्तः, १९६८) | अङ्कः १०

मङ्गलम्

आशुकवि श्रीहरिशास्त्री, सम्पादकः

भूमीपदा गगननाभिमती रवीन्दु-
वह्नीक्षणा शिवमनाः श्रुतिनासिका च ।
दन्तोज्ज्वलाऽप्यतिबला द्युतलोत्तमांगी
मूर्तिस्तवाऽम्ब ! भवतान्मम मंगलाय ॥

मासावतरणम्

धारासारजलं प्रवर्षति गिरीन् प्रक्षालयत्यंजसा
वेगान्नैकनदीर्नदानथ सरांस्यंभोभरैः पूरयन् ।
शंभुं बिल्वतरोः सुकोमलदलैरभ्यर्चयन्सर्वतः
मासोऽयं समुपागतोऽखिलविपद्विद्रावणः श्रावणः ॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जये !

श्रीनरेन्द्रकुमारपण्ड्या, गनोड़ा ।

अयिविधिनन्दिनि ! पण्डितमोदिनि ! वेदसुबोधिनि ! वाङ्निलये ।
कविवरमानसबर्हिविलासिनि पद्मनिवासिनि जाड्यलये ॥
स्मृतिमतिधारिणि शोकविदारिणि सेवकतारिणि हे सदये ।
भगवति भारति भूतिदयावति पाहि सरस्वति पाहि जये ॥१॥

मणिमयमौक्तिकमालिनि शालिनि पण्डितपालिनि पावनि हे ।
करधृतवल्लकिवादिनि मोदिनि षड्ज सुरागिणि गीतिलये ॥
परिभवहारिणि हंसविहारिणि जल्पविदारिणि नीतिनये ।
सुरवरवन्दिनि मानसनन्दिनि पाहि सरस्वति पाहि जये ॥२॥

वरदा शारदा भूयात् सरस्वती दयावती ।
प्रभा प्रमारमा सा मामवतु भारती सदा ॥३॥

मनोविनोदकणिका—

लूपवती भव

नवोढानां कृते पूर्वं शुभाशीर्दीयते स्म यत् ।
'भव पुत्रवती भद्रे !' परं तासां कृतेऽधुना ॥
एषाशीर्दीयते प्रायः 'भव लूपवती सदा' ॥

—दीनानाथत्रिवेदी मधुपः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—❀ ममता ❀—

ले०—वैद्यश्रीरामस्वरूपजोशी, काव्यतीर्थः, आयुर्वेदाचार्यः कोट—स० माधोपुरम्

सचराचरे संसारेऽस्मिन् स्वस्वकर्मण्यभिरता मोहनिद्रावशंगताश्च सर्वेऽपि प्राणिनो यापयन्ति कालं केचित् सुखेन केचिच्च दुःखेन परं न कस्याऽपि विरज्यते मन आशापाशसन्दोहसन्नद्धमितः।

माधवः स्वतनयं मधुकरं सुशिक्षयितुं सहशिक्षणालये (कॉलेजे) प्रावेशयत्। प्रिन्सिपलनिर्धारितं त्रिंशत्मुद्रामितं शुल्कञ्च प्रतिमासमदात्तस्मै। तदन्यामावश्यकताञ्चाप्यपूरयत्।

गच्छति कियति काले तस्मिन्नेव सहशिक्षणालये पठन्ती सुधाकरसुता षोडशीयं पुष्पा चपला चमत्कृतिरिव बहिर्वाटिकायां मुहुर्मुहुः करपल्लवेन कुसुमावचयं नाटयन्ती कदाचिन्नयनपथगता मधुकरस्य, सोऽपि च तस्या नयनपथातिथिः समभूत्।

एवं प्रत्यहं वारमेकं तयोश्चक्षुःसम्मेलनं भवति, कदाचित् प्रातः कर्हिचित् सायं कर्हिचिच्च मध्यंदिने।

अथैकदा राजपथेन गच्छन्तीयं पुष्पा सखटखटाशब्दं धावन्त्या कयाचिद् गन्त्र्या भृशमाहता निर्विचेष्टा निष्पपात तत्रैव स्थण्डिले। तामनुगच्छन् मधुकरोऽयं शनैस्तां समुत्थाप्य अश्ववाह्यायां शकट्यां (ताँगा) समारोप्य च गतोऽभूत् कमपि चिकित्सालयम् किन्तु दिवा द्वादशवादनवेलायां सर्वेऽपि चिकित्सकाः स्वस्वसदनं प्रति गताः। स च मधुकरः कमपि भृत्यं तस्याऽन्तिके संस्थाप्य—इतश्चेतश्च तज्ज्ञानां गृहात् गृहं परिभ्रमन् प्रचण्डचण्डकरकरसंतापसंतापितकलेवरस्तृषापरिशुष्ककण्ठगलतालुरसनाप्रदेशः वाचामप्युच्चारणाक्षमः सोष्णशरीरः कस्यचन चिकित्सकस्य गृहद्वारि निपपात।

आसनानन्तरं पर्यङ्के पार्श्वं परिवर्तयता चिकित्सकेनाऽदर्शि तस्यं तथा पतनाऽवस्था। दयालुतया सपद्येवासौ समुत्थाय तदन्तिकमागत्य तं प्रत्यवोचत् भ्रातः! कथय किं निमित्तमिदं तवागमनम् कथं वा तवेयं दशा संजाता? स तु केवलं करसंकेतेन पानीयं पातुमैषीत्।

चिकित्सकोऽपि विलोक्य तदवस्थां शतपुष्पाऽर्कं उसीरासवं कर्पूराधिवासितं हिमशीतलं सलिलं प्रायच्छद् अस्मै।

तथोपचरितप्राप्तजीवनोऽयं मधुकरो व्यजिज्ञपत् सर्वमपि यथावृत्तम्। निशम्य चिकित्सकः—समाश्वसिहि भद्र! समाश्वसिहि सर्वमपि साधु भविष्यति। न किमपि परिशोचनीयम् इत्यवोचत् सकरुणम्।

अथ त्वरितमेवासौ द्राक्तरो वस्त्राणि परिधाय सिद्धौषधमञ्जूषां करे समालंब्य तां स्वस्थयितुं तेनैव सह गतोऽभूत्। तेन च तत्रैव नीतोऽयम्—दीर्घमुष्णञ्च विनिश्वसन्तीं पुष्पां प्लास्टरादिभिरस्थिसंधानकैर्बन्धैरबध्नात्।

एकविंशति दिनानन्तरं च मुक्तप्लास्टरादिबन्धा यथापूर्वं स्वस्था पुष्पा आभारवतीयं भवत इति मधुकरं प्रत्यवोचत्। मधुकरोऽपि निशम्य तदीरितां गिरं नहि नहि न कोऽप्याभारः।

अयमपि जनः पूर्वसुकृतैः क्रीतो भवत्या दास एव—अतो दासे को नामाभारः?

तदाप्रभृत्येव तयोरन्योन्यं प्रगाढ़ा समभून्मैत्री दाम्पत्यसुखसंचारश्च।

शिक्षासमाप्तौ सुधाकरसुतेयं पुष्पा सहमधुकरा प्राविशदेकस्यां नाट्यप्रयोगशालायां यत्र हि संगीतकलानिष्णाता सेयं समभूदेका गण्या मान्याऽभिनेत्री। पुष्पाप्रेमाऽऽमोदं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जिघृक्षुरयं मधुकरोऽपि प्रतिदिनं तया सह सङ्गीताभिनयं व्यवस्यन् महतो राज्ञः श्रेष्ठिनश्च संमोह्य द्रव्यमतुलमलम्भीत् ।

इतस्तावत्—माधवो जराजर्जरितकलेवरः किमपि कर्तुमशक्तः समीपस्थमपि द्रष्टुमक्षमः सहाय्यं समयाचत मधुकरस्य ।

परं क्वास्ति मधुकरो माधवस्य । अस्ति सम्प्रति सोऽयम्—लावण्यभारभरिताया निजाभिनयसौष्ठवेन जनमनोमोहिन्याः पुष्पायाः प्रौढप्रेमपरवशः ।

किं कुर्याद् वराकोऽयं माधवः । स तु स्वयमेव जलार्काशिण्या पानीयमाकृष्य समानयति, स्वयमेव च भोजनादिकं निर्माति । अन्यदपि सकलं स्वजीविकोपयुक्तं कार्यं स्वयमेव सम्पादयति ।

कारुण्येन कर्हिचित् कोपि ग्राम्यः साहाय्यं तस्य विदधाति । परं नाऽणुरपि करुणोदयः समभूत् पितरं प्रति मधुकरस्य मनसि । कतिचिद्दिनानन्तरं च ज्वरितोऽयं माधवः स्वान्तिकागतं ग्रामीणमेकमित्थं प्रावोचत्—

भद्र ! पश्य किमेतदर्थमेव मयास्य लालनं पालनं शिक्षणञ्च विहितं यदयं मे सुतः पुष्पाप्रेमपरवशो ममान्तिकमागन्तुमप्यक्षो भविष्यति—इति विचारपारावारे निमग्नः क्षणं स्वदशां क्षणञ्च अतीतं कालं विचिन्तयन् माधवोऽयं दैवदुर्विलसितमेव निर्णेतुं पारयति ।

प्राह ग्राम्यः—त्वयाऽस्य सहशिक्षणालयेप्रवेशः कारितस्तन्न शोभनं कृतम् । स्वकृतस्य कर्मणः सम्प्रति भुंक्ष्वेदं फलम् । किं मुधैव दैवमाक्षिपसि, कार्यवशतया गच्छाम्यहं तु सम्प्रति स्वगृहम् । न रोचते वार्ता मह्यम् ।

भद्र ! किमेवं क्रुध्यसि । गन्तव्यमस्माभिरपि संसारतः । दृष्टमस्य तत्त्वम् । परं न दृष्टं पौत्रसुखमित्याशापाशपाशितोऽयं माधवो नहि विरक्तिमाश्रयते । परं जीवनं मरणं च न गणयति परकीयं मनोरथसाफल्यम् । घटिकाद्वयानन्तरमेवासौ विहायेममसारं संसारं परलोकातिथिः समभूत् । महत्कृच्छ्रमतोऽप्ययं माधवः स्वसुतस्य मङ्गलं कामयाञ्चकार ममतापरवशः ।

सहृदयाः पर्यालोचयन्तु—यत् पित्रा तु ममत्वेन प्रदत्तास्मै क्षमा आशी राशिश्च परं जगत्पिता सोऽयं परमेश्वरो महापातकिनमेनं मधुकरं किं न दण्डयिष्यति ? किमयं सर्वदा आजीवनमेव पुष्पासहवाससुखं भोक्ष्यति ? किं चाऽयं पितृवियोगव्यथया पश्चात् न तप्स्यति ? इति शुभम् ।

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"संस्कृत-व्याकरण-पद्धतीनामुत्पत्तिः विकासश्च"

पं० श्रीदुःखिश्यामपट्टनायकः, औत्कलिः

पूर्वानुवृत्तः



अथ तत्रादौ पाणिनीयाः—

तदनन्तरं पाणिनेः व्याकरणस्यालोचनं संस्करणं चाभूत्। ख्री० पू० ५००–३५० तमे कात्यायनः अष्टाध्यायीग्रन्थस्य व्याख्यानमूलकं परिपूरकञ्च वार्तिकं व्यरचयत्। अस्मात् प्राक् पाणिनीयाध्यनाध्यापनयोश्च नासीत् सौकर्यम्। अतो वार्तिकं पाणिनीयस्य महत्त्वपूर्णमङ्गम्। इदं वृत्तेर्व्याख्यानं वार्तिकं हि 'उक्तानुक्तदुरुक्तचिन्ता' इति काव्यमीमांसायाम्। अतो ह्यस्य मान्यत्वं पाणिनेरप्यधिकतरं प्रमाणयन्ति—'यथोत्तरं मुनीनां प्रामाण्यम्' इत्यनेन। कात्यायन एव वररुचि-नाम्ना प्रख्यात इति प्रवदन्ति मनिषीणः। कात्यायनः कुत्रचित्कुत्रचित् पाणिनिमतं दूषयति। अत एव कथासरित्सागरे पाणिनिकात्यायनयोर्विद्वेषपूर्वकं परस्परशास्त्रार्थस्य किम्वदन्त्यपि प्रवृत्ता येन एतदपि अनुमीयते यत् कात्यायनोऽपि आसीत् पाणिनिकालिक इति।

तदनन्तरं १५० तमे ख्री० पूर्वे पतञ्जलिमहर्षिणा महाभाष्यं प्रणितमासीत्। अनेन हि पाणिनीयसूत्रतत्त्वार्थं विशदयता शेषावतारेण महर्षिणा सरलया शैल्या गम्भीरभावानां तात्त्विकालोचनं प्रकटितम्। अतो ह्युक्तम्—'महाभाष्यं वा पठनीयं, महाराज्यं वा शासनीयम्'। व्याकरणशास्त्रस्य अध्ययनकाले महाभाष्यस्य गौरवं प्राधान्यं च सुविदितं भवति। सूक्ष्मविचारदृशा अस्य महत्त्वं सर्वातिशायि। 'भाष्यमतं हि निर्विवादम्'–इति वैयाकरणनिष्पत्तिरेवास्य प्राधान्यं प्रकटयति।

पाणिनिः–कात्यायनः–पतञ्जलिश्च मुनित्रयम् इति प्रख्यातः। तेषां चाचार्याणां 'यथोत्तरं मुनीनां प्रामाण्यम्' इति भट्टोजिदीक्षितप्रभृतयो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैयाकरणा आहुः (द्रष्टव्या सिद्धान्तकौमुद्याः कृत्यप्रकरणे 'न कादेः' इति सूत्रवृत्तिः)। पाणिनिसूत्रविषये यत्र कात्यायनेन काचिद्विप्रतिपत्तिः प्रदर्शिता, उपसंख्यानादिकं वा कृतम्, तत्र कात्यायनस्यैव वचनं ग्राह्यम्। तद्वचनसंस्कृता एव प्रयोगाः साधुत्वेन मन्तव्याः। यत्र च कात्यायनवचनानि खण्डयित्वा भाष्यकारेण कश्चित्प्रयोगः समर्थितः, वार्तिकं वा प्रत्याख्यातं तत्र भाष्यकारवचनमेवानुसृत्य प्रयोगाणां साधुत्वं विवेचनीयम्। एतेन भाष्यकारस्य प्रामाण्यं सर्वोपरि स्थितमिति सिद्धं भवति। यथा—"न बहुव्रीहौ" इति बहुव्रीहिसमासे सर्वनामसंज्ञाप्रतिषेधं कुर्वतः सूत्रकारस्य मते बहुव्रीह्यवयवानामपि सर्वनामत्वाभावे तत्राकज्न भवतीति 'त्वं पिता यस्येत्यादिविग्रहे स्वार्थिके क-प्रत्यये 'त्वत्कपितृकः' इत्येव प्रयोगः साधुतयाऽभ्युपगन्तुं युक्तः। परं भाष्यकारेण "गोनर्दीयस्त्वाह अकच्स्वरौ तु कर्त्तव्यौ प्रत्यङ्गं मुक्तसंशयौ—त्वकत्पितृको मकत्पितृक इत्येवं भवितव्यम्" इति स्वीकृतम्। तत्र भाष्यकारप्रयोगा एव साधुतया बोद्धव्याः।

वार्त्तिकभाष्ययोः पर्यालोचनया एतदेव प्रतीयते यत् वार्तिककारः सूत्रकृतः पाणिनेर्न्यूनता—प्रतिपादनाय वार्तिकरूपव्याकरणे प्रवृत्तः। अत एव—प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण (अ १ पा १. सू १. भा ३)" इत्यादिकमनेकत्र तेनोद्घुष्टम्। पाणिनीयसूत्राणां वार्त्तिकखण्डनानि खण्डयन् भाष्यकारः पाणिनीयसूत्राणि मण्डयति स्म। येषु सूत्रेषु वार्त्तिकानि न दृश्यन्ते तत्र भाष्यमपि प्रायेण न दृश्यत एव। अतो वार्त्तिकस्य व्याख्यानरूपमेव हि महाभाष्यम्। अत्र तु इदं वैलक्षण्यं व्याकरणेऽनुसन्धेयम्। यदन्यत्र मीमांसा—वेदान्तादिषु भाष्यस्य व्याख्यानभूतं वार्त्तिकम्, इह तु वार्त्तिक-व्याख्यानरूपं भाष्यम् इति। अस्य त्वेतद्धि कारणं यत्—'उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्त्तते, तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञा मनीषिणः—इति वार्त्तिकलक्षणमनुसृत्य उक्तानुक्तदुरुक्तचिन्ताभीष्टतया ग्रन्थस्य नाम वार्त्तिकमिति कृतं कात्यायनेन। कात्यायनकृतः स्वतन्त्रो वार्त्तिकपाठो नोपलभ्यतेऽधुना। भाष्यमनुसृत्यैव कैश्चिद्वार्त्तिकपाठः सज्जीकृतः। अतः नायं पाठः सर्वथाऽसन्दिग्धो, यतः भाष्ये स्ववाच्यस्यापि व्याख्यानं स्थातुमर्हति—"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः, स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः" इति तल्लक्षणात्।

महाभाष्यानन्तरं ख्रीष्टजन्मनः चतुःशतकं यावत् कालापमन्तरा कस्याप्यन्यमौलिकग्रथस्याविर्भावो नाभूत्। ख्रीष्टे ४०० तमे हि महावैयाकरणो भर्तृहरिः व्याकरणस्यालोचनां दार्शनिकदृशा स्व-वाक्यपदीये कृत्वा व्याकरण-सुवर्णसौरभं निहितवान्। तस्य विवर्त्तवाद-स्फोटवादौ सर्वेषां वैयाकरण-धौरेयाणां विवेच्यविषयत्वेन शेखरायमाणौ वर्त्तेते। अस्य नयेन शब्द-ब्रह्मण एव रज्ज्वाः सर्परूपेणेव जगद्रूपेण विवर्त्तः। तदुक्तं तेन स्वीये माङ्गलिके पद्ये—

अनादि-निधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतस्ततः॥

तर्हि कोऽयं विवर्त्तो हि नाम अतत्त्वतोऽन्यथा प्रथा। उक्तञ्च—

'अतत्त्वतोऽन्यथा प्रथा विवर्त्त इत्युदीरितः' इति।

स्फोटवादश्चास्यापरो भावः। स्फुटत्यर्थो यस्मात् स स्फोटः। हृदयान्तर्निर्गतो नादो वर्णविशेषरहितः। उक्तञ्च तत्र तस्य वाक्यपदीये—

"स्फोटाख्यो निरवयवो नित्यशब्दो ब्रह्म वेति"

तत्र तस्य आगम (ब्रह्म वा)-वाक्य-पद (प्रकीर्ण वा)-काण्डत्रयसंवलिते वाक्यपदीये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथाक्रमं स्फोट-वाक्य-पदानां विचारः सन्निवेशितः।

अनेनैव 'महाभाष्यप्रदीपिका' नाम महाभाष्यस्य एका व्याख्या प्रणीता आसीत्। अधुना तु तस्या एकपादं मात्रांश उपलभ्यते।

तदनन्तरं ख्रीष्टीये सप्तमशतके अष्टाध्याय्याः काशिकावृत्तिर्जयादित्यवामनाभ्यां विरचिता आसीत्। जयादित्येन प्रागध्यायपञ्चकस्य वृत्तिः विरचिता, शिष्टं तु वामनेन समाप्ततां नीतम्। इयं हि 'काशयति प्रकाशयति सूत्रार्थमिति काशिका' इति भाषावृत्तिव्याख्यायां सृष्टिधराचार्यः काशिकायां बहुप्राचीनवैयाकरणानां मतानि उल्लिखितानि दृश्यन्ते। अस्याः टीकासु 'न्यास'-नाम्ना सुप्रसिद्धा आचार्यजिनेन्द्रबुद्धि (७२५-७५० ख्रीष्टीय)-कृता 'काशिका विवरणपञ्जिका, हरदत्तमिश्र (१११५ विक्रमाब्द) कृता 'पदमञ्जरी' चापि प्रख्याता।

जैय्यटपुत्रेण कैय्यटेन कृतं भाष्यप्रदीपं प्रदीपतुल्यं महाभाष्यार्थप्रकाशकमद्वितीयं ग्रन्थरत्नम्। प्रदीप-सिद्धान्तान् विशदतरं कर्तुं ख्रीष्ट्रीये सप्तदशशतके नागेशभट्टेन "उद्योतम्" अन्नम्भट्टेन 'उद्योतनम्' च विरचितमासीत्।

परमासां व्याख्यानां बाहुल्येन महाभाष्यमधिकतरं वैदुष्यसाध्यं पाण्डित्यबोध्याञ्चाजायत। अतः संस्कृतसाहित्यस्य रसावबोधनाय दार्शनिकग्रन्थाध्ययनाय च व्याकरणाध्ययने प्रवृत्ता जनाः भग्नमनोरथा अभवन्। व्याकरणस्य जटिलजालेनाबद्धाः सन्तः ते स्वाभिलषितं पूरयितुं नाशक्नुवन्। अतोऽस्य सरलीकरणाय विभिन्नपद्धतीनामाविष्करणाय च प्रचेष्टा अजायन्त।

प्रथमं तावत् ख्रीष्टीये द्वादशशतके सिंहलस्य बौद्धभिक्षुः धर्मकीर्तिः पाणिनीयसूत्राणां परिवर्तनं कृत्वा "रूपावतारम्" प्रणीतवान्। तदनंतरं व्यवहृतशब्दानां विचारं कृत्वा ख्रीष्टीये चतुर्दशशतके विमलसरस्वतिना (१३४३) 'रूपमाला' विरचिता।

ततो लक्ष्यानुसारं व्याकरणं प्रणेतुं प्रवृत्तिः परिदृष्टा अभवत्। अस्मिन् विषये ख्रीष्टीयपञ्चदशशतकोत्पन्नस्य रामचन्द्राचार्यस्य (१४२३) प्रयासः प्रशंसार्हः। स तु पाणिनीयसूत्राणाम् अष्टाध्यायीक्रमं परित्यज्य स्वकीयया प्रक्रियया रीत्या संयोज्य, नूतनरीतेः प्रचलनमकरोत्। अस्मात् बहुपूर्वं कालापव्याकरणं प्रणीतमासीत् अपाणिनीयसूत्राणां सन्निवेशनेन। अतः कालापव्याकरणस्य प्रक्रियापद्धतिरप्यत्रानुसृता दृश्यते। रामचन्द्रस्येयं "प्रक्रियाकौमुदी" अधुनापि बहुत्र प्रचलति। अनेन प्रक्रियाविधिना शब्दसाधनं सुखकरं भवति। तस्मात् षोडशख्रीष्टाब्दे नारायणभट्टेनापि "नारायणीयम्" नाम प्रक्रियाव्याकरणं विरचितमासीत्। परमत्रेयमेव त्रुटिः दृष्टिगोचरतां आगता, यदत्र अष्टाध्याय्याः सर्वाणि सूत्राणि नान्तर्भुक्तानीति।

अतोऽदः प्रक्रियाव्याकरणमवलम्ब्य ख्रीष्टीय-पञ्चदशशताब्द्यां महावैयाकरणो भट्टोजिदीक्षितः (१४६०) सिद्धान्तकौमुदीं व्यरचयत्। इयं हि सिद्धान्तकौमुदी पूर्ववर्त्तिनः सर्वान् ग्रन्थान् अतिक्रम्य भूयसा लब्धप्रसारा जाता। यद्यप्यत्र प्रक्रियाकौमुद्याः शैली समाश्रिता, तथापि विषयाणामुपन्यसनं बहुग्रन्थालोडनेन जातम्। तथा ह्युक्तं तेन स्व-शब्दकौस्तुभे—

"परिभाव्य बहून् ग्रन्थान् योऽर्थः क्लेशेन लभ्यते।
तमशेषमनायासादिति गृह्णीत सज्जनाः॥"

अनेन हि महाविदुषा शब्दकौस्तुभः, तन्निष्कर्षरूपा वैयाकरणसिद्धान्तकौमुदी, तद्व्याख्यानमूला प्रौढमनोरमा, लिङ्गानुशासनवृत्तिः (पाणिनीयलिङ्गानुशासनोपरि व्याख्या),

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैयाकरणमतोन्मज्जनञ्च कृतम् । उणादिसूत्र-फिट्सूत्र-लिङ्गानुशासन-गणपाठ-धातुपाठादीनि च संयोज्य भट्टोजिदीक्षितो व्याकरणमिदं पूर्णतया रचयांञ्चकार । अष्टाध्याय्याः यानि सूत्राणि प्रक्रियाकौमुद्यां त्यक्तानि तान्यपि सर्वाणि सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन सङ्गृहीतानि। तेन हि सकलशब्दतन्त्ररत्नमाला-मध्यमणिरिव सेयं सिद्धान्तकौमुदी अतीवर-मणीयरश्मिराजिभिरद्यापि विलसति दिग्दि-गन्तरालमुद्भासयन्ती । अतो हि वदन्ति सानन्दं वैयाकरणाः—

कौमुदी यदि नायाति वृथा भाष्ये परिश्रमः ।
कौमुदी यदि चायाति वृथा भाष्ये परिश्रमः ॥

किन्तु अस्या अभ्यासकाले सूत्रैः समं वृत्तीनामपि स्मरणमावश्यकं भवति। अतः तत्र काठिन्यं जायते। ग्रन्थविस्तृतिरपि पाठकान् हतोत्साहितान् करोति। अतः तस्यैव शिष्येण वरदराजेन (स्त्री० १४८५) सिद्धान्तकौमुदीं संक्षिप्य मध्यसिद्धान्तकौमुदी, लघुसिद्धान्त-कौमुदी च रचिता आसीत्। किन्तु अष्टाध्याय्याः सर्वा जटिलताः पूर्ववदेवावर्त्तन्त । पुनः अष्टाध्यायीग्रन्थे अनुवृत्तिः पूर्वसूत्रात् मण्डु-कप्लुतिः, उत्तरसूत्रात् चापकर्षः स्पष्टतया युक्तियुक्ततया च प्रतिपन्नं भवति किन्तु कौमुदीषु तेषां ज्ञानम् अष्टाध्यायीज्ञानस्य अपेक्षां करोति। तथैव "कानि सन्ति' 'कौ स्तः" इत्यत्रास्तेरल्लोपस्य स्थानिवत्त्वेन कुर्वन्तीत्यत्र णत्वे प्राप्ते तस्यासिद्धत्वात् अनु-स्वारे परसवर्णे च कृते तस्य असिद्धत्वान्न णत्वम् इत्युल्लेखो निरर्थको भवति "इनसोर-ल्लोपः, रषाभ्यां नो णः समानपदे" इति सूत्राणां ज्ञानं विना [द्रष्टव्या सिद्धान्तकौमुद्यां 'लोपः शाकल्यस्य' इति सूत्रवृत्तिः] । पुनश्च सिद्धान्तकौमुद्याः नागेशभट्टकृतं व्याख्याद्वयं लघुशब्देन्दुशेखरं बृहच्छब्देन्दुशेखरञ्च ताम-धिकतया जटिलां दुरूहां चाकरोत् । अतो ज्ञानेन्द्रसरस्वती-(१४९३-१५०३ स्त्रीष्टीय)-कृता तत्त्वबोधिनी, वासुदेवदीक्षित-(स्त्री. १६८५-१७३५) कृता बालमनोरमा च लोकेषु प्रचल-तस्तराम् । ज्ञानेन्द्रसरस्वती-शिष्य-नीलकण्ठ-वाजपेयिनः सुखबोधिनी टीका रामानन्दस्य च तत्त्वदीपिका टीकाऽपि प्रसिद्धा एव ।

अनेन पाणिनीय-व्याकरणस्याध्ययनेन काठिन्यलब्धः खलु पाण्डित्यप्रकर्षः अजायत परमनेन विधिना सहजतया व्याकरणज्ञानलाभो नाभवत् । अतः पाणिनीयपद्धतिं विहाय केचन वैयाकरणाः स्वकीयानि सूत्राणि प्रयोज्य व्याकरणानि व्यरचयन् । तेषु स्त्रीष्टीयप्रथम-शतके शर्ववर्मणा विरचितं कातन्त्र-व्याकरणं प्रथमतः पुरत आयाति । कार्तिकेयमाराध्य तत्प्रसादेन कृतत्वादस्य व्याकरणस्य नाम कौमारमपि। व्याकरणमिदं कलापनानाम्नापि प्रख्यातम् । पाणिनीयव्याकरणस्य पूर्णाध्य-यनानन्तरं शिववर्मणा व्याकरणमिदं विरचितं लोकसुगमाय । अतोऽत्र प्राप्यते—"संयोगान्तस्य लोपः" "गत्यर्थाकर्मणि द्वितीयाचतुर्थ्यौ चेष्टा-यामनध्वनि" "द्वित्रिचतुर्भ्यः सुच्" देये त्रा च" "गुप्तिज्किद्भ्यः सन्" "उपमानदाचारे" "स्पर्धायामाङः", "शेषात् कर्त्तरि परस्मैपदम्", पूर्वोभ्यासः", "हो ढः", "कर्मण्यण्" इति । अत्र "अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ" इत्यनेन प्रकारेण लोकप्रचलितक्रमेण वर्णसमाम्नायः प्रदत्तः, न तु 'अइउण्' इत्यादिना। व्याकरणेऽस्मिन् 'ॡ' इत्यस्य दीर्घत्वं स्वीकृतम् । पाणिनेः 'अच्हल्'-इत्यधिकरणे व्याकरणेऽस्मिन् 'स्वर-व्यञ्जन' इत्यस्य प्रयोगो दृश्यते ; यथा -पाणिनेः 'रधिजभोरचि' इत्यधिकरणे 'रधिजभोः स्वरे' इति । अस्य सन्धिसूत्राणि अनायासबोध्यानि अपेक्षान्तरही-नानि च । अत्र पूर्वं सूत्रं परं नापेक्षते । अतो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याकरणमिदं पाणिन्यपेक्षया सुबोध्यं सरलम् अनायाससाध्यमिति निश्चप्रचम् । अतोऽस्यापि प्रचलनं भूयसा परिलक्ष्यते । अस्य हि सुप्रसिद्धटीकाकारेण अष्टमशतकोत्पन्नेन दुर्गासिंहेनोद्घोषितम्—'मयि स्थिते वादिनि दौर्गसिंहे, नैकाक्षरं वेत्ति महेश्वरोऽपि' । किन्तु अस्मिन् व्याकरणे स्थानप्रयत्नविवेकः छन्दस्सूत्रं च पूर्णरूपेणोपेक्षितम् । क्रमशः

मनोव्यथा

श्रीलक्ष्मीशंकरत्रिपाठी न० व्या० शास्त्री, चूरूः (राजस्थानम्)

वयं पूर्वं ह्यास्मो विषयमदमत्ताश्च पपिताः ।
ततः पश्चाद् रुग्णा विभवरहिताः स्वार्थवशगैः ॥
स्वकीयैः समस्त्यक्ताः सखिसुतकलत्रैः प्रियतमैः ।
क्व यामः किं कुर्मः क्वचिदपि न बुद्धिः प्रसरति ॥१॥
न गीताऽधीताऽहो श्रुतिपथगता नो हरिकथा ।
न पीता जाह्नव्याः सकलफलदा हा खलु सुधा ॥
कृता नार्चा पित्रोर्भवजलनिधेर्नौरिव च या ।
व्यतीता पापे मे बिषयविषकीटस्य दिवसाः ॥२॥

वर्षावर्णनम्

प्रो० श्रीरामदत्ताचार्यः, राजकीयमहाविद्यालयः, टोंकः

वर्षाकाले समायाते, पतन्ति जलबिन्दवः ।
कूजन्ति पक्षिणो यत्र, सः कालः समुपस्थितः ॥१॥
शस्यसंभारपूर्णानि क्षेत्राणि हरितानि च ।
गुञ्जन्तो भ्रमरा यान्ति, स कालः समुपस्थितः ॥२॥
गर्भाधाने बलाकानां, काले यत्र महोत्सवाः ।
भ्रमन्ति जलदाः यत्र, सः कालः समुपस्थितः ॥३॥
पतन्ति करकाः मेघात्, विद्युत् विद्योतते पुनः ।
वहन्ति सरितोऽजस्रं, सः कालः समुपस्थितः ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एका लघुकथा

बालकस्य सत्यत्वम्

श्रीराजकुमारो जैनः "भारिल्लः" दर्शनोपाध्यायः, जैनसंस्कृतकालेजः, जयपुरम्

कस्मिंश्चित्समये एकस्मिन् ग्रामे एको वृद्धो न्यवसत् । स स्वस्य समये एकोऽनुभवी वृद्ध आसीत् । अन्ते च स इममेव निष्कर्षमगच्छत् यत् भौतिकस्य शारीरिकमानवीयजीवनस्य सारः सत्ये एवास्ति । कटुवप्रियसम्भाषणादीनां मूलमसत्यभाषणमेवास्ति । तस्य वृद्धस्यैको पुत्रोऽप्यासीत् । यस्यायुर्सम्भवतः षोड़शवर्षीयं भविष्यति । सोऽपि पितृप्रभावेणापरिपक्वबुद्धिरपि चंचलः निर्भयः विचारशीलः बुद्धिमांश्चासीत् । स पितृभक्तिमेव स्वधर्ममन्यत । स एव तस्य कुलस्य जाज्वल्यमानः प्रदीपः तस्य वृद्धस्य च हृदयगतमन्धकारञ्च दूरीकर्त्तुं सूर्य इवात्सीत् । तस्य वृद्धस्य च समस्ताः आशास्तस्मिन्नेव पुत्रे आसन् । एकदा मरणासन्नः स वृद्धः स्वपुत्रं सन्निकटे आहूयावदत्-भो पुत्र ! अहन्तु जगत्यस्मिन् किंचित्समयस्यातिथिरस्मि । साम्प्रति मम जीवनलीला समाप्तप्रायाऽस्ति । मम समीपे तुभ्यं दातुं किंचदपि नास्ति । येन तवेदं कैशोरं जीवनं दुःखरहितं भवेत् । मम समीपे तु तदमोघास्त्रमस्ति यत्स्वजीवने पूर्णरूपेणावतीर्णं चेत् तव मनसः शान्ति तदस्त्रं च कोऽप्यपहर्तुं समर्थो नास्ति । तदस्त्रमेव सम्पूर्णजीवनस्य धनं सारश्चास्ति । तेन विनेदं मानवजीवनमपूर्णमेवास्ति । मानवस्य मानवतागुणोऽप्यनेनैव सुशोभते । तेन विना च सम्पूर्णः संसारोऽपूर्णोऽस्ति तदस्ति सत्यम् ।

सत्यं तदमोघास्त्रमस्ति यल्लब्ध्वा बृहल्लघुसबलनिर्बलसमृद्धदीनास्तिकनास्तिकाश्च सर्वे प्राणिगणा भयंकरातिभयंसरापत्तावपि सुखपूर्वकं तामापत्तिं दूरीकर्तुं प्रभवन्ति । सत्यस्य च सदैव विजयः भवति । अतः कदापि विस्मृत्यापि स्ववचनेऽसत्यं न प्रयोक्तव्यम् ।

सत्यवादी सदैव निर्भयो भवति । स निर्धनोऽप्यसत्यवादिसमृद्धपुरुषापेक्षयाऽधिकं संमानं प्राप्नोति । तस्य सत्यवादिनः वचनं प्रमाणं मन्यते । तस्य हृदयं मलीमसं न भवति । तस्य सत्यव्यवहारः एव महातपस्याऽस्ति । अत्यल्पमसत्यमपि महान्तमनर्थं करोति । गुञ्जाप्रमाणमपि सत्यं संसारं महतो विनाशाद्रक्षति धर्मप्रचारः, समाजसेवा, धर्माचरणञ्च सत्यप्रवृत्तेराश्रयं प्रप्यैव सफलीभवन्ति । येन वचनेन धर्मप्रवृत्तेराघातः, कस्यचिज्जीवस्याघातो, भवति, कस्यचिज्जीवस्य वा हृदयं दुःखमाप्नोत्येतादृशं वचनमपि धर्मशास्त्रे सत्यं न मतम् । एतादृशमुचितं सत्यमपि कदापि न वक्तव्यम् । यथा-नेत्रहीनमन्धः, वधिरं बधिरः कुब्जं कुब्जः, कुष्ठिनं कुष्ठी, कुणिनं कुणी, खंजं खंजः, जडं मूर्खः, वामनं वामनः आदि । इदं सर्वं सत्यमस्ति किन्तु धर्मशास्त्रे व्यवहारे च कटुवचनात्तत्सत्यं नास्ति । अतः कटुवप्रियं परसन्तापकरं च वचनं सत्यमपि कदापि न वक्तव्यम् । यथोक्तम्—"परसंतावकारण वयणं मौतूण सपरहिदवयणं" । इति । अर्थात् परदुःखदायकवचनानि नोक्त्वा स्वस्य परस्य च हितकराणां वचनानां कथनमुत्तमं सत्यमस्ति । अतः कस्यामप्यवस्थायामसत्यस्य ग्रहणं सत्यस्य च त्यागो न करणीयः ।

इति स्वपुत्रं समुपदिश्य स वृद्धः स्वपुत्रसाहाय्येन समीपस्थभूमिमखनत् । अभ्यन्तराच्च चत्वारिंशत् स्वर्णमुद्राः निष्कास्य पुत्रं ददद्वदत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत् "इदमेव मे जीवनस्य संचितं धनमस्ति, येन ते किंचिज्जीवनं सुखपूर्वकं व्यतीतं भविष्यति"। इत्युक्त्वा स वृद्धोऽकस्मादेव मौनं दधौ। कालेन गृहीतोऽभूत्सः। तस्य जीवनस्य किंचित्प्रकाशमानो दीपः सदाकृते शान्तोऽभूत्। इदं दृष्ट्वा स किशोरः स्वं रोदनान्निवर्तयितुं समर्थो नाभूत्। तस्य च नेत्राभ्यामश्रुबिन्दवोऽपतन्। बहुकालपर्यन्तं च स एतादृश्यामवस्थायामेव स्थितः। अत्यन्तशोकाकुलश्चाभूत्सः। पितृदाहसंस्कारादि कर्म निर्वर्त्यानन्तरं स तत्रैव स्मशाने पितृदाहस्य रजः हस्ते आदाय पृथिवीमाकाशं सूर्यं च साक्षीकृत्यावदत् यत् भो मे संरक्षकाः! अहं युष्मान् सर्वान् साक्षीकृत्य प्रतिज्ञां करोमि यत्स्वजीवने भयंकरापत्तावपि सत्यं त्यक्त्वाऽसत्यस्य शरणं न गमिष्यामि। यूयं सर्वे मे संरक्षकाः स्थ इति। ततः स स्वस्वर्णमुद्रा नीत्वा कैश्चित् व्यापारिभिः सह स्वजीविकोपार्जनाय व्यपारार्थं देशान्तरमचलत्। मार्गोऽत्यन्तभयावहः आसीत्। वन्यानां पशूनां चौराणां दस्यूनां च तत्र सदैव भयं भवति। यतः तत्रानेके चौराः दस्यवश्च व्यापारिणः विलुण्ठ्य निर्धनानकुर्वन्। यदा च स बालकः तैर्व्यापारिभिः सहागच्छत्तदामार्गे कतिपये चौरा व्यापारिणः विलुण्ठ्य बालकं च निर्धनं ज्ञात्वाऽत्यजन्। अथानन्तरं किंचिद्दूरे गते सति पुनः तं बालकं कतिपये चौराः प्राप्ताः। एकलं तं बालकं दृष्ट्वा ते चौराः आश्चर्यान्विताः अभवन्। यतः तस्मिन् समये एकाकी कोऽपि नागच्छत्। बालकस्तु नितान्तभयरहितेन सौम्यस्वभावेन गच्छन्नासीत्। बालकस्य समीपे गत्वा ते चौराः तमपृच्छन्—कुत्र गच्छसि त्वम्? कोऽस्ति त्वया सह? न जानासि किं यदत्र बहवः जांगलाः पशवः चौराः दस्यवश्च निवसन्ति। ये त्वाम् एकाकिनं मृत्युमुखे प्रेषणाय विलुण्ठनाय च समर्थाः सन्ति। बालकः तेनैव निर्भयसौम्यस्वभावेनावदत् अहं देशान्तरं व्यापारार्थं गच्छामि। नास्ति कोऽप्यन्यः पुरुषः मया मह। अहं सर्वं जानामि यदत्र बहवः हिंसकाः वन्याः पशवः, अनेकेः चौराः दस्यवश्च भवन्ति। चौराः अवदन्—यदि जानासि तर्हि यत्किंचिदपि धनं तव समीपेऽस्ति तत्सर्वमस्मभ्यं देहि। वयं सर्वे चौराः स्मः। बालकः (तेनैव भावेन)—मम समीपे चत्वारिंशत् स्वर्णमुद्राः सन्ति। इत्युक्त्वा स स्वगुप्तस्थानात् सर्वाः स्वर्णमुद्राः निष्कास्य चौराणां समक्षं स्वहस्ततले निदधे। बालकस्य सत्यत्वं निर्भयसौम्यस्वभावत्वञ्च दृष्ट्वा पूर्वोक्तञ्च प्रत्युत्तरं श्रुत्वा तेऽत्यधिकाः आश्चर्यान्विताः बभूवुः। सकौतुकं च बालकमपृच्छन्—कुतः प्राप्ता इमाः स्वर्णमुद्राः? बालकोऽवदत् मरणासन्नो मे पिता मम जीवननिर्वाहार्थमदादिमाः स्वर्णमुद्राः। चौराः—यदा त्व जानासि यद्वयं सर्वे चौराः स्मः, तदा त्वं सत्यमुक्त्वा कथं स्वर्णमुद्राः प्रादर्शय? बालकः—मे पितावदत् यत् कदाप्यसत्यस्य शरणं न गन्तव्यं, सदैव सत्यं वक्तव्यम्। स्वजीवनस्य त्यागेनापि सत्यस्य रक्षा करणीया। इति मे पिता मां सदुपदेशमदात्। अतोऽहमपि सत्यमेवाकथयम्। इति श्रुत्वा तेषां चौराणां हृदयेऽपि बालकस्य वार्ताया अदृश्यः प्रभावोभूत्। ते च बालकस्य सम्मुखे प्रतिज्ञामकुर्वन् यद्वयमपि कदापि असत्यं न वेदिष्यामः—इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान प्राच्यविद्या प्रतिष्ठान, जोधपुर

- द्वारा -

शोध, संदर्भ एवं दुर्लभ महत्वपूर्ण ग्रंथों का

राजस्थान पुरातन ग्रंथमाला के अन्तर्गत प्रकाशन

प्रकाशित ग्रंथों की सूची

(ख) राजस्थानी-हिन्दी

प्रकाशन का नाम	सम्पादक	मूल्य
काह्नड़दे प्रबन्ध	प्रो० के० वी० व्यास	रु० १२-२५
क्यामखां रासा	डा० दशरथशर्मा और अगरचन्द भंवरलाल नाहटा	,, ४-७५
लावा रासा	श्री महताबचन्द खारेड़	,, ३-७५
बांकीदास री ख्यात	श्री नरोत्तमदास स्वामी	,, ५-५०
राजस्थान साहित्य संग्रह भाग १	,, ,, ,,	,, २-२५
,, ,, ,, भाग २	डा० पुरुषोत्तमलाल मेनारिया	,, २-७५
कवीन्द्र-कल्पलता	रानी लक्ष्मीकुमारी चूण्डावत	,, २-००
जुगलविलास	,, ,, ,,	,, १-७५
भगतमाल	श्री उदयराज उज्ज्वल	,, १-७५
राजस्थान पुरातत्व मंदिर के हस्तलिखित ग्रंथों की सूची भाग १	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य	,, ७-५०
राजस्थान प्राच्यविद्या प्रतिष्ठान हस्तलिखित ग्रंथों की सूची भाग २	श्री गोपालनारायण बहुरा	,, १२-००
राजस्थान हस्तलिखित-ग्रंथ-सूची भाग १	पद्मश्री मुनि जिनविजय पुरातत्वाचार्य	,, ४-५०
,, ,, ,, भाग २	डा० पुरुषोत्तमलाल मेनारिया	,, २-७५
स्व० पुरोहित हरिनारायणजी विद्याभूषण ग्रंथ संग्रह	श्री गोपालनारायण बहुरा	,, ६-२५
मुहता नैणसी री ख्यात भाग १	श्री बदरीप्रसाद साकरिया	,, ८-५०
,, ,, ,, भाग २	,, ,, ,,	,, ९-५०
,, ,, ,, भाग ३	,, ,, ,,	,, ८-००
,, ,, ,, भाग ४	,, ,, ,,	,, ८-७५
राजस्थानी साहित्य संग्रह भाग ३	श्री लक्ष्मीनारायण गोस्वामी	,, ५-५०
सूरजप्रकाश भाग १	श्री सीताराम लालस	,, ८-००
,, भाग २	,, ,, ,,	,, ९-५०
,, भाग ३	,, ,, ,,	,, ९-७५
नेहतरंग	श्री रामप्रसाद दाधीच	,, ४-००
मत्स्य-प्रदेश की हिन्दी साहित्य को देन	डा० मोतीलाल गुप्त	,, ७-००

पुस्तक विक्रेताओं को २५ प्रतिशत कमीशन दिया जाता है।

(राजस्थान सरकार द्वारा प्रसारित)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ श्रीशिवराज्योदये महाकाव्ये

३१ सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः, डी.लिट्, नागपुरम्

अथ विजापुरराजसभान्तरे
रणकथाश्रवणोत्सुकचेतसः ।
नरपतिं परितो हि महाजनाः
समिलन् विजयस्थिरनिश्चयाः ॥१॥

स नृपतिः स्फुटसुस्मितविस्मितो-
च्छ्वसितनेत्रमुवाच लसन्मुखः ।
किमनिमित्तमिहाद्य समागता
उत वगच्छथ युद्धजनश्रुतिम् ॥२॥

बहुतिथेषु दिनेषु गतेष्वपि
श्रुतिपथं न च दृष्टिपथं तथा ।
समरवार्तमुपागतमुत्तमम्
तदधुना मन उत्कयतीव मे ॥३॥

बत कुतोऽपि चिराय कथञ्चन
श्रुतिपथं न जनश्रुतिरागता ।
यदफझुल्लशिवाजिसमागमे
समभवत् कुतुकास्पदमद्भुतम् ॥४॥

स समरं प्रति याति यदा यदा
विहितशत्रुनिबर्हणनिश्चयः ।
निगडनद्धकरांघ्रिमरिं हटात्
स्वयमुपाहरतीह तदा तदा ॥५॥

रिपुशिरः स्वकरेण मदोन्नतं
नमयतीह मदीयपदे बलात् ।
गदयति स्फुटमेनमसौ मुहुः
बत विजापुरवैभवघोषणाम् ॥६॥

मम खलूत्सुकमद्य मनो भृशं
छलयितुं मदरिं गिरिमूषकम् ।
तमफझुल्लनिबद्धकरांघ्रिकं
चरणयोरवनामितमस्तकम् ॥७॥

यदि शिवाजिरसौ मदमोहितः
न नमयेत्स्वशिरः पदयोर्मम ।
तदफझुल्लकराभिहतिर्बलात्
मदमदश्च सहैव विनामयेत् ॥८॥

सपरिहासमिति प्रतिजल्पति
यवनभूभृति बालमतौ भृशम् ।
श्रुतिपथं सहसाऽपतदुच्चकैः
श्रवणदारणदारुणरोदना ॥९॥

स्थगितमेकपदे नृपभाषितम्
अधिकृतां हसितं च विमूर्च्छितम् ।
प्रबलसम्भ्रमघूर्णितलोचनाः
समभवन् सकला विकला इव ॥१०॥

प्रतिनिमेषमसौ भयदध्वनिः
शिशुयुवस्थविरार्तरवोद्भवः ।
प्रववृधे परितो नृपमन्दिरं
नृपतिहृद्वदकम्पत यत्तदा ॥११॥

किमविशन्नगरे हतराक्षसी
धृतभयंकरभीतकलेवरा ।
उत कथंचिदकम्पत मेदिनी
किमथवाऽऽपतितः पृथुपर्वतः ॥१२॥

इति विकल्पितविह्वलबुद्धयो
नृपतितत्सुहृदः परिशुश्रुवुः ।
यदफझुल्लबली निहतो रणे
प्रविहता निखिला च वरूथिनी ॥१३॥

ददृशिरे पुरतस्तदनु स्फुटं
त्रिचतुरः पुरुषा दुरवेक्षणाः ।
मलिनशीर्णविदीर्णकुवाससः
व्रणितगात्रगलद्रुधिरद्रवाः ॥१४॥

नृपतिना ससदस्यगणेन ते
निकटगा अनिमेषमवेक्षिताः ।
परिचिता अपि नैव विजज्ञिरे
ह्यतितरां विकृताकृतयो नराः ॥१५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदनु कश्चन तेष्ववदन्नृपं
नरपतेऽङ्कुश एष नमाम्यहम् ।
अयमुपस्थित एष च फाजलः
पितृवधाधिविनिर्ज्वलितान्तरः ॥१६॥

हसन एष उपैति रुदन्मुखो
ऽयमपरश्च मुसा मुषिताङ्गकः ।
विनिहता स्म इमे निजपाप्मना
न तु मृतास्तव पुण्यवशात् परम् ॥१७॥

अहह हन्त कथं बत कथ्यतां
स पृतनाधिपतिस्तव मानितः ।
निजवशं गमितः खलशत्रुणा ❀
ह्युदरदारममारि शिवाजिना ॥१८॥

प्रलयवातसुदुर्धररंहसा
रिपुबलेन तदैव लघीयसा ।
प्रहर एव विजापुरवाहिनी
कठिनसह्यगिरौ परिचूर्णिता ॥१९॥

वयमिमे परिदारितविग्रहा
अपि तु दिष्टसुरक्षितजीविताः ।
इह समापतिताः पतिताखिल-
स्वसुहृदामिव भौतपिशाचकाः ॥२०॥

दिशमिमां प्रति च त्वरतेऽधुना
स मरहट्टचमूपतिरुन्मदः ।
प्रतिपदं प्रहरन् हतभागिनो
रणनिवृत्तविजापुरसैनिकान् ॥२१॥

दहति लुण्टति मन्थति कृन्तति
मृधति कुट्टति वृश्चति हन्ति वा ।
अधिपथं यदमुष्य हि दृक्पथं
पतति हन्त विजापुरवैभवम् ॥२२॥

शृणुम एति स चात्र विजापुरे
विभवजातमरिः परिलुण्टितुम् ।
यदि विशेन्नगरे प्रहरान्तरे
न तदवेहि महीश महाद्भुतम् ॥२३॥

भृशमरुन्तुदयेति गिरा नयन्
स निजमङ्कुशनाम यथार्थताम् ।
नरपतेश्च सदस्यगणस्य च
प्रकृतिनिष्ठुरमन्तरदारयत् ॥२४॥

समरदुर्घटनाश्रावणाहता-
खिलशरीरमनोमतिशक्तयः ।
नरपतिप्रमुखा भयविह्वला
ददृशुरापतितं नगरस्पशम् ॥२५॥

कृतनतिः स यथाविधि भूभुजे
कुशलवार्तमुवाच दरस्मितः ।
नरपते ! मरहट्टचमूपतिः
निववृते सहसैव यथागतम् ॥२६॥

भयनिमित्तमतो रिपुमूलकं
किमपि नाद्य नरेश विजापुरे ।
निगदतेत्यमुनैव पुरोऽपरः
समवलोकि चरो विपिनेचरः ॥२७॥

स निजसव्यकरेण मुहुः स्पृशन्
नतशिरा धरणीं च ललाटकम् ।
प्रतिपदं स्खलिताक्षरमूचिवान्
यदजयत् करवीरपुरं शिवः ॥२८॥

नगरखर्वटखेटपुराणि च
तव तदाक्रमणाध्वनि यान्यपि ।
युधि निपात्य सचन्द्रकला ध्वजाः
झटिति तेन हटादिव जिग्यिरे ॥२९॥

अतिविचित्रचरित्रमरेस्तव
श्रुतिपथं नृप हन्त ममागतम् ।
पुरि पुरि प्रतिचत्वरमुच्चकैः
जनगणैर्यदगीयत भक्तितः ॥३०॥

स्थविरबालशिशूनथवाऽङ्गनाः
क्वचन नच्छलयन्ति मनागपि ।
न विजयेऽपि पिबन्ति तथा सुराम्
अतिविचित्रगुणाः शिवसैनिकाः ॥३१॥

भवति हस्तगतं खलु कुत्रचित्
यदि पवित्रकुराणममुष्य च ।
श्रुतिपुराणसमं बहु मन्यते
प्रतिनिवर्तयते च सुधार्मिकम् ॥३२॥

❀ खलशत्रुः इति कर्मधारयपरो वक्तुरभिप्रायः परं खलाः शत्रवो यस्येति बहुव्रीहिपरो वास्तविकोऽर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुतमिदं च पुरात्र विजापुरे
नतसमस्तसदस्यशिरस्यपि ।
नृपसदस्यपभीः स किलैकलः
शिशुवयाः न ननाम निजं शिरः ॥३३॥
नगरचत्वर एव च सत्वरं
ललितमूर्तिरपि प्रखराक्रमः ।
अतिकरालतनोरपि गोहनः
विकट इद्त्रधरं करमाच्छिनन् ॥३४॥
अथ कदाचन संयति कुत्रचित्
अनवधानवशाच्छिवसैनिकैः ।
शशिमुखी विधृता यवनाङ्गना
भयवती गुरुपेटकसंस्थिता ॥३५॥
शिवसमक्षमसावबला बलात्
तदनु हन्त कथञ्चिदनीयत ।
स तु युवापि सुसंयमितेन्द्रियः
किमपि दिव्यमुवाच सुभाषितम् ॥३६॥
भवति किन्तु बिभेषि सुतान्निजात्
त्वमसि मे जमनी खलु धर्मतः ।
प्रथममेतदवेहि मम व्रतं
यदखिला महिलाः खलु मातरः ॥३७॥
बत इहागमितासि कुतश्चन
जननि ! तत्र निवर्तितुमर्हसि ।
मदनुयायिजनस्य कुचेष्टितं
प्रथममेतदवेहि तथान्तिमम् ॥३८॥
इति निगद्य वचः परमादरं
स्वकुलरीतिमनु प्रतिपूजिताम् ।
पतिगृहं विससर्ज यवीयसीं
बत शिवाजिरमूं यवनाङ्गनाम् ॥३९॥
अभयवाक्यमितीदमकल्पितं
नृपशिवोक्तमसावधिश्रृण्वती ।
पुलककुड्मलिताङ्गकवल्लरी
प्रमुदिता समभाषत सुन्दरी ॥४०॥
नरतनुं श्रयसे भगवानिति
यदनिशं हि श्रुतं बहुधा मया ।
तदधुना तव पुण्यचरित्रतो
मनुजदेव ! परिस्फुटतां गतम् ॥४१॥
विजय एतु सदा तव दासताम्
अखिलभूतिरुपेतु च वश्यताम् ।
तव पवित्रयशोभिरिदं जगत्
धवलतां भजतामकलङ्कितां ॥४२॥
भुवनमण्डलमण्डनमुज्ज्वलं
शिव भवन्निभमत्र परत्र वा ।
न खलु जात्वभवन्न भविष्यति
विमलशीलमहाद्युति भास्वरम् ॥४३॥
सकलमङ्गलभावपरिप्लुतं
मम मनो यदु भावयतेऽधुना ।
तदनिशं पुरुषोत्तम गीयतां
तव चरित्रमिहाऽखिलसज्जनैः ॥४४॥
इति चरित्रमरेस्तव भूपते
कविजनः परितो बहु गायति ।
पवनलोलसरोजवनश्रियं
किरति यच्चलमूर्धसु श्रृण्वताम् ॥४५॥
स खलु विष्णुरयं पुरुषाकृतिः
चरति लोकहिताय शिवाख्यया ।
इति धिया तमिमेऽखिलहिन्दवः
सुदृढभक्तिजुषः सपुपासते ॥४६॥
न खलु नामत एव तु तत्त्वतः
स भगवान् शिव एव शिवोह्ययम् ।
इति धिया तमिमेऽखिलहिन्दवो
सुदृडभक्तिजुषः समुपासते ॥४७॥
वनचरस्य चरस्य गिरं तथा
निजरिपुस्तुतिमात्रपरायणाम् ।
हृदयमर्मविघातपटीयसीं
स कथमप्यश्रृणोद्यवनाधिपः ॥४८॥
क्रथितगात्रगलद्रुधिरद्रवाः
नृपसखा विकला इव तत्र ये ।
चरगिरा च तया खलु मेनिरे
विषमिव व्रणमर्मसु सिञ्चतम् ॥४९॥
कथमयं रिपुवह्निरितस्ततः
प्रसरदचिरनन्यनियन्त्रितः ।
प्रशममेकपदे खलु नीयताम्
इति महाधिरमून् हृदयेऽदहत् ॥५०॥
वर्तां तां शिवराजविक्रमयशश्चारित्र्यरोचिष्मतीं
श्राबं श्रावमसावतप्यत भृशं राज्ञो विमाता शुचा ।
रुग्णान्तःकरणा विवर्जितवती दैनंदिनं भोजनम्
कं नूनं न दुनोति दुःश्रवतरा ह्युत्कर्षवार्ता रिपोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदि आप हमें कोई विशेष स्मारक डाक-टिकट जारी करने का प्रस्ताव भेजना चाहते हैं, तो आपका स्वागत है।

विशेष डाक-टिकट

लेकिन, प्रस्ताव भेजते समय कृपया हमारी साधारण नीति को ध्यान में रखें। हमारी नीति के अनुसार आपका प्रस्ताव किसी महान् व्यक्तित्व की जन्म-शताब्दि के सम्बन्ध में या उसकी पहली/दसवीं/सौवीं मरण तिथि के सम्बन्ध में, अथवा किसी अन्तर्राष्ट्रीय घटना के पचासवें/सौवें समारोह के सम्बन्ध में होना चाहिये।

davp 68/91

आपका प्रस्ताव टिकट जारी करने की प्रस्तावित तिथि से १८ महीने पहले हमें इस पते पर मिलना चाहिये:

महा निदेशक, डाक व तार
पार्लियामेन्ट स्ट्रीट, नई दिल्ली-१

हमें बेहतर सेवा का अवसर दीजिये!

भारतीय डाक व तार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान-साहित्य-संगमस्य दशाब्दी-महोत्सवः

(संक्षिप्तं विवरणम्)

प्रस्तोता-विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम् (राजस्थानम्)

विगतासु ज्येष्ठमासस्य शुक्लपक्षे प्रतिपद्-द्वितीयातृतीयासु तिथिषु, मईमासस्य २८, २९, ३० दिनाङ्केषु-उदयपुरनगरे राजस्थान-साहित्य-संगम (अकादमी) इति सुप्रसिद्धायाः प्रादेशिक्याः साहित्य-संस्थाया दशाब्दी-महोत्सव-समारम्भो महता समारोहेण सम्पेदे।

सोऽयं महामहोत्सवो राजस्थान-विद्यापीठ, उदयपुरेति शोधप्रतिष्ठानस्य, सालेटिया-ग्राउण्ड इति स्थाने सुप्रतिष्ठितस्य प्राङ्गणभूमौ विरचिते सुविशालेऽतिरमणीये च भव्ये सभामञ्चे सम्पन्नः।

अथ ज्येष्ठमासस्य शुक्लायां प्रतिपत्तिथौ, मईमासस्य २८ तारिकायां दिने सायं सन्ध्यासमये चन्द्रोदयवेलायामारेभे। अत्र प्रसङ्गे-आचार्यवर्यः श्रीमद्दत्तात्रेय-बालकृष्णः काकाकालेलकर-महाभागः, श्रेष्ठिवर्यः श्रीगोबिन्ददासमहोदयः, श्रीहरिभाऊ उपाध्यायमहाभागः, प्राध्यापकः श्रीपुष्करचन्द्रवाकरमहाशयः, श्रीनरेन्द्रदेवमहोदयः, श्रीविद्याधर शास्त्रिवर्यः, श्रीमदगरचन्द्र-नाहटामहोदयस्तथा चान्ये ख्यातनामानो नेतारः, साहित्यकाराः; विद्वांसश्च मुख्या मान्या अतिथयश्चोपस्थिता आसन्। राजस्थानप्रदेशस्थानेके गण्यमान्या साहित्यकाराः श्रीजनार्दन-रायनागरप्रमुखाः, साहित्यसङ्गमस्य वरिष्ठाः कार्यकर्तारस्तथा प्रान्तस्यास्य विद्वांसः साहित्यसेवकाश्चोपस्थिता अभूवन्।

प्रथमदिने सर्वादौ सभामञ्चस्य समीपं काष्ठफलकासने संस्थापितस्य वाग्देव्याः श्रीसरस्वत्या मनोहरचित्रस्य पुरतो दीपज्योतिः प्रज्वालनं समभूत्। श्रीउमाशङ्करशुक्ल-महाशयेन 'तमसो मा ज्योतिर्गमय' इति वेद-मन्त्रोच्चारपुरस्सारं शान्तिपाठो व्यधीयत। ततः सर्वोपकरणसुसज्जिते सुश्रृङ्गारिते च सभामञ्चे कैश्चित् स्थानीयैः संगीताचार्यैर्गन्धर्वादिभिश्च कलाप्रवीणैः सज्जनैः सवाद्यतालं सुमधुरस्वरं च प्रार्थनागीतिरगीयत। तदनु राजस्थान-साहित्य-संगस्याध्यक्षपदमधितिष्ठता सुविख्यातेन साहित्यकारेण श्रीहरिभाऊ-उपाध्यायमहाभागेन महोत्सवस्यास्य स्वागताध्यक्षेण महोत्सवेऽत्र सगागतानां सर्वेषां मान्यातिथिवर्याणां सम्भावनार्थं स्वागतभाषणं मुद्रिताक्षरं स्नेहसद्भावसौहार्दविलसितं सुस्फीतमपाठि। स्वागताध्यक्षेण श्रीहरिभाऊ-उपाध्याय-महाभागेन स्वभाषणे राजस्थान-साहित्य-संगमस्य (अकादमी, ति संस्थाया अस्याः) स्वावत्तीकरणस्य, स्वप्रान्तस्य तथान्तःप्रादेशिकानां साहित्य-सेवकानां मिथो बन्धुत्वभावापादनस्य, साहित्यसंस्थाप्रतिष्ठानानां, साहित्यसेवा-तत्पराणां विदुषां च लोकतन्त्रोचितायाः स्वाधीनतयास्तथा तेषां सम्भावना सम्मान-वृद्धेरेवमेव समाजसदस्यैः प्रदेशराज्यद्वारा च धनानुदानवर्धनस्य पक्षः समर्थितः।

अथोपाध्यामहाभागस्य स्वागतभाषणानन्तरं साहित्य-संगमस्यास्य संस्थापकेन भूतपूर्वेणाध्यक्षेण श्रीजनार्दनरायमहाभागेन साहित्य-प्रतिष्ठानस्यास्य संस्थापनसङ्कल्पमारभ्येदानीं यावत् सम्पादितानां कार्यकलापानां, विविधविध-शुभप्रवृत्तीनां च संक्षिप्तः परिचयः प्रादायि। ततः प्रधानेनातिथिना श्रीकाकाकालेलकर महोदयेन पुष्पमालार्पणपुरस्सरं श्रीमद्गोविन्द-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दासश्रेष्ठिवर्यः, श्रीजनार्दनरायनागरमहोदयस्तथा श्रीविद्याधरशास्त्रिमहाभागो 'मनीषी' इत्युपाधिना वरिष्ठेन समङ्कृतास्तेभ्यः प्रत्येकं खचिताक्षररूपा रजतपट्टिका प्रशस्तिः समर्पिता। ततः श्रीगोविन्ददासश्रेष्ठिमहोदयेन त्रयाणामपि सम्मानितानामेतेषां विद्वद्धुरीणानां प्रतिनिधित्वेन धन्यवादभाषणं प्रदत्तम्। तदनन्तरम् श्रीविद्याधरशास्त्रिमहाभागः स्वकीयं वक्तव्यं सारगर्भितमपि सविनयमूचे।

तदनन्तरं राजस्थानराज्यस्य माननीयशिक्षामन्त्रिमहोदयस्य श्रीशिवचरणलालमाथुरमहाभागस्याध्यक्षीयं भाषणं सुविचारसद्भावशबलं समभूत्। ततः सामूहिकरूपेण स्वासनेभ्य उत्थाय राष्ट्रगीतगायनेन साकं तदेतन्मनीषिसमावर्तनं प्रथमदिवसस्य कार्यक्रमस्वरूपं सानन्दं ससुखं साह्लादं च समाप्तिमगात्।

अथ द्वितीयेऽह्नि ज्येष्ठशुक्लपक्षस्य द्वितीयायां तिथौ, २९ मईदिनाङ्के प्रातः सार्द्धाष्टवादनसमये राजस्थान-साहित्य-संगमस्य दशाब्दीं यावत्सम्पन्नानाम् नानाविधकार्यकलापपरिचायकानां, संस्कृत-हिन्दी-उर्दू-राजस्थानीति चतसृणामपि भाषाणां साहित्यसम्बन्धिग्रन्थ-पुस्तिकादिप्रकाशनानां, कलाविलासललितप्रवृत्तिद्योतकानां चित्र-मानचित्रपटलादिनानावस्तूनां तथा च संगम-संस्थाया अस्या विविधविधपुरुषार्थप्रदर्शकानां प्रदर्शिन्या उद्घाटनमंगलम् रास्थानस्य सुविख्यातो वरिष्ठो विद्वान् संस्कृत-साहित्यज्ञो मनीषी प्राध्यापकः श्रीविद्याधरशास्त्रिमहाभाग एम. ए., भूतपूर्वः संस्कृतप्रधानाध्यापको डूँगरकालेजः बीकानेर इत्याख्यः सम्पादितवान्। सैषा प्रदर्शिनी राजस्थान-साहित्य-संगमस्य दशसु वर्षेषु सम्पन्नानां सर्वविधानां गतिविधिप्रवृत्तिप्रगतीनां भव्यं भद्रं रमणीयं च चित्रं साकारं साक्षादुपस्थापयन्ती दर्शकानां मनोहरन्ती तन्नेत्रोत्सवायानन्दायाह्लादाय सुखाय चाजायत।

ततो 'राजस्थान-साहित्य- संगमस्य स्वप्रान्तस्य संस्थाभिः सह सम्बन्धः, सहयोगः, परस्परं योगदानं च इति विषयमधिकृत्य किलैकम् विद्वद्गोष्ठी-अधिवेशनं समपद्यत। अस्यां खलु गोष्ठ्यां प्रदेशस्यास्य राजस्थानस्य विभिन्नाञ्चलेभ्यो, गुर्जर-सौराष्ट्रप्रान्ताभ्यां च समागतानां साहित्यसेविनां, साहित्यिकीनां संस्थानां प्रतिनिधीनां च तत्तत्समस्याऽभावाभियोगादि-विविधविषयसम्बद्धानि भाषणानि, वक्तव्यानि च समभूवन्।

अथः पुनः सायङ्काले साहित्य-संगमस्यास्य महोत्सवेऽस्मिन् कार्यक्रमान्तर्गतं पूर्वनिर्धारितायोजनानुसारं 'अन्तःप्रादेशिकं साहित्यकारबन्धुत्वम्' इति विषयमिममधिकृस्य महोत्सवस्यास्य बृहदधिवेसनं समपद्यत। अत्र प्रकरणे संगमस्याध्यक्षपदमधितिष्ठता श्रीहरिभाऊउपाध्यायमहाभागेन गुर्जरभाषाया वरिष्ठसाहित्यकारस्य स्वर्गीयश्रीझवेरचन्द्र मेधाणीमहोदयस्य पुण्स्मृतौ मेधाणी-पुरस्कार-समर्पणविधिरुद्यापितः। स एष मेघाणीपुरस्कारो हि सौराष्ट्रप्रान्तस्य सुविख्याताय साहित्यसेवकाय उपन्यास-एकाङ्कनाटकसुकथा--काव्यलेखकाय श्रीपुष्करचन्द्रवाकरमहोदयायोपाध्यायमहाभागेन तत्परिचयप्रदानपूर्वकं समर्पितः सादरम्। ततः श्रीपुष्करचन्द्रवाकरमहोदयो गुर्जरभाषायां लिखितं, हिन्दीभाषाक्षरेषु मुद्रितं पुस्तिकारूपं स्वकीयं भाषणं पपाठ। धन्यवादाश्च तेन संगमसंस्थानाय समर्पिताः। तदनंतरं राजकोटवास्तव्यस्य श्रीनरेन्द्रदवे इति सुप्रसिद्धस्य साहित्यकारस्यान्तःप्रादेशिकसाहित्यकार-बन्धुत्व-विषये सारगर्भितं सरसमधुरं भाषणं समभूत्। एवमस्य दिनस्य कार्यक्रमः परिपूर्णतामियाय।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ च ज्येष्ठशुक्लातृतीयायां तिथौ, ३० मई ६८ दिवसे प्रातः सार्द्धाष्टवादनसमये पूर्वदिगावशिष्टस्य साहित्यसङ्गमेन सह 'राजस्थानप्रान्तीयानामन्यान्यसाहित्यिकीनां संस्थानां मिथः सम्बन्धः सहयोगश्चेति' विषयणी गोष्ठी श्रीमल्लक्ष्मीलालजोशीमहोदयानां साभापत्ये प्रारेभे। नत्र च राजस्थानप्रदेशस्य बिभिन्नस्थानेभ्यः समागतानां संस्था—प्रतिष्ठानानां प्रतिनिधीनां वक्तव्यानि समभूवन्। मध्ये-मध्ये शङ्कासन्देहसमाधानार्थं राजस्थान-साहित्य-संगमस्य प्रतिष्ठापकस्य श्रीमज्जनार्दनराय-महोदयस्य संक्षिप्तानि वक्तव्यान्यपि चाभूवन्।

अस्मिन्नेव दिने मध्याह्नसमये विद्यापीठनाम्नः साहित्यशोधसंस्थानस्य तत्त्वावधाने श्रीप्रतापजयन्तीमहोत्सवस्य कार्यक्रमः ससमारोहमुद्यापितो, यसोऽस्मिन्नेब दिवसे श्रीप्रतापजयन्तीमहोत्सबस्य वार्षिकी तिथिरभूत्।

अथ ३० मई ६८ दिने, ज्येष्ठशुक्ला तृतीयायां तिथौ गुरुवासरे सायं ८ वादनसमये राजस्थानराज्यस्य मुख्यमन्त्रिप्रवरस्य श्रीमोहनलालसुखाड़ियामहोदयस्य सभापतित्वे दीपज्योतिःसरस्वतीप्रार्थना-संगीतगानपूर्वकं श्रीहरनाथकवीन्द्रस्य ग्रन्थावलिविमोचनस्य तथान्येषां रातस्थानीयसाहित्यसेविनां सम्मानसम्भावनादेः समारोहस्य कार्यक्रमः प्रावर्तत। सर्वादौ मञ्चासीनेभ्यो मुख्यमन्त्रि-साहित्यकारादिभ्यः साहित्यसंगमस्याध्यक्षः श्रीहरिभाऊ-उहाध्यायमहाभागो माल्यापर्णं कृतवान्। ततः साहित्यसंगमस्य प्रतिष्ठापको भूतपूर्वोऽध्यक्षश्च श्रीजनार्दनरायनागरमहाभागः श्रीहरनाथकवीन्द्रस्य परिचयात्मकं भाषणं प्रददौ। तत्र भाषणे कवीन्द्रस्य श्रीहरनाथमहाभागस्य काव्यकृतित्वे तथा च तस्य ग्रन्थावलेः प्रकाशनादिसम्बन्धे नागरमहोदयेन संक्षेपतः प्रकाशो निक्षिप्तः। तदनु श्रीहरनाथकवीन्द्रो मुख्यमन्त्रिमहोदयाय श्रीमन्मोहनलालसुखाड़िया महाभागाय स्वग्रन्थावलेर्मुद्रितरूपां प्रतिमेकां प्रार्पयत्। ततः कवीद्रो ग्रन्थावलीतः काव्यमेकमश्रावयत्। धन्यवादप्रदानपुरस्सरं कृतज्ञताभारं च प्राकाशयत्। एवं ग्रन्थावलेर्विमोचनसंस्कारः सविधि सोपचारं च व्यधीयत।

तदनन्तरं राजस्थानप्रदेशस्य विशिष्टसाहित्यकारणामेकादशसाहित्यसेविनां कविलेखकविद्वद्वराणां हिन्दी-ऊर्दू-इतिहासादिषु विषयविशेषेषु चिरात् साहित्यसेवासाधनानिरतानां सम्मानसत्कारविधेः कार्यक्रमः प्रारेभे। अत्र प्रसङ्गे १-श्रीझाबरमल्लमर्शा २-श्रीप्रतापनारायणपुरोहितः ३-श्रीमुरलीधरव्यासः ४-श्रीसुमनेशजोशी ५-श्रीअगरचन्द्रनाहटा ६-श्रीचांदबिहारीलालः ७-श्रीहरनाथःकवीन्द्रः ८-श्रीसीतारामलालः ९-डा० श्रीरामानन्दत्रिपाठी 'भारतोनन्दनः' १०-श्रीशम्भुदयालसक्सेना ११-श्री डा० मनोहरशर्मा इत्येकादश सज्जनाः सम्माननीया आसन् मुख्यमन्त्रिणा मोहनलालसुखाड़ियामहोदयेन स एष सम्मानसत्कारसंस्कारो विधिविधानपूर्वकं समाल्यार्पणं विहितः। राजस्थान-साहित्य-संगमस्य निर्देशको द्राक्तरः श्रीहरीशमहोदयो मध्ये-मध्ये सर्वेषामेतेषां विद्वत्साहित्यकाराणां कृतित्वस्य तथा तत्साहित्यसेवाव्रततपःसाधनादेः संक्षिप्तं परिचयमपि च प्रददानोऽभूत्।

ततः पुनः सम्मानितानां सर्वेषां लेखककविविदुषां प्रतिनिधित्वेन श्रीअगरचन्द्रनाहटामहाशयेन धन्यवादाः प्रार्प्यन्त साभारं कृतज्ञताभावश्च विज्ञापितो राजस्थानसाहित्यसंगमाय, मुख्यमन्त्रिमहोदयाय, श्रीजनार्दनरायमहाभागाय च।

तदनन्तरं राजस्थान-साहित्य-संगमस्य दशाब्दी-समारोह-सभाया अस्याः प्रधानातिथेः श्रीमोहनलालसुखाड़ियामहागस्य माननीयमुख्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्रिमहाभागस्य सारगर्भितं गम्भीरविचार-विचक्षणं स्नेहसद्भावसौहृदसुस्फीतं साहित्य-सेवकेभ्यः प्रेरणास्फूर्तिप्रदायकं च भाषणमभूत्। स्वस्य भाषणे श्रीमोहनलालसुखाड़ियामहोदयः साहित्यसेवकान् कवीन् लेखकान् विदुषश्च राष्ट्रनिर्मातॄन्; समाजसंस्कर्तॄन् मानवोपकारकर्तॄंश्चोवाच। स खलु राजस्थान-साहित्य-संगमस्म शुभप्रवृत्तीः कार्यविधींश्च प्रशशंस। संस्थाया अस्याः कृते राज्यद्वारा धनानुदान-साहाय्यादिवृद्धे राश्वासनं च प्रददौ।

अन्ते धन्यवादप्रदानानन्तरं राष्ट्रियगीत-गायनेन सह महामहोत्सवोऽयं सानन्दं ससुखं सह्लादं सपरितोषं च समाप्तिं जगाम।

Protect your property against Fire & other damages

Ruby General Insurance Company Limited

Year	Nett Premium Income	Nett Claims Paid	Capital & Funds	Assets.
1966	Rs. 2,75,88,000	Rs. 1,44,57,000	Rs. 2,50,00,000	Rs. 5,18,00,000

BUSINESS TRANSACTED :

FIRE MARINE MOTOR ACCIDENT AVIATION MACHINERY AND ERECTION ETC. ETC.

Branches & Agencies in all Important Towns in India
Foreign Branches & Agencies.

Aden, Amsterdam, Beirut, Biratnagar, Georgetown (Guyana), Kingston (Jamaica), Kathmandu, Nairobi & Sanfernando

Head Office & Registered Office :

"RUBY HOUSE"

8, India Exchange Place, CALCUTTA-1.

Managing Director, Shri K. P. Modi, B.Com., B.L., A.F.I.I., J.P.

सुन्दर व आकर्षक मुद्रण के लिये

* श्री हनुमान प्रिन्टिंग प्रेस *

चौड़ा रास्ता, राधा दामोदर की गली,

जयपुर – ३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संगृहीताः समाचाराः

विद्याभूषणः श्रीगणेशरामशर्मा, डूंगरपुरम्, (राजस्थानम्)

अदीसअबाबा नगरस्य जेलिफानामको जनः सविश्वासं कथयति यत् सः कुक्कुरैः सह तेषामेव भाषायां सम्यग् वार्तालापं कर्तुं प्रभवति । तत्कथनानुसारं तेन शूनां भाषाशिक्षणे स्वजीवनस्य ६१वर्षाणि व्यतीतानीति ।

—❀—

स्विट्जरलैण्डदेशस्य ज्यूरिचनगरस्य निवासी ७३ वर्षायुः एलियसहासकेल्डनामा व्यक्तिः प्रार्थनागृहस्य घण्टाध्वनिश्रवणं विना स्वजीवनमपूर्णमिव मन्यते । ५६ वर्षाणि यावत् स खल्वेकस्मिन् प्रार्थनागृहे (चर्च इत्याख्ये) घण्टावादनस्य सेवां सम्पादितवान् । विश्रामवृत्तिग्रहणानन्तरं स घण्टाध्वनिश्रवणं विनात्मनो जीवनं व्यर्थमिवाभावयत् । परिणामतः स स्वगृहे घण्टामेकां समायोजितवानास्ते यां स वादयन् मोदते ।

—❀—

कनाडादेशस्य टोरण्टोनगरे हागनामा जनः २६५ डालरमुद्राणां चौर्यकर्मारोपे न्यायालयस्य पुरत उपस्थापितः । स हि न्यायालये स्ववक्तव्यमुवाच यद्धि तदिदं चौरकर्म स केवलं रात्रिभोजनं संयोक्तुमेव चकारेति ।

—❀—

दारेसलाम इति नगरेऽधुना बालकेष्वेको विचित्रो रोगो ननु प्रसृतोऽस्ति-स हि रोगो हास्यरूपो वर्तते । अस्य रोगस्याक्रमणमकस्माद्भवति, बालको निषण्णः सन् हसितुं प्रारभते । स हसन् पुनर्हसन् तावत्पर्यन्तं हसति यावन्मूर्च्छितो विसंज्ञो न भवति । सोऽयं हास्यरोगो बालकमन्वपरं शीघ्रमेव हि संक्राम्यति । तत्रत्याः शालाः सर्वाः शासनाज्ञयाऽनिश्चिकालपर्यन्तं स्थगिताः सन्ति ।

—❀—

नैरोबीनगरस्य वनविभागस्य श्रमिका दिनेष्वेष्वान्दोलनमेकं प्रारभन्त । कियत्समयात्पूर्वं वन्यगजेभ्यः स्मात्मरक्षार्थं तैः १८ घण्टापर्यन्तं वृक्षारोहणं कर्तव्यमभूत् । तेषामयमभियोगोऽस्ति यद्वृक्षारोहणस्यायं १८ घण्टात्मकः समयोऽधिककार्यकालो विभाव्य तेभ्यः पारिश्रमिकं धनं प्रदीयेतेति ।

—❀—

पेरिसनगरस्य अग्नि-सेवायां नियुक्तो ३१ वर्षीयो गेस्टनराक्सनामा जनोऽधुना स्वनियोगकार्यान्निलम्बितोऽक्रियत । यतः स खल्वेकस्मिन् गृहे प्रज्वलितमग्निमुपशामयितुं निषेधं कृतवान् । तद्गृहं तस्य युवकस्यासीद्योहि तस्य प्रेयसीमपबोध्य तां परिणिन्ये ।

—❀—

टोकियोनगरस्य औषधालयानां प्रसूतिगृहेषु नवजातशिशूनामङ्गुष्ठमुद्राप्रतिलिपिः सद्यो जातानामेव परिगृह्यते । तत्र जातानां शिशूनां परिवर्तनस्यानेकघटनानन्तरं तेषां सम्यक् परिचितये सोऽयं प्रबन्धो विहितोऽस्ति ।

—❀—

मास्कोनगरे यन्त्रनिर्मितमस्तिष्कानां मिथः प्रथमायां चतुरङ्गक्रीडाप्रतिस्पर्धायामन्ताराष्ट्रियायां रूषदेशस्य गणकयन्त्रं केलिफोर्नियाया गणकयन्त्रं पराजिगाय । सैषा प्रतियोगिताऽभूतपूर्वा सर्वप्रथमा चासीत् ।

—❀—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेनायां प्रवेशमाप्तुं ३७ वर्षदेशियो ग्रामीणोऽथ एलेक्सीजानविचनामा ११७ मीलमितं पन्थानं पद्भ्यामतिक्रम्य वार्सानगरस्य सैन्यकार्यालयं प्राप । तत्र स सेनायामेतदर्थं नागृह्यत यतः स द्राक्तराणां सम्मत्यनुसारं तस्य पदयोः पर्याप्ता शक्तिर्नासीत् ।

—❀—

शिकागोनगरस्य ६८ वर्षीयो थियोसिकलायरनामा जनो यदा ४५ वर्षाणि यावदेकस्मिन् भोजनालये स्थालीप्रक्षालनकार्यसम्पादनानन्तरं विश्रामवृत्तिं गृहीत्वा पृथग् बभूव तदा सः शतशंख्यकाः स्थालीः खण्डं खण्डं त्रोटयित्वाऽऽत्मनो मुक्तिदिवसोत्सवमुद्यापयामास ।

—❀—

कुवैतनगरस्यैका ग्रामीणा महिला स्वपालितानां तिसृणामुष्ट्रीणां ग्रीवाः क्रकचेन विदार्यास्माद्धेतोस्तासां वधं चकार यतस्तस्याः पतिस्तदपेक्षयोष्ट्रीणामधिकं समवधानमरक्षत् ।

२६-५-६८ तथा २-६-६८ दिनाङ्कयोः साप्ताहिकहिन्दुस्तानात्साभारम् ।

—❀—

निनोकार्टियानामकेन जनेन मिलाननगरे स्वस्य सप्ततितमे वर्षग्रन्थ महोत्सवे सप्ततिसंख्याका अतिथयो निमन्त्रिताः । सप्ततिसंख्यानि मद्यपात्राण्युदघाटयन्त । मद्यपानानन्तरं महोन्मत्तो निनोमहाशयः स्वातिथिनैकेन साकं कलहं चकार । अन्ततः सोऽयं कलहो हस्ताहस्ति दण्डादण्डि भयङ्करीं स्थितिं प्राप । अतिथिर्गम्भीररूपेणापहतोभूत् । अभियोगे प्राप्ते सति न्यायाधीशमहोदयो तिपुणं विचार-विमर्शं कृत्वोवाच यन्नीनोमहाशयाय सप्ततिदिनपर्यन्तं कारागृहनिवासस्य दण्ड उपयुक्तः स्यादिति ।

—❀—

टोरण्टोनगरस्य न्यायलयो द्वाविंशतिवर्षवयसः श्रीमत्याः शेलाफिसर इत्याख्याया युवत्याः स्वपत्युः सम्बन्ध-विच्छेदस्य प्रार्थनापत्रं न स्वीचकार, यतस्तस्याः सम्बन्धविच्छेदस्य प्रार्थनाया आधारो न हि सुदृढोऽभूत् । सा स्वप्रार्थनापत्रे लिलेख यत्तस्याः सर्वासामपि सखीनां विवाहितानामधुनापर्यन्तम् न्यूनान्न्यूनमेकैकः सम्बन्ध-विच्छेदो बभूव तथा सा स्वयमिदानीं यावन्न तथा कर्तुं पारयामासेति । तदनन्तरं शैलायाः पतिः सम्बन्धविच्छेदाय प्रार्थना-पत्रं निवेदयामस तथा तन्न्यायालयेन स्वीकृतम् । स तत्र प्रार्थनापत्रे लिलेख यत्तस्याः पत्नी शैला केवलं सम्बन्ध-विच्छेदायैव सम्बन्धविच्छेदं ववाञ्छ ततः सा सहधर्मिणी पतिपरायणा च पत्नी प्रमाणिता भवितुं नार्हतीति ।

—❀—

अद्यतनं जीवनमेतावदस्तव्यतं समभूद्यल्लोकेभ्यः क्षणमात्रोऽपि समयोऽपगमयितुं नो रोचते । तदिदमेव तथ्यं स्वदृष्टौ रक्षता सेन्टलुईनाम्ना कैथोलिकसम्प्रदायप्रार्थनागृहेणैका नव्या व्यवस्था विहिता । इदानीं लौकेः स्वपापानां स्वीकारोक्तये प्रार्थनागृहस्याभ्यन्तरगमनस्यावश्यकता न भविष्यति । धर्माचार्यः स्वयमेव हि बहिर्गत्वा तेषां लोकानां पापस्वीकारोक्तिं श्रोष्यति तथा चेश्वरस्तेभ्यः क्षमादानं करिष्यति ।

—❀—

ओटावानगरस्यैकपञ्चाशद्वर्षीयः पैरीबेकनामा जनो भवनस्य खण्डद्वयमध्यवर्तिनोमूर्ध्वमधो सञ्चरन्तीं यन्त्रनिःश्रेणीं (लिफ्ट) मध्ये मार्गमेवावरुध्य खण्डशोऽत्रोटयत् । ततः सः स्वयं तत्रावरुद्धो बहोः समयादनन्तरं स्थानात्तस्मान्निःसारितः । सोऽवदत् – समाचारपत्रेषु प्रकाशिमं स्वाभिधानं द्रष्टुमेव स इत्थमाचचारेति ।

९ जून ६८ दिनस्य साप्ताहिकहिन्दुस्तानपत्रात् साभारम् ।

—❀—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविकुलगुरोः कालिदासस्य अभिज्ञानशाकुन्तलम् इति विश्व-विख्याते नाटके तन्नायिकायाः शकन्तलाया अङ्गुलीयकं विगलितं सन् मत्स्योदरतः पुनः प्राप्तमभूदिति न हि दन्तकथासीद् वरञ्च सत्या घटनाभूदिति विश्वासयोग्यं प्रतिभाति। अधुनैव नारवेदेशस्यैकस्य मत्स्याजीविन उपनेत्रम् (चश्मा) समुद्रे निपतितमभूत् । कियद्दिनानन्तरं तदुपनेत्रं तेनैव मत्स्याजीविनैकस्य मत्स्योदरादुपलब्धम् ।

—❀—

पैरिसनगरस्यैकस्मिन् सुविशाले सर्वसुविधासम्पन्ने च भोजनालये कश्चन ग्राहक एक आतृप्ति स्वादिष्टं भोजनमकरोत् । ततः स विषं भक्षित्वा भृत्यमाह्वयत्तमुक्तवाँश्च—"मम धनदेयपत्रं (बिल) परमेश्वरस्य गृहं (स्वर्गं) प्रेष्यताम् ।" परन्तु भोजनालयस्य तस्य कार्यकर्तार आरक्षिविभागीयान् (पुलिस) समाजुहुवुः । ते चारक्षिविभागीयास्तं भोजनभट्टं ग्राहकमौषधालयं निन्युस्तं चोपचारैर्मृत्युमुखाद्ररक्षुः । अन्ततस्तेनैव ग्राहकेण भोजनमूल्यस्य द्रव्यं प्रदातव्यं समभूत् ।

—❀—

शिकागोनगरस्यैकाध्यापिका स्वगृहाद्बहिः किमप्येकं विचित्रं कृष्णवर्णं वस्तु अपश्यत् । कदाचिदेतद्वस्तु कस्याश्चित्तारकाया, उल्कायाः किं-वा-उड्डयनस्थाल्याः (उडनतश्तरी) निपतितं भवेदिति विचिन्त्य साध्यापिका तं पदार्थं परीक्षणायैकां विज्ञानशालां प्रति प्रेषितवती । बहुदिनानन्तरं निपुणं परीक्षणादयेदं विज्ञातं यत्तद्वस्तु ज्वलिताया डबलरोटिकायाः खंडोऽभूदिति ।

डेनमार्क देशे-एकस्मिन् पत्यौ स्वपत्न्या दन्तोत्पाटनस्याभियोगः समारोप्यत । न्यायालये स्वनिर्दोषताप्रतिपादनाय तेन पत्योक्तम्—"सैषा मम पत्नी मम हस्तं कर्तयन्ती समभूत् । मया सवेगं प्रबलाघातपूर्वकं स्वहस्तो विमोचितस्ततोऽस्या दन्ता अत्रुट्यन् । अत्र को मे दोषः ?"

—❀—

टोकियोनगरे कश्चनैक एकादशवर्षवयस्को बालको मुष्टिद्वन्द्वसंघर्षं दर्शं दर्शं तथोद्विजितो यत् स स्वहस्ताभ्यां प्रहारार्थमचेष्टत । तस्यानया चेष्टया तत्समीपं निषण्णायाः स्वभगिन्या मुखमुत्पाट्य विध्वंसितम् ।

—❀—

नार्वेदेशस्यारक्षिविभागो वन्दिगृहात् प्रपलायितस्यैकस्य बन्दिनोऽन्वेषणायां सचेष्टः सक्रियश्चास्ते—एतत्प्रदर्शनार्थम् यत् स नाधिकं पलायेत, तस्य बन्धनान्मुक्ते राज्ञापि च बभूव ।

३०, जून ६८ दिनस्य साप्ताहिकाद्धिन्दुस्तानात्' साभारम् ।

—❀—

दी अवध सूगर मिल्स लिमिटेड

प्रधान कार्यालय :—
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई-१

मिल्स :—
हरगांव
जिला-सीतापुर
उत्तरप्रदेश

निर्माता :—
शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in any language, it's sweet



In old French it was called ZUCHRE. In Arabic and Persian it is SUKKAR and SHAKAR respectively. It is SHARKARA in Sanskrit and SAKKHARON in Greek.

One does not have to be a scholar to notice the evident phonetic resemblance of the words. It is perhaps not surprising, since all of them mean the same thing—SUGAR, the universal sweetening agent which in some form or other has been known to mankind from the neolithic age.

Today SUGAR usually means crystalline sucrose —the kind you use in your home every day. It is an essential item in your diet with a high energy value of 1,794 kilocalories per pound. There is no other satisfactory substitute for sugar.

Issued by:

- **UPPER GANGES SUGAR MILLS LTD.**
- **THE OUDH SUGAR MILLS LTD.**
- **NEW INDIA SUGAR MILLS LTD.**
- **THE NEW SWADESHI SUGAR MILLS LTD.**
- **BHARAT SUGAR MILLS LTD.**
- **GOBIND SUGAR MILLS LTD.**

Managing Agents:

BIRLA BOMBAY PVT. LTD.

Industry House, 159, Churchgate Reclamation, Bombay-1.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीननाथत्रिवेदी मधुपः, सहसम्पादकः

संस्कृतविश्वविद्यालयस्यावश्यकत्वम्

डा० श्रीचिन्तामणि-द्वारकानाथदेशमुखेन (तिरुपती) संस्कृतविद्यापीठस्य गवेषणाध्येतॄणां पुरतो भाषमाणेन प्रोक्तं यत् संस्कृतस्य भविष्य-दुज्ज्वलं वर्तते, दक्षिणे संस्कृतविश्वविद्या-लयस्य स्थापनार्थं प्रयासः करणीयः। तथा च देशेऽत्र यत्र तत्र स्थितानां संस्कृतग्रन्थानां पाण्डु-लिपीः संगृह्य संस्कृताध्येतृभिर्महानुभावैस्तासां प्रकाशनं विधेयमिति।

संस्कृतविद्यालयस्यायोजनम्

शेखावाटीप्रान्तस्थिते रामदुर्गे ब्राह्मण-सभया विसाऊद्वारस्योपरि भवकनेकं निर्माय तत्र संस्कृतविद्यालयसञ्चालनस्य कृतो निश्चयः।

विदितमेवेदं संस्कृतसेविनां विदुषां यत्पूर्वं रामदुर्गे बह्वयः संस्कृतपाठशालाः धन्यैः श्रेष्ठिवर्य्यैः सञ्चालिता अभूवन्। अत एव तदानीं रामदुर्गमिदं 'लघु-काशी' इति नाम्ना ख्यातमासीत्, परं महतो दुःखस्यायं विषयो यत्सम्प्रति नैकापि तत्र संस्कृतपाठशाला विद्यत इति।

अहं सम्यक् स्मरामि यत्तदानीं तत्रानेके सुयोग्या विशिष्टा विद्वांस आसन्, ये हि पदे-पदे शास्त्रार्थं कर्तुं सदा सन्नद्धास्तिष्ठन्ति स्म। तेषां विदुषामिदानीं तत्र प्राचीनाः पण्डिताः श्रद्धेयाः श्रीयमुनाधरशास्त्रिणो लाटोपनामधेया नैया-यिका विराजन्ते, येषां रचना भारत्यां प्रका-शिता भवति!

सम्मतिः

अस्माकं प्रियमित्रेण कुशललेखकेन विद्व-द्वरेण श्रीदुःखिश्यामशास्त्रिमहोदयेन **'गल्प-कल्पलतिकां'** उद्दिश्य समुचिता या स्वस्य सम्मतिः प्रहिता सेदानीं 'आरती' पाठकानां विपश्चितां पुरस्तात्समुपस्थाप्यते। यथा हि-श्रीमन्महोदय! सप्रणयं नमस्ते!

भवत्संगृहीता संस्कृत-प्रचार-परिषदा च प्रकाशिता 'गल्पकल्पलतिका' दृष्टिपथमागता! तत्रत्यानां सरसमधुराणां विनोदमदभरितानां गल्पानां पठनेनाहं प्रमुदितोऽभवम्। भारती-संस्थायाः स्वागतयोग्यया एवंविधया चेष्टया हि संस्कृतसाहित्यममचिरादेव लोकप्रियतामासाद्य पुनः स्वकीयं स्थानं यथापूर्वं नूनमेवाधिकरिष्य तीति नन्दामि!

एवंविधानां हि सरलसरलानां क्षुद्रगल्पानामे-काङ्किनाञ्चाभावः संस्कृत-साहित्येऽनुभूयतेत-राम्। तत्र तु कारणम् अधुना सर्जनशील-साहित्यसृष्टिमनोवृत्तेरभाव एव न तु भाषाया असामर्थ्यम्।

अत्र हि भ्रातृस्नेह-दैवबलैकता-प्रेमपरा-काष्ठा-वीरत्व-स्त्रीप्रशंसाः समवलम्ब्य रचि-ताभिः पण्डितवराणां श्रीगणेशरामशर्म-वासुदेवशास्त्रि-शठकोप-नन्दकिशोरझा-श्यामदेव शास्त्रि—मधुप-दीनानाथत्रिवेदानां रचनाभिः संवलिता सेयं गल्पकल्पलता सहृदयपाठकानां गल्पपठनाकांक्षापूरणे कल्पलता इवैवेति वेद्मि। अतः श्रीमतामभिमतं 'सकृद् विलोक्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यावदादितः समाप्तिपर्यन्तं न भवन्तः पठिष्यन्ति, तावन्न मध्ये परित्यक्ष्यन्ति' इति तु यवार्थमित्यनुभूतं मया । पुस्तिकायाः आकृतिः मुद्रणपरिश्रमश्चापि मनो हरति पाठकानाम् एदर्थं श्रीमन्तमभिनन्दामि अनेनेति शम् ।

श्रीमतां गुणमुग्धो
बुःखिश्यामशास्त्री पट्टानायकः

तिथिः संस्कृतविभागः
१४-६-६८ उत्कलविश्वविद्यालयः, भुवनेश्वरम्

•

स्व० म० म० श्रीगिरिधरशर्मचतुर्वेदानां
तथा
स्व० राजगुरु-श्रीभवदत्तशर्ममैथिलानां

पुण्यतिथौ

गताषाढस्य कृष्णाष्टम्यां जयपुरस्थ—श्रीगिरिधर-साहित्यिकशोधसंस्थानेन स्व०श्रीचतुर्वेदमहोदयानां तथा स्व० श्रीभवदत्तमैथिलानां पुण्यतिथिमधिकृत्य **पं० श्रीदेवीशंकरतिवाडीमहोदयानां** सभापत्ये महाराज-संस्कृत-कालेजे सभैका समायोजिताभूत् । विद्वद्वरेण्ययोरुभयोरपि विषये यैर्महानुभावैः संस्मरणानि कविताश्चाश्राव्यन्त तेषां नामानि यथा—

डा० श्रीमथुरालालशर्माणः, वैद्यश्रीदौलतरामचतुर्वेदाः, निदेशकाः आयुर्वेदविभागस्य, पण्डितश्रीगोविन्दनारायणशर्माणो नैयायिकाः, अध्यक्षाः, महाराजसंस्कृतकालेजस्य, श्रीताराप्रकाशजोशीमहोदयाः, उपजिलाधीशाः, जयपुरप्रान्तस्य, कथाभट्ट-श्रीजगदीशचन्द्रशर्माणः, पं० श्रीदेवीदत्तचतुर्वेदाः, पं० श्रीदुर्गादत्तशर्ममैथिलाः, व्याकरणप्राध्यापकाः, श्रीगणेशनारायणशर्माणः (दक्षाः) इत्यादयो वक्तार आसन् ।

किञ्च शोधसंस्थानमन्त्रिणा पं० श्रीरमेशभारतीयेन च शोधस्यावश्यकता प्रतिपादिता । स्व० महामहोपाध्यायानां कनिष्ठपुत्रेण श्रीशिवदत्तशर्मचतुर्वेदमहोदयेन संस्थानद्वारा प्रकाशितानां पुस्तकानां विवरणं प्रस्तुतम् । श्रीमता ताराप्रकाशमहोदयेन च स्व० मैथिलमहोदयस्य कवितानां प्रकाशनस्यावश्यकता समर्थिता । तथा च स्व० भवदत्तशर्मकनिष्ठात्मजेन श्रीज्वालादत्तमहोदयेन च स्वपितृरचितानां कवितानां पाठो विहितः ।

अन्ते च श्रीसभापतिमहोदयानां सारगर्भितं भाषणं संवृत्तम् । किञ्च राजगुरूणां शिष्येण अमेरिकास्थ— येलविश्वविद्यालयप्राध्यापकमहोदयेन पं० श्रीरविदत्तदाधिमथेन ववतृणाञ्च मध्ये-मध्ये विविधानि चित्राणि समुट्टङ्कितानि ।

निम्नस्तरीयशालासु ध्यानमधिकमावश्यकम्

गोंदियातः प्राप्तसमाचारानुसारेण गतदिवसेषु अन्ताराष्ट्रिययोगप्रचारकसंस्थाद्वारा समारब्धस्य सार्वजनीनविश्वविद्यालयस्योद्घाटनमाचरता केन्द्रीयशिक्षामन्त्रि—**श्रीत्रिगुणसेनमहोदयेन** प्रतिपादितं यत् 'अस्माकं बालकाः वस्तुतो भारतीया भवेयुः' इत्यतस्तेषु मातृभूमिं प्रति निस्वार्थस्य प्रेम्णस्तथा समर्पणभावनायाश्च जागरणमावश्यकमस्तीति ।

किञ्चाद्य सर्वतोमहत्कार्यमिदमस्ति यद् बालकेषु भारतीयत्वं सम्पादनीयमिति । एतदर्थञ्च पश्चात्यशिक्षाप्रणालीं तदुत्तमगुणांश्च भारतीयमूलसंस्कृत्या सह संमिश्र्या स्माभिरस्माकं शिक्षापद्धतिर्निर्मातव्यास्तीति । सहैवास्माभिः स्वविद्यालयानां भारतीयसंस्कृतेराधारेण पुनर्घटनञ्च कर्तव्यं भविष्यति । सम्प्रति च भारतशिक्षापद्धतौ उच्चशिक्षां प्रत्येवाधिकं ध्यानं दीयमानमास्ते । परिणामतोऽस्माकं शिक्षापद्धत्या आधारशिला सुदृढा नैव वर्तते । अतो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽस्माभिर्महाविद्यालयानामपेक्षया निम्नस्तरीय-शालाः प्रति समधिकं ध्यानं दातव्यं भविष्यतीति।

संस्कृताध्ययनस्य नवीना प्रणाली

मध्यप्रदेशस्य शासकीयास्वशासकीयासु च शिक्षणसंस्थासु संस्कृतशास्त्रीयशिक्षणस्य यः पाठ्यक्रम इदानीं यावत् प्रचलन्नासीत् तत्स्थानेऽधुना (१९६८-६९) वर्षेऽस्मिन्नेव प्रथमा-मध्यमा-शास्त्र्याचार्यपरीक्षाणां पाठ्यक्रमः प्रचलितो भविष्यति।

किञ्चेदानीं कोऽपि नवीनश्छात्रः संस्कृत-शास्त्रीयशिक्षाध्ययनार्थं प्रवेशं न प्राप्स्यति, परं यैश्छात्रैः प्रथमद्वितीयवर्षयोः शिक्षणं समाप्ति नीतं, ते सम्बद्धासु शिक्षणसंस्थासु अध्ययनस्य सौविध्यं लप्स्यन्ते।

ग्वालियरस्थस्य संस्कृतमहाविद्यालयस्य च पाठ्यक्रमे किमपि परिवर्तनं न सम्पत्स्यते। तथा च शास्त्रिपरीक्षाया आचार्यपरीक्षायाश्चाध्ययनं महाविद्यालयेषु, मध्यमाया उच्चशालासु, प्रथमायाश्चाध्ययनं माध्यमिकशालासु सम्पत्स्यते सदैव संस्कृतमाश्रित्य प्रचलन्त्यः प्राथमिकशाला अपि भविष्यन्ति। तथा च संस्कृतस्य कृते प्रोत्साहनं दातुं संस्कृतशिक्षकाणां वेतनमानेऽपि समुचितं संशोधनञ्चापि भविष्यतीति।

विदुषां वशम्वदो
दीनानाथत्रिवेदी मधुपः

मनोविनोदः—

भार्याभक्तः

एकदा एका माता स्वस्य सर्वान् बालकान् समाहूय अवदत् यत् 'हे बालकाः! सावधानतया यूयं शृणुत-मया निर्णय एष कृतो यदहं तस्मै बालकाय प्रति-सप्ताहं पारितोषिकं दास्यामि, यः सर्वतोऽधिकं मम आदेशस्य पालनं करिष्यति'—इति।

'तदा तु नास्माकं कृते कोऽपि लाभः' यतो हि पारितोषिकमिदं तु प्रति-सप्ताहं अस्माकं पितृमहोदया एव प्राप्स्यन्ति' इति तस्याः एकतमेन बालकेन सत्वरम् उत्तरं प्रायच्छत्—इति।

—मधुपः

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्व० श्रद्धेय-श्रीभवदत्तशर्ममैथिलाय तत्पुण्यतिथौ

* श्रद्धापुष्पोपहारः *

जयपत्तनराजगुरोर्मिथिलाभिजन-बुधचन्द्रदत्तकवेः—
वृन्दायामधिगम्य जनिं बाल्यं क्रीडापरं निन्ये ॥१॥

व्याकरणं दर्शनञ्च गिरिधरबुधवरात्पितुस्तथाधीत्य ।
भाषां प्रभोर्गृहीत्वा दृढतरपाण्डित्यमापदसौ ॥२॥

प्रौढं तत्पाण्डित्यं रुचिरां कवितां सभासु शृण्वन्तो ।
गुरवः श्रमसाफल्यं मत्वा गर्वोन्नता जाताः ॥३॥

विंशतिवर्षवयस्कः विधिना सावित्रीमुपयम्यासौ ।
गार्हस्थ्यसुखं स्वीयं द्रुतगत्या गमितवाँस्तरलम् ॥४॥

ताम्बूलारुणवदनं नीलोपनेत्रमनोहरे नयने ।
स्मेरास्यं सदसुत्कं प्रत्यक्षं भ्रातरं वन्दे ॥५॥

सङ्गीतनाट्यगीतानि तच्छिन्नमथ कन्दुकम् ।
कलाक्रीडनयोर्मध्ये प्राथम्यं भजते हि सः ॥६॥

मित्रगोष्ठ्यां सदैवायं प्राणभूत इवाभवत् ।
श्रद्धाभक्ति-समायुक्ताः सुहृदोप्यनुयायिनः ॥७॥

स्वतन्त्रे भारते जाते नष्टे प्रत्ने महीपतौ ।
क्षीणास्तदाश्रिता जातास्तथैवायं तदाभवत् ॥८॥

आदिवर्णसमायुक्तं शिक्षणं कृतवानसौ ।
अन्ते सुबोध-कालेजे श्रेष्ठश्छात्रप्रियोऽभवत् ॥९॥

तत्राध्यापकवर्गेषु विनयेन नयेन च ।
लोकप्रियत्वमासाद्य बहुवर्षाणि नीतवान् ॥१०॥

रुदतीं जननीं जायां विलपन्तीः सन्ततीः समा हित्वा ।
बन्धून् शोकनिमग्नान् ययौ सहसा सुरपति सदनम् ॥११॥

भवदनुजस्य
दुर्गादत्तशर्ममैथिलस्य
प्रा० म० सं० कालेजः, जयपुरम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गणितस्य चमत्कारः

(साप्ताहिक–जनगणपत्रतोऽनूदितः)

अनुवादकः–वैद्यश्रीरतनलालमिश्रः, जोध्यासी, जि० नागोरः

गणिते स्वीयं अद्भुतं चमत्कारं प्रकटयितुं विज्ञेन पृच्छकः स्वमनस्येवेत्थं गणितक्रियां कर्तुमादेष्टव्य इति ।

पूर्वं भवान् स्वं मित्रं कथयतु यदहं भवतो मनसि विचारितां संख्यां प्रकटयितुं शक्नोमि एतच्छ्रुत्वा भावत्को मित्रं साश्चर्यं भविष्यति । अधस्तात् तत्क्रिया इत्थं प्रदर्श्यते ।

भवान् स्वं मित्रं कथयतु – कापि संख्या मनसि चिन्तनीया । चिन्तितायां संख्यायां एकादशमिता संख्या योजनीया । ततस्तां संख्यां त्रिगुणितां कृत्वा अष्टादशसंख्या च योक्तव्या । पुनस्तां संख्यां द्विगुणीकृत्य त्रिसंख्यया विभजेत् । पुनरधुना तां पञ्चगुणितां विधाय तस्यां पञ्चमिता सङ्ख्या योज्या । ततस्तं पृच्छेत् सर्वमवशिष्टं योगफलं कियदस्ति ?

भवांस्तद्योगफलस्यान्तिमं अङ्कं अपसार्य शेषसङ्ख्यातः सप्तदशमितां सङ्ख्यां हीनां कुर्य्यात् । अन्ते च यत् शिष्यते सैव भवतो मित्रेण स्वमनसि चिन्तिता संख्या ।

उदाहरणार्थं गणितस्य प्रक्रियाधो निर्दिश्यते । यथा भवतो मित्रेण द्वादशमिता सङ्ख्या मनसि निश्चिता । आधुनान्ते चिन्तिता सङ्ख्या एवं निस्सरिष्यतीति—

गणितप्रकारः—

१२+११=२३
२३×३=६९
६९+१८=८७
८७×२=१७४
१७४÷३=५८
५८×५=२९०
२९०+५=२९५

सङ्ख्या २९५ तोऽन्तिमाङ्कं अपसार्य शेषाङ्क २९ तः १७ मिता सङ्ख्या हीना कार्या । शेषे १२ मिता संख्या अवशिष्टा । या भवतो मित्रेण प्राक् चिन्तितेति शम् ।

गिरने से पहले उनकी रक्षा करें

दाँतों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय ! इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तैल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके दाँत [illegible] तथा [illegible] और आपके [illegible] बलवृत रहेंगे।

इलाज से बचाव बेहतर है !

आयुर्वेद [illegible] अजमेर [illegible]

गाय

छाप

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्षा-विलासः

श्रीराधाकृष्णशर्म सा० आचार्यः, म० सं० कालेजः, जयपुरम्

(१)

प्रचण्डभानुभानुभिः प्रतप्तजीवधारिणो महीरुहा महीधराश्च मोदगानमाजगुः ।
विलोक्य जीवनप्रदां मनोज्ञप्रांवृषं क्षितौ चराचरा महासुखार्णवे निमज्य हर्षिताः ॥

(२)

शिखावलैः प्रनृत्यते वनेषु यत्र तत्र वै, कलस्वनं प्रकुर्वते मुदाऽण्डजाः पिकादयाः ।
सुहारसन्निभा सुशोभते बलाकसंततिः, विलोक्य जीवनप्रदां मनोज्ञ प्रावृषक्षितौ ॥

(३)

वर्षाकाले सजलजलदैराततं ध्वान्तमभ्रे, विद्योतन्ते चपलचपला गर्जितं घोरमास्ते ।
सर्वाभूमिर्हरितहरितैः शाद्वलैरावृताद्भि मार्गाः क्लिन्ना नयनसुभगैर्लोहिताश्चेन्द्रगोपैः ॥

(४)

वने शकुन्ताः पशवश्चमत्ताः, रम्याः द्रुमान्ताः हरिता वनान्ताः ।
प्रसन्नचित्ता नवकान्तकान्ताः, सुजीवनं प्राप्य समेऽपि तृप्ताः ॥

(५)

उन्मार्गमासाद्य गतत्रपा इव, श्रेष्ठापगा जारनदं प्रयान्ति ।
तद् गर्ह्यकृत्यं हि विलोक्य सिन्धू रोषानलक्षारमना बभूव ॥

(६)

झीर्यन्ति कुत्रापि च निर्झराः कलं. गायन्ति वेदानिव दर्दुरा द्विजाः ।
क्षेत्राणि भान्तीह मनोज्ञसस्यैः, विभाति सर्वत्र हि सर्वतोमुखम् ॥

(७)

वर्षाविलासेन शिलीन्ध्रपुष्पैः पृथ्वी नवा पुष्पवती बभूव ।
धृत्वाऽथ गर्भं प्रकृतिस्वरूपं प्रभूतसस्यादिफलान्यसूत ॥

(८)

ग्रामेषु मार्गे शिशवः प्रमुग्धाः उच्चालयन्त्यम्बुकणान् हसन्तः ।
शिलीन्ध्ररम्यान् सिकतागृहान् वै, कृत्वा प्रक्रीडन्ति समं वयस्यैः ॥

(९)

हिन्दोलमारुह्य नवाङ्गनाः क्वचित् सार्धं सखीभिर्मदनं मुदा जगुः ।
क्वचिद् वनक्रोडमुपेत्य कान्ताः, खेलन्ति कान्तैर्नवकामकेलिम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालोपयोगी लघुकथा

श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

वैन्यं पृथुं हैहयमर्जुनं च
शाकुन्तलेयं भरतं नलं च ।
रामं च यो वै स्मरति प्रभाते
तस्यार्थलाभो विजयश्च हस्ते ॥

वैन्यं, पृथुम्, हैहयमर्जुनम् शाकुन्तलेयं भरतम्, नलम् रामम् च यो वै प्रभाते स्मरति तस्यार्थलाभो हस्ते च विजयः (अस्ति)।

वैन्यो पृथुः-पृथुः संसारस्य आद्यः राजा मान्यते । वेनस्य राज्ञो वंशे एषः समुद्भूत आसीत् अतः अयं वैन्यः-इति कथ्यते । पृथुराजेन एव शतं अश्वमेधयज्ञाः कृताः अन्तिमे यज्ञे इन्द्रेण विघ्नः कृतः किन्तु पृथुना स्वपराक्रमेण ते सर्वे विघ्नाः विनाशिताः। अस्यां पृथिव्यां विभिन्नप्रकारकाणां धन्यानां निर्माणं कृत्वा तथा तस्यां अन्तर्गतानि यानि रत्नानि विद्यमानानि सन्ति तेषां आविष्कारं कृत्वा पृथुना इयं पृथ्वी वैभवसम्पन्ना, सुविभक्ता, पुरपत्तनशालिनी कृता ।

पृथुना प्रविभक्ता च शोभिता च वसुन्धरा ।
शस्यरत्नवती स्फीता पुरपत्तनशालिनी ॥

अतः एषा पृथ्वी पृथोः कन्या इति मन्यते । पुराणेषु पृथोः महिमा एतादृशो वर्णितोऽस्ति यत् यदा स पृथुनृपतिः सम्राडभूत् तदा तस्मै कुवेरः सुवर्णसिंहासनं, वायुदेवः रत्नमंडितं छत्रम्, इन्द्रः सुवर्णमुकुटं, यमः दण्डम्, विष्णुः चक्रम्, रुद्रः खड्गम्, विश्वकर्मा रथम्, सागरश्च शङ्खम् समर्पितवान् ।

वैन्य पृथुको हैयय अर्जुन को शकुन्ता के पुत्र भरत को नल को राम को जो प्रातःकाल स्मरण करता हैं उसको धनलाभ होता है और उसके हाथ में सदा विजय रहती है।

वैन्यपृथुः-पृथु संसार का आद्य राजा माना जाता है । वेन राजा के वंश में यह उत्पन्न हुआ था । इसलिये वह वैन्य कहलाता है । पृथु राजा ने एक सौ अश्वमेध यज्ञ किये थे ! अन्तिम यज्ञ में इन्द्र ने विघ्न किया किन्तु पृथु ने अपने पराक्रम से वे सारे विघ्न नष्ट कर दिये । इस पृथ्वी पर अन्यान्य प्रकार के धान्यों का निर्माण करके तथा उसके अन्दर रहने वाले रत्न विद्यमान है उनका आविष्कार करके पृथु ने इस पृथ्वी को वैभव सम्पन्न सुविभक्त तथा पुरी नगरियोंवाली बनाया था इसलिये यह पृथ्वी-पृथु की कन्या मानी जाती हैं । पुराणो में पृथु की महिमा ऐसी वर्णन है कि जब यह पृथु राजा सम्राट् हुआ तो उसको कुबेर ने स्वर्णसिंहासन, वायुदेव ने रत्नमंडित छत्र, इन्द्र ने स्वर्णमुकुट, यम ने दण्ड, विष्णुने चक्र, रुद्र ने खड्ग, विश्वकर्मा ने रथ और सागर ने शंख समर्पित किया ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हैहयार्जुनः (सहस्रार्जुनः)–सहस्रार्जुनः महिष्मत्याः अधिपतिरासीत् । आहिमालयात् नर्मदापर्यन्तं सहस्रार्जुनस्य साम्राज्यस्य विस्तार आसीत् । स्वपराक्रमेण सहस्रार्जुनेन रावणोऽपि परास्तः कृतः आसीत् । पुराणानुसारं सहस्रार्जुनस्य जन्म सहस्राजिद्वंशेऽभूत् । अस्य पितुर्नाम कृतवीर्यः आसीत् । जन्मत एव अस्य हस्तौ नास्ताम् । भगवतः दत्तात्रेयस्य उपासनया तेन सहस्रं हस्ताः लब्धाः । अतः अर्जुनः सहस्रार्जुन इति नाम्ना प्रख्यातोऽभूत् ।

बाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः ।
सहस्रबाहुर्वाद्येन ताण्डवेऽतोषयन्मृडम् ॥

श्रीमद्भागवते १०।६२।२

हैहय अर्जुन (सहस्रार्जुन) सहस्रार्जुन महिष्मती का राजा था । हिमालय से लेकर नर्मदा पर्यन्त सहस्रार्जुन के साम्राज्य का विस्तार था । अपने पराक्रम से सहस्रार्जुन ने रावण को भी परास्त कियां था । पुराणों के अनुसार सहस्रार्जुन का जन्म सहस्राजित् वंश में हुआ था । इसके पिता का नाम कृतवीर्य था । जन्म से ही इसके हाथ नहीं थे । भगवान् दत्तात्रेय की उपासना से उसने हजार हाथ प्राप्त किये इसलिये अर्जुन सहस्रार्जुन नाम से प्रख्यात था ।

शाकुन्तलेयो भरतः-भरतो हस्तिनापुरस्य सम्राजो दुष्यन्तस्य विश्वामित्रस्य ऋषेश्च कन्यायाः शकुन्तलायाः पुत्र आसीत् महाकविना कालिदासेन निजे विश्वविख्याते अभिज्ञानशाकुन्तलरु नाटके भरतस्य बाल्यावस्थाया वर्णनं कृतम् यत् एषः वीरबालकः सिंहस्य मुखं उद्घाट्य तस्य दन्तान् गणयति स्म । भरतेन गङ्गायाः स्तटे पञ्चपञ्चाशतम् यमुनायाश्च तटे त्रयोविंशतिसंख्यकाः यज्ञाः कृता आसन् । अनेन दिग्विजयं कृत्वा किरातहूणान् यवनान्, पौण्ड्रान्, कङ्कान्, शकान्, म्लेच्छान् च संग्रामे हत्वा अस्य भारतवर्षस्य संरक्षणं कृतम् ।

किरातहूणान् यवनान्
पौन्ड्रान् कङ्कान् खशाञ्छकान् ।
अब्रह्मण्यनृपांश्चाहन्
म्लेच्छान् दिग्विजयेऽखिलान् ॥

शकुन्तला का भरत–भरत हस्तिनापुर के सम्राट् दुष्यन्त का, विश्वामित्र ऋषि की कन्या शकुन्तला का, पुत्र था । महाकवि कालिदास ने अपने विश्वविख्यात अभिज्ञान शाकुन्तल नाटक में भरत की बाल्यावस्था का वर्णन किया है कि यह वीरबालक सिंह के मुखको फाडकर उसके दांतों को गिनता था । भरत ने गंगा के तटपर पचपन, यमुना के तटपर तेवीस यज्ञ किए थे । इसने दिग्विजय करके किरात हूण, यवन, कंक, शक और म्लेच्छों को संग्राम में हराकर इस भारतवर्ष की रक्षा की थी ।

नलः–पुरा निषधाधिपतिश्चन्द्रवंशीयो नलो नाम राजा आसीत् । हंसमुखात् विदर्भेश्वरस्य भीमराजस्य कन्यां दमयन्तीं त्रिभूवनैकसुन्दरीमाकर्ण्य पुनस्तां स्वयंवरविधिना उपयेमे ।

नलः–पूर्वकाल में निषधाधिपति चन्द्रवंशीय नल नाम का राजा था । हंस के मुख से भीमराज की कन्या दमयन्ती को त्रिभुवन में एक अद्वितीय सुन्दरी सुनकर स्वयंवर की

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वभ्रात्रा पुष्करेण सह स द्यूतक्रीड़नात् सर्वस्वमहारयत्। ततः स राज्यच्युतो दमयन्त्या सह वनं गतवान्। अथ कल्यावेशितचित्तोऽयं नलः सुप्तां दमयन्तीं निष्ठुरवत् परित्यज्य पलायाञ्चक्रे। दमयन्ती तु प्रबुद्धच बहु विलप्य च पथिकसार्थवाहेन सह मातामहीगृहं गतवती। नानाविधक्लेशेभ्यः शीर्णदेहा सा मातृमह्यापि अविज्ञाता तद्भवने तस्थौ। अथ दमयन्तीपिता भीमनृपतिर्दममन्त्या अन्वेषणाय दूतान् नियोजयामास। दूतास्तु चिह्नविशेषैर्दमयन्तीं परिज्ञाय भीमाय न्यवेदयन्। भीमस्तु तां स्वगृहमानयत्।

विधि से उनके साथ विवाह किया। अपने भाई पुष्कर के साथ द्यूतक्रीडा में वह नल सर्वस्व हार गया। उसके बाद वह राज्य च्युत होकर दमयन्ती के साथ बन में गया। इसके बाद कलि के द्वारा आवेशित यह नल सोती हुई दमयन्ती को छोड़ कर भाग गया। दमयन्ती तो जगकर बहुत विलाप करके यात्री के साथ नानी के यहां गई। अनेक प्रकार के क्लेशों से दुर्बल देहवाली वह अपनी नानी के द्वारा भी न पहचानी हुई उस भवन में ठहरी। इसके पश्चात् दमयन्ती को ढूंढने के लिये भीमराजा ने दूतों को भेजा। दूतों ने चिह्नों से दमयन्ती को पहचान कर भीम को बताया। भीम उसे अपने यहाँ ले आए।

नलस्तु दमयन्तीं परित्यज्य गच्छन् दावानलमध्यगतं करकोटकं नागं विपद उज्जहार। कर्कोटकस्तु नलं प्रत्युपकर्तुमिच्छन् शरीरस्थमस्य कलिं दृष्ट्वा कलिमेव भृशं सन्तापयामास। ततोऽसौ ऋतुपर्णस्य सारथ्ये नियुक्त आसीत्। अथ गच्छति काले दमयन्ती पितृगेहस्था नलान्वेषणाय ब्राह्मणान् संप्रेष्य कथञ्चित् ऋतुपर्णसारथिं नलत्वेनावगम्य पुनः स्वयम्बरमिषेण ससारथिं ऋतुपर्णं पितृवेश्मनि आनयामास। तत्र दमयन्ती पाकादिकौशलेन ऋतुपर्णसारथिं नलं विज्ञाय स्वसमीपमानयामास। अथ कलिपरित्यक्तेन नलेन स्वसौन्दर्ये गृहीते भैम्या सह मेलनं संजातम्। ततोऽयं निषधं स्वदेशं आगम्य भ्रातरं पुष्करं पुनर्द्यूताय आहूय पराजित्य च तं पुनर्लब्धराज्यो दमयन्त्या सहस सुखमुवास।

नल ने तो दमयन्ती को छोड़कर जाते हुए दावानल के बीच में फसे कर्कोटक नाग को विपत्ति से बचाया। कर्कोटक ने नल का प्रत्युपकार करने की इच्छा से इसके शरीर में बैठे हुए कलियुग को देखकर उसको अत्यधिक सन्ताप दिया। इसके बाद वह ऋतुपर्ण के सारथि नियुक्त हुए। इसके बाद समय जाने पर दमयन्ती पिता के घर पर से नल को ढूँढने के लिए ब्राह्मणों को भेजकर किसी तरह ऋतुपर्ण के सारथी को नल समझकर फिर से स्वयंबर के बहाने से सारथी सहित ऋतुपर्ण को उसके पिता के घर पर ले आये। वहाँ दमयन्ती ने भोजनादि के कौशल से ऋतुपर्ण के सारथी को नल जानकर अपने यहां ले आई। उसके बाद कलि के छोड़ने पर नल ने अपने सौंदर्य प्राप्त किया और दमयन्ती के साथ उसका मेल हो गया। इसके बाद यह (नल) अपने देश निषध में आकर भाई पुष्कर को द्यूत हेतु बुलाकर और उसे पराजित करके फिर से राज्य प्राप्त करके सुख से रहने लगे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोक भविष्य निधि योजना

में शामिल होकर
अपने भविष्य के लिये बचत कीजिये !

इस योजना की स्थापना भारत सरकार ने की है। इसके लिये जमा की रकमें स्टेट बैंक आफ इण्डिया की शाखाओं तथा उसके सहायक बैंकों में स्वीकार की जाती हैं।

रकम जमा करने का तरीका

आप कभी भी और कितनी ही रकम अपने फण्ड में जमा कर सकते हैं, लेकिन आपकी रकम ५ के गुणितों में होनी चाहिये। जमा करने की किस्त भी जितनी आप चाहें बना सकते हैं, लेकिन वह महीने में एक बार से ज्यादा नहीं होनी चाहिये। फण्ड में आप की रकम १०० रु० वार्षिक से कम और १५,००० रु० वार्षिक से ज्यादा नहीं होनी चाहिये। आपकी जमा-रकमों पर ४.८ प्रतिशत के हिसाब से लाभांश दिया जायेगा।

कर-छूटें

जमा की रकमें कर-योग्य आमदनी में नहीं जोड़ी जायेंगी और यह छूट उसी हद तक दी जायेगी, जितना कि आयकर कानून में इसकी व्यवस्था है। ब्याज की रकम पर आयकर नहीं लगेगा और बकाया जमा रकम पर कोई सम्पत्ति कर भी नहीं लगेगा।

रुपये निकालना व ऋण

पूरी रकम १५ वर्ष बाद निकाली जा सकती है। जमाकर्ता की मृत्यु हो जाने की दशा में इस अवधि से पूर्व ही पूरी रकम उसके कानूनी उत्तराधिकारी को सौंप दी जाती है। धन राशि का कुछ भाग निकालने तथा सीमाओं के अन्दर ऋण प्राप्त करने की सुविधायें दी जाती हैं।

कुर्की से सुरक्षा

कोई भी न्यायालय आपकी जमा रकम को कुर्क करने का आदेश नहीं दे सकता।

पेशेवर लोग, जैसे डाक्टर, वकील, अभिनेता, व्यापारी यहां तक कि अवकाश प्राप्त व्यक्ति भी अपनी स्वेच्छा से इस भविष्य निधि योजना के जरिये बचत कर सकते हैं। उन्हें भी कर-छूटों की सभी सुविधायें दी जायेंगी।

अधिक जानकारी के लिये स्टेट बैंक आफ इण्डिया और उसके सहायक बैंकों से सम्पर्क कीजिये।

लोक भविष्य निधि योजना

जनता के लिये एक वरदान है।

Corp 68/185

वित्त मंत्रालय, भारत सरकार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीरामः—आदिकाव्यस्य रामायणसद्ग्रन्थस्य नायको कोटि-कोटिहिन्दूनाम् आराध्यदेवो भारतीयसंस्कृतेर्मर्यादापुरुषोत्तमः सर्वश्रेष्ठो राजर्षिः युद्धवीरो दानवीरो दयावीरो धर्मवीरो महापुरुषः श्रीराम आसीत् । पितृवचनं परिपालयता तेन चतुर्दशवर्षपर्यन्तं वनवासजीवनं व्यतीतमासीत् । स रावणसदृशस्य त्रैलोक्यकण्टकस्य विध्वंसं कृत्वा समस्तं ससारमातङ्कात् विमुक्तं कृतवान् । 'रामराज्य' इति शब्दोऽस्माकं सर्वासु प्रादेशिकभाषासु आदर्शराज्यस्य पर्यायोऽस्ति । श्रीरामस्य अद्भुतेन रम्येण चरित्रेण भारतस्य प्रत्येकं व्यक्तिमात्रं सुपरिचितमस्ति । अतः अस्मिन् संक्षिप्ते पुस्तके तस्य विनिवेदनस्य विस्तारो न कृतः ।

श्रीरामः—आदि काव्य रामायण सद्ग्रन्थ के नायक कोटि-कोटि हिन्दुओं के आराध्यदेव भारतीयसंस्कृति के मर्यादा पुरुषोत्तम सर्वश्रेष्ठ राजर्षि, कर्मवीर, दानवीर, दयावीर, धर्मवीर, महापुरुष श्रीराम थे । पिता के वचन को पालन करते हुए उन्होंने १४ वर्ष पर्यन्त वनवास जीवन व्यतीत किया था। उन्होंने रावण जैसे त्रिलोकी के कण्टक का नाश करके समस्त संसार को आतंक से मुक्त किया था । "रामराज्य" यह शब्द हमारी सभी प्रादेशिक भाषाओं में आदर्श राज्य का पर्याय है। श्रीराम के अद्भुत् रम्य चरित्र से भारत का प्रत्येक व्यक्ति सुपरिचित है। अतः इस संक्षिप्त पुस्तक में उनके विशेष विवरण का विस्तार नहीं किया है।

आप 'भारती' के लिए क्या कर सकते हैं

१. ७) रु० भेजकर ग्राहक बनिये ।

२. अपने परिचित मित्रों को सम्मानार्ह संरक्षक, विशिष्ट संरक्षक, साधारण संरक्षक, सन्मान्य सहायक, आजीवन सदस्य अथना स्थायी ग्राहक बनने को प्रेरित कीजिए।

३. अपनी सुन्दर व विद्वत्तापूर्ण रचनाएं 'भारती' में भेजिए ।

४. 'भारती' में अपने व्यवसाय के लिए विज्ञापन दीजिये व दूसरों को प्रेरित कीजिये ।

५. धन भेजकर भारती को स्वावलम्बी बनने में सहायता कीजिये ।

६. 'भारती' के अभिकर्त्ता (प्रचारक) बनिए ।

७. 'भारती' की कमियाँ तथा सुधार के लिए हमें समय समय पर आपकी बहुमूल्य सम्मतियों से अवगत कराते रहिए।

८. आपके नगर के विद्वानों को 'भारती' में लेख सामग्री भेजने को प्रोत्साहित कीजिए। हमें विश्वास है कि श्रीमान् एक अथवा अनेक रीतियों से 'भारती' की सहायता के लिये अग्रसर होते रहेंगे ।

विनीत—**गिरिराज शर्मा, प्रबन्ध सम्पादक**

भारती भवन—गोपालजी का रास्ता, जयपुर (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP.6
"Licenced to Post.
Without Prepayment"

सूक्ति-सुधा

उपकारमुद्दिश्य

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

येन श्रीपरमेशस्य
सामीप्यं लभ्यते स वैः ।
उपकार इति ख्यातः
सर्वलोकहितावहः ॥१॥

जिस कर्म के द्वारा श्रीपरमेश्वर का सामीप्य प्राप्त हो जाता है उस क्रिया (कर्म) को उपकार कहते हैं। वह सभी लोकों का हितकर है। ॥१॥

यस्योपकारं कुरुते
स हि तस्य समीपगः ।
भवत्येवेति युक्तैवो-
पकारस्य निरुक्तिका ॥२॥

जिसका जो उपकार करता है वह उसके समीप ही हो जाता है। यह उपकार की निरुक्ति उचित ही है जैसे 'उप समीपं करोति कारयति वा स उपकारः'। जिससे सामीप्य प्राप्त हो अथवा जो समीप प्राप्त कर दे करा देवे वह उपकार है। ॥२॥

उपकारो हि सर्वेषां
प्राणिनां वशकारकः ।
उपकारपरैर्भाव्यं
तस्माल्लोकाश्रयैर्जनैः ॥३॥

उपकार सभी प्राणधारियों का वशीकरण भी है। इस कारण लोकाश्रयवाले जनों को (संसारियों को) उपकार परायण होना ही चाहिये। ॥३॥

उपकारस्योपकारं
वदन्ति प्रत्युपक्रियाम् ।
सा नेष्टव्या जातुविज्ञै-
स्तदर्थी दुःखभाजनम् ॥४॥

उपकार का भी जो उपकार (बदला) उसे प्रत्युपकार कहते हैं उसे विज्ञ (विद्वान्) लोक नहीं चाहते हैं क्यों कि प्रत्युपकार चाहने वाला दुःखी होजाता है। ॥४॥

तस्मादुपकृतिः साध्या
न साध्या प्रत्युपक्रिया ।
उपकारपरा लोकाः
परत्रेह च यान्ति शम् ॥५॥

इसलिए उपकार की साधना ही करनी चाहिये प्रत्युपकार साधना कभी नहीं करनी चाहिये। उपकार करने वाले लोगों को इस लोक और परलोक में भी सुख प्राप्त होता है ॥५

प्रकाशकः—जयबहादुरसिंह पता: भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष: ७५४९६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रि० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

संस्कृतमासिकस्य

4-1-69
पुस्तकालय
गुरुकुल कांगड़ी विश्वविद्यालय
हरिद्वार

स्वतन्त्रे गणतन्त्रेऽस्मिन् भारते प्रतिभारते ।
भगवान् गणनाथोऽयं गुणिगण्यः प्रसीदतात् ॥

१८
११

वार्षिकमूल्यं सप्तमुद्राः ७.
एकप्रतिः सप्ततिपणाः ०.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय-सूची

क्र. सं.	लेखाः	लेखकाः	पृ०	क्र, सं.	लेखाः	लेखकाः	पृ०
१.	मङ्गलम्	श्रीहरिशास्त्री	३९५	८.	परमाणुवादे०	श्रीयमुनाधरशास्त्रिणः	४१२
२.	भवभूतेः कारुण्यं	श्रीमेवारामकटारा	३९६	९.	समाचाराः	श्रीगणेशरामशर्मा	
३.	समासविमर्शः	श्रीविश्वनाथमिश्राः	३९७	१०.	श्रीशिवराज्यो०	श्रीधरभा.वर्णेकराः	४१९
४.	मनोविनोदः	मधुपः	४०२	११.	सम्पादकीयम्	मधुपः	४२३
५	उग्रता०	श्रीगणेशरामशर्मा	४०३	१२.	भातु भारतम्	श्रीरामस्रूपशास्त्रिणः	४२५
६.	वर्षा-चर्या	श्राबद्रीप्रसादः	४०७	१३.	लघुकथा	श्रीगिरिराजशास्त्री	४२६
७.	व्याकरण०	श्रीदुःखिश्यामशास्त्री	४०९	१४.	सूक्तिसुधा	श्रीहरिशास्त्री	४३१

आज की आवश्यकता

राजस्थान के मुख्य मंत्री श्रीमोहनलाल सुखाड़िया का उद्बोधन

उत्पादन

हमें उत्पादन में अधिक से अधिक वृद्धि के कार्य को एक राष्ट्रीय कर्तव्य मानकर खेतों, कारखानों व खदानों में कार्य करना है जिससे कि हम अपनी अर्थ-व्यवस्था को मजबूत बना सकें और हमें अपनी आवश्यकताओं की वस्तुओं के लिए बाहरी सहायता पर निर्भर नहीं रहना पड़े। देश के हर नागरिक को, चाहे वह किसी भी कार्य में लगा हो, यह मानकर कार्य करना चाहिये कि वह देश की शक्ति और समृद्धि बढाने के लिए अपना योगदान दे रहा है।

परिवार नियोजन

परिवार नियोजन का उद्देश्य परिवार, समाज व देश के कल्याण के लिए परिवार को सीमित करना है। हमें उतने ही बच्चे पैदा करने चाहिये जिनका भरण-पोषण माता-पिता भली-भांति कर सकें, उन्हें अच्छी शिक्षा दे सकें और अच्छे वस्त्र तथा स्वास्थ्यप्रद भोजन उनके लिए उपलब्ध कर सकें। यदि हमने ऐसा किया तो हम हर परिवार को समाज को एक समृद्ध और सुखी इकाई बना सकेंगे।

अल्प बचत

हमारे साधनों में अल्प बचत का विशेष महत्त्व है। यह न केवल पारिवारिक जीवन में बचत को आदत डालती है बल्कि इससे योजना की क्रियान्विति हेतु आवश्यक धनराशि भी प्राप्त होती है। इस वर्ष अल्प बचत योजना के अन्तर्गत हमें अधिक से अधिक धनराशि एकत्रित करनी होगी। इस लक्ष्य की पूर्ति होने से राज्य को विकास कार्यों के लिए उपयुक्त धन प्राप्त होगा और हम विकास के क्रम को जारी रख सकेंगे।

राजस्थान सरकार द्वारा प्रसारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकः
आशुकवि-कविभूषण-
श्रीहरिशास्त्री

सहसम्पादकः
दीनानाथत्रिवेदी 'मधुपः'
साहित्यालङ्कारः

भारती

प्रबन्धसम्पादकः
सहसम्पादकश्च
गिरिराजशर्मा

भारती-भवनम्,
गोपालजी का रास्ता,
जयपुरम्

लेखैरुपष्टुता याऽऽस्ते भारतीव सितच्छदा
भारती भारतीयानां भासतां भवनेष्वलम्

वर्षम् १८ | भाद्रपदः, विक्रमाब्दः २०२५ (सितम्बरः, १९६८) | अङ्कः ११

मङ्गलम्

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

यस्या नाम-मनुर्जपन्नपि नरः श्रेयांसि भूयांस्यथो-
शत्रूणामुपरि द्रुतं च विजयं सम्प्राप्नुते निश्चितम् ॥
सैषा भक्तसुखावहा भगवती 'धू'' वीजयुग्मप्रिया ।
वृद्धा काकपताकिनी वितनुतां धूमावती मङ्गलम् ॥१॥

मासावतरणम्

वापीकूपसरोनदीनदमुखान्यापूरयन्वारिभिः ।
भूमिं धान्यसुसम्पदा रुचिरयन् संहर्षयन्कर्षकान् ॥
दूर्वाभिर्गणनायकं प्रतिपुरं ह्यभ्यर्चयन्सर्वतः ।
सोऽयं भाद्रपदः पुनर्वसुमतीं प्राप्तः सखे वीक्ष्यताम् ॥१॥

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—: भवभूतेः कारुण्यम् :—

वा. श्रीमेवारामकटारा, पङ्कः

संस्कृत-नाट्यशास्त्रे शृंगार-वीररसौ एव प्रमुखौ स्तः, परञ्च पाश्चात्य-साहित्येषु करुण एव प्रधानम्। महाकविभवभूतिरत्रोत्तररामचरिते करुणस्य प्राधान्यं प्रदर्शयति। संस्कृत-साहित्य-सागरसरस—सम्पूरितेष्वपि भवभूतिर्विभाति करुण-रस-क्षेत्रे भवभूतिरप्रतिमोऽस्ति। भवभूतेः करुणरसप्रसंगे—

"भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति।
एतत्कृत्य कारुण्ये किमन्यथा रोदिति ग्रावा॥"

गोवर्धनाचार्योऽपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्प्रति प्रेरयति।

भवभूतेरुत्तररामचरितन्तु करुणस्य प्रधानं नाटकमस्ति। करुणस्यापूर्वाभिव्यञ्जनोत्तरराम-चरिते वर्तते। नाट्य-शास्त्रोल्लङ्घनकारणेनात्र बहवः विद्वांसः विप्रलम्भशृंगारमपि वदन्ति। भवभूतिना प्राचीनरूढिमुपेक्ष्य नवादर्शः सृष्टस्तेन पूर्णतः करुणस्य व्यापकः प्रभावो जनितश्च।

सर्वे रसाः तस्यैव प्ररूपाः। सोऽकथयत्—

"एको रसः करुण एव निमित्तभेदाद्
भिन्नः पृथक्पृथगिवाश्रयते विवर्तान्।
आवर्तबुद्बुदतरंगमयान् विकारान्,
अंभो यथा सलिलमेव हि तत् समग्रम्"॥

सम्पूर्णोत्तररामचरितस्य सारोयम्।

नाटकारम्भे एव यदा जनकोऽगच्छत्तदा खिन्नचित्तः रामः जानक्यै सान्त्वनमदाच्चित्र-प्रदर्शन-काले दुःखानि संस्मृत्योभावपि परितोष-मनुभवतः। पंचवटीचित्रमपि दृष्ट्वा तौ वैकल्य-माप्नुतः। द्वितीयाङ्केऽपि, यदा रामः दण्डकारण्यं प्रविशति तदा ह्यतीतं सौख्यं संस्मृत्य सः व्यथितः भवति—

"चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः
कुतश्चित्संवेगाच्चलित इव शल्यस्य शकलः।
व्रणो रूढग्रन्थिः स्फुटति इव हृन्मर्मणि पुनः
घनीभूतः शोको विकलयति मां मूर्च्छयति च"

तृतीयाङ्कस्तु करुणस्यागाधसागरोऽस्ति। तीक्ष्णा गम्भीरा मार्मिकी शैली व्यञ्जिताऽस्मिन्नङ्के उत्करसस्य। भवभूतेरत्र करुणस्य मूर्तिरथवा शरीरिणी इति स्पष्टम्। चतुर्थाङ्के कौशल्या-जनकावतीतमवगत्य, सीता मृतेति ज्ञात्वा विलपतः। लवन्दृष्ट्वा स्वपुत्रीसीता-वपु-र्लाव-ण्यमनुभूय जनकः खिन्नतामायाति। पञ्चमाङ्के चन्द्रकेत्वादयो लवकुशाभ्यां सह युध्यन्तीदमप्यस्ति करुणापूर्णम्।

षष्ठे च रामः स्वपुत्रौ दृष्ट्वा सीताया आकृतिं लावण्यं गर्भालसां स्थितिञ्च स्मरति। तत्काले रामस्य करुणोक्तिर्हृदयं स्पृशति—

"चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः।
जगज्जीर्णारण्यं भवति च विकल्प व्युपरमे,
कुकूलानां राशौ तदनु हृदयं पच्यत इव"

सप्तमाङ्के सीतारामयोः पुनर्मिलनमस्ति परञ्च तन्मूले सीता-निर्वासन-दृश्यं रामं क्षुभित-वाष्पोत्पीडनिर्भरं कृत्वा मूर्च्छयति। तृतीयस्य चरमोत्कर्षोऽयम्। भवभूतेः करुणरसो महा-मार्मिकः गाम्भीर्ययुक्तश्च, स तु पुटपाक इव यस्यान्तः प्रज्ज्वलत्यन्तर्वेदना। हृदये शूलमिव प्रविशति सा वेदना यन्त्रणा च जायते। यथाहि—

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः॥

कविरन्तर्गूढ व्यथाधिक्यम्मुर्हुर्मुहुः प्रलापञ्च-चित्रयति यतः सः जानाति शोकङ्क्षयति हृदयभारमपाकरोति च रोदनम्। यथा हि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समासविमर्शः

श्रीविश्वनाथमिश्रः, श्रीशार्दुलसंस्कृतविद्यापीठः, बीकानेरः

अथेदानीं प्रस्तूयते समासविचारः। समासो हि निखिलशास्त्रोपयोगी। तच्च किमित्याकांक्षायामुच्यते—समसनं समासः। भावे घञ्। समसनं नाम संक्षेपीकरणम्। संक्षेपीकरणञ्च अनेकेषां पदानामेकीभवनम्। तच्च-स्वाव्यवहितोत्तरविभक्तिमपाकृत्य परस्परसम्मेलनरूपम्।

एवञ्च यत्रानेकानि पदानि स्वप्रकृतिकविभक्तिमपाकृत्य परस्परं सम्मिलितानि विशिष्टार्थबोधकानि स्युस्तत्र समास इति व्यवहारः। तेन "गवित्ययमाह" "घटो न" इत्यादौ न दोषः। उक्तस्थलद्वये न भवति विशिष्टार्थसम्प्रत्यः। परन्तु समासस्यैवंविधे लक्षणे क्रियमाणे सुबन्तस्थले दोषाभावेऽपि "पचतभृज्जता" "खादतमोदता" इत्यादौ तिङन्तपदानां समासे उक्तलक्षणस्यानागमनादव्याप्तिः स्यादिति समासाधिकारपठितसंज्ञावत्त्वं समासत्वमिति निर्दुष्टं तल्लक्षणं वेदितव्यम्। अधिकारस्थसमासशब्दस्य स्वरूपपरतया नान्योन्याश्रयोऽपि। एतेन सति समासज्ञाने तदधिकारपठितत्वं, तदधिकारपठितत्वज्ञाने च समासत्वमित्यन्योन्याश्रय इति वदन्तः पराकृता एव वेदनीयाः।

स च समासो मुख्यतया चतुर्विधः अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः द्वन्द्वश्च। तत्र कर्मधारयद्विगुनञुपपदसमासास्तत्पुरुषस्यावान्तरभेदाः।

कुत्रचिच्च—

सुपां सुपा तिङां नाम्ना धातुनाथ तिङां तिङा।
सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥

इत्युक्तिमनुसृत्य समासस्य षड्विधत्वं प्रतिपादितम्। परमेतत् समासभेदकं तत्त्वं नातीवोपयुक्तमव्यापकञ्चास्ते। यतो हि-कटप्रूः, "आयतस्तूः" इत्यत्र सुपां धातुना सह समाससिद्धये "क्विब्वचिप्रच्छयायतस्तु" इत्यादिवार्तिके धातुसुबन्तयोर्द्वन्द्वघटकतया निर्देशादाश्रीयते निपातनमिति गौरवात्। किञ्च मयूरव्यंसकादयश्च" इत्येकेनैव तत्पुरुषाधिकारस्थसूत्रेण

पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया। स तु विस्तरेण सूक्ष्मातिसूक्ष्मां मृदुतरान्तर्दशामुद्घाटयति। पूर्वानुभूतं दाम्पत्य-प्रेमापि रामं पीडयतीति—

"अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः।
सा हंसैः कृतकौकुका चिरमभूद् गोदावरीसैकते।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्यबद्धस्तथा,
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः॥"

पञ्चवटीप्रदेशस्य प्राकृतिक-रमणीयतां तत्कालिकवृत्तान्तञ्च स्मृत्वा रामस्य व्यथा कथन्नाविर्भविष्यति। तद्देशस्य पशवः सीतासाहचर्य-सम्बद्धा आसन्। तत्स्थले हि:-

करकमलवितीर्णैरम्बुनीवारशष्पैस्तरुशकुनिकुरंगान् मैथिली यानपुष्यत्।
भवति मम विकारस्तेषु दृष्टेषु कोऽपि
द्रव इव हृदयस्य प्रस्तरोद्भेदयोग्यः॥

अतस्तेन महाकविनोत्तररामचरिते करुणस्य मन्दाकिनी प्रवाहिता। मन्दाकिन्याअस्यान्धारायां सीतायाः परित्यागेन जन्यं मालिन्यन्दूरीभवति। भवभूतेः करुणरस-प्रभावेण जडानामपि चैतन्यं भवभूतेरभूद् गिरा, ग्रावाप्यरोदीत् पार्वत्या हसतः स्म स्तनावपि। सिद्धत्यतो यद् भवभूतिः करुणरसवर्णने सर्वानतिशेते महाकवीन्। उत्तररामचरितन्त्वस्य प्रमाणम्। केनाऽप्युक्तञ्चः—

"उत्तरे रामचरिते भवभूतिर्विशिष्यते।"

यतः "अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्वाहे सिद्धे "पिबतखादता" इत्यर्थं तिङां तिङेतिप्रविभागः, "जहिस्तम्भः" इत्यर्थश्च तिङां सुपेति प्रविभागः पृथक् २ करणीयो भवतीत्यतिगौरवम्। तस्मात् समासस्योपर्युक्तो विभागः एव साधीयान्।

तत्र किं नामाव्ययीभावत्वादिकमिति जिज्ञासायां केचित्—पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः, उभयपदार्थप्रधानो द्वन्द्वः। तत्र प्राधान्यञ्च-तत्तत्समासोपस्थितीयमुख्यविशेष्यताश्रयत्वरूपम्, क्रियानिरूपितान्वयितावच्छेदकत्वरूपञ्च। "राजपुरुषः" इति तत्पुरुषे राजपदार्थनिष्ठप्रकारतानिरूपितविशेष्यतायाः पुरुषे सत्वात् तस्यैव क्रियान्वयाच्च वर्तते तत्र प्राधान्यम्। बहुव्रीहौ तु इतरपदार्थनिष्ठविशेष्यतानिरूपितप्रकारतायाः पीताम्बरपदघटके प्रत्येकं पदे वर्तमानतया भवत्येव समन्वयः। 'ईशकृष्णौ' इत्यादुवभयपदार्थस्य दर्शनादिक्रियान्वयित्वादुभयोः प्राधान्यं स्पष्टमेव। किन्त्वेवमपि सन्ति भूयांसि तत्तत्समासोदाहरणानि यत्रैतल्लक्षणं न संघटते। यथा-उन्मत्ता गंगा यस्मिन् स उन्मत्तगंगो नाम देशः" इत्यत्रान्यपदार्थस्य प्राधान्यात् अव्ययीभावलक्षणस्यासंगतिः, बहुव्रीह्यापत्तिश्च। एवमेव पञ्चानां गंगानां समाहारः पञ्चगंगमित्यत्र समाहारद्विगुलक्षणातिव्याप्तिः पूर्वपदार्थप्राधान्याभावादव्ययीभावलक्षणासंगतिश्च। एवं तत्पुरुषोदाहरणे "अर्धं पिप्पल्याः" इत्यत्रार्धरूपपूर्वपदार्थस्य प्राधान्यात् तत्पुरुषत्वं न प्राप्नोति, प्राप्नोति चाव्ययीभावत्वम्। एवं "द्वित्रा" इत्यादावुभयपदार्थप्राधान्यात् द्वन्द्वो व्याप्नोति।

एवञ्च तत्पुरुषादीनामुपर्युक्तं लक्षणं सांकर्यमुपैतीति स्वीकृतमभियुक्तैस्तस्य प्रायिकत्वम्। अर्थात् तत्पुरुषादौ यस्य यस्य पदार्थस्य प्राधान्यमुक्तं तस्य प्रायः सार्वत्रिकत्वेऽपि कुत्रचित् विशेषादेशवशाज्जायतेऽन्यथात्वमपीति न दोषः। अस्याञ्च परिस्थितौ पाणिनिसंकेतसम्बन्धेनाव्ययीभावादिपदवत्वमेव अव्ययीभावादिकत्वमाकलनीयम्। तेन न कुत्राप्यव्याप्त्यतिव्याप्ती वा स्तः।

इदमत्र विमृश्यते—समाहारस्यास्तित्वम् अव्ययीभावे तत्पुरुषे "द्वन्द्वे" चेति त्रिषु समासेषु भवति। तद्यथा—अव्ययीभावे "नदीभिश्चेति सूत्रम्" समाहारे चायमिष्यते इति तदुपरिवार्तिकञ्च। पञ्चानां गंगानां समाहारः पञ्चगंगम् इति तदुदाहरणम्। तत्पुरुषे च "तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रैकदेशे समुल्लेखः समाहारस्य। अत्रापि दिक्सख्याप्रकृतिकसुबन्तं समाहारे वाच्ये सुबन्तेन सह समस्यते। उदाहरणञ्च पञ्चानां गवां समाहारः पञ्चगवमिति। द्वन्द्वश्चेतरेतरयोगे समाहारे च प्रसिद्ध एव। तत्र प्रथमन्तावद् विचार्यते-कोऽयं समाहारः? यदि समाहारशब्दः समाहरणं समाहारः इति भावसाधनं स्यात् तदा विप्रकीर्णानामेकत्र राशीकरणात्मकः समूहः समाहारशब्दार्थः स्यात्। एवञ्च पञ्चगवमित्यादौ समूहस्यैव प्रधानत्वात् द्रव्यस्य चाप्रधानत्वात् तस्यानयनादिकं न सम्पद्येत। किञ्च-समाहारशब्दस्य भावसाधनत्वेन समूहार्थकत्वे समूहार्थस्य च तद्धितार्थत्वेनैव गतार्थत्वे सिद्धे सूत्रे समाहारग्रहणमेव व्यर्थं स्यात्।

यदि च सम्-आङ् पूर्वात् हरतेः कर्मसाधने घञि समाह्रियते इति समाहारः स्वीक्रियते तदा पञ्च कुमार्यः समाहृताः "पञ्चकुमारि" इत्यत्र समाह्रियमाणस्य कुमार्याद्यर्थस्य प्राधान्यात् समासशास्त्रे च प्रथमानिर्देशाभावात् उपसर्जनसंज्ञा न स्यात्, ततश्च ह्रस्वो नैव स्यात्। एवञ्चोभयपक्षस्य दोषग्रस्तत्वात् कस्तावत् समाहारशब्दार्थः? इति चेत्-भावसाधनेन समूह एवेत्यवधेयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न च समाहारशब्दस्य भावसाधनत्वे तद्धितार्थेनैव सिद्धे सूत्रे तद्ग्रहणं व्यर्थमिति शंक्यम् ? तथा सति पञ्चानां कुमारीणां समूह इत्यर्थे समूहार्थकस्य तद्धितस्य प्रसक्तौ "द्विगोर्लुगनपत्ये" इति स्त्रीप्रत्ययस्यापि लुगापत्त्या पृथक् समाहारग्रहणस्यावश्यकत्वात् ।

एवञ्च सिद्धं समूहार्थके समाहारे समासत्रयम् । तत्र शंकते यदि समूह एव द्वन्द्वादिषु समासत्रयेषु समाहारवाच्यस्तदा को लाभः पृथक् २ समासत्रयकरणेनेति चेदत्रोच्यते—काकानाम्–उलूकानां च समाहारः काकोलूकम्" इति द्वन्द्वस्थलीयसमाहारतः पञ्चानां गवां समाहारः पञ्चगवम् इति तत्पुरुषस्थलीयसमाहारस्य वर्तते स्पष्टमेव वैभिन्न्यम् । यत्र तत्पुरुषे अभेदेन पञ्चत्वसंख्यानिष्ठप्रकारतानिरूपित-विशेष्यताश्रयाणां गवां समूहः प्रत्याय्यते समासेन तत्रैव-द्वन्द्वे परस्परं प्रकारताविशेष्यतानापन्नानां स्वातन्त्र्येण पृथगुपस्थितिविशिष्टानां विभिन्नपदार्थानां समाहारो द्योत्यते समासेन ।

न चैवं द्वन्द्वतत्पुरुषयोः समाहारे वैभिन्न्येऽपि पञ्चानां गंगानां समाहारः पञ्चगंगम्, इत्यव्ययीभावतः "पञ्चगवम्" "पञ्चकुमारि" इति तत्पुरुषस्य को भेदः ? किमिति च "नदीभिश्चेति सूत्रेण साध्येरन् अल्पीयांसि रूपाणि ? कथं न "तद्धितार्थोत्तरपदसमाहारे चेति" समाहार ग्रहणेनैव साधनीयं तत्कार्यमिति चेदत्र ब्रूमः—यदि च "पञ्चगंगम्" इत्यत्र समाहारद्विगुरभिप्रेयते तदा "अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः" इति नियमात् तस्य स्त्रीत्वे "द्विगोः" इति ङीपि "पञ्चगंगी" इति स्यात् । न चैतादृशः प्रयोगः कस्याप्यभिमत इति आवश्यकम् "नदीभिश्च" इति पृथक् सूत्रं विशेषविहितत्वात् तदप्राप्तियोगेऽचारितार्थ्यरूपापवादत्वाच्च प्रबाधतेऽत्र द्विगुम् । इयमेव व्यवस्था समासत्रये समाहारविषये वेदितव्या ।

इदानीं विचार्यते–समासे पदशक्त्यतिरिक्ता विशिष्टार्थबोधिका काचित् शक्तिरस्ति न वेति । तत्र तावन्नैयायिकमते पदमेव शक्तम् । अर्थविशेषनिरूपितशक्तिः पदे एव तिष्ठति न तु वाक्येऽपि । वाक्यञ्चानेकपदघटितात्मकम् । तच्च समासे सिद्धमेवेति न वर्तते समासे काचित् विशिष्टा शक्तिः, किन्तु समासघटकानि प्रत्येकं पदानि सन्ति सार्थकानि स्वार्थबोधसमर्थानि । न च "राजपुरुषः" इति समासतो राजसम्बन्धवान् पुरुषः, इति बोधस्य सर्वानुभवसिद्धतया समासे शक्तिमन्तरा कथं जायेत तस्य प्रत्ययः ? न च वर्ततेऽत्र सम्बन्धबोधिका विभक्तिरपि यया प्रत्याय्येत सम्बन्धः । तस्मादगत्या समुदायशक्तिरङ्गीकार्येति चेदत्र वदन्ति ते—पदार्थद्वयसंसर्गस्याकांक्षाभास्यत्वमिति नियमाभ्युपगमात् "राजपुरुषः" इत्यत्र सम्बन्धस्याकांक्षाभास्यत्वमेव भविष्यतीति न तदर्थं विशिष्टशक्तिकल्पनमावश्यकम् । तथा च स्वत्वसम्बन्धेन राजवान् पुरुषः" इत्येव तत्र बोधः इति न काप्यनुपपत्तिः ।

न च येषां मते संसर्गस्य प्रकारत्वं तेषां मते कथं निस्तारः स्यात् विना विशिष्टशक्तिस्वीकारादिति चेत् तत्रापि राजपदस्य राजसम्बन्धिनि लक्षणया तेन सह पुरुषस्याभेदान्वये सम्पन्ने सर्वथैवानुपपत्तेरभावः ।

एवं बहुव्रीहौ "चित्रगुः" इत्यादौ गोपदस्य गोस्वामिनि-लक्षणां कृत्वा गवि चित्राभेदान्वयेन चित्राभिन्ना या गौः तस्याः स्वामीति बोधः सुशकः । न च गोस्वामिनि लक्षणया तदैकदेशेन गोपदार्थेन सह कथं चित्रान्वयः ? एवञ्चेत् गोपदं चित्रगोस्वामिनि लाक्षणिकं चित्रापदञ्च तात्पर्यग्राहकमित्यभ्युपगमान्न दोषः । द्वन्द्वे तु प्रत्येकं पदार्थस्य स्वातन्त्र्येण भानं विभक्त्यर्थान्वयश्चानुभवसिद्ध एवेति नास्त्यावश्यकता तत्र लक्षणायाः । यत्र तु समानविभक्तिकपदानां कर्मधारयः क्रियते तत्र "नीलोत्पलम्" इत्यादौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संसर्गवादानुसारं जायते,.....अभेदसम्बन्धेन नीलविशिष्टमुत्पलमिति बोधः। अत्राभेदः आकांक्षाभास्यः। प्रकारतावादानुसारन्तु नीलाभिन्नमुत्पलमिति बोधस्तु कर्त्तुं न शक्यते, अभेदोपस्थापिकायाः विभक्तेरभावात्। न च समासस्थले लुप्तविभक्तेरनुसन्धानमभिमतम्। तस्मादत्रापि नये नीलपदार्थः अभेदेनाकांक्षाभास्येनोत्पलपदार्थे विशेषणम्।

यत्र चासमस्तानि प्रयुज्यन्तेऽनेकानि पदानि तत्र तद्घटितवाक्ये शक्तेरभावात् न भवति लक्षणा कुत्रापि, किन्तु तत्र "गभीरायां नद्यां घोषः" इत्यादौ नदीपदं गभीरनदीतीरे लाक्षणिकं, गभीरपदञ्च तत्रैवार्थे तात्पर्यग्राहकं भवति। एवं रीत्या सर्वत्रैव समासे विशिष्टशक्तिस्वीकारमन्तरापि कार्ये निर्वाहे किमर्थमङ्गीकार्यातिरिक्ता शक्तिः? तस्मात् समासघटकानि प्रत्येकं पदानि सार्थकानि। अयमजहत्स्वार्थवृत्तिपक्ष एव व्यपेक्षाशब्देनोच्यते। व्यपेक्षा च-स्वार्थपर्यवसायिनां पदानामाकांक्षादिवशात् परस्परमन्वयः। एवञ्च नैयायिकमतानुसारं समासघटकपदानां सार्थकत्वेनैवोपपत्तौ समासे न काप्यतिरिक्ता शक्तिरिति सिद्धम्। न चैवं "राजपुरुषः" इत्यत्र राजपदार्थस्य सार्थकतया तत्र वृत्यघटकपदार्थान्तरस्यान्वये "ऋद्धस्य राजपुरुषः" इति प्रयोगापत्तिरिति वाच्यम्? सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो नेति सिद्धान्ते जागरूके तथा वक्तुमशक्यत्वात्। न चैवम् "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति सूत्रे "सामान्याप्रयोगे" इति विशेषणोपादानं व्यर्थम्, "पुरुषो व्याघ्र इव शूरः" इत्यत्र पुरुषे शूरस्य विशेषणतया समासाप्राप्तेः सुतरां सिद्धत्वेन सामान्याप्रयोगे, इत्यस्यानर्थकत्वात्। तस्मात् विशेष्यस्य सापेक्षत्वेऽपि न सामर्थ्यविघातकमित्यवधार्यते। तेन भवत्येव राजपुरुषः सुन्दरः" इति प्रयोगः।

अत्र वैयाकरणाः—यथा पंकजशब्दे अवयवशक्त्यतिरिक्ता समुदायशक्तिः स्वीकृता तथैव "राजपुरुषः" इत्यादौ समासेऽपि अवयवशक्तितो भिन्ना समुदायशक्तिरङ्गीकार्या! सा च शक्तिः राजसम्बन्धविशिष्टपुरुषविषयकबोधजनिका। अत एवात्र विषये जहत्स्वार्थवृत्तिपक्ष एवाङ्गीक्रियते। एतत्पक्षानुसारं पदानि निरर्थकानि। सार्थकन्तु तत्समुदितं वाक्यमेव। अत एवात्र मते "राजपुरुषः" इत्यादौ राजपदार्थे "ऋद्धस्येति विशेषणान्वयवारणाय 'वृत्तस्य विशेषणयोगो नेति नियमोप्यनङ्गीकार्य एव भवति।

न चैवं समासघटकपदानां निरर्थकत्वे "महाबाहुः" सुपन्थाः इत्यादावात्वं न स्यात् अर्थवद्ग्रहणपरिभाषया सार्थके एव महत्शब्दे पथिन् शब्दे चात्वविधायकसूत्रत्य प्रवृत्तेरितिवाच्यम्? वृत्तेः प्राग्भाविसार्थकत्वमादायात्वस्य सूपपादनीयत्वात्।

वस्तुतस्तु समासे समुदायशक्तिस्वीकारेऽपि न युक्तोऽवयवशक्तिपरित्यागः। समासे अवयवशक्तिसहकृतसमुदायशक्तिपक्ष एव प्रतिभाति ज्यायान्। अत एव अवयवानामपि सार्थकतया पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः' इत्यादयः प्राचां प्रवादोऽपि संगच्छते। समासे विशिष्टशक्तिस्वीकारादेव जायते समासस्यार्थवत्वं ततः प्रातिपदिकत्वञ्च। किञ्च विशिष्टशक्तिस्वीकारमन्तरा "चित्रगुः" इत्यादौ स्वाम्याद्यर्थप्रत्ययो न यास्यति! न च लक्षणया तत्प्रतीतिर्वाच्या, गोपदस्य तत्स्वामिनि लक्षणायां चित्रापदार्थेन सहान्वये चित्राभिन्नगोस्वामीत्यर्थापत्तेः। चित्रापदस्य तत्र लक्षणायां चित्रस्वामिगौः इत्यर्थापत्तेश्च। समासतः चित्राभिन्ना गौरिति बोधानन्तरं तादृशो गोस्वामी लक्ष्यते इत्युच्यते चेत्, तत्र कस्य पदस्य लक्षणेति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनिगमकस्याभावः। यदि च प्रत्ययसन्निकृष्टत्वात् गोपदस्यैव लक्षणेति स्वीक्रियते तदा अषष्ठ्यर्थबहुव्रीहौ "प्राप्तोदको ग्रामः" इत्यादौ लक्षणायाः असम्भाव्यत्वमस्त्येव। तत्र हि "प्राप्तः" इत्यत्र कर्तरि क्तः। तथा च नामार्थयोरभेदान्वय इति व्युत्पत्त्या प्राप्तिकर्त्रभिन्नमुदकमिति बोधोत्तरं तत्सम्बन्धिग्रामे लक्षणायामपि न भवितुमर्हति "उदककर्तृकप्राप्तिकर्मग्राम इत्यभीष्टो बोधः।

अतोऽनेकविलष्टकल्पनामपहाय वरं समासेऽतिरिक्तशक्तिकल्पनमेव। एवञ्च पदनिष्ठोद्देश्यतानिरूपितविधेयताश्रयविधेः समासस्य समर्थाश्रितत्वात्, यत्रैकार्थीभावरूपं सामर्थ्यं तत्र समासः, यत्र तु व्यपेक्षारूपं सामर्थ्यं तत्र वाक्यमिति द्वैविध्यस्य सुतरामेव सिद्धिरिति, विभाषाधिकारस्यार्थत्वं सिद्ध्यति। नैयायिकरीत्या तु समासे व्यपेक्षावादस्यैव स्वीकरणमिति तन्नये वाक्यं सम्पादयितुं विभाषाधिकारस्यावश्यकत्वमिति गौरवमपि।

इदमत्रतत्त्वम्—नैयायिकाः समासे खलु केवलमजहत्स्वार्थवृत्तिपक्षमेवाङ्गीकुर्वते। अयमजहत्स्वार्थवृत्तिपक्ष एव तेषां व्यपेक्षावादः। वैयाकरणनये तु-समासे व्यपेक्षालक्षणमेकार्थीभावश्चेति द्विविधं सामर्थ्यमभिमतम्। तत्रैकार्थीभावे समासो भवति। "राजपुरुषः" इत्यादीनि च तदुदाहरणानि। अत्रैव एकार्थीभावे जहत्स्वार्थपक्षः, अजहत्स्वार्थपक्षश्चेति पक्षद्वयमभिमतम्। "राजपुरुषः" इत्यादौ प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन गृहीतान्यपि पदानि समुदायशक्त्या विशिष्टैकार्थप्रतिपादकानि भवन्तीति राजाद्यर्थस्य पदार्थैकदेशतया न भवति समासाघटकपदार्थस्य ऋद्धादेस्तत्रान्वयः। "देवदत्तस्य गुरुकुलम्" इत्यत्र तु यत्र कुले गुरुर्विशेषणं, गुरौ च गुरुत्वं विशेषणं तत्र गुरुत्वरूपे पदार्थैकदेशे देवदत्तस्यान्वयो गमकत्वात् भवत्येव। गमकत्वञ्च-वाक्यजन्यशाब्दबोधीयपरस्परनिरूप्यनिरूपकभावापन्नविषयताविलक्षणविषयताकशाब्दबुद्धित्वावच्छिन्नाजनकत्वे सति तावदर्थविषयकशाब्दबोधजनकत्वम्। अर्थात् यत्र वृत्तिविग्रहयोः समानार्थकत्वं स्यात् तत्रैव भवति गमकत्वम्। देवदत्तनिरूपितगुरुत्ववतः कुलमिति वृत्यर्थात् नातिरिच्यते 'देवदत्तस्य गुरोः कुलमित्यत्र जायमानः प्रत्ययः। 'ऋद्धस्य राजपुरुषः' इत्यत्र तु न तथा। अत्र तु "ऋद्धस्य राज्ञः पुरुषः" इति वाक्यतः ऋद्धाभिन्नो यः राजा तस्य पुरुषः' इति प्रतीतिः, ऋद्धस्य राजपुरुषः इत्यत्र वृत्तौ तु ऋद्धस्यान्वयः पुरुषे जायते न तु राजनि' इति वृत्तिविग्रहयो र्वैभिन्न्यस्य स्पष्टत्वात् नात्र गमकत्वमिति युज्यते वक्तुम्। तदुक्तं हरिणा—

सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते।
वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते॥
समुदायेन सम्बन्धो येषां गुरुकुलादिना।
संस्पृश्यवयवांस्ते तु युज्यन्ते तद्वता सह॥ इति।

अयञ्चैकार्थीभावः "राजन्-ङस् पुरुष-सु" इत्यलौकिकविग्रहवाक्ये एव कल्प्यते। यथा "पचतीत्यादौ बोधकतारूपां तिबादिशक्तिं तत्स्थानिनि लकारे प्रकल्प्य कर्मणि कर्तरि च विधीयते लकारस्तद्वत् 'राजपुरुषनिष्ठबोधकबोधकताशक्तिः कल्प्यते तदीयेऽलौकिके विग्रहवाक्ये।

एवञ्चालौकिकविग्रहवाक्ये श्रूयमाणानां शब्दानां क्लृप्ता या शक्तिस्तस्यास्त्यागे मानाभावात् प्रत्येकशक्तिसहकारेण समुदायशक्त्या विशिष्टार्थबोध इति साधीयान् पन्थाः।

जहत्स्वार्थवृत्तिपक्षस्तु तत्रैव स्वीकरणीयः, यत्रावयवार्थविरुद्धः समुदायार्थः स्यात्। तदुक्तम्—

जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी।

अश्वगन्धाश्वकर्णादिशब्दे स्पष्टमेव भासते अवयवार्थविरुद्धः समुदायार्थः ओषधिविशेषः व्यक्ति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषश्च। अत एतादृशस्थले एव जहत्स्वार्थवृत्तिपक्षोऽङ्गीकार्यः। समासे सर्वत्रैव जहत्स्वार्थवृत्तिपक्षस्वीकारे तु "महाबाहुः" इत्यादौ महत्शब्दस्यानर्थकतया आत्वमेव न स्यात्। भूतपूर्वगत्याश्रयणं तु गौरवग्रस्तमेव।

अत्र मते यो व्यपेक्षापक्षस्तत्र समासस्तु भवत्येव न हि, किन्तु वाक्यमेवावतिष्ठते। समासप्रकरणे विभाषाधिकारस्याभिमतत्वेऽपि "यत्र पारे मध्ये षष्ठ्या वा" द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यामित्यादौ विकल्पवाचकानि पदान्युपन्यस्तानि सन्ति तत्र एकार्थीभावे एव पाक्षिकत्वं विधीयते, न तु एकार्थीभावव्यपक्षयोर्मध्ये जायते तत्र विकल्पः। तादृशविकल्पस्तु "विभाषाधिकारेणैव सिद्धः। अत एव तत्र पारेगङ्गम्" इत्यस्याभावपक्षे षष्ठीसमासात् "गङ्गापारमित्यपि सिद्ध्यति। विभाषाधिकारात् व्यपेक्षया च गङ्गायाः पारमिति वाक्यमपीत्यलं पल्लवितेन।

मनोविनोदकणिका—

विश्राम आवश्यकः

द्राक्तरस्यान्तिके गत्वा युवतिः काप्यभाषत। 'शैथिल्यं वर्ततेऽङ्गेषु मस्तिष्कं भ्रमतीव मे॥'
द्राक्तरो निपुणं दृष्ट्वा ताम्प्रत्याह च सादरम्। 'न रोगो दृश्यते कश्चित् विश्रामं केवलं कुरु'॥
'यद्येवं श्रीमता तर्हि जिह्वैव मम वीक्ष्यताम्'। 'अस्याः कृतेऽपि विश्रामो नूनमावश्यकोऽधुना'॥

—दीनानाथत्रिवेदी मधुपः

Protect your property against Fire & other damages

Ruby General Insurance Company Limited

Year	Nett Premium Income	Nett Claims Paid	Capital & Funds	Assets.
1966	Rs. 2,75,88,000	Rs. 1,44,57,000	Rs. 2,50,00,000	Rs. 5,18,00,000

BUSINESS TRANSACTED :

FIRE MARINE MOTOR ACCIDENT AVIATION MACHINERY
AND
ERECTION ETC. ETC.

Branches & Agencies in all Important Towns in India
Foreign Branches & Agencies.

Aden, Amsterdam, Beirut, Biratnagar, Georgetown (Guyana), Kingston (Jamaica), Kathmandu, Nairobi & Sanfernando

Head Office & Registered Office :

"RUBY HOUSE"
8, India Exchange Place, CALCUTTA-1.

Managing Director, Shri K. P. Modi, B.Com., B.L., A.F.I.I., J.P.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उग्रता नामैका राष्ट्रव्यापिनी समस्या

अनुवादकः-विद्याभूषणः श्रीगणेशरामशर्मा डूंगरपुरम्

अद्यतनेषु प्रदर्शनेष्वान्दोलनेषु तथा तेषु च छात्राणामुग्रतापूर्णायां भूमिकायां यदा-यदा ध्यानमाकर्षितं भवति, तदास्माकं मनः खल्वेकया विचित्रयोद्विग्नतया परिपूर्णं भवति। छात्र-समूहैर्विध्वंसस्य घटनाः प्राप्तकालं श्रूयन्ते। छात्राणां दूरीकरणार्थमारक्षिविभागीयैः कार्य-करैर्यष्टिप्रहाराः कर्तव्या भवन्ति, गुलिकाप्रहार-पर्यन्तं दुःस्थितिर्विजृम्भते। शिक्षा-संस्थाः स्थगिताः कर्तव्या भवन्ति याभ्यो विद्या-ज्योतिः प्रस्फुटति। यदा ज्योतिरेव हि निर्वाणं नीयते, तदा पुनर्दिग्भ्रमान्मार्गस्खलनादतिरिक्तं कस्या-प्यन्यस्य का वा बताशा कर्तुं शक्यते। सेयमेव दुर्भाग्यपूर्णा कथाद्य पुनः पुनर्बम्भण्यते।

१६, मार्च सन् १९६६ दिनस्य वृत्तपत्रेषु तदिदमपठ्यत यन्मध्यप्रदेशे हिंसकस्यैकस्य जनसम्मर्द्दस्य विकिरणार्थमारक्षिविभागेन गुलिकाप्रहाराः कर्तव्या अभूवन्। तत्र जन-सम्मर्द्देऽधिकांशतश्छात्रा एवासन्, ये प्रश्नपत्राणां रहस्योद्भेदस्य परिणामतः परीक्षाणां स्थगनाय विरोधं प्रकटयन्त आसन्। तत आरभ्य निरन्तरं विरोधप्रदर्शनेषु हिंसावृत्तिं विवर्धमानां पश्यन् वर्तेऽहम्, यत्र च्छात्रा महत्यां बृहत्संख्यायां भागं गृह्णन्ति। छात्राणामुग्रतया साकमेव सामान्यं जनजीवनमपि चोग्रत्वं प्रत्यग्रेसरं भूत्वा स्वस्य विक्षोभं हिंसापूर्णैरान्दोलनैरभिव्यङ्क्तुमात्मनो विश्वासं विवर्धयदास्ते। 'घेराव' तथा 'बन्धस्य' रूपे विरोधप्रदर्शनमेकं नव्यं शिल्पतन्त्रमाससाद। क्वचित्-क्वचित्तत्रापि च हिंसा विस्फोटः प्रज-ज्वाल। हिंसायास्तमिमं प्रज्वलनव्यतिरेकं दृष्ट्वाद्यतनः सचेता नागरिकश्चिन्ताकुलो वर्तते। प्रजातन्त्रस्य भविष्यमेकस्मिन् भयावहे भीषणे च बिन्दौ समागत्य संस्थितमास्ते।

हिंसाया अग्नेरस्योद्दीपकं कारणं नैकमास्ते, वरञ्चानेकानि कारणानि वर्तन्ते तथा सर्वेषां कारणानाम् सम्मिलितः प्रभावोऽप्रत्यक्षरूपेणासां हिंसात्मिकानां गतिविधीनामुत्तरदायित्वमाव-हति। यदा देशोऽसौ स्वतन्त्रो बभूव तदा लोका-स्तामिमाशामनुसेवमाना अभूवन् यदिदानीम् शीघ्रमेव हि देशस्य सामाजिक्य आर्थिक्यश्च समस्याः समाहिता भवेयुः। सत्ताधिरूढा राज-नीतिज्ञा राजनेतारश्च यान् यान् समयान् जनताभ्यः कृतवन्तस्ताँश्चिरकालं यावत् पूर्ण-तामनासादयतो नाभिवीक्ष्य जनमानसं विचुक्षुभे। तास्वेतासु परिस्थितिषु वयमेतन्न विस्मरेम यच्छात्राणां तदिदमुग्रमाचरणं विक्षुब्धस्य जन-मानसस्यासंतुलिताचरणस्येकं लघु संस्करण-मेवास्त इति। विभिन्नप्रान्तानां विधानसभासु, केन्द्रे च संसत्कार्यविधयोऽसंसदीयं मनोभाव-मासादयन्तः सन्ति। सदस्या अन्योन्यमुचिताऽनु-चितानामारोपाणां वर्षां कुर्वन्तो विद्यन्ते। प्राप्तकालं तथाविधाभिः शब्दावलिभिर्दुर्विवादा बोभूयन्ते यन्नासौ संसत् संसदिव, वरञ्च घण्टा-पथ इव प्रतीयमानानुभूयते। चरित्रेषु नन्वाक्षेप-पंकलेपा बत साधारणी वार्ता बभूव। समग्रापि च राजनैतिकी स्थितिभ्रष्टतां गच्छन्ती वर्तते। पुनर्यदा तमिममादर्शमस्माकं वयस्का विधायकाः संस्थापयन्तो विद्यन्ते, तदा यदि चासंतुष्टा विद्यार्थिसमूहा मार्गेषु विध्वंसलीलामातन्वाना निर्गच्छन्ति, तदा किं नामाश्चर्यम्। समस्याया-मस्यां चिन्तयानैरस्माभि हिंसकप्रदर्शनानामेतेषां समग्रमपि चित्रं स्वावधाने रक्षितव्यं स्यात्। तदेतत् सम्पूर्णं चित्रमास्ते येन लोकतान्त्रिक्या जीवनपद्धतेः पुरत एकं भयभीषणम् प्रश्न-चिह्न-मङ्कितमास्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशस्यास्यार्थिकी स्थितिरपि महानिराशापूर्णास्ते, स्वस्य त्रिवार्षिकीषु पञ्चवार्षिकीषु योजनासु विद्यमानास्वपि जनसामान्यस्य जीवने तथाविधो न कोऽपि सुधारो बभूव, यथा विंशतिवर्षाणां स्वातन्त्र्यादनन्तरं कस्यापि देशस्य व्यक्ते र्जीवने भवितुमर्हति। समये-समये पदार्थजातानां मूल्यभावास्तथोच्चतां स्पृशन्तस्तस्थुर्यज्जनसाधारणस्य कृते जीवननिर्वाहो भद्रजनोचितं दुर्भरप्रायो जायमानोऽस्ति। सोऽयं पक्षो न दृष्टोऽप्यदृष्ट इवोपेक्षणीयो भवितुमर्हति।

विरोधिदलानां विक्षोभस्याक्रोशस्य चैकं कारणमेतदपि वर्तते यच्छाशसनतन्त्रस्य सूत्रमेकस्यैव दलस्य हस्तगतं प्रचलद्विद्यते तथा च तन्निकटे भविष्ये तत् परिवर्त्य विरोधिदलानां हस्तावम्बनमासादयेदित्यस्यापि चाशा नदृश्यते। ततः स्वाभाविकरूपेण तत्र विरोधिदलानामाक्रोशोऽधिकं वर्धते, विशेषतस्तदा, यदा जनतास्वयं विश्वासो वृद्धिगतो भवेद्यच्छासनतन्त्रमनेकरोगग्रस्तं जातमस्ति, भ्रष्टाचारो बलवानस्ति (कामं स एष विश्वासोऽसंगतः सर्वथा निर्मूलो निराधरश्च स्यात्) तर्हि विश्वासेनानेनैकमात्रेण राजनैतिकीं सत्तां प्रत्यनादरभाव उत्पद्यते। सोऽयमनादरः प्रजातन्त्रस्य कृतेऽतीव भयङ्करः संसिद्धो भवितुमर्हति। अनेनैव कारणेन यदाकदाक्रोशस्य विस्फुलिङ्गा हिंसाज्वालामालासु परिवर्तन्ते।

छात्रेषु याऽसंतोषस्य तरङ्गधारा व्याप्तास्ते तथा च यत्कारणाद्धिंसायाः स्फुलिङ्गा देदीप्यमानाः प्रज्वलन्ति, तदसंतोषस्यैकमङ्गमस्ति येन सामान्यं जनजीवनमद्यत्वे ग्रस्तमास्ते। यदि च वयं विश्वविद्यालयीयं जीवनं दृक्कोणे सम्प्रधार्य पश्येम चेत्तदा स्थितिमिमामुग्रतरां विधाय कानिचित् कारणान्तराणि बोधगम्यानि भवन्ति। अस्माकं शिक्षण-पद्धतिः सुधारमपेक्षतेऽअस्माकं परीक्षा-प्रणाली दोषाक्रान्तास्ते। अस्माकं विश्वविद्यालयानां प्रशासने प्रायेणानियमितताया आरोपः श्रूयमाणोऽस्ति तथा च विषयेषु केषुचिदित्थमपि प्रतीयमानमास्ते यद्धि विश्वविद्यालयानां प्रशासने, शिक्षकवर्गे च मिथः समन्वयो न भवितुं पारयामास। स्वस्य परेषां च समस्यानामन्योन्यमवबोधस्य प्रयत्नो नाक्रियत। शिक्षकशिक्षार्थिनां मध्ये वैचारिकस्यादान-प्रदानयोर्न्यूनतापि च तासु सामान्यासु स्थितिषु स्वयोगदानं प्रायच्छद्याभिर्विश्वविद्यालयीये जीवने हिंसां व्यवर्धयत्। नैतावदेव, यस्मिन् खल्वार्थिकेऽनिश्चये समग्रोऽपि समाजो जीवति, तेन विद्यार्थिसमुदायोऽसंस्पृष्टो नास्ति। तेषां मनस्यपि चानिश्चयस्य कुतुकं स्वप्रभावमर्पयद्विद्यते। अन्ततः शिक्षा-समाप्तेरनन्तरं तस्य (विद्यार्थिसमुदायस्य) पुरतः का नु बत पंथा विद्यते? कुतो वायं राजसेवासादयेन्नाम? कं वोज्ज्वलस्य भविष्यस्य स्वप्नं संयोज्य स इतोऽग्रे जीवेत्? अधिकांशैरभावेषु जीवद्भिर्विषमाभिरार्थिकीभिः स्थितिभिः सङ्घर्षः कर्तव्यो भवति। ते जानन्ति यच्छिक्षासमाप्तेरनन्तरमपि कापि शोभना राजसेवोपलप्स्यते, किंवा कस्मिंश्चिल्लाभप्रदे व्यवसाये ते प्रवेशं लभेरन्नित्यत्र सन्देहो विजृम्भत इति। सर्वकालं तच्छिरस्यनिश्चयखड्गः प्रोत्तम्भमानस्तिष्ठति, तथाऽनिश्चयाधोतिकाभ्यः प्रवहन्नसौ प्रतिध्वनिस्तत्कर्णयोः प्रत्याघातं कृत्वा तानसन्तुलितान् विधातुं सहायको भवति। स एष स्तथाविधोऽस्ति पक्ष एको यो हि विस्मरणीयो न हि भवितुं शक्यते।

एकोऽस्त्यपरो झंझावातो यो हि विश्वविद्यालयानां प्राङ्गणेष्वथ हिंसाग्निं प्रज्वालयितुं साहाय्यमाचरति। सोऽयं प्रभञ्जनो राजनैतिकदलरूपो वर्वर्ति। सम्भवति, कदाचिदसौ प्रभञ्जनश्छात्राणामुपद्रवानुत्प्रेरयन्न स्यात्, परन्तु यदा कदा तत्प्रेरणे महत्त्वपूर्णां भूमिकामभिनाटयति। व्यायसायिकाश्छात्रा ये स्वात्मनो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजनीतिगतानां मन्तव्यानां प्रचार-प्रसारयोस्तथा स्वदलस्य सिद्धान्तानामारोपणे समधिकामभिरुचिं दधते, तथाविधेषूपद्रवेषु मुख्यां भूमिकां निर्वहन्ति। यदि च विगतसमयस्यच्छात्रान्दोलनानां पूर्णतः परीक्षणं क्रियेत, तर्हि सुदृढोऽयं मे विश्वासोऽस्ति यदस्य दुष्पापस्य मूलसन्वेष्टितं भवेत्तथा समस्याया अस्यास्तात्त्विकं निदानं सम्यग् ज्ञायेत। परमेतदर्थं शिक्षाशास्त्रिभिः समाजशास्त्रिभिश्च सहभावेन निष्पक्षं रागमुक्तं च तेषु तेषु सर्वेष्वपि पक्षेषु विचारविमर्शः कर्तव्यो भवेद्यदन्ततः सोऽयमग्निः क्व नु कदा कुत्र वा प्रजज्वाल, केषु केषु समयेषु प्रजज्वाल, कुतो वा प्रजज्वाल, प्रसारस्य विधिश्च कोऽभूदित्यादि।

अद्यत्वे सेयं हिंसात्मिका प्रवृत्तिस्तथा भयङ्करी प्रमाणिता बोभूयते यज्जनसम्पत्तेर्होलिका दन्दह्यते, यानानि प्रज्वाल्यन्ते, भवनानि भज्यन्ते, स्टेशनानि, कार्यालयाः कर्मशालाश्चापलुण्ट्यन्ते, रेलयानानि भस्मसाद्भवन्ति, नैतावदेवापि तु व्यक्तिगताः सम्पदोऽपि च विनाशसन्देहगर्ते पतन्ति, निपतन्ति च, निस्सन्देहं, तामिमां विध्वंसहोलिकां प्रज्वाल्य प्रदर्शनकारिणः केवलं सत्तारूढं दलं प्रत्यात्मन आक्रोशमभिव्यङ्क्तुमिच्छन्ति, परन्तु तस्मिन् खलून्मादे ते तदेतद्विस्मरन्ति यद्राष्ट्रियसम्पत्तिं क्षतिग्रस्तां कृत्वा राष्ट्रस्यार्थतन्त्रस्य मेरुदण्डमपतक्षन्ति। ते नावबुध्यन्ति यदनेन कर्मणा राष्ट्रस्य शिरसि भारो महान् सुतरां वृद्धिं गमिष्यति, योऽन्यैरुपढौकनेन साकमेव स्वयं तैरपि च सोढव्यः स्यादिति। यदि च प्रसृमणशीलं तमिमं दावाग्निं हिंसारूपम् समयात्पूर्वमेव नावरुन्ध्याम तदासौ व्यक्तिगतां सम्पदमपि भस्मसात् कुर्वीत। तदा पुनस्तमिमं ज्वालमालाकुलं दावानलं सर्वभक्षं सर्वतः प्रज्वलन्तं दर्शं दर्शं दुःखदग्धानामस्माकं न कोऽपि चाभ्युपायो बुद्धिगम्यो भावी। अस्माकं समग्रोऽपि समाजः समस्तमपि च सामाजिकम् जीवनमराजकताया दुर्लक्ष्यं भावि, प्रत्येकं जनो भयाक्रान्तं संत्रस्तं च जीवनं जीवितुं बाध्यो भावी तथा प्रजातन्त्रस्य कङ्कालं समूलं नष्टं भ्रष्टं सद्विनश्येत्।

इत्थं प्रतिभाति, यद्धिंसात्मिकीनां घटनानां पृष्ठभूमावेको विश्वासः सक्रियं क्रीडन् वर्तते यद्यावदसंतोषो हिंसात्मिकया भाषया नाभिव्यक्तिमाश्रयते, तावत्तद्दिशि सर्वकारशासनस्य ध्यानमाकर्षितं नैव भवति। हिंसया प्रकारान्तरेण कश्चनैको नाटकीयः प्रभावविशेषो निपतति, तथानेन सद्य एव सर्वेषां ध्यानं तं प्रत्याकृष्टं भवति। अतस्तदिदमावश्यकमास्ते यद्धि सर्वकारो लोकानां मनसि तामिमां भावनां कृतास्पदां न कारयितुमवकाशं प्रयच्छेद्यद्धि हिंसात्मिका भाषैव सर्वकारस्य बुद्धिं स्पृशतीति। यदि च प्रदर्शनमनु काप्युपयोगिनी भावना सचेष्टास्ते तदा सर्वकारस्तां प्रति लक्ष्यं दत्त्वा विचारयेत्तथा प्रदर्शनस्य हिंसापूर्णाया नीतेः स्वीकरणात्पूर्वमेव तद्विमर्शं कुर्यात्। यदि च केनाप्यवैधेन तर्कहीनेन वा कारणेन हिंसा प्रज्वलन्ती भवेत्तदा निश्चयपूर्वकं सर्वकारो हिंसायाः पुरतो नात्मानमवनमयेत्। सर्वकारस्तदिदमवदधीत यत् प्रजातन्त्रस्य प्रथमः कल्पोऽस्ति विधिविधाननियमा व्यवस्था च। यदा पुनर्विधिविधाननियमधारा व्यवस्था च हिंसाया भयाक्रान्ता भवन्ति तदैतत् सुनिश्चितमेव मन्तव्यं यत्तद्भयं प्रजातन्त्रस्य समाप्तेः प्रथमोऽस्ति चरणः। तदिदमेकं कटु सत्यमास्ते यस्य बोधः परमावश्यकोऽस्ति नाम नूनम्। तस्मादेव कोऽपि सर्वकारः किमपि च शासनं विधिविधाननियमानां व्यवस्थायाश्च विषये कस्यापि किमप्युल्लङ्घनं नो सहेत, नैव सहेत। छात्रैः कृता हिंसात्मकानामुपद्रवाणां बिध्वंसलीलादुश्चेष्टितानि विधिविधाननियमानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवस्थायाश्चान्तर्गतं गृहीत्वा तत्प्रति सशक्तं दण्डविधानं कर्तव्यम्।

अत्रैव च बुद्धिजीवानां पुरतः किलैका धर्षणा व्युत्तिष्ठते। सर्वेऽपि जानन्ति यद्धिंसाया मूले नन्वाक्रोशः कुण्ठा विक्षोभश्च सक्रियाः प्रेरका भवन्तीति। क्रोधाध्मातो जनो विवेकमपजहाति तर्कं च त्यजति। बुद्धिजीविनामेतत्कर्तव्यं भवति यत्ते तथा विधायां परिस्थितौ तर्कं विवेकं प्रति चान्धतां गच्छतो जनान् विवर्जयेयुः। लोकेषु वैचारिकेनादानप्रदानेन मान्यतामूल्यानि प्रति च सन्तुलितां दृष्टिं विकासयेयुः। तथा तादृशीः परिस्थितीरुत्पादयेयुर्यासु स्वयं जनता हिंसां न सहेत। प्रजातन्त्रस्य सिद्धान्तानां समुचितपालनाय विधिविधानधाराभ्यो जनतायाः सक्रियसहयोगावाप्तिरतीवावश्यकी भवति।

छात्राणां हिंसात्मिकासु गतिविधिप्रवृत्तिषु सम्मिलनं नामास्माकं देशस्य भविष्यस्यान्धकारमयत्वे परिणमनस्य सङ्केतो वर्तते। सैषा प्रवृत्तिर्देशघातिनी। भाषा-समस्यामधिकृत्य च्छात्रा यदुत्पातं चक्रुस्तदस्ति चिन्ताया विषयः। अस्योत्पातस्य पृष्ठभूमावहितकरो राजनीतिगतो मतभेदो दुश्चेष्टमानो वरीवर्ति। राजनैतिकेषु दलेषु पक्षपरिवर्तनस्य नीत्या महदेव कुण्ठापूर्णमपरोधि च वातावरणमुत्पेदे, यत्समाधानं नगराणां राजमार्गेषु व्यूहरचनां कृत्वा क्रियते, यत्रच्छात्राणां सहभागित्वमपरिहार्यमिवाभूत्। त इमे व्यूहा हिंसामार्गे परिवर्तन्ते, विपरिवर्तन्ते च तथा छात्राणां तरुणं मनस्तत्र गतिशीलतामासाद्य तदिदं विस्मरति 'कः पन्थाः श्रेयान्' इति। नाहमेतद् ब्रवीमि यच्छात्रै राजनीतिगता विषया नावगन्तव्या इति, तैरद्यतन्या राजनीतेः समस्या अवगन्तव्यास्ताः समस्या अधिकृत्य वादविवादप्रतियोगिता आयोज्या, यतस्तैः श्वस्तनस्य भारतस्योत्तरदायित्वमावोढव्यमास्ते, राष्ट्रियमहत्त्वस्य राष्ट्रियनीतीः प्रति तद्ध्यानाकर्षणमावश्यकमास्ते; किन्तु विभिन्नानां राजनैतिकानामुद्देश्यानां कृते राजनीतिगतदलानां नीतिषु तैः सर्वथा न व्यावल्गितव्यम्। राजनैतिकानि दलानि विश्वविद्यालय-प्राङ्गणात् स्वात्मानं पृथक् रक्षेयुस्तथा विद्यार्थिसमुदायाय स्वस्य वास्तव्यं कर्तव्यं प्रति विचारविमर्शार्थं तदाचरणार्थं च समयावकाशं प्रयच्छेयुः। सन्दर्भेऽस्मिन् समस्तदेशस्य च्छात्रजगदहं प्रार्थये यद्देशस्यैक्यं गौरवं च पवित्रं मत्वा तत् प्रति निष्ठावन्तो भवन्तु ते, राष्ट्रियां सम्पदं स्वसम्पदं भावयेयुः। राष्ट्रियसम्पत्तेर्विनाशात् स्वात्मानं पृथक् रक्षेयुस्तथा हिंसात्मकेभ्यो विवेकहीनेभ्यः कार्येभ्यः स्वात्मानं सर्वथा दूरे पृथक् स्थापयितुं शपथं गृह्णन्तु तथा च राष्ट्रियगौरवस्यैकताया राष्ट्रियसम्पत्तेश्च यथाशक्ति सुरक्षार्थं कृतसङ्कल्पा भूयासुरिति।

दी अवध सूगर मिल्स लिमिटेड

प्रधान कार्यालय :-
इण्डस्ट्री हाउस
१५९ चर्च गेट रिक्लेमेशन
बम्बई-१

मिल्स :-
हरगांव
जिला-सीतापुर
उत्तरप्रदेश

निर्माता :—
शुद्धा, श्वेता, कणवती शर्करा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ वर्षा-चर्या ❀

वैद्य-श्रीबदरीप्रसादशर्मा शास्त्री, राजकीय औषधालयः, तूंगा (जयपुरम्)

नित्यं हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्तः।
दाता समः सत्यपरः क्षमावानाप्तोपसेवी च भवत्यरोगः॥

वर्षर्तौ प्रायः पयोभिरार्द्रायां वसुन्धरायां संजातनानातरुदूर्वालताभिर्हरितगिरिकाननोपवनानि रम्याणि सजलकूपनदीसरांसि च विलोक्य-कस्य जीववर्गस्य चेतो मुदं नावहति? अपि तु सकलचराचरात्मकं जगदिदं सुखमेवानुभवति।

किंच सदारोग्यमिच्छद्भिर्मानवैरिदमपि नो विस्मरणीयं-यत्तैः प्रकृत्या प्रवर्तमानेषु सर्वेष्वेव ऋतुषु तत्तदृत्वनुकूलान्याहारविहारादीनि यावन्नो सेव्येरन् तावत्पूर्णतयाऽरोग्यमाप्तुं नैव शक्येत।

भीष्मग्रीष्मवातातपव्यथित — मनस्कानां प्राणिनां पूर्वमेवाग्निसादो भवति; ततः सहसा-वर्षाजलप्रपातैर्भुव उष्मणा सहाधिकमग्निमांद्यमुपजायते। अग्निमांद्येन सह वातादयस्त्रयोदोषा अपि प्रकुप्य मानवानुत्पीड़यन्ति।

वर्षाकाले विशेषण वायुः प्रकुप्यति। पित्तञ्च सञ्चितं भवति। अतः द्वयोरनयोः प्रशमनाय सर्वदा प्रयतितव्यं मानवैः। "अजीर्णं हि सर्वरोगाणां मूल" मिति कृत्वा समयेऽस्मिन् सर्वतः प्रथमं सैन्धवलवणाक्तं त्रिफलाचूर्णं कवोष्णेन जलेन यावत् कोष्ठशुद्धि संसेव्यम्। भोजनञ्च साधारणमेव भोक्तव्यम्। मधुराम्लवणरसाः विशेषेण सेव्याः। भोजनोपरि निम्बुरससिक्तं भास्करलवणचूर्णमवश्यं सेव्यम्। द्राक्षासवः पुरातन एव सेव्यः, नत्वभिनवः। तथा वर्षाजनितक्लिन्नतामपनेतुं मधु च जलेन दुग्धेन वावश्यं पातव्यम्। यतो हि "वातलं वातकोपेऽपि वर्षासु मधु शस्यते"

भोजनेषु च पानकेषु च निम्बुरसोऽधिकतया सेव्यः, पित्तशान्त्यर्थम्।

तथा च मरिच-लवणात्मकानि (नमकीन) व्यञ्जनानि स्वल्पान्येव भोज्यानि नाधिकानि ह्यजीर्णभयात्। शाकाश्च मनोऽनुकूलाः सेव्याः किन्तु दधिमाषचणकनिर्मितमन्नमस्ति त्याज्यमेव।

जलेषु कूपजलमेव पेयं तच्च वस्त्रपूतं स्फटिकया शुद्धञ्च। लूतकीटादिभिर्दूषितं नदीतटाकजलं परिहार्यम्। भोजनान्ते दिवा शयनं नोचितम्। वर्षासु व्यायामो व्यवायश्च त्याज्यो वातदुष्टिभयात्।

वर्षाजलप्रपातेन तज्जलं सर्पवृश्चिकविवरेषु वेगेन गच्छति, तदा तेभ्यो जलभरितविवरेभ्यो बहिरागत्य सर्पादयो जन्तवो नगरवीथिकासु चेतस्ततः पर्यटन्ति। अतस्तेभ्यो रक्षणमिच्छता पुरुषेण नक्तं यष्टिकया प्रदीपेन (बैटरी) विना न क्वापि गन्तव्यम्। वर्षाकाले पादुकाभ्यां छत्रेण विना नो बहिश्चङ्क्रमणीयम्। यतो हि जलभरितमार्गेष्वतिचङ्क्रमणेन पादयोः पीडाकराः बहुधा व्रणाः प्रादुर्भवन्ति। अतस्तत्प्रशमनार्थं जात्यादितैलेन पिण्डतैलेन वाभ्यङ्गमतीव सुखकरं भवति।

सार्षपतैलेन तिलतैलेन वाभ्यङ्गपूर्वकं सदा स्नानमाचरणीयम्। तैलाभ्यङ्गेन वातशान्तिर्भवति।

वर्षाकाले प्रायः कालमहिम्ना मिथ्याहारविहाराभ्यां वा बालकेषु तरुणेषु वा मौक्तिकज्वरो भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदुपशमनाय संजीवनीवट्यारोग्यवर्द्धिनी वटी—मुक्तापिष्टि—प्रवालभस्म—कस्तूरीभैरव-चन्द्रोदयादिभिर्दिव्यौषधिभिर्यथादोषमनुपान-प्रयोगैश्च शनैः २ सन्निपातस्यास्य शान्ति-र्भवति । अन्यच्च सर्वा व्यवस्था वैद्याधीना । समयेऽस्मिन् मानवसंतापकरो विषमज्वरोऽपि भवति । तदुपशयनाय षड्माषमितानि तुलसी-दलानि द्वित्राः कृष्णमरीचिकाः, स्वल्पञ्च कृष्ण लवणं संमेल्य पलद्वयेन जलेन सहापिष्य कवोष्णं नियमेन प्रतिदिनं पातव्यम् । अनेन विषमज्वरा-गमनभीतिर्नो भविष्यति ।

तथा शुद्धश्वेतस्फटिकाचूर्णं गुञ्जाद्वयं लघुरेला चैका—एतद्द्वयं संपेष्य मधुना सदा सेव्यम् ।

पानयोग्ये जले कतिपयतुलसीदलानि निक्षिप्य नियमेन च तत् पेयम् ।

वर्षाकाले कालमहिम्ना सर्वत्र मत्सराणां (मशकानां) प्रसारो भवति । तदपसारयितुं गन्धकगुग्गुलुविरोजाभिधद्रव्यत्रयस्य चूर्णस्य प्रज्वलितेऽङ्गारे धूपदानेन गृहेषु निभृता सर्व एव मशकाः पलायन्ते ।

एवं यथर्तु दिनचर्यां रात्रिचर्यां वा सम्यगनुतिष्ठन्तः सुधिय आरोग्यफलमवाप्य सुखिनो भवन्त्विति शुभम् ।

आप 'भारती' के लिए क्या कर सकते हैं

१. ७) रु० भेजकर ग्राहक बनिये ।

२. अपने परिचित मित्रों को सम्मानार्ह संरक्षक, विशिष्ट संरक्षक, साधारण संरक्षक, सन्मान्य सहायक, आजीवन सदस्य अथवा स्थायी ग्राहक बनने को प्रेरित कीजिए ।

३. अपनी सुन्दर व विद्वत्तापूर्ण रचनाएं 'भारती' में भेजिए ।

४. 'भारती' में अपने व्यवसाय के लिए विज्ञापन दीजिये व दूसरों को प्रेरित कीजिये ।

५. धन भेजकर भारती को स्वावलम्बी बनने में सहायता कीजिये ।

६. 'भारती' के अभिकर्त्ता (प्रचारक) बनिए ।

७. 'भारती' की कमियां तथा सुधार के लिए हमें समय समय पर आपकी बहुमूल्य सम्मतियों से अवगत कराते रहिए ।

८. आपके नगर के विद्वानों को 'भारती' में लेख सामग्री भेजने को प्रोत्साहित कीजिए । हमें विश्वास है कि श्रीमान् एक अथवा अनेक रीतियों से 'भारती' की सहायता के लिये अग्रसर होते रहेंगे ।

विनीत—**गिरिराज शर्मा, प्रबन्ध सम्पादक**

भारती भवन—गोपालजी का रास्ता, जयपुर (राजस्थान)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"संस्कृत-व्याकरण-पद्धतीनामुत्पत्तिः विकासश्च"

पं० श्रीदुःखिश्यामहट्टनायकः, औत्कलिः

पूर्वानुवृत्तम्—

तदनन्तरं प्रक्रियया पद्धत्या विभिन्नवैयाकरणाः लोकेषु स्वस्य ग्रन्थस्य प्रचलनार्थं व्याकरणानि प्रणेतुं चेष्टितवन्तः बौद्धजैनादयोऽपि व्याकरणाध्ययनाय स्वीयं व्याकरणं कर्त्तुं प्राचेष्टन्त।

तेषु बौद्धचन्द्रगोमी चान्द्रव्याकरणं खीष्टीये पञ्चमशतके प्रणिनाय।

ततो जैना अपि तेषां व्याकरस्यादिकर्त्ता महावीर इति स्वीकृत्य जैनेन्द्रव्याकरणस्य सूत्राणां प्रणेता पूज्यपाद-देवेन्द्रदण्डी काशिकाकार इन्यपि समवोचन्। अस्य व्याकरणस्य सूत्राणि संज्ञाश्च पाणिनीयसूत्राणामपेक्षया अधिकतरं दुर्बोध्यानि कष्टसाध्यानि च।

तदनन्तरं श्वेताम्बरजैनेन अभिनव-शाकटायनेन ९ मशताब्द्यां 'शब्दानुशासनं' नाम व्याकरणं प्रणीय शाकटायनपद्धत्याः प्रवर्त्तनमक्रियत। शाकटायनव्याकरणे पाणिनीयचान्द्रादीनां प्रभावो दृश्यते। शाकटायनस्य आलोचनन्तु अमोघवृत्तिटीकाकारेण सविस्तरं कृतम्।

एवं प्रकारेण विभिन्नमताबलम्बिनोऽपि व्याकरणग्रन्थस्य प्रचाराय प्रसाराय चाचेष्टन्त।

एकादशशताब्द्यां धारधीशो भोजोऽपि 'सरस्वतीकण्ठाभरणं कृत्वा तत्र स्वप्रणीतसूत्राणां समुपन्यासमकरोत्। अत्रापि अष्टाध्यायीरीत्या अष्टौ अध्यायाः दृश्यन्ते।

एकादशशताब्द्यां हि जौमरपद्धत्याः प्रचलनमण्यभवत्। अनया पद्धत्या 'संक्षिप्तसारव्याकरणं' क्रमदीश्वरेण रचितम्। अस्य 'रसवती' टीकाऽपि तेनैव विनिर्मिता। व्याकरणमिदम् अष्टाध्याय्याः संक्षिप्तः प्रकाश इति वाच्यम्।

तथापि व्याकरणानि सरलतया महत्तया वापि लोकान् सन्तोषयितुमलं नाभवन्। अतः खीष्टीये त्रयोदशशतके बोपदेवेन 'मुग्धबोधव्याकरणं' प्राणैषीत्। अत्र बोपदेवनिर्मितानि सरलानि सूत्राण्येव सन्ति। बोपदेवपद्धत्याः वैशिष्ट्यं तु सारल्यं धार्मिकत्वञ्च। अतो बङ्गदेशे अधुनाऽपि मुग्धबोधस्य समादरः परिलक्ष्यते। अनेन काव्यरसेप्सूनामिच्छा चरितार्था जाता, परं न वेदविद्याध्यनशीलानाम्।

तथापि व्याकरणान्तररचनया स्ववैशिष्ट्यं प्रकटयितुं पाणिनीयस्य च मर्यादालाघवं कर्त्तुं जना अयतन्त।

पाणिनीयसूत्राणि यथा महेश्वरादागतानि इति प्रथितं लोके तथैव सारस्वताः स्वसम्प्रदायसूत्राणामुत्कृष्टमूलकतां प्रदर्शयितुं सरस्वत्याः सकाशात् समावाप्तानीति वर्णयन्ति। सारस्वतसूत्राणि मुख्यतो मुसलमानशासकानां व्याकरणज्ञान-सम्पादनाय निर्मितानि आसन्। एतेषां सूत्राणां वैशिष्ट्यं तु सरलता एव। अस्य मूलभूतानि चतुर्दशसूत्राणि सरस्वत्या देव्या प्रकटितानि। किन्तु अस्य सप्तशतानि सूत्राणि नरेन्द्रेण निर्मितानि इति प्रचलितम्, परं त्रयोदश-शताब्द्याम् अनुभूति-स्वरूपाचार्येण सरस्वत्या इमानि सूत्राणि आकलय्य सारस्वतप्रक्रिया कृता। अस्या हि सारस्वतप्रक्रियायाः पञ्चदशटीकाः प्राप्यन्ते। सारस्वतपद्धत्या रामचन्द्राश्रमेण रचिता 'सिद्धान्तचन्द्रिका' अनेकत्र अधुनापि समादृता दृश्यते। अस्याः पद्धत्याः विकासहेतुस्तु पाणिनीयव्याकरणस्य तुल्यत्वस्य प्राप्तिरेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदनन्तरं केचन दार्शनिक-वैयाकरणा अपि व्याकरणे दर्शनस्य सत्तामनुभूय तस्या आलोचनामकुर्वन्। ये तु अद्वैतवादिनस्ते शब्देऽपि ब्रह्मसत्तामनुभूतवन्तः। तेषु भर्तृहरेः स्फोटवाद-शब्दब्रह्मैकवादौ प्रथितौ। नागेशभट्टेनाऽपि स्फोटवादस्य विशदमालोचनं कृतम्। किन्तु ये तु भक्ताः, नामकीर्त्तनेन हि भगवद्भक्तिः कर्तव्या इति मन्यन्ते, तेषां व्याकरणे रुचिः नाभवत्। तेषु मधुरकृष्णलीलाचिन्तनपरायणाः वैष्णवा व्याकरणेन समं मधुरं हरिनामकीर्त्तनमपि विधातुम्, एकया क्रियया कार्यद्वयं यथा व्याकरणज्ञानं धर्मार्ज्जनञ्च साधयितुं हरिनामामृत–व्याकरणं प्राणयन्। तत्र सर्वत्र सूत्रोदाहरणेषु हरेः विभिन्नानि नामानि एव साधितानि, ते तस्मादवदन्—

"सूत्रैः पाणिनि-निर्मितैर्बहुतरैर्निष्पाद्य शब्दावलिं,
वैकुण्ठस्तवमक्षमा रचयितुं मिथ्याश्रमाः
शाब्दिकाः।
पक्वान्नं विविधं श्रमेण विविधापूपाग्र्यसूपान्वितं
मन्दाग्निनानुरुन्धते मितबलानाघ्रातुमप्यक्षमान्।"

षोडशशताब्द्यां रूपगोस्वामिना जीवगोस्वामिना च कृतं हरिनामामृतं इति नाम्ना अभिहितं व्याकरणद्वयम् अस्य साम्प्रदायस्य आदरभूतं रत्नम्। तथैव शिवनामकीर्त्तनप्रियेण बालरामपञ्चाननेन 'प्रबोधचन्द्रिका' कृतास्ति। एतेषां व्याकरणानां प्रणयनहेतुस्तु भक्तिः। अतोऽपाणिनीयपद्धतिषु भक्तिमूलाः धर्मानुसारिण्यश्च पद्धतय इति कृता मया अन्तर्भुक्ताः।

तथा हि ये काव्यरसास्वादिनो नीरसे युक्तिजालजटिले व्याकरणेऽपि रसानुसन्धित्सवो जाताः, ते काव्यव्याकरणयोः युगपद् ज्ञानार्जनाय काव्येनैव व्याकरणं व्यरचयन्। तेषु षष्ठशतकोत्पन्नस्य भट्टभूमस्य 'रावणार्ज्जुनीयम्', सप्तमशतकोद्भवस्य भट्टिकवेः 'रावणवधं' काव्यञ्च प्रधानम्। रावणार्जुनीयकाव्ये तु अष्टाध्यायीसूत्रपाठक्रमेण पदानां निदर्शनं कृतम्। किन्तु महाकविः भट्टिः व्याकरण-मार्ग-प्रदर्शन-पुरःसरं स्वकाव्यचषके राममदिरां पूरयित्वा लोकमानसं मोहयितुं समर्थोऽभवत्। उक्तञ्च ततः—

व्याकृतिचषकपेयं रामराज्यकथामृतम्।
शब्द-वाक्य-पदच्छेद-स्थूलाक्षर-विशेषदृक्॥
व्याकृत्या कोशछन्दोभ्यामलङ्कृत्या रसेन च
पञ्चकेनान्वितं काव्यं भट्टिकाव्यं विराजते॥

काव्यस्यास्य निर्माणोद्देश्यं तु मनोविनोदेन समं व्याकरणाध्ययनम्। अस्यादिमचतुर्षु सर्गेषु प्रकीर्णनियमाः, ततो नवमसर्गपर्यन्तं विशेषनियमाः, तदनु त्रयोदशसर्गान्तम् अलङ्काराः, तदनन्तरं द्वाविंशतिसर्गपर्यन्तं लकार-प्रयोगाश्च प्रपञ्चिताः। ललितकाव्यकलया यथा व्याकरणं काव्येऽस्मिन् उपगुम्फितं, न तथा अन्यस्मिन् कस्मिन् अपि इति हेतोः व्याकरणस्य जीवातुभूतमिदं काव्यं विद्वत्समाज आदरास्पदम्।

दशमशतकोत्पन्नस्य हलायुधस्य 'कविरहस्ये'ऽपि नानार्थधातूनां भिन्नेष्वर्थेषु प्रयोगः प्रदर्शितः। अधुना तु आचार्य-रामशरणशास्त्रिणा कौमुदीकथाकल्लोलिनीनाम गद्यकाव्यं व्याकरणप्रयोगपरिपाटीं प्रदर्श्य रचितमस्ति।

किन्तु एतेन व्याकरणस्य यथार्थज्ञानं नाभवत्। काव्यानीमानि तु व्याकरणविदां काव्यप्रवेशाय रसानुभूतये व्याकरणाभ्यासाय च सप्रयोजनानि जातानि न तु व्याकरणज्ञानहीनानाम्। संस्कृतभाषायाः प्रसारेऽपि क्रमशः ह्रासोऽभवत्, यतः सर्वाणि खलु व्याकरणानि पाणिनीयानुप्राणितान्येव। पाणिनीयसूत्रे यत् 'अकः सवर्णे दीर्घः', तदेव कलापे 'समानः सवर्णे दीर्घो भवति परश्च लोपम्, मुग्धबोधे 'सह र्णे र्घः' (अत्र र्णे=वर्णे, र्घः=दीर्घः इत्यर्थः) जैनेन्द्रे 'स्वेऽको दीः', हरिनामामृते तु 'दशावतार एकात्मके मिलित्वा त्रिविक्रमः'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अत्र दशावतारः=स्वरः, त्रिविक्रमः=दीर्घः इत्यर्थः) भवति।

किन्तु आङ्गल-शासकाः एतस्याः भाषायाः महत्त्वं सम्यगनुभूय अस्या अध्ययनाय सरलां पद्धतिम् आविष्कर्त्तुम् अयतिषत। अतः Macdonell-Whitney—आदि पाश्चात्य-मनीषिणः आङ्गलभाषायां संस्कृतव्याकरणं प्रणीतवन्तः भारतवर्षेऽपि भाण्डारकरप्रतिष्ठानस्य अस्मिन् क्षेत्रे महदवदानमस्ति। विभिन्न-भाषायां संस्कृतस्य प्रचाराय प्रसाराय च लिखितेषु व्याकरणेषु—

W. D. Whitney महोदयानां Sanskrit Grammar, H. H. Wilson महोदयानां Grammar of the Sanskrit Language, Miner William महोदयानां A Practical Grammar of the Sanskrit Language, ईश्वरचन्द्रविद्यासागर-महोदयानां व्याकरणकणकौमुदी (बंगला) M. R. Kale महोदयानां Higher Sanskrit Grammar, V. S. Apte महोदयानां Student's Guide to Sanskrit Composition, डॉ० कपिलप्रसादद्विवेदिनां प्रौढ-रचनानुवादकौमुदी (हिन्दी)—इत्यादिग्रन्थ-रत्नानि प्रमुखानि। अनया आङ्गलपद्धत्या हि अधुना संस्कृतस्य प्रचारो भवति। किन्तु अनया संस्कृतसाहित्ये प्रवेशः सुखकरोऽजायत परं पाण्डित्यप्रकर्षलभाभावात् ग्रन्थप्रणयनादिकं मौलिककार्यं बाधाप्राप्तमभवत्।

अत एव अधुना द्वे पद्धती सर्वत्र संस्कृत-व्याकरणाध्यनाय विशेषतः प्रचलतः। एका तु सुकृतभाषासुखबोधनोद्दिष्टा अर्वाचीनी आङ्गल-पद्धतिः, अपरा तु पाडित्यप्रकर्षकरी प्राचीना पाणिनीया पद्धतिः।[1]

[1] आरम्भतोऽद्यावधि व्याकरणस्य सोऽयं विकासः कालक्रमेण कथमजायत—इति जिज्ञासूनां 'भारती' पाठकानां मुदे व्याकरणमधीयानानां छात्राणामुपकाराय च पण्डितप्रवर-श्रीपट्टनायकमहोदयेन लिखितोऽयं लेखोऽत्र प्रकाशितः— इति— —मधुपः

गिरने से पहले उनकी रक्षा करें

बालों और दाँतों की नियमित देखभाल और उनका पोषण आवश्यक है। क्यों न फिर उनके गिरने से पहले उनकी रक्षा की जाय! इसके लिए उदयपुर का गाय छाप ब्राह्मी आँवला तेल और काला दन्त-मन्जन सर्वोत्तम है। इन आयुर्वेदिक उत्पादनों से आपके बाल घने तथा लम्बे और आपके दाँत चमकीले तथा मजबूत रहेंगे।

इलाज से बचाव बेहतर है!

वसुमेर ऐसाज ब्रदर्स लिमिटेड

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमाणुवादे महाप्रलयो नास्त्यस्तीति विचारः

पं० श्रीयमुनाधरलाटा, नव्यन्यायशास्त्री, रामगढ़ः (सीकरः)

परमाणुप्रवादेऽस्ति; नास्त्यस्तीति मतद्वयम् ।
महाप्रलयके जन्ये विरोधाभासकं सदा ॥१॥

कारणात् कार्यसंसिद्धिर्हेतोर्नाशाच्च तद्व्ययः ।
समवायिविनाशाच्च, कार्यनाशोऽपि सिद्ध्यति ॥२॥

यथातन्तुकपालानां नाशे नाशोऽपि तज्जयोः ।
एवं द्व्यणुकनाशे हि, त्र्यणुकनाशोऽपि सिद्ध्यति ॥३॥

महावयविपर्यन्तं, नाशो जन्यस्य सिद्ध्यति ।
परन्तु द्व्यणुकाभावो नास्ति कालत्रयेऽपि च ॥४॥

नित्यत्वात् परमाणूनां नाशो हि नोपपद्यते ।
एवं सति न कस्यापि कार्यस्य नाशभावना ॥५॥

अतोऽस्मिन् पक्षके सिद्धे, महाप्रलयनामान ।
नावान्तरलयोऽपि स्यात्, तेन शास्त्रविरुद्धता ॥६॥

अतः शास्त्रस्य रक्षार्थमसमवायि-नाशतः ।
कार्यनाशो हि मन्तव्यस्तेन सर्वं सुसिद्ध्यति ॥७॥

महेश्वरेच्छया शेतुं, सर्वद्व्यणुकनाशतः ।
प्राणिभोगापवर्गो हि महाप्रलयसंभवः ॥८॥

परमाणुद्वयासत्ते र्दैवान्नाशोऽपि जायते ।
सर्वशास्त्रप्रमाणं हि तेनावान्तरको लयः ॥९॥

अतो नास्ति विरोधोऽपि, यमुनाधरसम्मतौ ।
विद्वद्वरै विरुद्धांशस्त्याज्य एवात्र सर्वथा ॥१०॥

एकविंशतिदुःखानां, युगपद् ध्वंस एव हि ।
मोक्ष आत्यन्तिको ज्ञेयो भेदेऽपीश्वरजीवयोः ॥११॥

स्वाधिकरणवृत्तित्वे, दुःखाद्याभावकालके ।
अवृत्तित्वं वटो ज्ञेयमात्यन्तिकत्वमत्र वै ॥१२॥

षड्गोचराः षडक्षाणि, षड् ज्ञानानि शरीरकम् ।
सुखदुःखे मिलित्वा वै, भो दुःखान्येकविंशतिः ॥१३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कूर्मकण्टक + युक्तांगवत् सांख्ययोगयोर्मते ।
प्रादुर्भावतिरोभावौ, जन्मलयावुदाहृतौ ॥१४॥

अपूर्ववस्तुनो जन्म, नास्त्यत्र वै वटो मते ।
अत्यन्ताभावरूपो हि लयोऽपि नोपपद्यते ॥१५॥

प्रकृतिपुरुषाख्ये हि, कार्यं गुप्तं स्वकारणे ।
पटघटौ प्रलीनौ हि तन्तुकपालपुञ्जके ॥१६॥

मूलप्रकृतिरविकृतिर्महदाद्याप्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो, न प्रकृतिर्न विकृतिः पुरुषः ॥१७॥

सांख्या अनीश्वराः सन्ति, कपिलस्त्वीशसाधकः ।
ईश्वरप्रणिधानाद् वा, समाधिरिति बोधयन् ॥१८॥

सांख्ये पुरुषशब्देन, जीवाः प्रोक्ता अनेकशः ।
अत्र मोक्षः कथञ्चेन्नो, अन्यताप्रत्ययाद् भवेत् ॥१९॥

वेदान्तेऽद्वैतसिद्धिस्तु, मिथ्या संसारज्ञानतः ।
एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किंचन ॥२०॥

चिदितरेऽत्र सर्वेऽपि, कल्पिताः सत्त्वशून्यकाः ।
अतो नाद्वैतसिद्धौ ते, भान्तोऽपि प्रतिबंधकाः ॥२१॥

मायायाः परिणामोऽयं, पयसो दधिवत् वटो ।
ब्रह्मणस्तु विवर्तः संसारो रज्ज्वां हि सर्पवत् ॥२२॥

सतत्वतोऽन्यथाभावः, परिणामः प्रकीर्तितः ।
अतत्वतोऽन्यथा भावो, विवर्त इत्युदाहृतः ॥२३॥

अधिष्ठानस्य सज्ज्ञानात्, सिद्धो मोक्षो हि लभ्यते ।
ज्ञानिना ज्ञानसिद्धौ वा ❀ विस्मृतकण्ठभूषणम् ॥२४॥

ब्रह्मापि द्विविधं ज्ञेयं, शुद्धविशुद्धभेदतः ।
मायया रहितं शुद्धं साकं विशुद्धमुच्यते ॥२५॥

विद्याविद्येति भेदेन, मायापि द्विविधा मता ।
विद्याविशिष्ट ईशः स्यात्, साविद्यो जीव उच्यते ॥२६॥

ईशजीवौ प्रभोर्वश्यौ, मायायाः क्रमेण वै ।
अतः प्रभोर्विमुक्तीच्छा, नास्त्यप्यबन्धनात् किल ॥२७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीवस्तु मुक्तये नित्यं, ध्यायतीशं सुकर्मतः ।
विम्बवादः खलु पञ्चदश्यामीशांशबोधकः ॥२८॥

परिच्छिन्नं प्रवादं तु परिभाषा विवक्ति भोः ।
ग्रन्थद्वयं प्रपाठ्यं वै, वेदान्तमतज्ञप्तये ॥२९॥

मणिप्रभा मणिभ्रान्तिः संवादी भ्रम उच्यते ।
दीपप्रभा मणिभ्रान्तिर्विसंम्बादी भ्रमो मतः ॥३०॥

मूर्तिष्वीश्वरविज्ञानं, यद्यपि भो विपर्ययः ।
तथापीश्वरप्राप्तिः स्यात् संवादि भ्रमतो ध्रुवम् ॥३१॥

अविद्यांशद्वयं ज्ञेयमाद्य आवरणोऽपरः ।
विक्षेपः सार्थनामानौ, द्रष्टुश्चित्तविमोहकौ ॥३२॥

बुद्धितत्स्थचिदाभासौ, द्वावेतौ व्याप्नुतो घटम् ।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥३३॥

+(झावुला) ❀(इवार्थे)

भाग्यवान्

आशिक्षिता मिताहारा लज्जिताऽबहुभाषिणी ।
मुग्धाऽतिसरला यस्य भार्या, स भाग्यवाञ्जनः ॥

—मधुपः

—: विलास उद्योग लिमिटेड :—

सींगदाना, सींगदाने का तेल और एक्सपेलर एवं एक्सट्रेक्शन दोनों प्रकार की खली के उत्पादक व निर्यातक

कारखाना : पण्डित नेहरू मार्ग, पो. बो. नं. १५०
जामनगर (सौराष्ट्र)

फोन : ३८७–३८८ तार : विलासकेक

रजिस्टर्ड कार्यालय : २१५–१७, कालवादेवी रोड़
बम्बई–२ (बी० आर०)

फोन : ३८३१६–१७ तार : विलासकेक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचित्राः समाचाराः

संग्रहीता—विद्याभूषण-श्रीगणेशरामशर्मा, डूंगरपुरम्

अमूल्याः पत्न्यः

पत्युर्भृतिकर्मणस्तथा पत्न्या मूल्यम्—इत्यनयोर्द्वयोर्मिथः कोऽपि च घनिष्ठः सम्बन्धो भवितुमर्हतीति विषयोऽसावस्माकं भारतीयानां कृते नन्वाश्चर्यकरो भवेत्, परन्तु पश्चिमीयेषु देशेषु किलेदानीं स एष विषयः सर्वथैव साधारणो बोभूयते। पतिः श्रेष्ठं भृतिकर्मासादयेत् किं वा तस्य पदोन्नतिः स्यादत्र पत्न्या महत्त्वपूर्णम् योगदानं प्रति नाधुना कस्यापि च मनागपि सन्देहलवलेशोऽस्त्यवशेषः। 'वॉलस्ट्रीट जर्नल' इतिपत्रानुसारमधुना व्यापारमण्डलीष्वधिकारिणां निर्वाचनसमये, पत्युः पारिवारिके जीवनेऽतीव बलं प्रदीयते। नास्त्येव कोऽपि चिन्ताविषयो, यदि च पत्नी व्यापार-व्यवसाय-विषये सर्वथा ज्ञानशून्या भवेत्, परन्तु यदि सा गृहकार्याणां सञ्चालनं सुचारुरीत्या विधातुं शक्नोति, स्वपतये मानसिकीं सहायतां च दातुं पारयति चेत्, तदा सा स्वपतेरुन्नतिक्रमे प्रभूतं सहायिकी भवितुमर्हति।

'वॉलस्ट्रीट जर्नल-पत्रं' सोदाहरणमेतल्लिलेख यज्जीवनरक्षण – व्यवसायमण्डल्या अधिकारिणः कस्याप्येकस्य भृतिकर्मणि नियुक्तेः पूर्वं, प्रत्याशिनस्तस्य परिवारेण सह सायन्तनं भोजनं कुर्वन्ति पश्यन्ति च यत्तस्य पत्नी ननु साक्रोशं क्रोधाध्माता तु न भवति तथा (विश्वसनीयमेतत्) सा समर्घाणि; भास्वरवर्णानि वस्त्राणि तु न परिधत्ते! सारांशोऽयं यत्ते परीक्षन्ते यद्धि प्रत्याशिनः पत्नी दुःस्वभावा कर्कशा तु नास्तीति। एका विधि-व्यवसायमण्डली तु केवलं प्रत्याशिनः पुरुषस्य पत्न्या व्यक्तित्वाधार एव तस्मै भृतिकर्मणि नियुक्तिं प्रयच्छति तथा चैकस्या व्यापारमण्डल्या अधिकारिणो भृतिवृद्धिस्तस्मादेव नादीयत, यतस्तस्य गृहं कुक्कुटगृहमिवास्वच्छमशोभनञ्चासीत्।

अस्यायमेवास्त्यभिप्रायो यदधुना व्यापारश्च गृहं च मिथोऽन्योन्यं पूरकमिव मन्यते—अनयोर्द्वयो रथचक्रयोर्विसम्वादो यदि भवेत्तदा नहि कार्यनिर्वाहः। स युगो व्यतीयाय यदा पतिमहाशयः स्वगार्हस्थ्यशकटीं स्वेच्छया सञ्चालयति स्म, किन्तु यदि पत्न्यः पुरुषोचितानि सर्वाण्यपि च कार्याणि स्वोत्तरदायित्वे न गृह्णानाः केवलं स्त्रीजनोचितानि कर्माण्येव सुचारु सम्पादयेयुश्चेत् तदा पत्युर्व्यापारो वृद्धिं गतः स्याज्जीवनं च सयोगक्षेमं ससुखं सम्पद्येत।

रक्ताक्षरैः सम्वादमुद्रणस्य दण्डः

लंदननगरस्यैका लेज्लीशार्प-इत्यभिधाना चतुर्वर्षायुष्का बालिका तदिदं निरणैषीद्यत् सा लन्दननगरस्योपवसतिषु दृश्याणि द्रक्ष्यतीति। परन्त्वस्या बालिकाया रुचेरस्या हेतोर्नगरस्य सर्वे जना हतवाचो जडाः स्तब्धा इवाभूवन्, रक्षाविभागीयानि वाहनानि दधावुः, रुग्णोपढौकनानि यानानि च सावधानं सज्जानि तस्थुः। नाना रक्षोपायाश्च जागरूकं न्ययुज्यन्त।

लेज्लीशार्पबालिकाया विचारोऽयं बभूव यद्धि लन्दननगरं सर्वतो वर्तमानानां दृश्याणामवलोकनानन्दं सा कार्यालयस्यैकस्य सर्वोपरि भागमारुह्यानुभवेद्योऽधस्ताद्राजमार्गत ८० फीटमितोर्ध्वं वर्तते। नवेञ्चप्रमाणमात्रमतीव सङ्कीर्णविस्तारवत्यां भित्तौ सा वारं वारमूर्ध्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माकाशे तथा नीचै राजमार्गं पश्यन्ती समभूत्। स्वमाता-पितरौ केनापि सह वार्तालापं कुर्वन्तौ व्यस्तसमस्तौ चावलोक्य लेज्ली सर्वोच्चतमे खण्डे स्वस्वामिनो गृहं प्राप ततस्तूष्णीमेवोर्ध्वभित्तिमारुरोह।

तामिमां लेज्लीबालिकां भयङ्करात् स्थानात्तस्मादवतारयितुं पार्श्ववर्तिनि भवने निवसन् ऐलेनकार्टरमेनमहाशयः स्वगृहस्योपरि खण्डं गत्वा बालिकामिमामालपन् तां व्यस्तसमस्तां विधाय सावधानं ररक्ष। ततो लेज्ल्या माता पृष्ठतो मौनमागत्य तां स्वसमीपमाचकर्ष। परन्तु सम्वादपत्रेषु रक्ताक्षरैः सम्बादमुद्रणस्य पुरस्कारं सा किं लेभे ? स्वजीवने प्रथमो दण्डः सोऽपि चातीव निष्ठुरः।

प्राणापहारिण्यः पिपीलिकाः

स्वकीयस्य बृहदाकारेण पिपीलिकाया ह्रस्वाकारस्य तुलनां कृत्वा मनुष्यो निष्कर्षमिममाप्तुं शक्नोति यदेतावत् स्वल्पाकारं सत्वास्तित्वं तस्य किं नामानिष्टं कर्तुं प्रभवति ? परन्तु श्रीलङ्कायाः ५८ वर्षीयोऽप्पुस्वामीत्याख्यो जनः किलासां लघुसत्वानां कोपप्रसादाद्यथा स्वजीवनमपजहौ, तत् पश्यतो मनुष्यस्याहङ्कारो नष्टभ्रष्टश्चूर्णीकृतो भवति। अप्पुस्वामी सदा सर्वदैव सायङ्काले तद्दिनेऽपि च ससुखं रात्रिं यापनाय स्वपर्यङ्कशय्यामध्यशेत, परन्तु न स पुनर्जागर्तिं लेभे। पिपीलिकानामेको महान् यूथोऽकस्मात्तमाचक्राम, प्रातर्यावत् तस्य रक्ताक्तं मृतशरीरमेवावाशिष्यत। अप्पुस्वामिनः पुत्रोऽकथयद्यत् सः स्वपितुर्मृतशरीरे पिपीलिकानां पङ्क्तीरद्राक्षीत् या हि अप्पुस्वामिनं तथा निर्दयमदंशन् यथा तस्य देहात् समस्तमपि रुधिरं निःशेषं प्रावहत्।

—७ जुलाई ६८ दिनस्य
'दिनमान' पत्रात्साभारम्

कौटुम्बिकं सैन्यदलम्

इस्तम्बूलनगरस्य फेयदजियादनामा व्यापारी स्वस्य ७० तमस्य वर्षग्रन्थिमहोत्सवस्यावसरे स्वपुत्रान्, पुत्रीः, प्रपौत्रान्, प्रपौत्रीर्भागिनेयादीन् सर्वान् संसारभ्रममणार्थं प्रहिणोति। तेषां सर्वेषां संख्या १३६ मितास्ते।

स्वयमेव दुर्लक्ष्यं बभूव

सिडनीस्थानस्य तस्य चौरस्य भाग्यलिपिरपि च विचित्रासीत्। स वराकश्चौरकर्म कर्तुं जगाम परन्तु स्वस्य स्यूतकर्तनं कारयित्वा न्यवर्तत। स तद्गृहेऽपहरणयोग्यं न किमपि वस्तु समाससादातोऽविपरीतं ततः प्रतिनिवर्तनसमये तस्य धनकोशिकापि (पर्स) तद्गृह एव निपपात। तत्र तस्य धनकोशिकायां ४५ डालरमुद्राणां नोटसंज्ञकानि मूल्यकर्गदान्यासन्।

पिपीलिकाः स्यूतान्तरे संस्थाप्य

भीषणग्रीष्मस्य घर्मप्रवाहतरङ्गा आक्लैण्डस्थानस्य पीपिलिकानां, मशकानां, मक्षिकाणां च वंशमेव समूलं व्यनाशयन्। कामं मनुष्यास्तेषां सर्वनाशेन सुखमनुभवतु परं कीवीतित्तरादिसदृक्षाणां प्राणिनामनेन प्रायोपवेशनावसरः समुपस्थितः। तानेतान् प्राणिनः क्षुत्क्षामकण्ठान् संरक्षितुं तत्रत्याया जन्तुशालाया अधिकारिणः प्रवेशशुल्कमञ्जुषामेकां पिपीलिकामशकादीनां कृते निश्चितां कृत्वा स्थापितवन्तः।

एकानन्ता यात्रा

अर्जन्टा इनादेशस्य मरुभूमेरेका महिला सन् १९४८ ई० वर्षे स्वपतिना साकं तन्मरुस्थले व्रजन्ती समभूत्। सा तत्र ग्रीष्माधिक्येन मूर्च्छिता भूमौ निपपात, परन्तु तस्याः पतिरग्रे प्रचचाल। श्रीमती एन्टोनिया राइवारो इति नाम्नीदानीं महता कष्टेन २० वर्षानन्तरं तस्मान्मरुस्थालाद्बहिर्निःसृत्य जनवसतिक्षेत्रं प्राप्तुमशक्नोत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

❀ संगृहीताः समाचाराः ❀

भूगर्भे स्त्रीणां सुरक्षा-व्यवस्था

तस्मानिया-खनि-क्षेत्रे कर्म कुर्वताम् श्रमिकाणां नव्यव्यवस्थानुसारमितोऽग्रे स्वसम्भाषण-व्यवहारे भाषाप्रयोगविषये तैः सावधानं व्यवहर्तव्यं स्यात्। अन्यथा ते १०० डॉलरमुद्रात्मकेन द्रव्यदण्डेन दण्डनीयाः स्युः। देशस्यास्य नवीनखनिनियमानुसारं यदि कश्चन श्रमिको धर्षणां भर्त्सनां वा कुर्यात्, गालीदानायापशब्दान् प्रयुञ्जीत, किंवा कमप्यपमन्येत तथा तथाविधा अपशब्दाः कस्यचित् कर्णकुहरेष्वापतेयुस्तदा स कठोरेण दण्डेन दण्डनीयः स्यात्। अस्याः कठोरनियमव्यवस्थायाः कारणमिदमास्ते यत्प्रथमवारं तस्मानिया-खनिक्षेत्रे स्त्रीभूगर्भशास्त्रिणः सर्वेक्षकाश्च कार्यसम्पादनायानुमताः सन्तीति।

विशाल-पदस्यास्थि

पश्चिम-शर्मण्यदेशे ब्रानश्वेग इति प्राकृतिक-इतिहास-संग्रहालयो यत् २० पौण्डभारमेकं पदास्थि समुपलब्धवांस्तस्य पुरातत्त्व-क्षेत्रे विशिष्टं महत्त्वमास्ते। एकमीटरप्रमाणं लम्बाकारमेतदस्थि बुलडोजरयन्त्रेण भूमिखननसमये किलैकस्मिन् गर्ते समुपालभ्यत। पश्चिमशर्मण्यदेशे गजाकारस्य कस्यचिज्जन्तुविशेषस्येत्थं प्राप्तिर्नामैकमद्भुतंप्रकरणमस्ति। कथ्यते यत् प्रायेण २० लक्षवर्षेभ्यः पूर्वमौत्तरीये कटिबन्धे विशालकाया विशिष्टप्रकाराः पशुविशेषाः समुपलभ्यन्ते स्म। प्रागैतिहासकालीना मनुष्याः पशूनामेतेषां मृगयाखेटं विदधिरे। एतेषां पशुविशेषाणां यानि चित्राण्यधुनोपलभ्यन्ते, तैरेतज्ज्ञायते यत्तेषां चतुष्कोणा दन्ता बभूवुर्ये यदा कदा ३. ५ मीटरप्रमाणाश्चापि दीर्घा भवन्ति स्म। पशूनामेतेषां ग्रीवायां मनुष्याणामिव केशा बभूवुः। ब्रानश्वेगस्थाने हिमयुगीनस्यास्यास्थिविषये प्राकृतिकेतिहासविशेषज्ञा विषयेऽत्रानुसन्धाने संलग्ना वर्तन्ते।

प्राणरक्षकं सामुद्रिकं कवचम्

समुद्रस्यान्तर्गर्भे मानव-जीवनस्य सुरक्षायाः परम्परागतान् विधीनपहाय नवविधमेकं कवचं निर्मितमास्ते; यस्योपयोगो मनुष्याणां रक्षार्थं तावत्समयपर्यन्तं करिष्यते यावत्तेषां रक्षार्थं किमपि जलयानं तत्र न गच्छेत्।

अस्य कवचस्याभिधानसंज्ञा 'ब्रेकरसर्वाइवर केप्स्यूल' इत्यास्ते, यद्धि १४ फुटव्यासप्रमाणमास्ते, आकारश्चास्य मसूरधान्यकणानुकृतिरिव वर्तते। तदिदं कवचमग्निप्रतिरोधितन्तुकाचेन निर्मितं विद्यते। काचेऽस्मिंस्तादृशः पदार्थोऽपि व्यामिश्रितोऽस्ति, यो हि राडारतरङ्गान् परिवर्तयति। समधिकदृढतापादनार्थमस्य कवचयन्त्रस्य मध्यकेन्द्रे काष्णायसनिर्मितस्स्तम्भः किलैकः समुत्तम्भितोऽस्ति। कवचस्यान्तर्वर्ती वायुः परिशोध्यते, तस्य चोचितप्रवाहार्थं व्यवस्था भवति। इत्थं कवचाभ्यन्तरं वर्तमाना जनाः शीतलतामाप्नुवन्ति, तेषां श्वासावरोधश्चापि न भवति। कवचस्यास्य बाह्यस्तले द्रवविशेषेण प्रोक्षणं क्रियते येन तत्राग्निः प्रज्वलितुं न शक्यते। अस्मिन् कवचाभ्यन्तरं

लाभप्रदो व्यवसाय एकः

मिलाननगरस्यैकः सर्वकारीयो गुप्तचरः सेबासटोनो अमारः इति नामा भिक्षुकाणां व्यवसायं समाप्तिं नेतुं नियोजितः। सोऽनुभवमाप्तुमेकस्मिन् दिने स्वयमेव हि भिक्षुकाणामिव वेशभूषां परिधाय भैक्ष्यं याचितुं निषसाद। सायं सः साश्चर्यं ददर्श यत्तस्य सविधे ५० डालरमुद्राणां राशिः संगृहीतोऽवतिष्ठत इति। इदानीं स एतदर्थं स्वसार्वकारीयं भृतिकर्म त्यक्तवान् यतः सोऽवगच्छति यद् व्यवसायोऽसौ बह्वधिकं सुखसाध्यो लाभप्रदश्चास्त इति।

—७-७-६८ सा. हिन्दुस्तानात्साभारम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२९ जना उपवेष्टुं पारयन्ति। तदिदं कवचं स्वयमात्मनियन्त्रणस्यापि क्षमतां धत्ते। समुद्र-जलस्य तरङ्गाघातेषु प्रतिहन्यमानेष्वपीदं कवचं न निमंक्ष्यति। इदानीं यदिदं कवचं विनिर्मित-मास्ते, तत् सर्वविधानां जलयानयात्रिणां सुरक्षार्थमास्ते। अष्टमानवानामारोहणयोग्य-स्यैकस्य लघ्वाकारस्य कवचस्य निर्माणस्यापि योजनास्ते; यद्धि भारवाहकानां जलपोतेषु मत्स्याजीवानां जलयानेषु निवसतां जनानां सुरक्षार्थं भावि। ततो महतां जलतोपानां कृतेऽपि च ३५ यात्रिणामुपयोगक्षमाणि कव-चान्यपि निर्मीयेरन्।

अनाथबालकानां मातरः

अनाथबालकानामावासस्य, शिक्षाया भोज-नादीनां च व्यवस्था तु प्रायेण सर्वेष्वपि देशेषु विधीयते, परन्तु तेभ्यस्तद्वातावरणं नोपलभ्यते यद्वात्सल्येनात्मीयतया च परिपूर्णं भवेत् यत्र ते बालकाः स्वात्मानमनाथं नानुभवेयुः। अन-या दृशा पश्चिमशर्मण्यदेशोऽनाथबालकानां परि-पालनार्थं यां हि नवीनां व्यवस्थां कृतवान्, सानुकरणीयास्ते। तत्रानाथबालकानां कृते बाल-ग्रामा विरचिताः सन्ति येषु षडारभ्याष्ट-संख्याकानां बालकानां परिपालन-निरीक्षणार्थं तथा तेभ्य आत्मीयतापूर्णं वातावरणं प्रदातु-मेकाऽविवाहिता 'माता' नियोक्ष्यते। सा च माता बालकानां तेषां शारीरस्य मानसिकस्य च विकासस्योत्तरदायित्वभारं निर्वहेत्। पश्चिम-शर्मण्यदेशस्य प्रायेण शतसंख्याका महिला अविवाहिता मातरोऽत्र पुण्यकर्म निर्वोढुमुत्तर-दायित्वं सहर्षं स्वीचक्रुः। ता इमा मातरः स्वतत्त्वावधाने परिपरिपाल्यमानेभ्यो बालकेभ्यः स्वच्छताया भोजनस्य, सीवन-गुम्फनस्य च गृहकार्यं सम्पादयिष्यन्ति। निखिलेऽपि विश्व-स्मिन् यं स्नेहं यां च प्रीतिं मातरः स्वबालेभ्यः प्रयच्छन्ति तत्सर्वमिमेऽनाथा बालकाश्चापि वेतनभोगिनीभ्य आभ्यो मातृभ्यो लभेरन्। अन्तरं केवलं स्वकीयं परकीयं चेति भेदबुद्धे-रुपरि भूत्वानाथानुपेक्षितांश्च बालकान् स्वात्मी-यान् विभावयितुमास्ते।

मृत्योः परिभाषा

विश्वस्यास्य केचन हृदय-विशेषज्ञाः विश्व-स्वास्थ्य-संघटनस्य तत्त्वावधाने, चिकित्सा-दृष्ट्या मृत्योः परिभाषामन्वेष्टुं तत्परा विद्यन्ते। हृदय-प्रतिरोपणस्य प्रगतिं दर्शं दर्शमेवं विधायाः कस्याश्चित् परिभाषाया आवश्यकतानुभूयते। हृदय-प्रतिरोपणस्य सुकुमारायाः सूक्ष्मतमायाश्च शल्य-चिकित्सायाः प्रक्रमश्चिकित्सया, नैतिक-तया च सम्बद्धा या अगणिताः समस्या अज-नयत्तासु प्रथमवारमन्ताराष्ट्रियस्तरे विचार-विमर्शः क्रियमाणोऽस्ति। हृदयविशेषज्ञानां गोष्ठ्यां विषयेऽत्र ये विचाराः प्रास्तूयन्त ते भविष्यति कालेऽन्वेषणाया अस्या मार्गदर्शका भविष्यन्तीत्याशा कर्तुं शक्यते।

विषयेऽत्र हृदय-विशेषज्ञानां विचारा अधुनावधि गुप्ता अरक्ष्यन्त। विषयेऽत्र किमपि विस्तृतं ज्ञानं, किं बहुनात्र भागं गृह्णुतां विशेष-ज्ञानामभिधेयान्यपि, गोष्ठीनां समाप्तिपर्यन्तं नोपलप्स्यन्ते।

केषांचित् चिकित्सकानां, विशेषरूपेण फ्रांस-देशस्य द्रावतराणां मतानुसारं, मस्तिष्कस्य गतिविधिप्रदर्शकं विद्युद्यन्त्रं यदि चैकां सरलां रेखामङ्केत तदा मन्तव्यं स्याद्यद्धि मस्तिष्कस्य गतिप्रक्रिया समाप्तिं जगाम तथा व्यक्तेर्मरणं निष्पेद इति। सत्यप्येवम्, यदि हृदयं कार्य-क्षमतां रक्षति चेत्तदा समस्या विजृम्भते। विशेषज्ञानां पुरतः प्रश्नोऽयमेको वर्तते—'अपि च हृदय-प्रतिरोपणार्थं जीवद्धृदयमधिकमुपयोगि भवति ?'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ श्रीशिवराज्योदये महाकाव्ये

३२ सर्गः

महाकविः डॉ० श्रीधरभास्करवर्णेकरः, डी.लिट्, नागपुरम्

अथातः पितृसंहारदुःखनिर्दग्धचेतनः ।
फाझलो मृतकल्पोऽसौ न स्वगेहाद् बहिर्ययौ ॥१॥

स्वप्नेष्विव दिवानक्तं सर्वस्वध्वंसभीषणम् ।
प्रतापदुर्गसंहारं तमपश्यत् क्षणे क्षणे ॥२॥

दीर्यमाणोदरस्योच्चैराक्रन्दः पितुरन्तिमः ।
ददार हृदयं तस्य श्रूयमाणः कुतश्चन ॥३॥

स मांसभोजी कवलं कथञ्चन मुखे धृतम् ।
भुञ्जानः सहसा मेने पित्रामिषमिवाशितम् ॥४॥

जलपानेऽप्यनीहोऽसौ शुष्ककण्ठः पिबन् जलम् ।
तत्रापश्यत् पितुर्मूर्तिं सरोषां प्रतिबिम्बिताम् ॥५

स्वीयामपि प्रतिच्छायां दर्पणे प्रतिबिम्बिताम् ।
पश्यन् ददर्श स भ्रान्तः पितरं पुरतः स्थितम् ॥६

दिवं गतं स्वपितरं दर्शं दर्शमितस्ततः ।
विमृश्य बहुधा मेने स आत्मानं दिवं गतम् ॥७॥

तमेवं भूतमुद्भ्रान्तमफझुल्लात्मजं तदा ।
स सान्त्वयितुमायातो दुःखार्तो रुस्तुमाभिधः ॥८॥

स्मारं स्मारं गुणांस्तस्य मृतस्य परमाद्भुतान् ।
उभौ तौ चिररात्राय मिथो रुरुदतुर्भृशम् ॥९॥

रूस्तुमः क्षीणशोकोऽसौ निजमाधिं ततोऽब्रवीत् ।
दुःखितो दुःखितं प्रायो ब्रवीत्येव निजव्यथाम् ॥१०

हन्त हन्त हतो बन्धो त्राता मम पिता तव ।
तत्तुल्यमेवानाथत्वमावयोरुभयोरपि ॥११॥

ब्रवीमि किमभाग्यस्य मम त्राणं न केवलम् ।
दुर्हृदा लुण्टितं सर्वं वित्त स्थावरजङ्गमम् ॥१२

राजापुरं कारवारं करहाटं विसापुरम् ।
करवीरं च विख्यातं हा हा हन्त गतं मम ॥१३॥

गिरिदुर्गः स पर्णालो दुर्जयोऽब्दशतैरपि ।
त्रिभिरेव दिनैस्तेन पिशाचेनात्मसात् कृतः ॥१४॥

अक्षौहिण्याप्यजय्यास्ते मदायत्ता विनिर्जिताः ।
दुर्गा वसन्तमत्स्येन्द्रवर्धनास्तेन लीलया ॥१५॥

सप्ताहत्रितयेनैव त्वत्पितुर्निधनोत्तरम् ।
विजापुरीयं साम्राज्यं तृतीयांशं क्षयं गतम् ॥१६॥

पुर्तुगीजा वलंदेजास्तथाङ्ग्लाश्च फरांशिसाः ।
मुद्गानस्नेऽपि दिल्लीयाः शिवाद् बिभ्यति साम्प्रतम्

विजापुरेऽत्र सर्वत्र यवन्यो हतबान्धवाः ।
आक्रन्दन्ति चिरादुच्चैः सोरस्ताडं गृहे गृहे ॥१८॥

सा च तेजस्विनी सम्राण्माताऽस्माकं पितामही ।
महीमेवाधिशेते हा न भुङ्क्ते न पिबत्यपि ॥१९॥

मक्कां जिगमिषत्यद्धा तत्र कस्य जिहासति ।
न तिष्ठासति देशेऽस्मिन् बलिनो ह्यत्रकाफिराः ॥

प्रकृत्या दुर्बलः सम्राड् गरीयस्यानयाऽऽपदा ।
भग्नचेता न शक्नोति विधातुं वा विकल्पितुम् ॥

नरव्याघ्र तदुत्तिष्ठ क्रुधं भज शुचं त्यज ।
गर्ज गर्ज महोत्साहं भीषणां रणघोषणाम् ॥२२॥

कर्तास्मि तव साहाय्यमहमामरणं रणे ।
जिगीषां पूरयिष्यावो निर्हतस्य पितुस्तव ॥२३॥

इत्यूचिवान् रुस्तुमोऽसौ फाझलेन समं गतः ।
दुर्योधनाभं राजानं द्रौणिनेव कृपोऽकृपः ॥२४॥

तं पराभवनिर्विण्णमश्रुक्लिन्नेक्षणं नृपम् ।
उभयौ तौ ववन्दाते सजयोद्घोषणं रहः ॥२५॥

उवाच रुस्तुमो राजन् रुदित्वा खलु मा शुचः ।
द्विषतः प्रतिषेधाय खल्वलं बलमावयोः ॥२६॥

कपटेन वशीभूतो गजोऽप्येति पराभवम् ।
पराभवेऽफझुल्लस्य निदानं कपटं रिपोः ॥२७॥

अदत्त्वाऽवसरं कर्तुं कापट्यं रिपवेऽधुना ।
आवामाबध्य वाहत्यानयावस्तं पुरस्तव ॥२८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करवीरमितो गत्वा जित्वा पर्णालिपर्वतम् ।
शिवाजिमत्रानेष्यावो विनिर्बद्धकराङ्घ्रिकम् ॥२९

यत्र यत्र ध्वजास्तेन हठात् स्वीयाः प्ररोपिताः ।
तं तं प्रदेशं धक्ष्यावः सघोषागारमन्दिरम् ॥३०

यो यस्तव रिपोर्नाम मनाक् सादरमुच्चरेत् ।
तस्य तस्य हठाज्जिह्वाच्छेदं कुर्याव निर्दयम् ॥३१॥

शत्रुध्वंसैकामस्य यः कामो न प्रपूरितः ।
अफझुल्लस्य वीरस्य पूरयिष्याव साम्प्रतम् ॥३२॥

दशसाहस्रसंख्याकं चतुरङ्गं नवं बलम् ।
दीयतामाधिपत्येनौ रिपुध्वंसाय सत्वरम् ॥३३॥

तदैवोद्घोषयामास राजा स विजयातुरः ।
सेनाधिपत्यमुभयोस्तयोर्भाविनि सङ्गरे ॥३४॥

प्रतापदुर्गसङ्ग्रामोच्छिन्नगात्रा अपि क्रुधा ।
केचन प्रतिशोधार्थं पुनः सैन्ये समामिलन् ॥३५॥

गजोष्ट्रवाहभूयिष्ठा शतघ्नीशतभीषणा ।
प्रतस्थे जयकामार्ता विजापुरवरूथिनी ॥३६॥

सैनिकाः कृत्रिमोत्साहास्तेषु नैके पदे पदे ।
शिवस्य रणसामर्थ्यं स्मारं स्मारं चकम्पिरे ॥३७

श्रुत्वा श्वघूकारावं वा दृष्ट्वा मार्जारमागतम् ।
युद्धं शशंकिरे केचिदुदर्कध्वंसकारणम् ॥३८॥

तेषामुद्दीप्यमानोऽपि भेरीदुन्दुभिताडनैः ।
नोद्दिदीपे रणोत्साहो वह्निरार्द्रेन्धनैरिव ॥३९॥

श्रुत्वा नक्तं श्वापदानामपि सञ्चारशब्दनम् ।
शिवसैनिकसम्पातमकल्पंस्ते क्षणे क्षणे ॥४०॥

सैनिकास्ते बहिः शूराः परमन्तर्भयाकुलाः ।
व्याघ्रकृत्यावृता मेषा इवा गच्छन् रणाध्वना ॥

अथ स्वविक्रमाक्रान्तपर्णालिगिरिसुस्थितम् ।
शिवमावेदयां चक्रुश्चराः पर्यन्तसञ्चराः ॥४२॥

महाराज समायाता निकटे रिपुवाहिनी ।
करवीरं महालक्ष्मी पीठमाक्रंस्यतेऽचिरात् ॥४३॥

श्रुत्वैव तन्महावीरो निश्चकर्ष कटिस्थिताम् ।
भवानीं प्रलयाभ्रान्तर्विद्युल्लेखाप्रभास्वराम् ॥४४

बभाण प्रावृडारम्भाम्भोदम्भीरया गिरा ।
सन्नद्धा मम सर्वेऽपि युद्धार्थं वीरबाहवः ॥४५॥

तदैव तमुपाजग्मुः सुदृढास्ते रणोत्सुकाः ।
आकर्ण्य वाचिकं वेगाद् प्लवंगा इव राघवम् ॥

ताडिताध्मातपटहढक्काशंखानकोद्भवैः ।
प्रणादैः शिववीराणां शत्रवोऽन्तश्चकम्पिरे ॥४७

शशंकिरे च विध्वंसं पुरो ध्रुवमुपागतम् ।
पलायनोचिताध्वानं केऽपीक्षांचक्रिरेऽभितः ॥४८॥

रुस्तुमः स महाधीरस्तत्सर्वमपि तर्कयन् ।
विजापुरीयसाम्राज्यजयध्वनिमघोषयत् ॥४९॥

शिवाक्रमप्रतीकारव्यूहे यावत् स्ववाहिनीम् ।
स संयोजयते तावत् परीतः शिवसैनिकैः ॥५०॥

शिवाजिः स्वयमायातीत्यवगत्य कुतश्चन ।
मेनिरेऽकालसंवर्तं रिपवः पुर आगतम् ॥५१॥

निलिल्यिरे गर्तमुल्मकोटारान्धुषु केचन ।
पलायांचक्रिरे केचित् त्रपयन्तो मृगानिव ॥५२॥

अन्ये च बहवः शूरा स्तत्क्षणं स्विन्नमूर्तयः ।
विजज्ञिरे द्रवीभूय धैर्यं निर्गलितं निजम् ॥५३॥

अन्तराकुण्ठितश्वासा महाभीत्याऽथ केचन ।
अशक्ताः पुनरुच्छ्वासे गतप्राणा इवाभवन् ॥५४॥

स्वं स्वं वेध्यमभिद्रुत्य नेताजिप्रमुखास्तदा ।
युद्धमारेभिरे वीराः शत्रुसैन्यभयंकरम् ॥५५॥

तां खड्गवल्लरीं दीप्रां कृतान्तस्येव सोदरीम् ।
सम्भ्रामयम् शिवः साक्षाद् रुस्तुमं हन्तुमापतत् ॥

जिगीषुरपि सेनानीर्म्लेच्छानां स महाबली ।
चिक्षेप चक्षुषी भीत्या जिजीविषुरितस्ततः ॥५७॥

ददर्श दूरे निर्यातं निर्वासितमिवावहात् ।
पुत्रं तमफझुल्लस्य फाझलं मित्रमात्मनः ॥५८॥

प्राणत्राणचणं मत्वा तमध्वानं सुहृद्गतम् ।
स दुधाव क्षणे तस्मिन् भीतिसंवृद्धरंहणः ॥५९॥

रिपून् पलायमानांस्तान् जम्बूकानिव कातरान् ।
व्याघ्रा इवान्वधावंस्ते शैवा वीरास्तरस्विनः ॥६०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पृष्ठानुलग्नवीराणां मृगयूणामिवात्मनि ।
शस्त्राघातमपेक्षन्त श्रान्ता म्लेच्छाः पदे पदे ॥६१
दयनीयां दशां तेषामरीणामपि दर्शिवान् ।
दीनबन्धुरुवाचोच्चैः शिवाजिर्निजबान्धवान् ॥६२
अलं हत्वा भयग्रस्तान् निजारीन् शकानिव ।
दयां दीनेषु कुर्वन्ति धर्मवीरा द्विषत्स्वपि ॥६३॥
लीलोल्लङ्घितसह्याद्रिशिखराणामपि क्षणात् ।
तेषामभूद्दुरुल्लङ्घ्या शिवाज्ञा वाङ्मयागला ॥६४
बीरास्ते हतरिपवः पलायमानान्
त्यक्त्वारीन् द्र तमभितः शिवं परीयुः ।
सोऽप्येतान् प्रियतमबान्धवान् समस्तान्
सञ्चक्रे बहुकटकैश्च कुण्डलैश्च ॥६५॥
शाके रत्नशरर्तुभास्करमिते
माघे दशम्यां वदि
नीत्वा शूर्पणखामिवातिविकृतिं
तां शात्रवीं वाहिनीम् ।
तद्वक्त्रेण पराक्रमं स्वमतुलं
प्रख्यापयन् भूभुजे
युद्धाह्वानमिवाकरोत् पुनरपि
स्वातन्त्र्यवीरः शिवः ॥६६॥

मङ्गलम्

ज्ञानप्रदान-निपुणा भवभीतिहन्त्री
ऐश्वर्य्य-वैभवसमृद्धिनिदानभूता ।
पापापनोदनकरी स्तुतिपाठकानां
वागीश्वरी भगवती भविकाय भूयात् ॥१॥

—श्रीहरिः

शुभ कामनाओं के साथ

* इन्डो फॉरेन एजेन्सीज् *

२३, सर फिरोजशाह मेहता रोड़,

बम्बई – १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजस्थान प्राच्यविद्या प्रतिष्ठान, जोधपुर

– द्वारा –

शोध, संदर्भ एवं दुर्लभ महत्वपूर्ण ग्रंथों का राजस्थान पुरातन ग्रंथमाला के अन्तर्गत प्रकाशन

प्रकाशित ग्रंथों की सूची

(ख) राजस्थानी–हिन्दी

प्रकाशन का नाम	सम्पादक	मूल्य
काह्नड़दे प्रबन्ध	प्रो० के० वी० व्यास	रु० १२–२५
क्यामखां रासा	डा० दशरथशर्मा और अगरचन्द भंवरलाल नाहटा	,, ४–७५
लावा रासा	श्री महताबचन्द खारेड़	,, ३–७५
बांकीदास री ख्यात	श्री नरोत्तमदास स्वामी	,, ५–५०
राजस्थान साहित्य संग्रह भाग १	,, ,, ,,	,, २–२५
,, ,, ,, भाग २	डा० पुरुषोत्तमलाल मेनारिया	,, २–७५
कवीन्द्र–कल्पलता	रानी लक्ष्मीकुमारी चूण्डावत	,, २–००
जुगलविलास	,, ,, ,,	,, १–७५
भगतमाल	श्री उदयराज उज्ज्वल	,, १–७५
राजस्थान पुरातत्व मंदिर के हस्तलिखित ग्रंथों की सूची भाग १	पद्मश्री मुनि जिनविजय, पुरातत्वाचार्य	,, ७–५०
राजस्थान प्राच्यविद्या प्रतिष्ठान हस्तलिखित ग्रंथों की सूची भाग २	श्री गोपालनारायण बहुरा	,, १२–००
राजस्थान हस्तलिखित-ग्रंथ-सूची भाग १	पद्मश्री मुनि जिनविजय पुरातत्वाचार्य	,, ४–५०
,, ,, ,, भाग २	डा० पुरुषोत्तमलाल मेनारिया	,, २–७५
स्व० पुरोहित हरिनारायणजी विद्याभूषण ग्रन्थ संग्रह	श्री गोपालनारायण बहुरा	,, ६–२५
मुहता नैणसी री ख्यात भाग १	श्री बदरीप्रसाद साकरिया	,, ८–५०
,, ,, ,, भाग २	,, ,, ,,	,, ९–५०
,, ,, ,, भाग ३	,, ,, ,,	,, ८–००
,, ,, ,, भाग ४	,, ,, ,,	,, ८–७५
राजस्थानी साहित्य संग्रह भाग ३	श्री लक्ष्मीनारायण गोस्वामी	,, ५-५०
सूरजप्रकाश भाग १	श्री सीताराम लालस	,, ८–००
,, भाग २	,, ,, ,,	,, ९–५०
,, भाग ३	,, ,, ,,	,, ९–७५
नेहतरंग	श्री रामप्रसाद दाधीच	,, ४–००
मत्स्य-प्रदेश की हिन्दी साहित्य को देन	डा० मोतीलाल गुप्त	,, ७–००

पुस्तक विक्रेताओं को २५ प्रतिशत कमीशन दिया जाता है।

(राजस्थान सरकार द्वारा प्रसारित)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीननाथत्रिवेदी मधुपः, सहसम्पादकः

वेदानामाधारेण गोहत्यायाः समर्थन-मल्पज्ञानस्य द्योतकम्

गतमासस्यास्य ३० तारिकायां रोटरीक्लब-द्वारा समायोजिते समारोहेऽत्र ब्यावरनगरे भाषमाणैर्जगद्गुरु—शङ्कराचार्य-**श्रीनिरञ्जन-देवतीर्थस्वामिमहाराजैः** प्रतिपादितं यद् वेदानधिकृत्य येऽपि गोहत्याया वार्तां कुर्वन्ति, तेषां वेदेषु संस्कृते च स्वल्पं ज्ञानं विद्यते। ते यदि वाञ्छेयुस्तर्हि भ्रमस्यास्य निवृत्त्यर्थं मया सह शास्त्रार्थमपि कर्तुं शक्नुवन्तीति।

किञ्च न कोऽपि मतिमान् जनो जगति स्वजनन्याः मांसं विक्रीय धनमर्जयितुं विचारयति। प्रायोऽद्य गोवधः प्रकटरूपेण जायमानोऽस्ति।

अपि च कस्यापि प्राणिनः सेवा यदि भगवद्भावनया क्रियेत तर्हि सा वर्तते प्रभुसेवा, यतो हि समग्रस्यापि संसारस्य प्राणिनः सन्ति प्रभुस्वरूपाः' इदमेवास्ति भारतीयदर्शनस्य वैशिष्ट्यम्।

स्वागतसमारोहस्यास्याध्यक्षता च श्री जगन्नाथवावकीलमहोदयेन कृता। तथा श्रेष्ठिवर-श्रीगोवर्द्धनलाल-अरोडामहोदयेन च श्रीजगद्गुरूणां स्वागतमक्रियतेति।

शोध-प्रबन्धः

आदरणीयः **श्री के. माधवकृष्णशर्म-महोदयो** राजस्थानीय-संस्कृत-शिक्षानिदेशको यथा संस्कृतव्याकरणस्य सुयोग्यो विद्वान् वर्तते, तथैव न्याय-ज्योतिष-वेदान्तादिविषयेष्वपि प्रमुखः पण्डितोऽस्तीति विदितमेवेदं संस्कृत-सेविनां समेषामपि विदुषाम्। सहैव सोऽयं निदेशकमहाभाग आंग्ल-जर्मनप्रभृतिषु भाषासु तथा पाश्चात्यदर्शनेऽपि विशिष्टं वैदुष्य-मावहतीति।

श्रीशर्ममहोदयः सोऽयं विंशतिवर्षेभ्यः प्राग् आंग्लभाषायां पाणिनि-कात्यायन-पतञ्जलिसंज्ञकं सुमहत्त्वपूर्णं प्रबन्धं विलिख्य मद्रासविश्वविद्यालयाय समर्पितवान्, प्रीतेन तेन च विश्वविद्यालयेन श्रीशर्ममहानुभावाय 'मास्टर ऑफ ओरियन्टल लर्निंग्' इत्युपाधिः ससम्मानमदीयत।

प्रमोदस्यायमवसरो विद्यते यत् सोऽयं शोध-प्रबन्धः—इदानीमेव दिल्लीस्थ-श्रीलालबहादुर-शास्त्रि-राष्ट्रियसंस्कृतविद्यापीठेन प्रबन्धस्यास्य प्रकाशनं विधाय संस्कृतव्याकरणविषयस्य शोधार्थिनां विदुषां महानुपकारः कृतः। यद्यपि प्रबन्धस्यास्य प्रकाशनमिदं कालादेतस्मादपि प्रागेव समुचितमासीत्, परं नैवमभूत्—इति महतो दुःखस्येयमस्ति वार्ता!। प्रकाशनादेः सौविध्यस्याभावेन चेदानीमपि बहूनामेव संस्कृत-विदुषां विशिष्टाः ग्रन्था नैव प्राकाश्यमधिगच्छन्ति।

वस्तुतो व्याकरणशास्त्रे पाणिनेर्वर्तते विशिष्टं स्थानम्। यद्यपि पाणिनेः पूर्वमपि शाकटायनप्रभृतयोऽनेके महावैयाकरणा अभ्यासन्, येषामुल्लेखः पाणिनिना स्वस्याष्टाध्याय्यामेव कृतः, परञ्च तैः कार्यमिदं कर्तुं नापार्यत।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीनिदेशकमहोदयेन च स्वस्य प्रस्तुते प्रबन्धे मुनित्रयस्य कृतिषु शोभनो विचारः समुपस्थापितः। तथाहि—पाणिनिमधिकृत्य अध्यायपञ्चकमलिख्यत, यत्राष्टाध्यायीस्थसूत्राणां संख्याविषये विवादः, तत्परिभाषाः, याश्च ८४ संख्यामिताः सन्ति, व्याकरणविषयका अनुबन्धाः, अक्षरसमाम्नायस्य कर्तृत्वम्, एवमन्येषामप्यष्टाध्यायीस्थविषयाणां वर्णनमक्रियत। एषु पञ्चसु अध्यायेषु अष्टाध्याय्याः सकलव्याकरणसम्बन्धिनां विषयाणां क्रमबद्धं विवेचनमत्रास्ति निहितम्।

एवमेव वार्तिककार—कात्यायनस्य विषयेऽत्र त्रयोऽध्यायाः श्रीशर्ममहोदयेन रचिताः, येषु वार्तिकानामाधारः, तेषां भाषाविषयकेण परिवर्तनेन सह मिथः सम्बन्धः—इत्येतेषु विषयेषु सम्यग् विचारश्च कृतो विद्यते। वार्तिकेषु चैतेषु वैदेशिकानां विदुषां मतानि समुल्लिखितानि श्रीनिदेशकमहोदयेन स्वस्याभिमतमपि च प्रदर्शितम्।

अनन्तरञ्च ग्रन्थेस्मिन् पतञ्जलिमुद्दिश्याष्टाध्यायेषु विविधदृष्टिकोणैर्विचारं कुर्वद्भिरेभिः पातञ्जलं महाभाष्यं हि विद्यतेऽष्टाध्याय्याः अद्वितीया व्याख्येति साधितम्। समग्रोऽयं ग्रन्थश्च १८५ पृष्ठात्मको वर्तते। अस्य भाषा चांग्ला विद्यते।

किञ्चास्य श्रीशर्ममहानुभावैर्विरचितस्य ग्रन्थस्य संस्कृतजगति भूयान् प्रचारः प्रसारश्च भूयादिति हृदयेन कामये। सहैव चाहमेतदपि निवेदयामि यदयं संस्कृतव्याकरणविषयकः शोधग्रन्थः संस्कृतेऽनूदितः स्यात्तर्हि विशुद्धसंस्कृतसेविनो विद्वांसोऽपि लाभभाजः सम्भवेयुरिति शम्।

सर्वभाषाणां जननी देववाणी

उदयपुरस्थ—विद्यानिकेतनोच्चमाध्यमिकशालायामुदयपुरविश्वविद्यालयीयसंस्कृतविभागस्याध्यक्षो **डा० श्री आर० सी० द्विवेदिमहोदयो** विद्याभवनद्वारा सञ्चालितासु संस्कृतपरीक्षासु साफल्यं प्राप्तवद्भ्यश्छात्रेभ्यः प्रमाणपत्राणि वितीर्णवान्।

अस्मिन्नेवावसरे श्रीद्विवेदिमहाभागेन भणितं यत् संस्कृतं हि सर्वासामपि भाषाणां विद्यते जननी। न कस्याप्याश्रयेण सेयं देववाणी जीवितुमर्हति। एषा हि 'अमरभारती' इति नाम्ना विज्ञायते। अग्रे च स्वविचारोऽयमुपस्थापितः श्रीद्विवेदिना यद् विश्वविद्यालयस्य पाठ्यक्रमेषु सामान्यहिन्दीविषयस्यापेक्षया सामान्यसंस्कृतस्य विषयः सन्निवेशितो भवेत्तर्हि हिन्दीभाषाया वर्तन्यामिदानीं या अशुद्धीनां समस्या वर्तते, सा नैव स्थास्यति। अन्ते च श्रीद्विवेदिमहाभागेन विद्यालयेनानुष्ठितस्य संस्कृतप्रचारात्मकस्य कार्यस्य कामं प्रशंसा कृतेति।

पण्डित-श्रीपाददामोदरसातवलेकरः स्वर्गतः

जोलाईमासस्यास्य ३१ तारिकायां मध्याह्ने १०१ वर्षात्मके वयसि वर्तमानः श्रीसातवलेकरमहाभागो रक्तचापस्याभिवृद्धया सहसा पाञ्चभौतिकं शरीरं परित्यक्तवान्। दुःखप्रदञ्चेमं समाचारमुपलभ्य सर्वोऽपि संस्कृतसमाजः शोकाकुलोऽजायत।

वेदमूर्तेः श्रीसातवलेकरमहोदयस्य तस्य जन्म महाराष्ट्रान्तर्गत-रत्नगिरिमण्डलस्य कोलवागांवनाम्नि ग्रामे १८६७ तमे ख्रिष्टाब्दे सितम्बरमासस्य १९ तारिकायामभूत्। स्वजीवनस्य चारम्भस्तेन महानुभावेन चित्रकाररूपेऽक्रियत, तथा सुमहद्यशश्च समुपार्ज्यत।

पूर्वं हि श्रीसातवलेकरमहानुभावेन तेन राष्ट्रियान्दोलनेष्वपि सक्रियो भागोऽगृह्यत। तथा च वेदाध्ययनं विधाय तेन राष्ट्रियभावनाया उद्बोधनार्थं तात्कालिकसन्दर्भेषु वेदानां व्याख्या चाक्रियत। सहैव गुरुकुलकांगडी महाविद्यालये चाध्यापनमनुष्ठितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीसातवलेकरमहोदयेन च तेनाद्यावधि चतुःशतादप्यधिका ग्रन्था विरचिताः। तथा राष्ट्रपतिद्वारा च स १९५९ तमे ख्रिष्टाब्दे ससम्मानं पुरस्कृतः समभूत्, तथा गते १९६८ तमेऽब्दे च 'पद्मभूषणे' त्युपाधिना च सम्मानितो जातः।

अपि च महाविदुषस्तस्य वैकुण्ठलोकगमनकाले च तदीया धर्मपत्नी पुत्रः श्रीवसन्तरावः पुत्रवधूश्च तदन्तिके समुपस्थिताः समवर्तन्त।

तथा च महापण्डितस्य तस्य सहसा स्वर्गमनेन भृशं दुःखमनुभवन् भारतीपरिवारोऽयं दिवंगताय तस्मै श्रद्धाञ्जलिं समर्प्य परमात्मानं प्रार्थयते यत्स स्वर्गताय तस्मै शाश्वतिकीं शान्तिं तत्परिवाराय चासह्यं दुःखमिदं सोढुं शक्तिं दद्यादिति।

विनीतो
दीनानाथत्रिवेदी मधुपः
सहसम्पादकः

भातु भारतम्

श्रीवैद्य–श्रीरामस्वरूपशास्त्री सम्पादकः–बालसंस्कृतम्, बम्बई ७७

मुनिभिरर्चितं देवपूजितं
श्रुतिभिरूर्जितं शास्त्रचर्चितम्।
प्रकृतिभूषितं ज्ञानसुन्दरं
वरणिगौरवं भातु भारतम् ॥१॥

सुरसरित्तटं सिन्धुशोभितं
रुचिरपर्वतं कान्तकाननम्।
कृषकसङ्कुलं सस्यश्यामलं
विपुलगोव्रजं भातु भारतम् ॥२॥

विविधबोधदैः सूरिभिश्चितं
विमलबुद्धिभिर्ज्ञानिभिर्युतम्।
विततकीर्तिभिः कौविदैः स्तुतं
करुणमानसं भातु भारतम् ॥३॥

हरिनिषेवितं रामपावितं
मुरघरक्षितं व्यासवर्णितम्।
त्रिदशगोगुरुब्राह्मणप्रियं
रचितराष्ट्रकं भातु भारतम् ॥४॥

विततसंस्कृतं ख्यातकौशलं
विभवमण्डितं त्यागपण्डितम्।
प्रयतमानुषं स्वर्णभूतलं
सकलसुन्दरं भातु भारतम् ॥५॥

निहितपाकिकं चीनजित्वरं
निरतरूसकं स्वस्य रक्षकम्।
निखिलसम्पदं धर्मतत्परं
प्रथितविक्रमं भातु भारतम् ॥६॥

सरलसूनृतं ग्राम्यजीवनं
परमभावुकं भव्यमन्दिरम्।
अनघकेतुकं स्वीयशासनं
भुवनवन्दितं भातु भारतम् ॥७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



श्रीगिरिराजशर्मा शास्त्री, जयपुरम्

दध्यङ् मनुर्भृगुरसौ हरिपूर्वचन्द्रो
भीष्मार्जुन-ध्रुव-वसिष्ठ-शुकादयश्च ।
प्रह्लाद-नारद-भगीरथ-विश्वकर्मवाल्मीक-
योऽत्र चिरचिन्त्यशुभाभिधानाः । ॥१४॥

दध्यङ् मनुः भृगुः हरिश्चन्द्रः भीष्मः अर्जुनः ध्रुवः वसिष्ठः शुकादयः, प्रह्लाद-नारद-भगीरथ-विश्वकर्म-वाल्मीकिः इत्यादयः चिर-चिन्त्यशुभाभिधानाः सन्ति ।

दध्यङ्, मनु, भृगु, हरिश्चन्द्र, भीष्म, अर्जुन, ध्रुव, वसिष्ठ, शुकादि, प्रह्लाद, नारद, भगीरथ, विश्वकर्मा, वाल्मीकि इत्यादि दीर्घचिन्तन-योग्य और मङ्गलकर हैं ।

दध्यङ्—दधीचिः अथर्वमुनेः सकाशात् कर्दमस्य कन्यायां शान्तीनाम्न्यां जातः । वृत्रवधार्थं देवैरस्यास्थिभिर्वज्रं निर्मितम् । देवैः यदा विष्णुः तस्य वधार्थं प्रार्थितः तदा विष्णुना कथितं यत् दधीचिमहर्षेः अस्थिनिर्मितम् आयुधमेव तं वृत्रासुरं हन्तुम् क्षमम्-तत् श्रुत्वा देवैः स मुनिसत्तमो दधीचिः याचितः सोऽपि प्राणायामं कृत्वा योगबलेन च देहं त्यक्त्वा देवेभ्यो अस्थीनि ददौ ।

तत् श्रुत्वा सहसा देवैर्याचितो मुनिभिस्तथा ।
ददौ चास्थीनि देवेभ्यो दधीचिः सुमनास्तथा ॥
'वह्निपुराणे'

तस्यास्थिभिः विश्वकर्मा वज्रशूलचक्रगदादीनि प्रहरणानि कारयामास, तैश्च देवगणैः वृत्रासुराणां संहारः कृतः । दधीचिमहर्षेः अन्या अपि कथा विविधेषु पुराणेषु वर्णिताः सन्ति ।

दध्यङ्—दधीचि अथर्वमुनि के द्वारा कर्दम की शान्ती नाम की कन्या में उत्पन्न हुए थे । वृत्रासुर के वध के लिए देवताओं ने उसकी हड्डियों से वज्र बनाया था । देवताओं द्वारा जब विष्णु की प्रार्थना की गई तब विष्णु ने कहा कि "दधीचि ऋषि की हड्डियों से निर्मित शस्त्र ही वृत्रासुर को मारने को सक्षम है" । यह सुनकर देवताओं द्वारा श्रेष्ठमुनि दधीचि याचना किए जाने पर उन्होंने प्राणायाम करके योग बल से देह त्याग करके देवताओं को अस्थियां देदी । "सहसा देवताओं द्वारा अस्थि-याचना की बात सुनकर दधीचि मुनि ने प्रसन्नता से अपनी हड्डियां देदी ।" उसकी हड्डियों से विश्वकर्मा ने वज्र, शूल, चक्र, गदा आदि शस्त्र बनाए उनसे देवगणों ने वृत्रासुर आदि का संहार किया । दधीचि ऋषि की अन्य भी कथाएं विविध कथाओं में वर्णित हैं ।

मनुः—प्रतिकल्पं चतुर्दश मनवः स्वायम्भुवः स्वारोचिषः उत्तमः तामसः रैवतः चाक्षुषः (एते गताः) वैवस्वतः (वर्तमानोऽयम्) इत्यादयः भवन्ति । वेदेषु मनुः अखिलायाः मानवजातेः

मनुः—प्रत्येक कल्प में चौदह मनु स्वायम्भुव स्वारोचिष, उत्तम, तामस, रैवत, चाक्षुष (ये हो चुके) वैवस्वत (वर्तमान) इत्यादि होते हैं । वेदों में मनु को सम्पूर्ण मानव जाति का

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनको वर्णितः। संसारे प्रथमो यज्ञकर्ता मनुरासीत्। मनुना वसिष्ठाय ब्रह्मविद्या प्रदत्ता, तया च वसिष्ठो ब्रह्मनिष्ठोऽभूत्। धार्मिकनियमानां प्रवर्तनस्य कार्यं मनुना कृतमासीत्।

भृगुः—'भृगुः' इतिनामकाः त्रयः प्रख्याता ऋषयः अभूवन्। वैदिको भृगुः अथर्ववेदस्य प्रवर्तको मन्यते। तस्य धाता विधाता च द्वौ पुत्रौ आस्ताम्।

भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्वमुदधेः पुनः
तथा धाता विधाता च तस्यां जातौ भृगोः सुतौ

पुराणेषु वर्णितः भृगुः शिवेन सह युद्धमकरोत्। स संजीवनीविद्यायाः ज्ञाता आसीत्। स्वायम्भुवमनुना-ब्रह्मविष्णुशिवेषु त्रिदेवेषु कः श्रेष्ठतम इति प्रतिपादनस्य निर्णयं भृगुः दद्यात्-इति निश्चितम्। भृगुणा च त्रयाणां देवानां परीक्षा कृता। तस्यां परीक्षायां भगवान् विष्णुः भृगोः चरणं स्वहृदये धृत्वा तं प्रणतवान्। श्रीविष्णोः इमं विनयभावं दृष्ट्वा भृगुणा स सर्वश्रेष्ठो घोषितः।

सप्तर्षिगणेऽपि भृगोः गणना कृताऽस्ति। वैवस्वते मन्वन्तरेऽपि एको भृगुनामको महर्षिः समभूत्। तेन उन्मत्तो नहुषः शासनात् च्युतः कृतः। वैतहव्यनामकाय अब्राह्मणाय ब्राह्मणत्वं प्रदाय तेन गृत्समदनामकस्य ब्राह्मणवंशस्य प्रारम्भः कृतः। च्यवनपरशुरामसदृशाः श्रेष्ठपुरुषाः भृगुवंशे समुत्पन्ना अभूवन्। भृगुस्मृतिः, भृगुगीता, भृगुसंहिता, भृगुसिद्धान्तः इत्यादयो भृगुनिर्मिताः ग्रन्थाः प्रसिद्धाः सन्ति।

हरिश्चन्द्रः—हरिश्चन्द्रस्य पिता त्रिशङ्कुरासीत्। विष्णुपुराणे यथा-"त्रिशङ्कोर्हरिश्चन्द्रस्तस्माद्रोहिताश्वस्ततश्च हरितः"। हरिश्चन्द्रः महान् सत्यव्रती सत्यप्रतिज्ञश्चासीत्। हरिश्चन्द्रस्य पुरोहितेन वसिष्ठमहर्षिणा अस्य सत्यव्रतस्य मुक्तकण्ठेन प्रशंसा कृता आसीत्।

जनक बताया है। संसार में यह प्रथम यज्ञकर्ता मुनि था। मनु ने वसिष्ठ के लिये ब्रह्मविद्या प्रदान की जिससे वसिष्ठ ब्रह्मनिष्ठ हुए। धार्मिक नियमों के प्रवर्तन का कार्य मनु ने किया था।

भृगुः—भृगु इस नाम के तीन प्रख्यात ऋषि हुए हैं। वैदिक भृगु अथर्ववेद के प्रवर्तक माने जाते हैं। उसके धाता, विधाता ये दो पुत्र थे। "भृगु के द्वारा ख्याति के गर्भ से पहले लक्ष्मी और धाता विधाता दो पुत्र उत्पन्न हुए।" पुराणों में वर्णित भृगु ने शिव के साथ युद्ध किया था। वह संजीवनी विद्या का ज्ञाता था। स्वायम्भुव मनु ने ब्रह्मा विष्णु शिव इन तीनों देवों में श्रेष्ठ कौन है यह प्रतिपादन करने का निर्णय भृगु दें—यह निश्चय किया। भृगु ने तीनों देवताओं की परीक्षा की। इस परीक्षा में भगवान विष्णु ने भृगु के चरण को अपने हृदय में धारण करके उन्हें प्रणाम किया। श्री विष्णु के इस विनय भाव को देख कर भृगु ने उन्हें सर्वश्रेष्ठ घोषित किया। सप्तर्षिगण में भी भृगु की गणना की है। वैवस्वत मन्वन्तर में भी एक भृगु नामक महर्षि हुए थे। उन्होंने उन्मत्त नहुष को शासन से च्युत किया था। वैतहव्य नामक अब्राह्मण को ब्राह्मणत्व प्रदान करके उसने गृत्समदनामक ब्राह्मणवंश का प्रारम्भ किया। च्यवन, परशुराम सदृश श्रेष्ठ पुरुष भृगुवंश में उत्पन्न हुए थे। भृगुस्मृति, भृगुगीता, भृगुसंहिता, भृगुसिद्धान्त इत्यादि भृगु निर्मित ग्रन्थ प्रसिद्ध हैं।

हरिश्चन्द्रः—हरिश्चन्द्र के पिता त्रिशंकु थे। विष्णु पुराण में वर्णन है कि "त्रिशंकु के हरिश्चन्द्र इसके रोहिताश्व और तदनन्तर हरित हुए। हरिश्चन्द्र महान् सत्यव्रती और सत्यप्रतिज्ञ थे। हरिश्चन्द्र के पुरोहित वसिष्ठ ऋषि ने इसके सत्यव्रत को मुक्तकण्ठ से प्रशंसा की थी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

11354
Digitized by Arya Samaj Foundation Chennai and eGangotri

तेन ईर्ष्याकुलेन विश्वामित्रेण ऋषिणा अस्य सत्त्वस्य परीक्षा कृता। विश्वामित्रेण एकस्य मायावि-विवाहस्य समारोहः कृतः, तस्मिन् विवाहे च हरिश्चन्द्रेण राज्यस्य दानं कारितम्। दानपूर्त्यर्थं हरिश्चन्द्रेण पुत्रस्य रोहितस्य पत्न्यास्तारामत्यास्तथा निजस्यापि विक्रयः कृतः। अस्मिन् एव समये सर्पदंशेन रोहितो मृतः। तदा हरिश्चन्द्रः तारामती चोभौ अग्निप्रवेशार्थं सन्नद्धौ अभूताम्। अनया सत्त्वपरीक्षया हरिश्चन्द्रस्य च अभंगं शीलं दृष्ट्वा विश्वामित्रः प्रसन्नोऽभूत्। तेन रोहितः संजीवितो हरिश्चन्द्रोऽपि च पूर्वस्थितिं प्रापितः।

इससे ईर्ष्याकुल विश्वामित्र ऋषि ने इसके सत्व की परीक्षा ली। बिश्वामित्र ने एक मायावी विवाह का समारोह किया। उस विवाह में हरिश्चन्द्र से राज्य दान करा दिया। दान की पूर्ति के लिये हरिश्चन्द्र ने पुत्र रोहित का, पत्नी तारामती तथा निज का भी विक्रय कर दिया। इसी समय सर्पदंश से रोहित मर गया। इसके पश्चात् हरिश्चन्द्र और तारामती अग्निप्रवेश के लिये सन्नद्ध हो गए। इस सत्वपरीक्षाद्वारा हरिश्चन्द्र का अभंगशील देख कर विश्वामित्र प्रसन्न हुए। उन्होंने रोहित को जीवित कर दिया तथा हरिश्चन्द्र को भी पूर्वस्थिति में कर दिया।

भीष्मः—भीष्मः कुरुवंशीयस्य राज्ञः शन्तनोः पुत्रः गंगायां भार्यायां जातः। अत एव भीष्मः 'गाङ्गेयः' इति नाम्ना प्रख्यातः आसीत्। स परमधर्मात्मा महावीरोऽभूत्। अस्य मूलनाम 'देवव्रत' इत्यासीत्। येन देवव्रतेन पितुः दासकन्यया सत्यवत्या सह विवाहं कारयितुं पितृराज्यं त्यक्तम्। स्वस्य च विवाहं त्यक्त्वा यः उद्ध्वरेता जातः। अतः तदनन्तरं भीष्म इति नाम्ना प्रख्यातोऽभूत्। वसिष्ठबृहस्पतिशुकपरशुरामादिभ्यो महर्षिभ्यो भीष्मेण शास्त्राणां इतरविद्यानां च परिपूर्णमध्ययनं कृतम्। महाभारतकालिकेषु श्रेष्ठपुरुषेषु भीष्माचार्यस्य गणना क्रियते। स भगवतः श्रीकृष्णस्य भक्त आसीत्। भगवान् श्रीकृष्णोऽपि तं प्रति अतीवादरयुक्त आसीत्। कौरवपाण्डवयुद्धे च "अर्थस्य पुरुषोदासः" इति न्यायेन तथा धृतराष्ट्रस्य स संरक्षकत्वेनासीत्। अतः भीष्माचार्यः कौरवपक्षे स्थित्वा पाण्डवैः सह युद्धमकरोत्। तथापि सः पाण्डवानां सत्पक्षस्य पक्षपाती आसीत्। महाभारतयुद्धे प्रारम्भिकेषु दशदिवसेषु स कौरवपक्षस्य सेनापतिरासीत्। 'शिखण्डिनं पुरस्कृत्य अर्जुनेन तस्योपरि

भीष्मः—भीष्म कुरुवंशीयराजा शन्तनु के पुत्र उनकी गंगा नाम की पत्नी से उत्पन्न हुए थे। इसीलिये भीष्म गाङ्गेय इस नाम से प्रख्यात थे। वे परम धर्मात्मा महावीर थे। इसका मूल नाम देवव्रत था। देवव्रत ने पिता के दासकन्या सत्यवती के साथ विवाह कराने को पिता के राज्य को छोड दिया। अपना विवाह छोड़ कर वे उर्ध्वरेता हो गए। इसलिए इसके पश्चात भीष्म इस नाम से प्रख्यात हुए। वसिष्ठ, बृहस्पति, शुक, परशुराम इत्यादि महर्षियों से भीष्म ने शास्त्रों का तथा इतर विद्याओं का परिपूर्ण अध्ययन किया। महाभारतकालीन श्रेष्ठ पुरुषों में भीष्माचार्य की गणना की जाती है। वे भगवान् श्रीकृष्ण के भक्त थे। भगवान् श्रीकृष्ण भी उनका अत्यन्त आदर करते थे। कौरवपाण्ड युद्ध में "अर्थस्य पुरुषोदासः" इस न्याय से तथा धृतराष्ट्र के वे संरक्षक थे इस कारण भीष्माचार्य ने कौरवपक्ष में रहकर पाण्डवों के साथ युद्ध किया। तोभी वे पाण्डवों के सत्पक्ष के पक्षपाती थे। महाभारत युद्ध में आरम्भ के दस दिवसों में वे कौरवपक्ष के सेनापति थे। 'शिखण्डी' को आगे करके अर्जुन ने उनके

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

11354

बाणाघातः कृतः। भीष्माचार्यो धराशायी अभूत्, किन्तु तस्मिन् समये दक्षिणायनस्य समय आसीत् अतः उत्तरायणपर्यन्तं स शरशय्यायां शयानो मृत्युं विजित्य रणभूमौ स्थित आसीत्। तस्यामवस्थायामेव युद्धसमाप्तेरनन्तरं दुःखिताय धर्मराजाय राजधर्मस्य उत्कृष्टः उपदेशः कृतो भीष्मेण। महाभारतस्य शान्तिपर्वणि एष उपदेश इदानीमपि उपलब्धोऽस्ति।

अर्जुनः—अर्जुनः पाण्डुराजस्य तृतीयः पुत्र आसीत्। स इन्द्रात् कुन्तीगर्भतो जातः। एष द्रोणाचार्यस्य सर्वोत्कृष्टः शिष्य आसीत्। किरातरूपधारिणा भगवता शिवेन सह युद्धं कृत्वा अर्जुनः तं प्रसन्नमकरोत्। शिवस्य कृपया पाशुपतनामकं दिव्यास्त्रं अर्जुनेन लब्धम्, इन्द्रलोकस्य देवाङ्गना उर्वशी अर्जुनं मोहयितुं नाऽशकत्। स भगवतः श्रीकृष्णस्य परमप्रियः सुहृद् तथा श्रेष्ठभक्तश्चासीत्। महाभारतयुद्धस्य प्रारम्भे सशस्त्रं यादवसैन्यं साहाय्यत्वेन स्वीकृत्य अर्जुनः निःशस्त्रं श्रीकृष्णं एव स्वपक्षे अयाचत। महाभारते अर्जुनस्य पराक्रमस्य स्वाभिमानस्य त्यागादीनाञ्च महनीयगुणानां अनेकाः कथाः सन्ति। भगवद्गीतायाः श्रेष्ठं तत्त्वज्ञानं भगवता श्रीकृष्णेन अर्जुनाय उपदिष्टम्।

ध्रुवः—ध्रुवः उत्तानपादस्य नृपतेः पुत्रः सुनीत्यां भार्यायां जातः आसीत्। तस्य नृपतेः सुरुचिनाम्नी अपरा भार्याप्यासीत्। सा उत्तमाख्यं पुत्रं अजनयत्। एकदा सपत्नीतनयं ध्रुवं स्वपितुः उत्सङ्गे गन्तुमुत्सुकं दृष्ट्वा सा सुरुचिः ध्रुवमब्रवीत्—

एतत् राजासनं सर्वं भूभृतसंश्रयकेतनम्।
योग्यं ममैव पुत्रस्य किमात्मा क्लिश्यते त्वया॥

अनेन कुपितो ध्रुवः स्वमातुः समीपमगात्, तदा तस्य सकलां वार्तां श्रुत्वा सुनीत्या उपदिष्टम् यत् वत्स! यदि सुरुच्या वचनात् तव अत्यर्थं दुःखं जातं तर्हि सर्वफलप्रदे पुण्यो-

ऊपर बाणाघात किया। भीष्माचार्य धराशायी होगए। किन्तु उस समय दक्षिणायन का समय था। इसलिये उत्तरायण पर्यन्त वे शरशय्या में सोये मृत्यु को जीत कर रहे। उस अवस्था में युद्ध समाप्ति के बाद दुःखित धर्मराज को राजधर्म का उत्कृष्ट उपदेश किया था। महाभारत के शान्तिपर्व में यह उपदेश अभी भी उपलब्ध है।

अर्जुनः—अर्जुन पाण्डुराजा के तृतीय पुत्र थे। वे इन्द्र द्वारा कुन्ती के गर्भ से उत्पन्न हुए थे। ये द्रोणाचार्य के सर्वोत्कृष्ट शिष्य थे। किरातरूपधारी भगवान् शिव के साथ युद्ध करके अर्जुन ने उनको प्रसन्न किया। इन्द्रलोक की अप्सरा उर्वशी अर्जुन को मोहित करने को समर्थ नहीं हुई। वे भगवान् श्रीकृष्ण के परम सुहृद तथा श्रेष्ठ भक्त थे। महाभारत युद्ध के आरम्भ में सशस्त्र यादव सेना को साहायतार्थ स्वीकार न करके अर्जुन ने निःशस्त्र श्रीकृष्ण को ही अपने पक्ष में मांगा। महाभारत में अर्जुन के पराक्रम, स्वाभिमान तथा त्यागादि महनीय गुणों की अनेक कथाएं हैं। भगवद्गीता के श्रेष्ठ तत्वज्ञान का उपदेश भगवान् श्रीकृष्ण ने अर्जुन को दिया।

ध्रुवः—ध्रुव उत्तानपाद राजा के सुनीति पत्नी से उत्पन्न हुए थे। उस राजा के सुरुचि नाम की दूसरी भार्या भी थी। उसने उत्तमाख्य पुत्र को जन्म दिया था। एक दिन सपत्नी के पुत्र ध्रुव को अपने पिता की गोद में जाने को उत्सुक देखकर उस सुरुचि ने ध्रुव को कहा 'यह सारा राजासन और पर्वत, भूमि और गृह आदि मेरे ही पुत्र के लिए हैं, तू व्यर्थ क्यों इसके लिए क्लेश करता है'। इससे कुपित हुआ ध्रुव अपनी माता के समीप गया। तब उसकी सारी वार्ता सुनकर सुनीति ने उपदेश दिया कि 'वत्स यदि सुरुचि के वचनों से तुझे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पचये यत्नं कुरु। ततः ध्रुवोन्तःकरणे परमां भगवद्भक्तिं निधाय यमुनातटम् अगच्छत्। तत्र मधुवने 'ओं नमो भगवते वासुदेवाय' इति द्वादशाक्षरमंत्रस्य अखण्डं जपो बालध्रुवेण नारदस्योपदेशेन प्रारब्धः। ध्रुवस्य कठिनतमेन तपसा सन्तुष्टो भगवान् तत्र स्वयमुपस्थितो भूत्वा वरं च तस्मै अदात्।

"सप्तर्षीणामशेषाणां ये च वैमानिकाः सुराः।
सर्वेषामुपरि स्थानं तव दत्तं मया ध्रुवः॥

वसिष्ठः—वसिष्ठः ऋग्वेदस्य सप्तमण्डलस्य द्रष्टा आसीत्। यज्ञसंस्थायाः शुभारम्भावसरे च एकमात्रं वसिष्ठः एव यज्ञप्रक्रियायाः विशेषज्ञ आसीत्।

वसिष्ठनामकाः अन्येऽपि ऋषयः संजाता आसन्। स्वायंभुवमन्वन्तरस्य वसिष्ठः ब्रह्मदेवस्य मानसपुत्रो मन्यते जनैः। सती अरुन्धती अस्यैव धर्मपत्नी आसीत्। वसिष्ठस्य समीपे एका कामधेनुरासीत्। यस्या साहाय्येन तेन विश्वामित्र-नृपतेः सम्पूर्णस्य सैन्यस्य सम्मानं कृतम्। अस्याः कामधेनोः कृते वसिष्ठ-विश्वामित्रयोर्मध्ये संघर्षोऽभूत्। अस्मिन् संघर्षे क्षात्रतेजसो ब्रह्मतेजो श्रेष्ठतरम् इति विश्वामित्रेण अनुभूतम्। रघुवंशस्य दिलीप-रघु-रामचन्द्रप्रभृतीनां नृपतीनां वसिष्ठो ऋषिः कुलगुरुः आसीत्। वसिष्ठकृता वसिष्ठसंहिता, योगवासिष्ठम्, वसिष्ठतंत्रम् इत्यादयः अनेके ग्रन्थाः प्रसिद्धाः सन्ति।

शुकः—शुको भगवतः व्यासस्य पुत्र आसीत्। विरक्तेन शुकेन शैशवे एव वनं गन्तुमारब्धम्। भगवता व्यासेन तं प्रत्यानीय तस्योपनयनं कारयित्वा वेदाध्ययनादिकं च पूर्णं कारितम्। भागवतग्रन्थस्याध्ययनं शुकेन स्वपितुः समीपे कृतम्। मिथिलाधिपतेः जनकात् स ब्रह्मज्ञानं प्राप्तवान्। विरक्तेन तेन सर्वत्र भगवद्भक्तेः प्रचारः आरब्धः। अभिमन्युपुत्रः परीक्षित् यदा सप्तमे दिने सर्पदंशेन मृत्युं प्राप्स्यसि' इति शापेन शप्तः तदा एषु दिवसेषु शुकाचार्यः परीक्षिते श्रीमद्भागवतं श्रावयामास।

अत्यधिक दुःख हुआ है तो सर्वफलप्रद एवं पुण्य की वृद्धि करने वाले यत्न कर'। इसके पश्चात् ध्रुव अन्तःकरण में परमभगवद्भक्ति रखकर यमुना तट पर चला गया। वहां मधुवन में 'ओं नमो भगवते वासुदेवाय' इस द्वादशाक्षर मंत्र का अखण्ड जप बालक ध्रुव ने नारद के उपदेश से प्रारम्भ किया। ध्रुव के कठिनतम तप से तोषित भगवान् ने वहां स्वयं उपस्थित होकर उसको वर दिया। 'सम्पूर्ण सप्तर्षिगण तथा अन्य भी आकाशस्थित जो सुर हैं उनमें हे ध्रुव मैंने सर्वोपरि स्थान तुझे दिया है।

वसिष्ठः—वसिष्ठ ऋग्वेद के सप्तममण्डल के द्रष्टा थे। यज्ञसंस्था के शुभारम्भ के अवसर पर एकमात्र वसिष्ठ ही यज्ञ प्रक्रिया के विशेषज्ञ थे। वसिष्ठ नामक अन्य भी ऋषि हुए थे। स्वायम्भुवमन्वन्तर के वसिष्ठ ब्रह्मदेव के मानस पुत्र माने जाते हैं। सती अरुन्धती इनकी ही धर्मपत्नी थी। वसिष्ठ के पास एक कामधेनु थी। जिसकी सहायता से उसने विश्वामित्र नृपति की सम्पूर्ण सैन्य का सम्मान किया था। इस कामधेनु के लिए वसिष्ठ विश्वामित्र के बीच में संघर्ष हुआ। इस संघर्ष में क्षात्रतेज से ब्रह्मतेज श्रेष्ठतर है—यह विश्वामित्र ने अनुभव किया। रघुवंश के दिलीप–रघु–रामचन्द्र इत्यादि राजाओं के वसिष्ठ ऋषि कुलगुरु थे। वसिष्ठकृत वसिष्ठ संहिता, योगवासिष्ठ, वसिष्ठतंत्र इत्यादि अनेक ग्रन्थ प्रसिद्ध हैं।

शुकः—शुक भगवान् व्यास के पुत्र थे। विरक्त शुक शैशव में ही बन में जाने लगे थे। भगवान् व्यास ने उनको लौटाकर उपनयन करवाकर वेदाध्ययन आदि पूर्ण कराया। भागवत ग्रन्थ का अध्ययन शुक ने अपने पिता के समीप किया। मिथिलाधिपति जनक से उन्होंने ब्रह्मज्ञान प्राप्त किया। विरक्त उन शुक ने सर्वत्र भगवद्भक्ति का प्रचार आरम्भ किया। अभिमन्युपुत्र परीक्षित् को जब 'सातवे दिन सर्पदंश से मृत्यु को प्राप्त होगा' यह शाप लगा तो इन दिनों में शुकाचार्य ने परीक्षित् को श्रीमद्भागवत सुनाया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्ति-सुधा

आशुकवि-श्रीहरिशास्त्री, सम्पादकः

सुखमुद्दिश्य

सुव्यवस्थानि खानि स्युः
अस्माकं साह्यवस्थिका ।
सुखमित्युच्यते प्राज्ञै-
रिह तत्त्वावलोकिभिः ॥१॥

जिस अवस्था में हमारे खानि अर्थात् इन्द्रियां सु सुव्यवस्थित हुई रहें निज निज कर्म-क्षम रहें वह अवस्था विशेष ही सुख है। सदा काल किसी की भी इन्द्रियां सुव्यवस्थित नहीं रह सकती है, हीनाधिकभाव रहता ही है। इस अवस्था में सुख क्षणिक कुछ ही देर के लिए मिलता है। यह समझने की बात है। इसी अर्थ को और भी स्पष्ट कर के कहते हैं—॥१॥

सुष्ठु कर्मसमृद्धानि (समर्थानि)
हीन्द्रियाणि सचेतसाम् ।
यस्यां जागृदवस्थायां
साऽवस्था सुखसुच्यते ॥२॥

जिस समय या जाग्रत अवस्था में हमारी आंख नांक कान आदि सभी इन्द्रियां समुचित सुयोग्य काम में सुव्यवस्था से लगी रहती हैं कोई न्यूनाधिक नहीं होती। वही समय और जाग्रत् अवस्था विशेष सुख कहलाता है। सु-सुव्यवस्थानि सुष्ठु प्रकारेण स्थितानि खानि इन्द्रियाणि यस्यामवस्थायां, सासाऽवस्था सुख शब्देन उच्यते-उच्यतां वा) इति ॥२॥

एतादृशं सुखं लब्धुं
यतचित्ताः समाहिताः,
यूयं सदा भवत भोः !
यत्सुखं स्वात्मानः सुखम् ॥३॥

यह सुख कभी किसी को दिया या बाँटा नही जाता है। न किसी से लिया ही जा सकता है। यह तो अपने आत्मा (मन) के आनन्द के लिए बढता रहता है ॥३॥

ईदृक् सुखं न दीयेत
नचैवा ह्रियते क्वचित् ।
एतत्तु सर्वदा स्वस्या-
नन्दायैव विजृम्भते ॥४॥

ऐसे सुख को प्राप्त करने को हे बालको सदा प्रयत्न करो सावधानी से करो यही सुख सुख है।

अनेनैव सुखेनायु-
र्वर्द्धतेऽवहितात्मनाम् ।
मनः प्रसादमाप्नोतीत्येवं-
तत्त्वविदां मतम् ॥५॥

इस प्रकार के सुख से ही सावधान पुरुषों की आयु बढती है और मन प्रसन्नता को प्राप्त होता है ऐसा तत्त्ववेत्ता लोग कहते हैं यह उन तत्त्वज्ञों का मत है ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती

Regd. No. J 7
Licence No. PP.6
"Licenced to Post.
Without Prepayment"

एक राष्ट्रीय उत्पादन

३५००० से अधिक श्रमिकों को काम देने वाला

श्रेष्ठतम सामग्रियों से निर्मित

मेंगलूर

गणेश बीड़ियां

धूम्रपान करने वालों की अति प्रिय

प्रधान कार्यालय

मेंगलूर गणेश बीड़ी वर्क्स

विनोबा रोड़ : मैसूर-५

दूरभाष : ४२१ तार : AROMA

प्रकाशकः—जयबहादुरसिंह पता : भारती भवन, गोपालजी का रास्ता, जयपुर। दूरभाष : ७५४९६
राधेश्याम शर्मा द्वारा श्री हनुमान प्रि० प्रेस, चौड़ा रास्ता, जयपुर में मुद्रित। फोनः ६३१५९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Gurukul
1999-2004

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri